5919

A 5919

Missing # 1,

Total # F = 226 - 1 = 225

Complete

सं० 2862 क
नक्षत्र ...
225 पत्राणि
...



देव्यागमे शिववाक्यम् गुरुशय्यासनं यानं पादुकोपानपीठकम् स्ना
नोदकं तथाच्छायां लंघयेन्न कदाचन गुरोरग्रे पृथक्पूजामौद्धत्यं च
विवर्जयेत् दीक्षां व्याख्यां प्रभुत्वं च गुरोरग्रे परित्यजेत् इति शिष्य॰
लक्षणम् यथा योगिनीतंत्रे पितुर्दीक्षां न गृह्णीयात् तथा माता॰
महस्य च सोदरस्य कनिष्ठस्य वैरिपक्षाश्रितस्य च तथा गणेश
विमर्शिन्याम् यतेर्दीक्षा पितुर्दीक्षा दीक्षा च वनवासिनः विवि॰
क्ताश्रमिणो दीक्षा न सा कल्याणदायिका इत्यादिनिषिद्धेभ्यो मंत्रं
न गृह्णीयात् इदं तु सिद्धेतरविषयम् सिद्धमंत्रो न दुष्यतीति व॰
चनात् तथा सिद्धयामले च यदि भाग्यवशेनैव सिद्धविद्यां लभे
त्प्रिये तदैव तां तु दीक्षेत मंत्रगुरुविचारणम् तथा च रुद्रयामले
न पत्नीं दीक्षयेद्भर्ता न पिता दीक्षयेत्सुतान् न पौत्रं च तथा भ्राता भ्रा
तरं न तु दीक्षयेत् सिद्धमंत्रो यदि पतिस्तदा पत्नीं स दीक्षयेत् प्रमा
दाच्च तथाज्ञानात्पितुर्दीक्षां समाचरेत् प्रायश्चित्तं ततः कृत्वा पु
नर्दीक्षां समाचरेत् पितुरुपलक्षणम् मातामहादीनामपि प्रा
यश्चित्तं त्वयुतगायत्रीजपः सर्वत्र तथा दर्शनात् तथा च मत्स्यसू
क्ते निर्वीर्यं तु पितुर्मंत्रं शैवशाक्तेन दुष्यतीति वचनम् कौलिक
मंत्रदीक्षापरम् योगिनीतंत्रे शाक्त्यादिविद्यामधिकृत्य दीक्षानिषे
धात् तद्धातारादिविद्यायां मत्स्यसूक्ते तथा प्रतिपादनात् तथा॰
च तारा विलासे कथमपि तत्तु मंत्रं प्राप्य शिष्याय कस्मै निजकु
लतिलकाय ज्येष्ठपुत्राय दद्यात् महातीर्थे उपरागे मतिनदोषः
तथा च विष्णुमंत्रमधिकृत्य सायुष्टे त्वया ब्रह्मन्नस्माभिः सकलं
तव ब्रह्मणा कथितं पूर्वं वसिष्ठाय महात्मने वसिष्ठोऽपि स्वपुत्रा॰
य मत्पित्रे दत्तवान्स्वयम् प्रसन्नहृदयः स्वस्थः पिता मे करुणानिधिः
कुरुक्षेत्रे महातीर्थे सूर्यपर्वणि दत्तवान् इत्यादि वैशम्पायनसंहि
तायाम् शौनकं प्रति व्यासवाक्यम् योगिनीतंत्रे निर्वीर्यं स्वपितु
र्मंत्रं तथा मातामहस्य च स्वमलब्धः स्त्रियादत्तः संस्कारेणैव शु॰

ख्यातियत्र साध्वीचैवसदाचारागुरुभक्ताजितेंद्रिया सर्वमंत्रार्थतत्त्वा
ज्ञासुशीलापूजनेरता गुरुयोग्याभवेत्साहिविधवापरिवर्जिता स्त्रि
यादीक्षाशुभाप्रोक्तामातुश्चाष्टगुणास्मृता इदंतु सद्गुरोरुपासितंम
त्रपरम् तथाचभैरवीतंत्रे स्त्रीयंमंत्रोपदेशात्तु नकुर्याद्गुरुचिंतनम्
मात्रेति दुपासितेष्टगुणमनुपासितशुभफलदमित्यर्थः सिद्ध
मंत्रविषयंवेतिकेचित् वस्तुतस्तुयोगिनीतंत्रे स्त्रीपदंविधवापर
मेकवाक्यत्वात् स्वमले ह्रुते कलशादेः प्राणान्निवेशयेत् वटपत्रे
कुंकुमेनलिखित्वाग्रहणंशुभम् ततः शुद्धिमवाप्नोतिह्यन्यथाविफलं
भवेत् इदंतु सद्गुरोरभावेतत्संभवेतस्मादेवगृह्णीयात् स्वप्नेतुनि
येमानहीतिनारदवचनात् मंत्रसिद्ध्यादिनियमोनास्ति दीक्षावि
नाजपस्यदुष्टत्वात् प्रथमंसानिरूप्यते दिव्यंज्ञानंयतोदद्यात्क्षी
यतेपापसंचयः तस्माद्दीक्षेतिसाप्रोक्तामुनिभिस्तंत्रवेदिभिः सर्वा
श्रमेषुदीक्षायाआवश्यकत्वम् तथाच दीक्षामूलंजपंसर्वंदीक्षा
मूलंपरंतपः दीक्षामाश्रित्यनिवसेद्यत्रकुत्राश्रमेवसन् अदीक्षिता
येकुर्वंतिजपपूजादिकाः क्रियाः नभवंतिप्रियेतेषांशिलायामु॰
प्तबीजवत् देविदीक्षाविहीनस्यनसिद्धिर्नचसद्गतिः तस्मात्सर्वप्रय
त्नेनगुरुणादीक्षितोभवेत् अदीक्षितोहिमरणेरौरवंनरकंव्रजेत्
तस्माद्दीक्षांप्रयत्नेनसदाकुर्याच्चतांत्रिकात् कल्पेदृष्ट्वातुवैमंत्रं
योगृह्णातिनराधमः मन्वंतरसहस्रेषुनिष्कृतिर्नैवविद्यते नादी
क्षितस्यकार्यंस्यात्तपोभिर्नियमैर्व्रतैः नतीर्थगमनेनापिनचशारी
रयंत्रणैः अतस्सद्गुरोराहितदीक्षस्सर्वकर्माणिसाधयेत् तत्राप्य
नुकूलंमंत्रंगृह्णीयात् तथाच स्वताराराशिकोष्ठानामनुकूला
भजेन्मनून् वाराहीतंत्रे ताराचक्रंराशिचक्रंनामचक्रंतथैवच
तत्रैवेत्सद्गुरोर्मंत्रान्नाम्नश्चक्रंविचारयेत् इदंतुप्रधानतयाबोद्धव्य
म् तथाच यनिमंत्रंनगृह्णीयादकुलंवतथैववचेत्यादिवचनात् त
च्चक्रविचारस्यावश्यकत्वात् प्रथमंतन्निरूप्यते तत्रच २

सिद्धार्कवाराहाणांप्रसादप्रणवस्य च सपिंडाक्षरमंत्राणांसिद्धादीन्नै
वशोधयेत् हंसेमलछेस्त्रियादनेमालामंत्रे च सप्ताक्षरे वैदिकेषु च सर्व
षु सिद्धादीन्नैवशोधयेत् मुंडमालायाम् कालीतारामहाविद्या।
षोडशीभुवनेश्वरी भैरवीछिन्नमस्ताच विद्याधूमावतीतथा
बगलामुखीसिद्धविद्यामातंगीकमलात्मिका एतादशमहादेवि
महाविद्याःप्रकीर्तिताः नात्रसिद्धाद्यपेक्षास्तिनतत्रविचारणा
कुलादिशोधनंनास्तिनचमित्रादिदूषणम् सिद्धविद्यामहाविद्या
योगसेवापरिश्रमः नास्तिकिंचिन्महादेवि दुःखसाध्यंकथंच।
नेमादिवचनात् मालामंत्रस्तुवाराहीये विंशमर्णाधिकामंत्रामा
लामंत्राःप्रकीर्तिताः नपुंसकस्यमंत्रस्यसिद्धादीन्नैवशोधयेत्
एकाक्षरस्यमंत्रस्यमालामंत्रस्यपार्वति वैदिकस्य च मंत्रस्यसिद्धा
दीन्नैवशोधयेत् प्राणप्रतिष्ठामंत्रस्यसिद्धादीन्नैवशोधयेत् इ
त्यादिवचनादेषुविचारोनास्तीति वस्तुतस्त्विदंप्रशंसापरंसर्वत्र
विचारस्यावश्यकत्वम् हरदत्तवशात्कदाचिद्धरिमंत्रस्यस्वप्नादे
प्राप्यातनदोषस्यदृष्टत्वादितिसंप्रदायिकाः तत्र कुलाकुलस्य
भेदोलिख्यतेस्मिन्मंत्रिणामिह तथाचनिबंधे वाय्वग्निभूजलाका।
शाःपंचाशल्लिपयःक्रमात् पंचह्रस्वाःपंचदीर्घाबिंदंताःसंधिसंभ
वाः कादयःपंचशःषलक्षसहांताःसमीरिताः अआएकचटतप
यषामारुताः इईऐखछठथफाह्नाश्राग्नेयाः उऊओगजडदबल
लापार्थिवाः ऋॠऔघझढधभवसाजलम् लृॡअंङञण
नमशहानाभसाः साधकस्याक्षरंपूर्वंमंत्रस्यापितदक्षरम् यद्येक
भूतंदैवंसंज्ञानीयात्तत्कुलंहितम् भौमस्यवारुणंमित्रमाग्नेय।
स्यापिमारुतम् मारुतंपार्थिवानांचरिपुराग्नेयमंभसाम् वका
राद्याग्नेयपार्थिवानांच नाभसंसर्वमित्रंस्याद्विरुद्धंनैवशीलये
त् इतिकुलाकुलविचारः अथराशिचक्रम् अआइईमेषः उऊऋ
वृषः ॠलृॡमिथुनः एऐकर्कटः ओऔसिंहः अंअःशषसह क

तं॰ सा॰ २

3

मा कवर्गस्तुला चवर्गो वृश्चिकः टवर्गो धनुः तवर्गो मकरः पव
र्गः कुंभः यवर्गो मीनः रेखाद्वयं पूर्वापरेण कुर्यात्तन्मध्यतो याम्यकु
बेरभेदात् एकैकमीशाननिशाचरेत्कृताशवायौ विलिखेत्ततो
णान् वेदाग्निवह्नियुगलस्त्रवणादिसंख्यान्मंत्रेषु बाणशरं चव
तद्ध्यातान् मेषादितः प्रविलिखेत्सकलांस्तुवर्णान्क्रमागतानास्व
विलिखेद्वेषमसहांस्तुवर्णान् स्वराशीनामनुकूलं मंत्रं भजेत् तथा
व स्वताराराशिकोष्ठानामनुकूलान्भजेन्मनूनिति वचनात् रा
शीनां शुद्धतास्तेयामजेदुत्तमतिमधमम् स्वराशेर्मंत्रराशिपर्यंतं गणा
नीयं विचक्षणैः यदा तु स्वराशेरज्ञानं तदा साधकानामाद्यक्षरा
संबंधिनीं राशिं गृहीत्वा गणयेत् साध्यास्य तत्र राशिपर्यंतं गणयेत्
साधकात्तमान् इति रामार्चनचंद्रिकायाम् एकपंचनवबंध्यवा
स्वतो नेत्रषष्ठदशमाख्यसेवकाः वह्निरुद्रमुनयस्तुपोषकाह्वा
दशाष्टचतुरस्तुघातका इति विश्वविषयम् रामार्चनचंद्रिका
विरुद्धत्वात् शत्र्वादीनां षष्ठं वर्जनीयम् षष्ठाष्टद्वादशानि वर्जनी
यानीति वचनात् अथ लग्नाद्धनं भ्रातृबंधुपुत्रशत्रुकलत्रकाः
मारणधर्मकर्मायव्ययद्वादशराशयः नामानुरूपमेतेषां शुभाशु
भफलं भवेत् वैस्ववेत्त मातुःस्थाने बंधुरिति पाठः बंधुस्थाने भ्रा
तुरिति पाठः तथा च तंत्रराजे तेन मंत्राद्यवर्णेन नाम्नः साध्यस्य वै
णच गणयेद्यदि षष्ठं वाप्यष्टमं द्वादशं तु वा रिपुमंत्राद्यवर्णस्था
तेन तस्याहितं भवेत् इति राशिचक्रम् अथ नक्षत्रचक्रम् अ आ अश्वि
नीदेवाः इ भरणी मानुषाः ई उ ऊ कृत्तिका राक्षसाः ऋ ॠ लृ ॡ रो
हिणी मानुषाः ए मृगशिरो देवाः ऐ आर्द्रा मानुषाः ओ औ पुनर्वसू दे
वाः कः पुष्यो देवाः खगौ आश्लेषा राक्षसाः घङौ मघा राक्षसाः चपू
र्वफल्गु मनुषाः छजौ उत्तरा मानुषाः झञौ हस्तो देवाः टठौ चित्रारा
क्षसाः डः स्वातिर्देवाः ढणौ विशाखा राक्षसाः तथद अनूराधा देवाः
धः ज्येष्ठा राक्षसाः नपफ मूल राक्षसाः बः पूर्वाषाढ मनुष्याः भउ

नुराधाढमनुष्याः मघश्रवणादेवताः धरायनिष्ठाराक्षसाः लश्यातभिष
क्षसाः वशपूर्वभाद्रमानुष्याः मघहस्तउत्तरमानुष्याः अश्वः लक्षःरेवा
तीदेवाः तथाचपिंगलातंत्रे उत्तरादक्षिणाग्रास्तुरेखाऊर्ध्वाश्चतुष्टयं
दशरेखापश्चिमाग्राः कर्तव्याश्वरवर्णिनि अश्विमादिक्रमेणैव विलि
खेन्नारकाः पुनः वक्ष्यमाणविधानेन तन्मध्येवर्णकांलिखेत् ए
देकश्रुतिरूपावनिभुजगशशिहिहिमधुग्मपक्षाधुगमेकहिविरू
पश्रवनिशशिभुजछेकपक्षाग्निवेदाः वर्णाःक्रमात्स्वरांमौतरेव·
संतगतात्तुभौ तथाचनिबंधे पूर्वोत्तरात्रयंचैवभरण्याद्रीतरोहिणी
इमानिमानुष्याण्यूर्ध्वनक्षत्राणिमनीषिभिः ज्येष्ठाशतभिषमूलध
निष्ठाश्लेषकृत्तिकाः चित्रामघाविशाखास्वातीधाराराक्षसदेवताः अ
श्विनीरेवतीपुष्यस्वातिहस्ताःपुनर्वसुः अनूराधामृगशिरः श्रव·
णादेवतारकाः तथाच स्वजातौपरमाप्रीतिर्मध्यमाभिन्नजातिषु
रक्षोमनुष्ययोर्नाशोवैरंदानवदेवयोः जन्मसंपद्विपत्क्षेमप्रत्यरि
साधकोवधः मित्रपरममित्रंच जन्मादीनि पुनःपुनः गणयेदिति
शेषः जन्मतृतीयपंचमसप्तमानिवर्जनीयानिनक्षत्राणि तथाच
नामाद्यनवमक्षाणियुग्मयुग्मगतान्यपि इतराणिनमक्षाणि इत्यादि
स्वनक्षत्रादेवनक्षत्रगणनीयम् स्वनक्षत्राज्ञाने स्वनामाद्यक्षरसंबंधि·
नोनक्षत्रादेवगणनीयमिति प्रादक्षिण्येनगणयेत्साधकाद्यक्षरान्त
धीः इतिनक्षत्रचक्रम् अथाकथहचक्रम् चतुरश्रेलिखेद्वर्णान्सुत
कोष्ठसमन्विते चतुष्कोष्ठेषोडशकोष्ठइतियावत् अकारादिवर्णा
नन्नचतुष्कोष्ठप्रादक्षिण्येनलिखेत् तत्क्रमः इंद्वग्निरुद्रनवनेत्रयुगा
केदिक्ष्वक्षष्टषोडशचतुर्दशभौतिकेषु पातालपंचदशवह्निहिमांशु·
कोष्ठवर्णांलिखेल्लिपिभवांक्रमशस्तुधीमान् नामाद्यक्षरमारभ्ययाव
न्मंत्राद्यमक्षरम् चतुर्भिःकोष्ठैरेकैकमितिकोष्ठचतुष्टयम् पुनःकोष्ठ
ककोष्ठेषु सम्पतोनामअश्वादितः सम्पतोदक्षिणतः तथाचविस्तारे
दक्षिणावर्तयोगेनकोष्ठवर्णांलिखेत्क्रमात् येनैवलिखनंकुर्यात्तेनैव।

तं॰
सा॰
४

गणं नक्षत्रम् सिद्धसाध्यसुसिद्धारिः क्रमाज्ज्ञेया विचक्षणैः। सिद्धसि-
ध्यति कालेन साध्यस्तु जपहोमतः। सुसिद्धो ग्रहणादेव अरिर्मूलं निकृं-
तति सिद्धार्णाः बान्धवाः प्रोक्ताः साध्यास्तु सेवकास्मृताः। सुसिद्धाः पोष-
का ज्ञेयाः शत्रवो घातकास्मृताः। जपेन वश्यसिद्धः स्यात् सेवकोधिकसेव-
या पुष्णाति पोषकोभीष्टं घातको नाशयेद्ध्रुवम्। पिंगलायां सिद्धसिद्धो
यथोक्तेन द्विगुणात् सिद्धसाध्यकः। सिद्धसुसिद्धोर्थजपात् सिद्धारिरिहेति
बान्धवान् साध्यसिद्धो द्विगुणतः साध्यसाध्यो निरर्थकः। तत्रत्वसि-
द्धो द्विगुणेन साध्यारिरिहेति गोत्रजान्। सुसिद्धसिद्धोर्थजपात् सा-
ध्यादिद्विगुणाधिकात्। तत्र सिद्धो ग्रहादेव सुसिद्धारिः स्वगोत्रहा। अ-
रिसिद्धः सुतान् हन्यादरिसाध्यस्तु कन्यकाः। तत्र सिद्धस्तु पत्नीघ्नः स-
दरिं हन्ति साधकान्। पशुदेवेषु सर्वत्र मायाकाममथापि वा। त्रिप्रा-
वाहाश्रियं दद्यात्तद्दूषणविमुक्तये। इमं कथ्यहं चक्रम्। राशिचक्रं लि-
ऽविना पातयेद्विद्वान् दुर्गां च वर्गेणीतां च भैरवीम्। कर्णमूत्रस्थाभय-
तं ईशानादिषु योजयेत्। त्रिपुरां भुवनेशीं च पीठेशीं चैव अम्बकम्। वाम-
देवश्रियं चैव छिन्नमस्तां च वंदिकाम्। ईशानाद्यं विवस्वन्तं क्रमाद्ब्रह्म-
रितं तथा रुद्राणीं चैव देवेशं पितामहमनन्तरम्। महामायां च काली
चयटसप्तसौम्यदेवतम्। ईशानाद्यमिति। ईशानकोणमाद्यं कृत्वेमर्थीः
पंचाशल्लिपिवर्णानीशकोष्ठादिकं क्रमात्। अत्र क्रमपदेन दिग्गत-
कोष्ठानामपि निग्रहणम्। मातापितृकृतं नाम एवमत्र परिष्कृतम्। स-
र्वकर्मणि यं योर्णांपशब्दं तन्मन्त्रवीक्षणम्। इति हरचक्रपरम्। नामार्धा-
तमस्मारभ्य यावेदर्णगोचरम्। संशुद्धो ग्रहणं कुर्याद् दृष्टशुद्धो न कदाच-
न धनं पुत्रं च लाभं च नित्यं नैव च विक्रियम्। भुक्तिं मोक्षं च धर्मं च त्व-
रिमित्रं च कामदम्। भीषणं चिंतयेत् कोष्ठचक्रकोष्ठमितीरितम्। अत्रा-
पि दक्षिणक्रमः। इति हरचक्रम्। अथाकडमचक्रम्। रेखाद्वयं पूर्वप-
रेण कुर्यान्मध्यतो याम्यकौवेरमेदात्। महेशाद्यन्ताधिपतिक्रमेणाति
पिन थावायुकृताशातेन अकारादिस्वकारांतानल्कीवहीनांल्लिखेत्ततः

एकैकक्रमतो लेख्यो मेषादिषु क्रमांतकान् गणयेत् क्रमशो भद्रो नामा
दिवर्णकात्मकान् मेषादितो हि मेनांतक्रमशो गणयेत्सुधीः सिद्धसा
ध्यसुसिद्धारीस्तनसिद्धादयः पुनः नैवैकं पंचमे सिद्धा साध्या षष्ठे
दशाष्टमके ह्यसिद्धसिद्धिसमरुद्रो वेदाष्टद्वादशे रिपुः एतन्नैकथितं
दैविकदुर्मारादिकमुत्तमम् इदं तु गोपालविषयकमेव गोपालेक
दुर्मास्मृत इति वचनात् तथा चोक्तं वाराहेतंत्रे नाराशुद्धिर्वैसवा
नांकोष्ठशुद्धिशिवस्यच राशिशुद्धिस्तुपुरेच गोपालेकदुर्मास्मृतः
कोष्ठशुद्धिर्वराहेचमहालक्ष्म्याकुलाकुलम् नामादिवके सर्वेषां भूत
एकेतथैवच इति वचनात् अथ ऋणधनिचक्रम् ॥
तत्र राजेत कृत्वाधिकऋणी जेय ऋणी चेन्मंत्रउत्तमम् द्वयं ऋणी
चेत् मन्मंत्रं त्यजेत्सर्वं ऋणी यतः कथं ऋणित्वं मंत्राणां साधकानां च
मेवद पूर्वजन्मकृताभ्यासात् साधादस्या फलाप्तिकृत् पापेन ष्टफ
लेवाप्तिकलेदेत त्वयाऋणी मंत्रं संप्राप्तिमात्रेण प्राकृतास्ति द्वय
भवेत् सिद्धमंत्रानुरोलेतु मंत्रायसिद्धभाग्नरः लक्ष्मीमदादनाहम
लक्ष्मी भोगमवाप्नुयात् समंत्रस्यऋणी ज्ञेयो मजनं ततस्य पूर्वकम
तस्मादृणवशुद्धिस्तु कार्या सर्वैस्तु सर्वशः एषायोयं ॥
तद्यथा कोष्ठान्येकादशा मेववेदने पूरितानि च अकारादि हकारां
तं लिखेत्कोष्ठेषु तत्त्ववित् प्रथमं पंचकोष्ठेषु ह्रस्वदीर्घक्रमेण तु
द्वयं द्वयं लिखेत्तत्र विचार्य खलु साधकः शेषेष्वेकैकशो वर्णाः
क्रमतस्तु लिखेत्सुधीः तथा च निबंधे द्वौ द्वौ स्वरौ पंचसु कोष्ठ
केषु शेषान्वरान्षट्सु पदैकमेकम् कादीन् शेषान्विलिखे
त्तेतोर्णानेकैकमेकादशा कोष्ठकेषु षट्कालकालविघ्नद्ग्र
समुद्रवेदवाकाशशूरमदत्तनाखलु साध्यवर्णाः धमद्विपंचवि
यदंबरषुकुशशांकसोमाद्रिवेदशाषिनः खलु साधकार्णाः
नाम्नो नलादकठवागान भुक्तपाश्वं तान्वाभयावधिकशेषमृणं
यं तस्मात् अप्पार्थः तयान्त्रक्षंजनतरूपेण एषकक्तृतान् यु

ग्माद्यैरंकैर्गुणयित्वाष्टसंख्याभिर्हृत्वा उभयोस्साध्यसाधकयोरधिकं
ऋणं शेषं ऋणेन धनं ज्ञात्वा मंत्रं दद्यात् तत्र मंत्रश्चेदृणी भवति तदा मंत्रः
शुभदायको भवति यदि चेत्तु तेनातो मंत्रो यद्यधिकांकस्स्यात्तन्मंत्रं
न जपेत्सुधीः समेपि च जपेन्मंत्रं न जपेद्धनाधिकं ऋणे मृत्युं वि
जानीयात्तस्मादृणं विवर्जयेत् तथा इदं दत्ते नेत्ररविपंचदशार्कवेद
वस्वागुथयाष्टनवभिर्गुणितांश्च साध्यात् दिग्भूगिरिसृतिगजा
ग्निमुनीषुवेदषड्रुद्रैर्भिश्च गुणिता तत्साधकाणि षट्कूलका
लश्मादिवर्णनविसर्गविषयम् रामार्णवनंदवेदिका एतत्स्यादिति केचित्
वस्त्वतस्तत्पूर्वस्यैव विवरणम् तथाहि इदं दत्ते नेत्ररस्मादितयाऽनंत
रम् नामाणि कोष्ठकमथाभिहन्यादेकादिरुद्रांकगतक्रमेण य
उक्तं रुद्रयामले साध्यकान्साधकोकांश्च पूरयेद्रुद्रसंख्यया गु
णितेतत्र तं कानां यवैषं जायते स्फुटम् तदेकं कथयाम्यत्र प
काद्दशाग्रहस्थितम् इत्यत्राबद्धोले स्वक्रमम् प्रकारांतरोयथा ना
माद्यत्तरमारभ्य यावन्मंत्रादिसंभवेत् त्रिधाकृत्वाष्टभिर्भिन्नं तदम
द्विपरीतकम् अस्यार्थः साधकनामाद्यत्तरान्मात्रकाचक्रे गणेन
यायावन्मंत्रादिमात्तरम् तत्संख्यां त्रिगुणीकृत्य सप्तभिर्हृत्वा यदधिकं
ऋणं शेषं धनं स्यात् तदमदिति मंत्रात्तरमारभ्य यावत्साधकाद्य
रभवेत् तावत्संख्यां समगुणं कृत्वा त्रिभिर्हरेत् अन्यच्च साध्यनाम
द्विगुणितं साधकेन समन्वितम् अष्टभिश्च हरेच्छेषं तदम्यद्विपरी
तकम् अस्यार्थः साध्यनामस्वरव्यंजनभेदेन द्विगुणीकृत्य साध
कनाम्नाम स्वरव्यंजनभेदेन मिलितं कृत्वाष्टभिर्हरेत् तदम्यदपि
साधकनामाद्यत्तरं स्वरव्यंजनभेदेन द्विगुणीकृत्य साध्येन युतं
कृत्वाष्टभिर्हरेत् ॥ अथदीक्षाकालः ॥ मंत्रारंभस्तु चैत्रे
तेसममल्पपुरुषार्थदः वैशाखे रत्नलाभाय ज्येष्ठे तु मरणं भवेत्
शाषाढे बंधुनाशस्स्यात्पूर्णायुः श्रावणे भवेत् प्रजानाशो भवेद्भा
द्रपदे आश्विने रत्नसंचयः कार्तिके मंत्रसिद्धिस्स्यान्मार्गशीर्षे तथा भ

वेत् पौषे तु शत्रुपीडा स्यान्माघे मेधाविवर्धनम् फाल्गुणे सर्वका
मस्स्यान्मलमासं विवर्जयेत् चैत्रे तु गोपालविषयम् गौतमीयोक्त
त्वात् मधुमासे भवेद्दीक्षा दुःखघ्नीति वचनात् अत्र मासा मेषादय एव सौ
रमासाः शुभा दीक्षा न चाद्रेन चतारके इति गौतमीयात् ॥ अथ वार
नियमः ॥ रविवारे भवेद्वित्तं सोमे शान्तिर्भवेत्किल आयुरङ्गारको हं
ति तत्र दीक्षां विवर्जयेत् बुधे सौन्दर्यमाप्नोति ज्ञानं स्यात्तु बृहस्पतौ
शुक्रे सौभाग्यमाप्नोति यशोहानिः शनैश्चरे ॥ अथ तिथिनिर्णयः ॥
प्रतिपदि कृता दीक्षा ज्ञाननाशकरी मता द्वितीयायां भवेज्ज्ञानं तृती
यायां शुचिर्भवेत् चतुर्थ्यां वज्रनाशः स्यात्पञ्चम्यां बुद्धिवर्धनम् ष
ष्ठ्यां ज्ञानक्षयस्सोऽखिल भवेत्सप्तमे दिने अष्टम्यां बुद्धिनाशस्स्यान्नव
म्यां वपुषः क्षयः दशम्यां राजसौभाग्यमेकादश्यां शुचिर्भवेत् द्वाद
श्यां सर्वसिद्धिः स्यात्त्रयोदश्यां दरिद्रता तिर्यग्योनिश्चतुर्दश्यां हानि
र्मासावसानके पक्षान्ते धर्मवृद्धिस्स्यात्स्वाध्यायं विवर्जयेत् सं
ध्यागर्जितनिर्घोषभूकंपोल्कानिपातनम् एतानन्यांश्च दिवसा
न्कृतकान्परिवर्जयेत् द्वादश्यामपि कर्तव्यं त्रयोदश्यामथापि वा
इति यतिविषयो वशी न हि स्त्रीविषये रामार्चनचन्द्रिकायाम् तन्त्रात् त्रयोद
शीव दशमी प्रशस्ता सर्वकामदा ॥ इति सनत्कुमारवचनात् ॥
अथ नक्षत्रनिर्णयः ॥ अश्विन्यां सुखमाप्नोति भरण्यां मरणं भवे
त् कृत्तिकायां भवेद्दुःखी रोहिण्यां वाक्पतिर्भवेत् मृगशीर्षे सुखा
वाप्तिरार्द्रायां बन्धुनाशनम् पुनर्वसौ धनाढ्यस्स्यात्पुष्ये शत्रुवि
नाशनम् आश्लेषायां भवेन्मृत्युर्मघायां दुःखमोचनम् सौन्दर्यं
पूर्वफाल्गुण्यां प्राप्नोति च न संशयः ज्ञानं चोत्तरफल्गुण्यां हस्ते
चैव धनं भवेत् चित्रायां ज्ञानसिद्धिस्स्यात्स्वातौ शत्रुविनाशनम्
विशाखायां सुखं चापि राधायां बन्धुवर्धनम् ज्येष्ठायां सुतहानिः
स्यान्मूलायां कीर्तिवर्धनम् पूर्वाषाढोत्तराषाढे भवेतां कीर्तिदा
यके श्रवणायां भवेद्दुःखी धनिष्ठायां दरिद्रता बुद्धिः शतभिषायां

स्यात्सर्वभाद्रेस्त्रावीभवेत् सौम्यंवेत्सरभाद्रेचरेवसंकीर्तिवर्धनम्
तथायोगादिनिर्णयोविश्वसारे ॥ शुभस्तिष्ठस्यस्याशुभानध्रुवोयोग
स्ततःपरम् प्रीतिसौभाग्ययोगश्चवृद्धियोगस्ततःपरम् हर्षणश्चता
तोयोगस्सर्वतंत्रस्त्रावोवरः ववकौलवतैतिलावनिजस्तदनंतरं
करणानिशुभामेवसर्वतंत्रेशुभानिति ॥ अथलग्ननिर्णयः वृषसिं
देवकर्माग्याधनुर्मीनाख्यलग्नके चंद्रताराद्यनुकूलेचकुर्याद्दीक्षाप्रव
र्तनम् शुक्लपक्षेशुभादीक्षाकृष्णेयापंचमाह्निकात् निषिद्धमासे
ष्वेतन्निषिद्धयोगतिथिभेदतः रत्नावल्याम् षष्ठीभाद्रपदेचैषीतथाकृ
स्याचतुर्दशी कार्तिकेनवमीशुक्लामार्गेशुक्लातृतीयका पौषेच
नवमीशुक्लाचैत्रेकामश्चतुर्दशी वैशाखेचाष्टम्यांचैवसप्तदशह
रातिथिः आषाढेपंचमीशुक्लाश्रावणेकृष्णपंचमी एतानिदेवय
वीणितीर्थकोटिफलंलभेत् अन्यत्रचमतं ॥ चैत्रेत्रयोदशीशुक्ला
वैशाखेकादशीसिता ज्येष्ठचतुर्दशीकृष्णाप्याषाढेनागपंचमी
श्रावणेकादशीभाद्रेरोहिणीसंयुताष्टमी आश्विनेचमहापुण्याम
हाष्टम्यप्यभीष्टदा कार्तिकेनवमीशुक्लामार्गशीर्षेतथासिता ष
ष्टीचतुर्दशीपौषमाघेप्येकादशीसिता फाल्गुणेचासिताषष्ठी
चैवेतिकालस्यनिर्णयः ॥ तथाचयोगिनीतंत्रे ॥ अयनेविषुवेचै
वग्रहणेचंद्रसूर्ययोः रविसंक्रांतिदिवसेयुगाद्येचसुरेश्वरि मन्वंतर
सप्तमीसमहाश्रज्ञादिनेतथा चतुर्थीपंचमीचैवचतुर्दश्यष्टमी
तथा तिथयःशुभदाःप्रोक्ताःइत्यादिवचनाच्चतुर्दश्यष्टमीचैवतिथ
किविषयम् चतुर्थीगणेशविषयम् ततत्कल्पाकृतत्वात् निंदिते
ष्वपिकालेषुदीक्षाकार्याग्रहणेशुभा सूर्यग्रहणकालस्यसमानोना
स्तिभूतले तत्रयद्यत्कृतंसर्वमनंतफलदंभवेत् रविसंक्रमणेचै
वसूर्यस्यग्रहणेतथा तत्रलग्नादिकंकिंचिन्नविचार्यंकथंचन
नवारतिथिमासादिशोधनंसूर्यपर्वणि ॥ एवंचंद्रग्रहणेपि ॥
तथाचमत्स्यसूक्ते ॥ नकुर्यात्क्रांतिकीदीक्षामुपरक्तेदिवाकरे

नकुर्याद्देसर्वदीक्षांतान्तुयदिचंद्रसमोग्रहः अमावस्यासोमवारेसौमेचैव
चतुर्दशीरविवारेचसूर्यपर्वशतैस्समः ॥ योगिनीतंत्रे ॥
ग्रहणेचमहातीर्थेनास्तिकालस्यनिर्णयः शिष्यान्नाहूयगुरुणादी
यतेकृपयायदा तदालग्नादिकंकिंचिन्नविचार्यंकृतंचन तथा स
र्वेवासरग्रहास्सर्वेनक्षत्राणिचराशयः यस्मिन्नहनिसंतुष्टोगुरुस्स
र्वेशुभावहाः तथा ग्रहणेचमहातीर्थेनास्तिकालस्यनिर्णयः गं
गायांभास्करेक्षेत्रेविरजेचंद्रपर्वते चटलेचमतंगेचतथाकामाश्र
मेषुच नगृह्णीयात्ततोदीक्षांतीर्थक्षेत्रेषुपार्वति ॥ वाराहीतंत्रे
शुक्रास्तायदिवावृद्धोगुर्वादिस्तोभवेद्यदि मघवृश्चिकसिंहेषुतदा
दीक्षानविद्यते ॥ अथकरमालानिर्णयः ॥ सनत्कुमारसंहिता
याम् ॥ तर्जनीमध्यमानामाकनिष्ठाचेतितास्क्रमात् तिस्रोंगु
ल्यास्त्रिपर्वानामध्यमाचैकपर्विका पर्वद्वयंमध्यमायामेरुत्वेनो
पकल्पयेत् अनामामध्यमारभ्यकनिष्ठादितएवच तर्जनीमूलप
र्यंतंदशापर्वसुसंजपेत् अनामातलमारभ्यकनिष्ठादितएवच त
र्जनीमूलपर्यंतंमष्टपर्वसुसंजपेत् एतद्वचनंत्वष्टोत्तरशतविषयं
इतिश्रीक्रमवचनात् ॥ हंसपारमेश्वरेपि ॥ पर्वद्वयमनामाया
परिवर्तनकारयेत् पर्वत्रयंमध्यमायास्तर्जन्येकंसमाहरेत् शक्ति
मालासमाख्यातासर्वमंत्रप्रदीपिका अनामामूलमारभ्यप्रदक्षि
णक्रमेणतु मध्यमामूलपर्यंतंजपेदष्टसुपर्वसु इदमपितथैव
शुद्धमालातंत्रे अनामिकापर्वद्वयंकनिष्ठादिक्रमेणतु तर्जनीमूल
पर्यंतंकरमालाप्रकीर्तिता अंगुलीर्नवियुंजीतकिंचिदाकुंचितेत
ले अंगुलीनांवियोगाच्चछिद्रेचस्रवतेजपः अन्यत्रापि अंगुल्यग्रेच
यज्जप्तंयज्जप्तंमेरुलंघनात् पर्वसंधिषुयज्जप्तंतत्सर्वंनिष्फलंभवेत्
गणनाविधिमुल्लंघ्ययोजपेत्तज्जपंयतः गृह्णंतिराक्षसास्तेनगणये
त्सर्वथाबुधैः ॥ सनत्कुमारे ॥ क्रमोत्क्रमगतेमालामात्रकार्णैःद
मेरुकैः सबिंदुकैस्साष्टवर्गैरंतर्यजनकर्माणि आदितःकरटनपयशा

वोष्टोप्रकीर्त्तिताः तद्यथा अकारादीनांवर्णानांकवर्गादीनांचान्तिमव·
र्णमात्रमन्तरंकृत्वापूर्वमुद्धार्य पश्चान्मंत्रजपःकार्यः अनेनप्रकारेणा·
ष्टोत्तरशतसंख्योजपोभवेत्संतर्पणंतत्स्वरूपलक्षणम् सविंदुमातृकाबा
ये पश्चान्मंत्रजपःकार्यः अनेनप्रकारेणाष्टोत्तरशतसंख्यः अकारा
दिक्षकारान्तंबिंदुयुक्तंविभाव्यच वर्णमालासमाख्यातानुलोमवि·
लोमिका ॥ इतिनारदवचनात् ॥ अथमालानांमणिनिर्णयः ॥ प
द्मबीजादिभिर्मालाबहिर्यागेप्यवश्रुताः रुद्राक्षशंखपद्माक्षपुत्र
जीवकमौक्तिकैः स्फाटिकैर्मणिरत्नैश्चसौवर्णैर्विद्रुमैस्तथा राजतैः कुशमू
लैश्चगृहस्थस्यात्क्षमालिका अंगुलीगणनादेकंपर्वणाष्टगुणंभवेत्
पुत्रजीवैर्दशगुणंशतंशंखैर्विसहस्रकम् प्रवालैर्मणिरत्नैश्चदशसाह
स्त्रिकंस्मृतम् तदेवस्फाटिकैःप्रोक्तंमौक्तिकैर्लक्षमुच्यते पद्माक्षैर्दश
लक्षंस्यात्सौवर्णैःकोटिरुच्यते कुशग्रंथ्याकोटिशतंरुद्राक्षैःस्यादनं·
नकम् सर्वैर्विरचितामालानृणांमुक्तिफलप्रदाः पद्माक्षैरितिविख्य
विषयम् पश्चाद्विहितामालाशत्रूणांनाशिनीमता कुशग्रंथिमयी
मालासर्वपापप्रणाशिनी पुत्रजीवफलक्लृप्ताकुरुतेपुत्रसंपदम् नि
र्मिता रूप्यमणिभिर्जपमालेप्सितप्रदा प्रवालैर्विहितामालाप्रयच्छति पु
ष्कलंधनम् भैरवीविद्यायांवाराहीतंत्रे सुवर्णमणिभिर्मालांस्फाटि
कीर्णांवानिर्मिताम् प्रवालैरेववाकुर्यात्पुत्रजीवविवर्जयेत् पद्माद्वै
वरुद्राक्षैर्मिश्रितंचविशेषतः त्रिपुरांमंत्रपादेतुरक्तचंदनबीजादिभि
रितिप्रशस्ता तथाचतंत्रराजे रक्तचंदनमालातुभोगदामोक्षदाभवेत्
वैष्णवीवलक्ष्मीमालागजदंतैर्गणेश्वरे त्रिपुरायाजपमालारुद्राक्षै
रक्तचंदनैः मणिनियमस्तत्रमेरुमालायाम् अन्येसमसमनूणानि नाति·
स्थूलकृशानिच कीटादिभिरदुष्टानि नजीर्णानिनवानिच तथागो
तमीये पंचाशन्मणिभिर्मालाविहितासर्वकर्मसु अकारादिक्षका·
रांतावाद्यमालाप्रकीर्तिता तांणिमेरुमुखंतत्रकल्पयेन्मुनिसत्तम अ
नथासर्वविद्यानांजपस्यात्तमसमहिद्धाः वामकेश्वरतंत्रे निसंजपंकरै·

कुर्यान्नत्काम्यमवोधनात् काम्यमपि करे कुर्यान्मालाभावेपि सुंद
रि तथाचगौतमीये समासेनाहमूत्रस्य विधानमिह कथ्यते पंचविं
शतिभिर्मोक्षं त्रिंशद्भिर्धनसिद्धये सर्वार्थाय सप्तविंशत्या पंचदशाभि
चारके पंचाशद्भिः काम्यसिद्धिः स्यात्तथा चत्तु रुत्तरैः अष्टोत्तरशतेन स
र्वसिद्धिरुक्ता मनीषिभिः ॥ इति मालानिर्णयम् ॥ अथासनभेदः
काम्यार्थकं बलं चैव वस्त्रं दूर्वा रक्तकं बलम् कृष्णाजिने काम्यसिद्धिर्मो
क्षश्रीव्याघ्रचर्मणि कुशासने मंत्रसिद्धिर्नात्र कार्या विचारणा धर
ण्यां दुःखसंभूतिर्दौर्भाग्यं दारुजासने वंशासने दरिद्रः स्यात्पाषाणे
व्याधिपीडितः तृणासने यशोहानिः पल्लवे चित्तविभ्रमः जपध्यान
तपोहानिं वस्त्रासनं करोति हि वस्त्रासनं केवलमेव निषिद्धं वस्त्रास
नं रोगहरमिति वचनात् विशिष्टफलदत्वाभिधानात् चैलाजिन
कुशोत्तरमिति भगवद्वचनाच्च ॥ इत्यासनलक्षणम् ॥ ॐ अथमा
लासंस्कारः ॥ कर्पाससंभवं सूत्रं धर्मकामार्थमोक्षदम् तच्च वि
प्रकन्याभिर्निर्मितं च सुशोभनम् उच्चाटनेकपटमेव सूत्रं लोहस्य
सूत्रं खलु मारणे तु पट्टस्य सूत्रं च सरस्वतीये कर्पाससूत्रं खलु सर्व
सिद्धौ शुक्लं रक्तं तथा कृष्णं पट्टसूत्रमथापि वा शांतिवश्याभिचारेषु
मोक्षैश्वर्यजयेषु च शुक्लं रक्तं तथा पीतं कृष्णं वर्णेषु च क्रमात् सर्वे
षामेव वर्णानां रक्तं सर्वेप्सितप्रदम् आश्रमेषु तथा चैव रक्तं चैव स
मृद्धिदम् त्रिगुणं त्रिगुणीकृत्य ग्रथयेच्छिल्पशास्त्रतः एकैकं मातृ
कावर्णं स्मरंस्तु जपेत्सुधीः मणिमात्राय सूत्रेषु ग्रथयेन्मध्यमध्य
तः ब्रह्मग्रंथिविधायैवं सुमेरुं च ग्रंथिसंयुतम् ग्रथयित्वा पुरो माला
ततः संस्कारमाचरेत् गौतमीये ॥ सुवर्णं वा तंतुसंयोगं पुच्छे पुच्छं नि
योजयेत् गोपुच्छसदृशी माला यद्वा सर्पाकृतिर्भवेत् एवं निर्माय मा
लां च शोधयेन्मुनिसत्तम अश्वत्थपत्रनवकैः पद्माकारं तु कारयेत्
तन्मध्ये स्थापयेन्मालां मातृकामूलमुच्चरेत् क्षालयेत्पंचगव्येन सद्यो
जातेन सज्जलैः ॥ अथ सद्योजातमंत्रः ॥ ॐ सद्योजातं प्रपद्ये दं

तं॰
सा॰
८
8

सद्योजातायवैनमः भवेभवेनादिभवेभजस्वमांभवोद्भव चंदनागुरु
गंधाद्यैवामदेवेनपूजयेत् ॥ अथवामदेवमंत्रः ॥ ॐवामदेवायन
मोज्येष्ठायनमोरुद्रायनमः कलायकलाधिकरणाय नमोबल
विकरणाय नमोबलप्रमथनायनमउन्मनाय नमस्सर्वभूतदम
नायनमः धूपयेत्तामघोरेण ॥ अथघोरमंत्रः ॥ ॐअघोरेभ्योथ
घोरेभ्योघोरघोरतरेभ्यश्च सर्वतः सर्वसर्वेभ्योनमस्तेरुद्ररूपेभ्यः ले
पयेत्तत्पुरुषेण ॥ अथतत्पुरुषमंत्रः ॥ तत्पुरुषायविद्महे म
हादेवायधीमहि तन्नोरुद्रः प्रचोदयात् मंत्रयेत्पंचमेनैवप्रत्येकंतश
तंशतम् मेरुवंमंत्रयेच्चैवमनुनाचघृतंशतम् ॥ अथपंचममंत्रः
ॐईशानाः सर्वविद्यानामीश्वरस्सर्वभूतानां ब्रह्माधिपतिर्ब्रह्मणो
धिपतिःशिवोमेअस्तुसदाशिवोम् प्रत्येकंतुसकृत्सकृत् इतिवा
तथाचतंत्रेव प्रत्येकंमंत्रयेन्मंत्रीपंचमेनसकृदिति समुदायमा
लामधिकृत्यपंचमेनचमूलेनशतंमूलेनमंत्रयेदिति दर्शनान्माला
मांवरशतंजपः ततोबाह्यपूजेदेवंयथाविभवविस्तरैः मालायाः प्रा
णप्रतिष्ठांततोदेवतांयजेत् यथासनत्कुमारसंहितायाम् संस्कृत्यै
ववयोमालातस्याःप्राणांस्तत्रस्थापयेत् मूलमंत्रेणतांमालांपूजयेद्धि
नमस्तेनमः ॥ वाराहीतंत्रेमंत्रः ॥ ॐमांमालेमहामालेसर्वतत्त्वस्वरू
पिणि चतुर्वर्गस्त्वयिन्यस्तस्तस्मान्मेसिद्धिदाभव स्वाहांतोयंमहामंत्रः
सर्वमालाविशोधनः ॥ इतिदेवीरहस्ये ॥ मायाबीजादिकंकृत्वा
रक्तपुष्पैस्समर्चयेदितिशक्तिविषयमेतत् पुनःवाग्भवंचरमाबीज
तारादिमालिकाततः ॐनमःहृदयवर्णान्तांमंत्रेणानेनपूजयेत् तथा
मंत्रयेन्मूलमंत्रेणक्रमेणोत्क्रमयोगतः तथैवमातृकावर्णैर्मंत्रये
नान्तमंत्रवित् ॥ अथशंखमालादिमालामंत्राः ॥ ॐश्रींश्रींॐशं
खिनीॐश्रींॐस्वाहा ॥ अथमुक्तमालामंत्रः ॥ ॐकुंकुंॐमुक्तमा
लिनिश्रींश्रींस्वाहा । अथप्रवालमालामंत्रः ॥ ॐह्रींॐरौद्र
मालिनिरुंस्वाहा ॥ अथस्फटिकमालामंत्रः ॥ ॐअसःसः अर्कं

मालेफट्स्वाहा । अथरुद्राक्षमालामंत्रः । ॐह्रीं ह्रीं रुद्राक्षमा
लिनिशुभाभवस्वाहा अथतुलसी ॥ ॐक्रों ॐ ॐ स्त्रीं तुलसिवि
ष्णुविवोघट्स्वाहा ॥ अथमणिमाला ॥ ॐक्रों ग्लौं मणिमालेस्वा
हा ॥ अथस्वर्णमाला ॥ ॐह्रीं क्रीं सौः स्वर्णमालिनिसौः स्वा
हा ॥ अथपद्माक्षमालामंत्रः ॥ ॐह्रीं ॐ पद्माक्षमालिनिह्सौः
स्वाहा अथदंतमालामंत्राः ॥ ॐ ॐ ॐ ह्रीं ह्रीं ह्रीं क्लीं क्लीं क्लीं ग
सौः दंतमालेवागीश्वरमालेह्रीं स्त्रीं ह्सौः स्वाहा इथकथ्थक्रमेणामंत्रैः
श्रीचक्रस्थमहेश्वरि मालांसंशोध्यसंस्कृत्यमूलेनस्यादशांशतः
गंयात्ततश्चसूत्रेणसंस्कृत्यजपेन्मंत्रिकोनमः अथसाधारणमाला
मंत्रः ॥ गंमेअविघ्नंकुरुमेस्वाहा ॥ अथकरमाला ॥ क्लीं
क्लीं टं क्रीं करमालेफट्स्वाहा षट्मासेनैवमालानांशोधयन्
साधकश्चरेत् ततोऽस्यजेन्महाविद्यासर्वसिद्धीश्वरोभवेत् ॥ इति
देवीरहस्येभैरववचनम् ॥ योगिनीतंत्रे । होमकर्मततःकुर्या
द्देवताभावसिद्धये अष्टोत्तरशतंकृत्वासंपातांस्तांविनिक्षिपेत् हो
मकर्मणिपशाक्षसूत्रेणगुणंजपमाचरेत् नामसंमंत्रंजपेन्मंत्रीकंपये
न्नविघूर्णयेत् कंपनात्सिद्धिहानिःस्यात् चनंबकुरुःखेदम् शब्दे
जातेभवेद्रोगः करभ्रष्टाद्विनाशकृत् छिन्नेसूत्रेभवेन्मृत्युस्तस्मा
द्यत्नपरोभवेत् ततोमालांगोपयेत् त्वमालासर्वदेवानांसर्वसिद्धि
प्रदामता तेनसत्येनमेसिद्धिंदेहिमातर्नमोऽस्तुते इत्युक्त्वापरिस
माप्यगोपयेद्यत्नतोगृही सप्तदमाद्रेपदे द्वादश्यांवैसवीमाला
कर्तव्यासोपवासकैः मंत्रज्ञैर्विस्मृमंत्रेणदिवाभागेनशस्यते श
क्तीनामपिकर्तव्यारात्रौभुक्त्वायथाविधिः अष्टम्यांवानवम्यांवाव
नर्दश्यांतथैवच त्रयोदश्यांतथाकुर्याद्विवस्यापिमहेश्वरि कामं
नामेदेवंगलिनियमः यथा तर्जन्यंगुष्ठयोगेनशत्रुच्चाटनकर्मसु
अंगुष्ठमध्यमायोगादुच्चाटोच्चाटनेमते ज्येष्ठाकनिष्ठयोगेनशत्रू
णांनाशनंमतम् जोगेमूत्रेपुनःसूत्रंग्रथयित्वाशतंजपेत् अप्सरा

तं॰ सा॰ ४

सतितां हस्ताब्धृतमष्टोत्तरं जपेत् जपेन्निषिद्धं संस्पर्शे क्षालयित्वा
यथोचितम् छिन्नेऽप्यष्टोत्तरशतं जपः कार्यश्छिन्ने योल्लस्वा
त् ॥ इति मालाविधिः ॥ अथ पुरश्चरणविधिः ॥ योगिनीहृद
ये गुरोराज्ञां समादाय शुद्धान्तःकरणो नरः ततः पुरश्क्रियां कु
र्यान्मंत्रसंसिद्धिकाम्यया जीवहीनो यथा देहः सर्वकर्मसु न क्ष
मः पुरश्चरणहीनोऽपि न मंत्रः फलदायकः तस्मादादौ स्वयं कु
र्याद्गुरुं वा कारयेत्सुधीः गुरोरभावे विप्रं वा सर्वप्राणिहिते रतम्
स्निग्धं शान्तं विदंभित्वं नानागुणसमन्वितम् स्त्रियं च सद्गुणोपेतां
सपुत्रां विनियोजयेत् तत्रादौ पुरश्क्रियाकर्तुः स्थाननिर्णय उक्त
ते योगिनीहृदये पुण्यक्षेत्रं नदीतीरं गुहापर्वतमस्तके तीर्थप्र
देशाः सिंधूनां संगमः पावनं वनम् उद्यानानि विविक्तानि बिल्वमू
लं तटं गिरेः तुलसीकाननं गोष्ठं वृषशून्यं शिवालयम् अश्वत्था
मलकीमूलं गोशाला जलमध्यतः देवतायतनं कूलं समुद्रस्य
निजं गृहम् तथा गृहे शतगुणं विद्याद्गोष्ठे लक्षगुणं भवेत् कोटिर्देवा
लये पुण्यमनन्तं शिवसन्निधौ म्लेच्छदुष्टमृगव्यालशङ्कातङ्कविव
र्जिते एकान्तपावने निन्दारहिते भक्तिसंयुते स्वदेशे धार्मिके देशे
सुभिक्षे निरुपद्रवे रम्ये भक्तजनस्थाने निवसेत्तापसप्रिये गुरूणां
सन्निधाने च चित्तैकाग्र्यस्थले तथा एषामन्यतमं स्थानमाश्रित्य ज
पं समाचरेत् यत्र ग्रामे जपेन्मंत्री तत्र कूर्मं विचिन्तयेत् गौतमीये
वने सिन्धुतीरे वा पुण्यारण्ये नदीतटे यदि कुर्यात्पुरश्चर्यां तत्र कूर्मं न
चिन्तयेत् ॥ अथ पुरश्चरणे भक्ष्यादिनिर्णयो गौतमीये ॥ पुर
श्चरणकृन्मंत्री भक्ष्याभक्ष्यं विचिन्तयेत् अन्यथा भक्षणाद्दोषः सिद्धिहा
निः प्रजायते तथागमसंहितायाम् दधिक्षीरघृतं गव्यमेवं गु
डवर्जितम् तैलाक्तवसितामपूपकान्दाकेमुकवर्जिताः नारिकेलफ
लं चैव कदली लवली तथा आम्रमामलकं चैव पनसं च हरीतकी
व्रतान्तरे प्रशस्तं च हविष्यं मन्यते बुधैः भुञ्जानो वा हविष्यान्नं शाकं

यावकमेव वा पयो मूलफलं चैव यत्र यत्रोपलभ्यते यत्तु योगिनीतन्त्रे चिं
चां च नालिकाशाकं कलायं कुलं च तथा कदंबं नारिकेलं च व्रते कूष्मां
डकं त्यजेत् इति व्रततन्त्रे बोध्यम् अथ वर्ज्यानि विवर्जयेन्मधु क्षारं ल
वणं तैलमेव च ताम्बूलं कांस्यपात्रं च दिवाभोजनमेव च तथा क्षारं च
लवणं मांसं शूद्रजनभोजनम् माषाढकीमसूरांश्च कोद्रवांश्चणकानपि
पि कौटिल्यं क्षारमभ्यंगमनिवेदितभोजनम् कुर्याद्यथोक्तविधिना
त्रिसंध्यं देवतार्चनम् अपवित्रकरो नग्नः शिरसि प्रावृतोपि वा प्रलप
ञ्जपेद्यावत्तावन्निष्फलमुच्यते कुलार्णवेपि यस्मात्त्रपानपुष्टांगः
कुरुते धर्मसंचयम् अन्नदाता फलस्यार्धं कर्ता स्यार्धं न संशयः त-
स्मात् सर्वप्रयत्नेन परान्नं वर्जयेत् सुधीः पुरश्चरणकाले तु सर्वकर्म-
स्वशास्त्रवित् जिह्वा दग्धा परान्नेन हस्तौ दग्धौ प्रतिग्रहात् परस्त्रीभि-
र्मनो दग्धं कथं सिद्धिर्वरानने परान्नमिह नेतरविविधं यं भिक्षायास्तस्य
स्तेनोत्पादनात् तथा च वैदिकाचारयुक्तानां शुचीनां श्रीमतां सतां
सत्कुलस्थानजातानां भिक्षाशीस्यात्र जन्मनाम सकृदुच्चारितेषा-
ऽशे प्रणवं समुदीरयेत् प्राणायामप्युवेशाद्वे प्राणायाममथाचरेत्
बहुलालापीनाचमनस्यांगानि ततो जपेत् द्वुतेण्वं तथास्पृश्य
स्थानानां स्पर्शनेपि च एवमादीन् नियमान् पुरश्चरणकृच्चरेत् विण्मू-
त्रोत्सर्गशंकादियुक्तः कर्म करोति यः जपार्चनादिकं सर्वमपवित्रं भ-
वेत्प्रिये मलिनाम्बरकेशादिमुखदौर्गन्ध्यसंयुतः यो जपेत्तं दहत्या-
शु देवता गुप्तसंस्थिता आलस्यं जृम्भणं निद्रां क्षुतं निष्ठीवनं भयम्
नीचांगस्पर्शनं कोपं जपकाले विवर्जयेत् एवमुक्तविधानेन विलम्ब-
विवर्जितं विना उक्तसंख्यं जपं कुर्यात् पुरश्चरणसिद्धये देवतागुरुमन्त्राणा-
मैक्यं संभावयन् धिया जपेदेकमनाः प्रातःकालं मध्यंदिनावधिः यत्सं-
ख्यया समारब्धं तत्कर्तव्यमहर्निशम् यदि न्यूनाधिकं कुर्याद्व्रतभ्रष्टो भ-
वेन्नरः ॥ मुण्डमालातन्त्रे ॥ यत्संख्यया समारब्धं तत्संख्यं दिनेदिने न्यू-
नाधिकं न कर्तव्यमासमाप्तं समाचरेत् ॥ कुलार्णवेपि ॥ न्यूनातिरि-

तं·
सा· क्तकर्माणि न फलन्ति कदाचन यथाविधि कृतान्येव तत्कर्माणि फलन्ति
१· च भूशय्या ब्रह्मचारित्वं मौनमाचार्यसेवनम् नित्यं त्रिषवणस्नानं क्षु
द्रकर्मविवर्जयेत् नित्यपूजा नित्यदानं देवतास्तुतिकीर्तनम् नैमि
10 त्तिकार्चनं चैव विश्वासो गुरुदेवयोः जपनिष्ठा द्वादशैते धर्माः स्युर्म
न्त्रसिद्धिदाः स्त्रीशूद्रपतितव्रात्यनास्तिकोच्छिष्टभाषणम् असत्य
भाषणं जिह्मभाषणं परिवर्जयेत् सत्येनापि न भाषेत जपहोमार्चना
दिषु असत्यानुष्ठितं सर्वं भवत्येव निरर्थकम् ॥ योगिनीहृदये ॥
शयीत कुशशय्यायां शुचिवस्त्रधरः सदा प्रसन्नः स्वालये शय्यामे
काकी निर्भयः स्वपेत् असत्यभाषणं वाक्कुटिलं परिवर्जयेत् सत्ये
नापि न भाषेत जपहोमार्चनादिषु वर्जयेद्गीतवाद्यादिश्रवणं नृत्यद
र्शनम् अभ्यङ्गं गन्धलेपं च पुष्पधारणमेव च मैथुनं स्त्रीकथालापं त
द्गोष्ठीं च विवर्जयेत् सजेतुष्णोदकस्नानमनिवेदितभोजनम् नैत्रैव
नैकवासा जपेन्मन्त्रं बहुवस्त्राकुलोऽपि वा पतितानामसज्जानां दर्श
ने भाषणे श्रुते क्षुतेऽधोवायुगमने जृम्भणे जपमुत्सृजेत् तथा च
स्पवतस्त्वात्मप्राणायामषडङ्गकम् कृत्वा सम्यग्जपेच्छेषं यद्वा सू
र्यादिदर्शनम् आदिशब्दाद्वह्निब्राह्मणांश्च तन्त्रान्तरात् मनःसंहर
णं शौचं मौनं मन्त्रार्थचिन्तनम् अव्यग्रत्वमनिर्वेदो जपसम्पत्तिहेतवः
उष्णीषी कंचुकी नग्नो मुक्तकेशो गलावृतः अपवित्रकरोऽशुद्धः प्र
लपन्न जपेत्क्वचित् अनासनः शयानो वा गच्छन्भुञ्जान एव च अप्रा
वृतोकरौ कृत्वा शिरसा प्रावृतोऽपि वा चिन्ताव्याकुलचित्तो वा क्रुद्धो
भ्रान्तः क्षुधान्वितः रथ्यायामशिवस्थाने न जपेत्तिमिरावृते उपा
नद्रूढपादो वा यानशय्यागतस्तथा प्रसार्य न जपेत्पादावुत्कटासन
एव च मार्जारकुक्कुटक्रौञ्चश्वानशूद्रकपिखरम् दृष्ट्वाचम्य स्पृशेत्
कर्णौ स्पृष्ट्वा स्नानं विधीयते सर्वत्र जपयज्ञनियमः नत्वमानसे तथा
च अशुचिर्वा शुचिर्वापि गच्छंस्तिष्ठन्स्वपन्नपि मन्त्रैकशरणो विद्वान्म
नसैवं सदाभ्यसेत् न दोषो मानसे जाप्ये सर्वदेशेऽपि सर्वदा जपनिष्ठा

द्विजश्रेष्ठोऽखिलयज्ञफलं लभेत् प्रणवादिमंत्रजप्येतत्तन्मंत्रविशेषो
वक्तव्यः जपफलमाह शिवधर्मे सर्वेषामेव यज्ञानां जायतेसौ महाफ
लः जपेन देवता नित्यं स्तूयमाना प्रसीदति प्रसन्ना विपुलान्कामान्द
द्यान्मुक्तिं च शाश्वतीम् यक्षरक्षःपिशाचाश्च ग्रहाः सर्पाश्च भीषणाः
जपितं नोपसर्पन्ति भयभीताः समन्ततः यावन्तः कर्मयज्ञाः स्युः प्रदि
ष्टानि तपांसि च सर्वे ते जपयज्ञस्य कलां नार्हन्ति षोडशीं महात्म्य
वाचिकस्यैतत् जपयज्ञस्य कीर्तितम् तस्माच्छतगुणोपांशुः सहस्रो
मानसः स्मृतः ॥ तन्त्रान्तरे ॥ मानसः सिद्धिकामानां पुष्टिकामैरुपां
शुकः वाचिको मारणे चैव प्रशस्तो जप ईरिताः ॥ गौतमीये ॥ श
क्त्या त्रिषवणं स्नानं मध्याह्ने सकृदेव वा त्रिसंध्यं प्रजपेन्मंत्रं पूजनं
तत्समं भवेत् संध्यात्रये पूजां गत्वा जपमष्टोत्तरशतमित्यर्थः एक
दा वा भवेत्पूजा न जपः पूजनं विना जपान्ते वा भवेत्पूजा पूजान्ते वा जप
मेव तु प्रातःकालं समारभ्य जपं मध्यंदिनावधि मध्यंदिनावधीति
नियमपरम् किं त्वधिककालव्यवच्छेदपरम् अतः स्थानत्रयजप
नाजपनियमे कदाचिन्निद्राजाड्याज्ञानाद्वा समासितप्रतिनियतदि
वसीय जपसंख्याया अपूरणत्वे नाधिकत्वे न नियमभंगः स्यात् मनः
संहृत्य विषयान्मंत्रार्थगतमानसः न द्रुतं न विलंबं च जपेन्मौक्ति
कहारवत् जपः स्यादक्षरावृत्तिर्मानसोपांशुवाचिकैः धियायदक्षर
श्रेणीं वर्णस्वरपदात्मिकाम् उच्चरेदर्थमुद्दिश्य मानसस्स जपः स्मृ
तः विशुद्धस्वरं तेन निजकर्णगोचरोऽयं मानसः स जपः स्मृतः उपां
शुर्निजकर्णस्य गोचरः परिकीर्तितः निगदस्तु जनैर्वेद्यस्त्रिविधो ज
प ईरितः मंत्रमुच्चारयेद्वाचा वाचिकः स जपः स्मृतः उच्चैर्जपाद्विशिष्टः
स्यादुपांशुर्दशभिर्गुणैः जिह्वाजपः शतगुणः साहस्रो मानसः स्मृतः
तन्त्रान्तरे ॥ उच्चैर्जपोऽधमः प्रोक्त उपांशुर्मध्यमः स्मृतः उत्तमो मान
सो देवि त्रिविधः कथितो जपः अतिह्रस्वो व्याधिहेतुरतिदीर्घो वस
क्षयः अक्षराक्षरसंयुक्तं जपेन्मौक्तिकहारवत् मनसा यत्स्मरेत्स्तो

तं॰
सा॰ त्वेवं वसावामं तु जपेत् उभयं यतिनिष्फलं याति भिन्नभांडोदकं यथा ॥ गौत
११ मीये ॥ पशुभावे स्थिता मंत्राः केवलं वर्णरूपिणः सौषुम्नाध्वन्युच्चरिताः
।। प्रभुत्वं प्राप्नुवंति ते मंत्राक्षराणि चिच्छक्तौ प्रोतानि परिभावयेत् तामेव प
रमे व्योम्नि परमानंदबृंहिते दर्शयत्यात्मसद्भावं पूजाहोमादिभिर्विनेति
कुलार्णवेपि मनोन्यत्र शिवोन्यत्र शक्तिरन्यत्र बृंहिते दर्शयत्यात्मसद्भा
वायवः न सिध्यति वरारोहे कल्पकोटिजपादपि जातसूतकमादौ स्या
दंते च मृतसूतकम् सूतकद्वयसंयुक्तो यो मंत्रः स न सिध्यति गुरुस्त
द्विहितं कृत्वा मंत्रं यावज्जपेद्धिया सूतकद्वयमुक्तस्य मंत्रस्य सर्वसिद्धिदः
तत्रैव ब्रह्मबीजं मनोर्दत्वा चाद्यंते परमेश्वरि सप्तवारं जपेन्मंत्रं सूतकद्व
यमुक्तये मंत्रार्थं मंत्रचैतन्यं योनिमुद्रां न वेत्ति यः शतकोटिजपेनापि त
स्य सिद्धिर्न जायते लुप्तबीजास्तु ये मंत्रा न दास्यंति फलं प्रिये मंत्राश्चैत
न्यसहितास्सर्वसिद्धिकराः स्मृताः चैतन्यरहिता मंत्राः प्रोक्ता वर्णास्तु के
वलम् फलं नैव प्रयच्छंति लक्षकोटिजपैरपि मंत्रोच्चारे कृते यादृक्स्व
रूपं प्रथमं भवेत् शते सहस्रे लक्षे वा कोटिजाप्येन तत्फलम् हृदयग्रंथि
भेदश्च सर्वावयववर्धनम् आनंदाश्रूणि पुलको देहावेशः सुरेश्वरि ग
द्गदोक्तिश्च सहसा जायते नात्र संशयः सकृदुच्चारितेप्येवं मंत्रे चैतन्यसं
युते दृश्यंते प्रत्ययास्तत्र पारंपर्यं तदुच्यते मासमात्रं जपेन्मंत्रं भूतलि
पिसंपुटम् क्रमोत्क्रमात्सहस्रं तु तस्य सिद्धो भवेन्मनुः ॥ अथ भू
तलिपिः ॥ पंचह्रस्वाः संधिवर्णा व्योमेराग्निजलेश्वराः श्रोत्रसाध्यं बि
तेयं ववतन्थे मध्यमक्रमात् पंचवर्गाक्षराणि स्युर्वांतः श्वेतं तु भिः स
ह एषा भूतलिपिः प्रोक्ता द्विचत्वारिंशदक्षरा ॥ गौतमीये ॥ एवं ज
पंचपुटाकृत्वा तेजोरूपं समर्पयेत् देवस्य दक्षिणे हस्ते कुशपुष्पाक्षतै
वारिभिः सफलं तद्विभागे च प्राणायामं समाचरेत्
चत्रितयं त्रितयं चरेत् ॥ शाक्तिविषये वामहस्ते जपस्यादौ जपांते
गकृत्वा गंधाक्षतकुशोदकैः जपं समर्पयेद्व्यावामहस्ते विचक्षणः तथा च एवं जपंतु
जपांते प्रसहस्रं मंत्री होमयेत्तद्दशांशतः तर्पणं चाभिषेकं च तद्दशांशं
-

ततोगुरुं प्रयत्नेन भोजयेद्द्विगुणान्नाधिकप्रशान्तये अष्टवा सर्वपूर्णेन च हो
मादिकमथाचरेत् ॥ होमाद्यशक्तौ समन्तकमादिये ॥ यद्यदङ्गं भवे
द्व्यग्रं तत्संख्याद्विगुणो जपः होमान्ते चेजपः कार्यो होमसंख्या चतुर्गु
णा विप्राणां क्षत्रियाणां च रससंख्या गुणः स्मृतः वैश्यानां वसुसं
ख्याकमेषां स्त्रीणामयं विधिः यं वर्णमाश्रितः शूद्रः स च तस्य विधिं
चरेत् शूद्रस्य विप्रमुक्तस्य तत्संख्या सदृशो जपः ॥ अत्राप्यशक्तश्चेत्
योगिनीहृदये ॥ होमकर्मण्यशक्तानां विप्राणां द्विगुणो जपः इत
रेषां तु वर्णानां त्रिगुणादि समन्वितः ॥ इति सर्वविषयम् ॥ एतेना
स्त्रीशूद्राणां होमाधिकारः तथा च ॥ शूद्राणां मण्डपादिकं रुद्रप्रक
रणो शारदायामिति ॥ स्त्रीणां होमाधिकारे च तत्र लाजैस्त्रिमधु
रोपेतैर्होमः कन्याप्रयच्छति अनेन विधिना कन्यावरमाप्नोति वा
ञ्छितम् ॥ अतः स्त्रीणां होमाधिकारः तच्च ब्राह्मणद्वारा तथा च तं
त्रान्तरे ॥ ओंकारोच्चारणाद्धोमात् सालिग्रामशिलार्चनात् ब्राह्म
णीगमनाच्चैव शूद्रश्चाण्डालतां व्रजेत् ॥ इति साहचर्यविषयात् ॥ त
था स्त्रीणामपि सर्ववैदिककर्मस्पृष्टत्वप्रतिपादनात् स्त्रीशू
द्रकरसंस्पर्शो वज्रपातसमो मम ॥ इति भगवद्वचनात् ॥ तथा ना
रायणकल्पे ॥ अष्टाक्षरो महामन्त्रः सन्मार्गः शूद्रयोषितः प्रणवादि
स्वयो मन्त्रो न स्त्रीशूद्रे प्रशस्यते ॥ इति सर्वत्र स्त्रीणां शूद्रवद्व्यवहारः
सर्वेषां वा द्विगुणो जपः ॥ तथा च तन्त्रान्तरे ॥ यद्यदङ्गं विहीयेत तत्सं
ख्या द्विगुणो जपः कर्तव्यः साङ्गसिद्ध्यर्थं तदशक्तेन मन्त्रिणा नचेदङ्गं
विहीयेत तद्विघ्नमवाप्नुयात् ॥ तथागस्त्यसंहितायाम् ॥
योऽपि होमेन शक्तः स्यात् स्वजातीयं न प्रणोऽपि वा तावत्संख्याजपेनैव ब्रा
ह्मणाराधनेन वा भवेदङ्गवैगुण्येनैव पुरश्चरणकर्मणि अत्र ब्राह्मण
भोजनमावश्यकमेव ॥ उक्तं हि ॥ विप्रभोजनमात्रेण व्यङ्गं साङ्गं भ
वेद्ध्रुवम् ॥ इतिवचनात् ततः गुरवे दक्षिणां दद्याद् भोजनाच्छादनादि
भिः गुरुसंतोषमात्रेण मन्त्रसिद्धिर्भवेद्ध्रुवम् सम्यक्सिद्धैकमन्त्रस्यापि

वागोपासनेनैव सर्वंमंत्राश्चसिद्ध्यंति त्वत्प्रसादात्कलेश्वरि गुरुमूल
मिदंसर्वमित्याहुस्तत्त्ववेदिनः एकग्रामस्थितोनित्यंगत्वावंदेतवैगु
रुम् गुरुरेवपरंब्रह्म तस्माद्यत्नेनतमर्चयेत् तदंतेमरुतीपूजांकुर्या
त्साधकसत्तमः सुवासिनीकुमारीश्च भूषणैरपिभूषयेत् मिष्टान्न
बटुकसत्कार्यभुंजेतबंधुभिःसह एवंसिद्धमंत्रोमंत्रीसाधयेत्सकले
प्सितान् अथवान्यप्रकारेणपुरश्चरणमिष्यते ग्रहणेर्कस्यचेंदो
र्वाशुचिःपूर्वमुपोषितः नद्यांसमुद्रगामिन्यांनाभिमात्रोदकेस्थितः
स्पर्शादिमुक्तिपर्यंतंजपेन्मंत्रमनन्यधीः नद्यभावेतु यद्वापुण्योदके
स्नात्वाशुचिःपूर्वमुपोषितः ग्रहणादिविमोक्षांतंजपेन्मंत्रंसमाहितः
उपवासाभावेतु ॥ सूर्यचंद्रोपरागेचस्नात्वाप्रयतमानसः स्पर्शा
दिमुक्तिपर्यंतंजपेन्मंत्रंसमाहितः ॥ मुंडमालायाम् ॥ दृष्ट्वास्ना
त्वासंसकल्प्योविमोक्षांतंजपंचरेत् तावद्यत्नाधिकंकार्यंग्रहांतेतु
शुचिर्भवेत् इतिजप्त्वामंत्रसिद्धिर्भवत्येवनसंशयः यःश्राद्धायगुरो
र्येनयदिजाप्यंनतत्रसः संभवेद्देवताद्रोहीपितृसमन्यसधः ॥ इ
तिसनत्कुमारीयवचनाज्जपस्यावश्यकत्वं ॥ वस्तुतस्त्वारब्धपु
रश्चरणविषयमिदम् ॥ तथाहि ॥ आरब्धेपुरश्चरणेयदिग्रहणं
भवेत् तदाज्ञाद्गुरोर्येनजपेनैवयजेन्नरः एवंरात्रावपिपुरश्चरण
विशेषोवक्तव्यः ॥ इतिसर्वत्रसमंजपम् ॥ योगिनीहृदये ॥ क
त्वोक्तविधिनामंत्रीकुर्याद्धोमंसमाहितः अथवातद्दशांशेनक्रमा
द्धोमादिकंचरेत् गोपालमंत्रतर्पणेहोमसमसंख्यात्वं तथागोपाल
मंत्रस्यतर्पणंहोमसंख्यया वर्णानामिहसर्वेषामित्यागमविदोविदुः
तदंतेमरुतीपूजांकुर्याद्ब्राह्मणतोषणम् ॥ तंत्रांतरे ॥ ततोमंत्र
प्रसिद्ध्यर्थंगुरुंसम्यक्प्रतोषयेत् एवंचमंत्रसिद्धिःस्याद्देवताचप्रसीद
ति यद्यपिपुरश्चरणपदंपंचांगपरम् ॥ तथाच ॥ जपहोमस्तर्पणं
चाभिषेकोविप्रभोजनम् पंचांगोपासनंलोकेपुरश्चरणमिष्यते
तथापिग्रहणेपुरश्चरणपदंजपमात्रपरम् सूर्योदयंसमारभ्यया

वत्सरेपोदद्याद्वधि ॥ इत्यादौदर्शनात् ॥ तत्रहोमादेरभावात् ॥ त
र्हिकथंपुरश्चरणंहोमादिरितिचेत् वचनादेवज्ञायेतनचपुरश्चरणस्य
पंचांगत्वात् सर्वत्रनदेवस्यादितिवाच्यम् ग्रहणेपुनस्तद्विधानमनर्थ
कंस्यात् किंच ग्रहणेहोमादिनियमान्नास्तत्रहोमादि ग्रहणपुरश्चर
णेहोमादिविधानंतुप्रकृतीभूतपुरश्चरणस्यतावबोधनाय अत
एवपंचांगस्वरूपपुरश्चरणेकृतेमुख्येप्रयोगेप्यधिकारइतिप्रकटीकृ
तम् तदकरणेपुनः केवलजपमात्रपुरश्चरणेनाधिकारइतिसर्वसं
मतम् पुरश्चरणकालस्तुवाराहीये चंद्रतारानुकूलेचशुक्लपक्षेशु
भेदिने आरभेतपुरश्चर्यांहरौसुप्तेनचनाचरेत् ग्रहणेचमहातीर्थेन
कालमवधारयेत् अथपुरश्चरणप्रयोगः तत्रतावद्भूमेःपरिग्रहंकृत्वा
पुरश्चरणप्राक्तृतीयदिवसेक्षौरादिकंविधायविदिक्षुचतुर्दिक्षुको
णकोणाद्यंदेशेचतुरस्रमाहारादिविहारार्थंपरिकल्पतेत्रैवक्रू
मेचक्रानुग्रणमंत्ररूपंविधायएकभक्तंकुर्यात् ततःपरदिनेस्नानादि
कंविधायशुद्धस्सन् अप्रमायोरईवरसदनाणामन्यतमस्यवितस्तिमा
त्रांदशकीलकांवेदिकायाम् ॥ ॐयेचात्रविघ्नकर्तारोभुविदिव्यंतरि
क्षगाः विघ्नभूतास्तथैवान्येममसंमंत्रस्यसिद्धिषु मयैतत्कीलितंक्षेत्रंप
रित्यज्यविसृतः अपसर्पंतुतेसर्वेनिर्विघ्नास्सिद्धिरस्तुमे इत्यनेन ॥ अ
स्त्रायफडितिमंत्रेण ॥ अष्टोत्तरशताभिमंत्रितांदशदिक्षुनिखनेत
षु ॐनमःसुदर्शनायअस्त्रायफडितिमंत्रेणअश्वंसंस्पृश्य एवंदि
क्रमेणइंद्रादिलोकपालान् पंचोपचारैःपूजयेत् ॥ तथाच ॥ पु
ण्यक्षेत्रादिकंगत्वाकुर्याद्भूमिपरिग्रहम् तथावाराह्यामुकमंत्रस्यपुर
श्चरणसिद्धये ममयंगृहमेतेसिद्धिंमंत्रोयंसिद्धतामिति तथाचतंत्रगण
दाचतुष्कोणक्रोशद्वयमथापिवा आहारादिविहारार्थंतावतीभूमि
मक्रमेत् क्षीरवृक्षोद्भवांकीलानस्त्रमंत्राभिमंत्रनात् निखनेद्दशदि
क्ष्वागेतेषुचप्रपूजयेत् लोकपालान्स्वनस्तेषुगंधाद्यैःपूजयेत्तथाः
ततोमध्यस्थानेक्षेत्रपालंबालीशंमूलमंत्रसर्वविघ्नविनाशार्थंगण

तं· स्रा· १२

13

पतिं पूजयेत् ॥ यथा ॥ ॐ अद्येत्याद्य ऽमुकगोत्रो ऽमुकदेवशर्माहं मत्क
र्तव्यामुकमन्त्रपुरश्चरणकर्मणि विघ्ननिवारणार्थं गणेशपूजनमहं करि
ष्ये इति संकल्प्य वेदिमध्ये पंचोपचारैः पूजयेत् ॥ तदुक्तम् ॥ क्षेत्र
पालादिकं तत्र पूजयेद्विधिवत्ततः क्षेत्रेशवास्तुनामानं विघ्नराजं सम
र्चयेत् दिक्पतिभ्यो बलिं दद्यात्ततः क्षेत्रं समाविशेत् ॥ ततो मांसभ
क्तादिना पूजितदेवताभ्यो बलिं दद्यात् ॥ ततः ये रौद्रा रौद्रकर्माणो
रौद्रस्थाननिवासिनः मातरोप्युग्ररूपाश्च गणाधिपतयश्च ये विघ्न
भूताश्च ये चान्ये दिग्विदिक्षु समाश्रिताः सर्वे ते प्रीतमनसः प्रतिगृह्णं
त्विमं बलिम् ॥ इत्यनेनाष्टदिक्षु भूतेभ्यो बलिं दद्यात् ॥ ततो गायत्रीं ज
पेत् ॥ ततश्च ॥ प्रातः स्नात्वा तु गायत्र्याः सहस्रं प्रयुतं जपेत् ज्ञाता
ज्ञातस्य पापस्य क्षयार्थं प्रथमं ततः ॥ इति विद्याधराचार्यः ॥ यून ॥
प्रातः स्नात्वा समाविश्याश्रयुतं प्रयुतं जपेत् ततः पुनरस्तपापशंक·
या ॥ ॐ अद्येत्याद्या ऽमुकगोत्रः श्रीअमुकदेवशर्मा ज्ञाताज्ञातपापक्ष
यकामोष्टोत्तरसहस्रं सावित्रीजपमहं करिष्ये ॥ ततः उपवासं हविष्यं
वा कुर्यात् ॥ ततः परदिने उपोषितः स्नानादिकं विधाय स्वस्तिवाचनपू
र्वकं संकल्पं कुर्यात् ॥ विष्णुः ॥ अद्येत्यादि अमुकगोत्रः श्रीअमुकदेव
शर्मा ज्ञाताज्ञातपापक्षयकामो अमुकदेवताया अमुकमन्त्रसिद्धिप्रति
बंधकाः शेषदुरितक्षयपूर्वकं तन्मन्त्रसिद्धिकामो ऽद्यारभ्य यावत्का·
लेन मे तस्य सिद्धिस्तावत्कालममुकमन्त्रस्य यत्संख्यं जपं तद्दशांशाभिषेकत
द्दशांशब्राह्मणभोजनरूपपुरश्चरणमहं करिष्ये इति संकल्प्य ॥ भू
तशुद्धिप्राणायामं च कृत्वा ॥ स्वां स्वां मुद्रां बद्ध्वा ॥ स्वस्वपद्धत्युक्तक्रमे
ण देवतां संपूज्य दीपं प्रज्वालितं देवताग्रदये कृत्वा प्रातःकालसमा
रभ्य मध्यंदिनं यावज्जपं कुर्यात् ॥ ततो होमः ॥ ततस्तर्पणम् ॥ ॐ
लार्पणे ॥ तर्पणान्ततः कुर्यात्तीर्थोदैर्देवमिश्रितैः जपेद्देवं समावा
स्वपाधाधेरुद्रकान्तमैः ॥ संपूज्याविधिवद्दत्त्वा परिवारसमन्वितम्
पकेकमञ्जलिं तोयं परिवारान्प्रतर्पयेत् ततो होमाद्दशांशेन तर्पयेत्

रदेवताम् तर्पणं तत्स्नानप्रकारेणैव क्रमम् अभिषेकवाक्यं तत्र नमो मूलमु
च्चार्यामुकदेवतामहमभिषिञ्चामीति कलशमुद्रया स्वमूर्ध्नि समभिषिञ्चेत्
तथा च ॥ नमोन्ते मन्त्रमुच्चार्य तदन्ते देवताभिधाम् द्वितीयान्तामहं पश्चाद
भिषिञ्चाम्यनेन तत् अभिषिञ्चेत्स्वमूर्धानं तोयैः कुम्भाख्यमुद्रया ॥ शक्ति
विषये ॥ मन्त्रान्ते नाम उच्चार्य षिञ्चामीति नमः पदमिति ॥ नीलतन्त्रे ॥
मूलान्ते नाम चोच्चार्य षिञ्चामीति नमः पदम् ॥ ततो दक्षिणा ॥ अद्य कृ
तैतदमुकदेवताया अमुकमन्त्रस्य पुरश्चरणकर्मणः साङ्गतार्थं दक्षिणा
मिदं काञ्चनं यथानामगोत्राय गुरवे तुभ्यमहं संप्रददे ॥ ततोच्छिद्रावधा
रणं कुर्यात् ॥ यत्तच्छिद्रं तपश्छिद्रं यच्छिद्रं यजने मम तत्सर्वमच्छिद्रमस्तु
भास्करस्य प्रसादतः ॥ अथ ग्रहणपुरश्चरणसंकल्पः ॥ तथा ॥ ॐ अ
द्येत्यादि अमुकगोत्रोऽमुकदेवशर्मा राहुग्रस्ते दिवाकरे निशाकरे वा ॥
अमुकदेवताया अमुकमन्त्रसिद्धिकामो ग्रासादिविमुक्तिपर्यन्तममुकम
न्त्रस्य जपरूपपुरश्चरणमहं करिष्ये इति संकल्प्य जपेत् तद्दिने तत्परदिने
वा स्नानादिकं विधाय ॐ अद्येत्यादि अमुकमन्त्रस्य कृतैतद्ग्रहणकालीने
पर्वकाले जपस्य तद्दशांशहोम तद्दशांशतर्पण तद्दशांशाभिषेक तद्दशांशब्रा
ह्मणभोजनकर्माण्यहं करिष्ये इति संकल्प्य होमादिकं कुर्यादिति द
क्षिणादिकं तु पूर्ववत् ॥ अथ कूर्मचक्रम् ॥ दीपस्थानं समाश्रित्य कु
र्यात्कर्म फलप्रदम् दीप्यते पुरुषो यत्र दीपस्थानं तदुच्यते चतुरस्रां भुवं
भित्वा कोष्ठानां नवकं लिखेत् पूर्वकोष्ठादि विलिखेत्सम वर्णाननुक्र
मात् लक्षवीरो मध्यकोष्ठे स्वरानुगमक्रमाल्लिखेत् दिक्षु पूर्वादितोय
वक्त्रेशाद्युत्तरसंस्थितिः मुखं तस्य विजानीयाद्धस्तावुभयतः स्थितौ
कोष्ठकेलौ उभौ पादौ द्वे शिरःपुच्छमीरितम् क्रमेणानेन विभजेन्मध्य
स्थमपि भागतः मुखस्थो लभते सिद्धिं करस्थः स्वल्पजीवनम् उदासी
नः कुक्षिसंस्थः पादस्थो दुःखमाप्नुयात् पुच्छस्थः पीड्यते मन्त्री बन्धनोच्चा
टनादिभिः कूर्मचक्रमिदं प्रोक्तं मन्त्राणां सिद्धिसाधनम् कूर्मचक्रमवि
ज्ञाय यः कुर्यात्तु जपयज्ञकम् तस्य यज्ञफलं नास्ति सर्वानर्थाय कल्पते ॥

तं॰
सा॰
१४
14

अथमंत्राणांदशसंस्काराः ॥ तत्रगौतमीये ॥ जननंजीवनंपश्चात्ताडनं
बोधनंतथा अथाभिषेकोविमलीकरणाप्यायनेपुनः तर्पणंदीपनंगु
प्तिर्दशैतामंत्रसंस्क्रियाः स्वर्णादिपात्रेसंलिख्यमातृकायंत्रमुत्तमम्
काश्मीरचंदनेनापिभस्मनावाथसद्व्रते काश्मीरंशाक्तिसंस्कारेचंदनं
वैष्णवेमतौ शैवेभस्मसमाख्यातंमातृकायंत्रलेखने शैवादिमंत्रभे
देनप्रोक्तंद्रव्यत्रयंशुभे मंत्राणांमातृकामध्यादुद्धारोजननंस्मृतम् पं
क्तिक्रमेणविधिनामुनिभिस्तत्रनिश्चितम् प्रणवांतरितांकृत्वामंत्रव
र्णाञ्जपेत्सुधीः प्रत्येकंशतवारंतज्जीवनंतदुदाहृतम् मंत्रवर्णान्समा
लिख्यताडयेच्चंदनांभसा प्रत्येकंवायुबीजेनपूर्ववत्ताडनंमतम् विलि
ख्यमंत्रवर्णांस्तुप्रसूनैःकरवीरजैः तन्मंत्रवर्णसंख्यातैर्हन्याद्रेफेनबोध
नम् तत्तंत्रोक्तविधिनाअभिषेकःप्रकीर्तितः अश्वत्थपल्लवैःसिंचेत्तं
त्रीमंत्रार्णसंख्यया संचिंत्यमनसामंत्रंस्वसुषुम्णामूलमध्यतः ज्योतिर्मं
त्रेणविधिवद्दहेन्मलत्रयंयती तारंव्योमाग्निमनुयुग्दंडीज्योतिर्मनुर्मतः
मनुः तारंॐकारः दंडीअनुस्वारः व्योमहकारः अग्नीरेफः स्ववर्णेनकु
शतोयेनपुष्पतोयेनवातथा तेनमंत्रेणविधिवदाप्यायनविधिःस्मृ
तः मंत्रेणवारिणातंत्रेतर्पणंतर्पणंमतम् मधुनाशाक्तिमंत्रेतुवैष्णवे
चेदुग्धजलैः शैवेघृतेनदुग्धेनतर्पणंसम्यगीरितम् ॥ अभिषेकेपित
थ्या ॥ तारमायारमायोगान्मनोर्दीपनमुच्यते जपमानस्यमंत्रस्य
गोपनंत्वप्रकाशनम् संस्कारादशसंप्रोक्ताःसर्वतंत्रेषुगोपिताः यान्कृ
त्वासंप्रदायेनमंत्रीवांछितमाप्नुयात् मलत्रयमितिआणवंमायिकं
कार्मणम् मायिकंमाययावोक्तंपौरुषंकार्मणंमलम् आणवंतद्दु
यत्तेयन्निषिद्धंतन्मलत्रयम् तारमायारमायोगइति तारमायारमा
बीजपुटितंमंत्रमष्टोत्तरशतंजपेदित्यर्थः ॥ तथाविश्वसारे ॥ ता
रमायारमाबीजपुटितेनजपेन्मनुम् शतमष्टोत्तरंचैवदीपनंत्वाय
कोनमः ॥ अथकलावतीदीक्षाप्रयोगः ॥ तत्रप्राग्भः पूर्वमुपोषि
तः कृतनित्यक्रियः स्वस्तिवाचनपूर्वकंसंकल्पंकुर्यात् ॥ यथा ॥

ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेवशर्माऽहं धर्मार्थकाममोक्षप्राप्तिकामोऽ
मुकदेवतायामन्त्रकर्तृत्वेऽमुकमन्त्रदीक्षामहं करिष्ये इति संकल्प्य गुरुं
वृणुयात् ॥ तद्यथा ॥ ॐ साधु भवानास्तां प्रसादात्मे ॐ अर्चयिष्या
मो भवन्तं ॐ अर्चय ततो गन्धपुष्पवस्त्रालंकारादिभिर्गुरुमभ्यर्च्य द
क्षिणां जानु कृत्वा पठेत् विप्रः ॐ अद्येत्यादि अमुकगोत्रोऽमुकदेव
शर्माऽमुकदेवतायामन्त्रकर्तृत्वेऽमुकमन्त्रदीक्षाकर्मणि अमुकगोत्रम
मुकदेवशर्माणं एभिः पाद्यादिभिरभ्यर्च्य गुरुत्वेन भगवन्तमहं वृणे
ॐ वृतोऽस्मीति प्रतिवचनम् यथाविहितं कर्म कुरु यथाज्ञानतः कर
वाणीति प्रतिवचनम् ततो गुरुराचम्य द्वारदेशे सामान्यार्घ्यं कुर्यात्
तद्यथा ॥ वामे त्रिकोणवृत्तभूबिम्बं विलिख्य ॐ आधारशक्तये नमः
इति संपूज्य फडिति मन्त्रेण पात्रं प्रक्षाल्य साधारं तत्र निधाय नमः इति सं
पूज्य ॐ इति अर्ककृशानुद्रव्यात्मरूपं मण्डलाद्यं गंगे च यमुने चेत्यादिना ती
र्थमावाह्य ॐ इति गन्धपुष्पाक्षतानि निक्षिप्य धेनुमुद्रां प्रदर्श्य ॐ इति अष्ट
धा दशधा वा जप्त्वा फडिति तज्जलेन द्वारमभ्युक्ष्य द्वारपूजां समाचरे
त् ॥ तथा च ॥ त्रिकोणवृत्तभूबिम्बं मण्डलं रचयेत्ततः आधारशक्तिं
संपूज्य तत्राधारं विनिक्षिपेत् अस्त्रेण पात्रं संशोध्य हृन्मन्त्रेण प्रपूरयेत्
निक्षिपेत्तीर्थमावाह्य गन्धादीन् प्रणवेन तु दर्शयेद्धेनुमुद्रां वै सामान्या
र्घ्यमिदं स्मृतम् मन्त्रेण प्रणवेनैव सामान्यार्घ्यमिदं स्मृतम् ॥ इति गौ
तमीयवचनात् ॥ अष्टधा प्रणवजपः विशेषार्घ्ये तथादर्शनात् एवा
मादेवे तु दशधा तदर्घ्येन तथादर्शनात् फडिति जलेन द्वारमभ्युक्ष्य ॥
द्वारपूजां कुर्यात् तद्यथा ऊर्ध्वो... बरे ॐ विघ्नेशाय नमः अधःकोण
द्वये ॐ महालक्ष्म्यै नमः ॐ सरस्वत्यै नमः दक्षिणशाखायां ॐ वि
घ्नाय नमः वामशाखायां ॐ क्षेत्रेशाय नमः तयोः पार्श्वे ॐ गंगायै
नमः ॐ यमुनायै नमः देहल्यां अस्त्राय नमः इति पूजयेत्स्वच्छा
रिणा अपसर्पयेत् ॐ द्वारदेवताभ्यो नमः इत्येतन्मात्रं त्रिपुरादिषु
नादिषु गणेशं क्षेत्रपालं च वटुकं योगिनीस्तथा गंगां च यमुनां चैव

लक्ष्मीवान्तीति तेनायजेत् वेश्मवेत्तु नन्दस्तु नन्दप्रवृत्तो बलएव च प्रबलो
भद्रनामा च सुभद्रो विघ्नवेश्मवाः प्रणवादिनमोन्तेन नाममन्त्रेण पूजये
त् ततो दक्षिणपादपुरस्सरं वामशाखां स्पृशन् दक्षिणाङ्गं संकोचय
न् मण्डपान्तः प्रविश्य नैरृत्यां ॐ वास्तुपुरुषाय नमः ॐ ब्रह्मणे नमः
ततो देवतामन्त्रेण दिव्यदृष्ट्यावलोकयन् दिव्यान्विघ्नानुत्सार्य अ
स्त्राय फडिति जलेनान्तरिक्षगान्विघ्नानुत्सार्य वामपार्ष्णिघातत्रयेण
भौमान् फडिति नत्वा विघ्नानुत्सारय ॐ अपसर्पन्तु ते भूता ये भू
ताभुवि संस्थिताः ये भूता विघ्नकर्तारस्ते नश्यन्तु शिवाज्ञया इमं ततो
विकिरेत् ॥ तथा च ॥ लाजाश्चन्दनसिद्धार्थभस्मदूर्वाक्षताङ्कुशाः वि
किरा इति संदिष्टाः सर्वविघ्नौघनाशकाः ह्रीं आधारशक्तिकमलास
नाय नमः इत्यासनं संपूज्य ॥ आसनमन्त्रस्य मेरुपृष्ठ ऋषिः सुत
लं छन्दः कूर्मो देवता आसनपरिग्रहे विनियोगः ॐ पृथ्वि त्वया धृता
लोका देवि त्वं विष्णुना धृता त्वं च धारय मां नित्यं पवित्रं कुरु चासनम्
इति पठित्वा ॥ स्वस्तिकादिक्रमेणोपविशेत् ॥ तथा चोक्तं तन्त्रान्तरे ॥
आदौ विघ्नसमुत्सार्य पश्चादासनम् अथवा आसने स्थित्वा विघ्नानु
त्सारयेत्सुधीः ततः पञ्चगव्येन मण्डपं संशोधये
य ॥ पञ्चगव्येन तद्द्रव्यं मण्डपं च विशोधयेत् ॥ तथा गौतमी
पलमात्रं तु मध्यभागो गोमूत्रं तावदिष्यते पञ्चगव्यप्रधानं तत्रैव
लकद्वयम् दधिप्रसृतिमात्रं स्यात् पञ्चगव्यमिदं स्मृतम्
सानां समानो भागः इष्यते मूलमन्त्रेण संमन्त्र्य तेनैव परिशोधयेत् अथवा पञ्चग
तेन सर्वविशुद्धिः स्यात्सर्वपापनिकृन्तनम् स्वदक्षिणभागे पूजाद्रव्या
णि वामे स्थापयेत् तान्बुद्धिं कृत्वा स्थाप्य हस्तप्रक्षालनार्घ्यपात्रान्तरं
इष्टे स्थापयेत् सर्वं दत्त्वा घृतप्रदीपांश्च पुटाञ्जलिर्भूत्वा वामे ॐ
गुरुभ्यो नमः ॐ परमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः दक्षि
णभागे ॐ गणपतये नमः मध्ये अमुकदेवतायै नमः तथा च ॥
कृत्वाञ्जलिपुटो भूत्वा वामे गुरुत्रयं यजेत् गुरुं च परमादिं च परापर।

गुरुं तथा दक्षिणे पार्श्वे गणेशं च मूर्ध्नि देवं विभावयेत् ततः फडिति मं
त्रेण गन्धपुष्पाभ्यां करौ संमार्ज्य ऊर्ध्वोर्ध्वं तालत्रयं दत्वा छोटिकया दि
ग्बन्धनं कुर्यात् ततो रमिति जलधारया वह्निप्राकारं चिन्तयेत् ॥ त
तो भूतशुद्धिः ॥ ततो मातृकान्यासः ॥ ततः प्राणायामः ॥ ततः
पीठन्यासः ॥ ततः ऋष्यादिन्यासः ॥ ततो मन्त्रन्यासः ॥ ततो मुद्रा
प्रदर्शनम् ॥ ततो ध्यानम् ॥ ततो मानसी पूजा ॥ ततोऽर्घ्यस्था
पनम् ॥ तत्रात्मवामे त्रिकोणं मण्डलं कृत्वा तत्र त्रिपादिकामारोप्य
फडिति शंखं प्रक्षाल्य तदुपरि संस्थाप्य नमः इति मन्त्रेण गन्धपुष्पा
क्षता पूर्वादि तत्र निक्षिप्य विमलजलेन क्षं लं हं सं षं शं वं लं रं यं मं भं
बं फं पं नं धं दं थं तं णं ढं डं ठं टं ञं झं जं छं चं ङं घं गं खं कं अः अं औं ओं ऐं
एं ॡं ऌं ॠं ऋं ऊं उं ईं इं आं अं इत्यनेन मूलेन च पूरयेत् तथा च गौत
मीये मं वह्निमण्डलाय दशकलात्मने नमः त्रिपादिकायाम् अं सूर्य
मण्डलाय द्वादशकलात्मने नमः शंखे उं सोममण्डलाय षोडशकला
त्मने नमः इति जले संपूज्य ओं गंगे च यमुने चैव गोदावरि सरस्वति
इत्यनेन क्रोमिति अंकुशमुद्रया तीर्थमावाह्य अमुके इहावहेह तिष्ठेति
स्वहृदया देवतां तत्रावाह्य लमिति अवगुण्ठ्य वषडिति गालिनीमुद्रां तत्र
प्रदर्श्य वौषडिति तज्जलं वीक्ष्य पुनः रां मन्त्रैः सकलीकृत्य गन्धपुष्पाभ्यां
नम इति तत्र देवतां संपूज्य तदुपरि मत्स्यमुद्रयाच्छाद्य तदुपरि मू
लमन्त्रमष्टधा जपेत् ॥ तथा च गौतमीये ॥ गन्धपुष्पैः समभ्यर्च्य
कृत्वाच्छाद्य मत्स्यया जपेत् अष्टकृत्वा जपेन्मन्त्रं पिधायाग्यां गालिनीं स
मेत् अत्र कुर्यात्पदं तत्तद्देवतायाः परम् ततो यमिति मन्त्रेण धेनुमुद्राप्रद
र्शनैः स्पर्शेण संरक्ष्य तस्मात् किंचिज्जलं प्रोक्षणीपात्रे निधाय तेनोदकेना
त्मानं पूजोपकरणं चाभ्युक्ष्य मूलमन्त्रेण पीठन्यासक्रमेण शरीरे ध
र्मादीन् पूजयेत् ॥ तद्यथा ॥ दक्षिणस्कन्धे ॥ ओं धर्माय नमः वा
मस्कन्धे ओं ज्ञानाय नमः वामोरौ ॥ ओं वैराग्याय नमः दक्षिणोरौ
ओं ऐश्वर्याय नमः वामपार्श्वे ओं अज्ञानाय नमः नाभौ ओं अवैराग्य

तं· सा· १९ 16

यनमः दक्षिणपार्श्वे ॐ अनैश्वर्यायनमः हृदये ॐ अनन्तायनमः ॐ
पद्मायनमः ॐ अं अर्कमण्डलायद्वादशकलात्मनेनमः ॐ सों सोम
मण्डलायषोडशकलात्मनेनमः ॐ रं वह्निमण्डलायदशकलात्मने
नमः सं सत्त्वायनमः रं रजसेनमः तं तमसेनमः आं आत्मनेनमः
अं अन्तरात्मनेनमः पं परमात्मनेनमः ह्रीं ज्ञानात्मनेनमः ततोहृ
त्पद्मस्यपूर्वादिकेषुदलेषुपीठशक्तीःसम्पूज्यमध्येपीठमन्त्रंयजेत्
तत्रहृदयमूलदेवतांनैवेद्यविनागन्धाद्यैःसम्पूजयेत् ॥ तथाच
निबन्धे ॥ मानसक्रमेणदेहेषुधर्मादीनपिपूजयेत् पुष्पाद्यैःपीठम
न्वेतमस्मिन्परमदेवताम् विनानैवेद्यंगन्धाद्यैरुपचारैस्समर्चयेत्
ततः उत्तमाङ्गहृदयमूलाधारपदेसर्वाङ्गेषुमूलेनपञ्चपुष्पाञ्जलिं
दत्वायथाशक्तिमन्त्रंजप्त्वा गुह्यादिनाजपंसमर्पयेत् तथाचनिब
न्धे पञ्चकृत्वस्ततोदद्यात्पुष्पाञ्जलिमनन्यधीः उत्तमाङ्गहृदयाधार
पदेसर्वाङ्गकेक्रमात् सर्वमेतच्चप्रोक्षणीपात्रस्थेनजलेनविदध्यात्
ततःप्रोक्षणपात्रस्थतोयंविसृज्यपूर्ववत्सम्पूर्य ॥ बहिःपूजामारभेत् ॥
तत्रवक्ष्यमाणशारदोक्तसर्वतोभद्रमण्डलाद्यन्यतमंमण्डलंविलिखेत्
ॐ मण्डलायनमः इतिमण्डलंसम्पूज्य शालिभिःकर्णिकामध्यमापूर्य
तदुपरितण्डुलानांस्तोमं तेषुदर्भाणांस्तोमं विष्टरंवाततस्तन्तउ
परिस्तरेत् ततोमण्डलदेवताःसम्पूजयेत् ॥ तद्यथा ॥ पीठमध्ये
आधारशक्त्यैनमः कूर्मायनमः इत्यादिपीठमन्त्रान्तंततःसकलोकपी
ठपूजांकुर्यात् ततोमण्डलेप्रादक्षिण्येनयं धूम्रार्चिषेनमः इत्यादिवह्नि
मायावह्निदशकलाविन्यस्यसम्पूजयेत् ततोहेमादिरचितंकुम्भंफडिति
प्रक्षाल्य ॥ चन्दनागुरुकर्पूरैर्धूपयित्वात्रिगुणात्मकतन्तुनासंवेष्ट्य
ॐ कुम्भायनमः इतिगन्धपुष्पाभ्यांसम्पूज्यविष्टरादेतननवरत्नानिस
तिष्ठप्राणमुक्तवस्त्र कुम्भपीठयोरैक्यंविभाव्यपीठेस्थापयेत् ॥ ॐ
नमीयकुम्भेविन्यस्यानेन ॥ हैमंमणिमयंतथाताम्रमार्त्तिकंवात्वशक्ति
नः वित्तशाठ्यंनकुर्वीतकृतेनिष्फलमाप्नुयात् ॥ षट्त्रिंशदङ्गुलंकुं

भविस्तरोन्नतिशालिनम् षोडशं द्वादशं वापि ततो मूलेन कारयेत् ॐ मं प्रा-
दक्षिण्येन कं भं तापिन्यै नमः इत्यादि द्वादशकलाविमर्शमत्र पूजयेत् ततः
क्षीरकुम्भकषायेण पलाशाश्वत्थभवेन वा तीर्थोदकैर्वा कर्पूरगंधपुष्पसु-
वासितैः आत्माभेदेन विधिवन्मातृकाप्रतिलोमतः जपन्मूलमणिं त-
द्वापूरयेद्देवताधिया ततश्चन्द्रमसः अमृतादिषोडशकला जलेन प्रादक्षि-
ण्येन विमर्शयेत् अं अमृतायै नमः इत्यादिनामसंपूज्य शंखोत्तरे क्षीरकषा-
यादिद्रव्यैः रात्रिपूर्णं गंधाष्टकं विलोड्य तस्मिन् जले सकलाः कला आवाह्य
पूजयेत् गंधाष्टकं च त्रिविधम् शाक्तवैष्णवशैवात्मकम् तत्र शाक्तं यथा ॥
चंदनागुरुकर्पूरचोरकुंकुमरोचना जटामांसीकपियुता शाक्ते गंधाष्ट-
कं विदुः चंदनागुरुह्रीवेरकुष्ठकुंकुमसेव्यकाः जटामांसीमुरमिति वि-
ष्णोर्गंधाष्टकं स्मृतम् चंदनागुरुकर्पूरतमालजलकुंकुमम् कुशीरकु-
ष्ठसंयुक्तं शैवं गंधाष्टकं स्मृतम् ॥ अस्यार्थः ॥ चंदनागुरुकर्पूरकुल-
शांटीकुंकुमरोचना जटामांसी गवियाना इति शाक्तो गंधाष्टकम् चंद-
नागुरुवालकुष्ठकुंकुमसेव्यतवीरणमूलजटामांसीदेवदारु इति विष्णो-
र्गंधाष्टकम् चंदनागुरुकर्पूरतमालवालकुंकुमरक्तचंदनकुष्ठमिति शै-
वं गंधाष्टकम् गंधाष्टकं तत्त्रिविधं शाक्तवैष्णवशैवात्मकम् तत्रादौ व-
ह्नेर्दशकलाः पूजयेत् ॥ तद्यथा ॥ वह्नेर्धूम्रार्चिरादिदशकला इहा-
गच्छत इह तिष्ठत इह सन्निधत्ते भवत ततो मूलमंत्रेण प्रतिलोमेन जप-
न् मंत्रदेवतां मनसा ध्यायन् आं सां प्राणप्रतिष्ठां कुर्यात् ॥ तद्यथा ॥
आं ह्रीं क्रों हंसः धूम्रार्चिरादीनां वह्नेर्दशकलानां प्राणा इह प्राणाः आं धू-
म्रार्चिरादीनां वह्नेर्दशकलानां सर्वेंद्रियाणि एवं आं धूम्रार्चिरादिवह्ने-
र्दशकला वाङ्मनश्चक्षुःश्रोत्रघ्राणप्राणा इहागत्य सुखं चिरं तिष्ठ-
न्तु स्वाहा इति प्राणान् प्रतिष्ठाप्य गंधादिभिः पूजयेत् ॐ धूम्रार्चिरादिव-
ह्नेर्दशकलाभ्यः एष गंधो नमः इत्यादिना पंचोपचारैः संपूज्य प्रत्येकं त-
त् पूजयेत् ॥ तद्यथा ॥ यं धूम्रार्चिषे नमः रं ऊष्मायै नमः लं ज्वलिन्यै
नमः वं ज्वालिन्यै नमः शं विस्फुलिंगिन्यै नमः षं सुश्रियै नमः सं सु-

रूपायैनमः हं कपिलायैनमः लं ह्रस्वबाहायैनमः ह्लं कम्बबाहायैनमः
शाक्त्यैव प्रत्येकमावाह्य पाद्यादिभिः सूर्यस्य तपिन्यादिद्वादशकलाः पूर्वव
दावाहनादिकं कृत्वा पूजयित्वा च प्रत्येकं पूजयेत् तद्यथा कं भं तपिन्यै
नमः खं बं तापिन्यैनमः गं फं धूम्रायैनमः घं पं मरीच्यैनमः ङं नं ज्वा
लिन्यैनमः चं धं रुच्यैनमः छं दं सुषुम्णायैनमः जं थं भोगदायैनमः
झं तं विश्वायैनमः ञं णं विबोधिन्यैनमः टं ढं धारिण्यैनमः ठं डं क्षमा
यैनमः इति प्रत्येकं पूजयेत् शाक्त्येव प्रत्येकमावाह्य पूजयेत् ॥ त
थाच तंत्रे ॥ कभाद्या वसवः सौराः ठडान्ता द्वादशीरिताः ततः चंद्रस्या
मृतादिषोडशकलाः प्राक्प्रतिष्ठादिकं कृत्वा पूर्ववत्पूजयेत् । तद्यथा
अं अमृतायैनमः आं मानदायैनमः इं पूषायैनमः ईं तुष्ट्यैनमः उं पुष्ट्यै
नमः ऊं रत्यैनमः ऋं धृत्यैनमः ॠं शशिन्यैनमः ऌं चंद्रिकायैनमः
ॡं कान्त्यैनमः एं ज्योत्स्नायैनमः ऐं श्रियैनमः ओं प्रीत्यैनमः औं अंग
दायैनमः अं पूर्णायैनमः अः पूर्णामृतायैनमः शाक्त्येव प्रत्येकमा
वाह्य पूजयेत् ततः पंचाशत्कलाः पूज्याः यथा ॥ सृष्ट्यादिकचवर्गाद
शकलाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् ॥ पूजनं च ॥ कं सृ
ष्ट्यैनमः खं ऋद्ध्यैनमः गं स्मृत्यैनमः घं मेधायैनमः ङं कान्त्यैनमः चं
लक्ष्म्यैनमः छं द्युत्यैनमः जं स्थिरायैनमः झं स्थित्यैनमः ञं सिद्ध्यैनमः
शाक्त्येव प्रत्येकमावाह्य पूजयेत् ततः हंसः शुचिषद्वसुरन्तरिक्षसद्धोता वे
दिषदतिथिर्दुरोणसत् नृषद्वरसदृतसद्व्योमसदब्जा गोजा ऋतजा अद्रि
जा ऋतं बृहत् इति मंत्रेणावाह्य शिवं पूजयेत् ततो जरादिटतवर्गादश
कलाः पूर्ववत्प्राणप्रतिष्ठादिकं कृत्वा पूजयेत् प्रत्येकं तु ॥ टं जरायै
नमः ठं पालिन्यैनमः डं शान्त्यैनमः ढं ऐश्वर्यैनमः णं रत्यैनमः तं का
मिकायैनमः थं वरदायैनमः दं ह्लादिन्यैनमः धं प्रीत्यैनमः नं दीर्घा
यैनमः शाक्त्येव प्रत्येकमावाह्य पूजयेत् ततः प्रतद्विष्णुस्तवते वीर्ये
ण मृगो न भीमः कुचरो गिरिष्ठः यस्योरुषु त्रिषु विक्रमणेष्वधिक्षियन्ति
भुवनानि विश्वा इति मंत्रेणावाह्य पूजयेत् तथा च तंत्रे ॥ प्रतद्विष्णुस्य

पते वीर्येण मृगो न भीमः इत्यपि ऋचा ः पदतः प्राप्ते गिरिष्ठः पदतो लिखेत्
यस्योरुषु त्रिषु रूपं च ततो विक्रमणेष्वधि क्षियंति भुवनानि इति विष्णुप
दं समुद्धरेत् ततः नीलादि पयवर्गे दशकलाः पूर्ववत्पूजयेत् पं नीला
यै नमः फं रौद्र्यै नमः बं भयायै नमः भं निद्रायै नमः मं तंद्रायै नमः यं क्षु
धायै नमः रं क्रोधिन्यै नमः लं क्रियायै नमः वं उत्कारिण्यै नमः शं
मृत्यवे नमः अं शाक्तं सकलमावाह्य पाद्यादिभिः पूजयेत् ततः
त्र्यंबकं यजामहे सुगंधिं पुष्टिवर्धनम् उर्वारुकमिव बंधनान्मृत्यो
र्मुक्षीय मामृतात् इति मंत्रमावाह्य पूजयेत् ततः पीतादि षवर्गे पंच कलाः
प्राणप्रतिष्ठादिकं कृत्वाऽऽवाह्य पाद्यादिभिः पूजयेत् यथा षं पीतायै
नमः सं श्वेतायै नमः हं अरुणायै नमः लं असितायै नमः क्षं अनंता
यै नमः शाक्तं सकलमावाह्य पूजयेत् ततः तद्विष्णोः परमं पदं
मित्यादि जपित्वा पठित्वाऽऽवाह्य पूजयेत् ततो निवृत्यादि स्वरषोडशक
लाः पूर्ववत् प्राणप्रतिष्ठादिकं कृत्वाऽऽवाह्य पाद्यादिभिः पूजयेत् ॥ त
यथा ॥ अं निवृत्त्यै नमः आं प्रतिष्ठायै नमः इं विद्यायै नमः ईं शांत्यै
नमः उं इंधिकायै नमः ऊं दीपिकायै नमः ऋं रेचिकायै नमः ॠं मो
चिकायै नमः लृं परायै नमः ॡं सूक्ष्मायै नमः एं सूक्ष्मामृतायै न
मः ऐं ज्ञानामृतायै नमः ओं आप्यायिन्यै नमः औं व्यापिन्यै नमः अं
व्योमरूपायै नमः अः अनंतायै नमः शाक्तं सकलमावाह्य पूजये
त् ॥ ओं तद्विप्रासो विपन्यवो जागृवांसः समिंधते विष्णोर्यत्परमं प
दम् ॥ विष्णुर्योनिं कल्पयतु त्वष्टा रूपाणि पिंशतु आसिंचतु प्रजाप
तिर्धाता गर्भं दधातु ते गर्भं धेहि सिनीवालि गर्भं धेहि सरस्वती गर्भं
ते अश्विनौ देवावाधत्तां पुष्करस्रजा इत्यावाह्य पूजयेत् ततः कलात्म
कं तद्बिंबं विष्णुकाष्ठं कुंभे निक्षिपेत् ततोऽश्वत्थपनसचूतपल्लवैरिंद्रव
ल्लीवेष्टितैः कल्पवृक्षत्वबुद्ध्या कुंभवक्त्रं पिधाय तस्मिन्वक्त्रे सफलान्त
त्र चपकं कल्पवृक्षफलबुद्ध्या स्थापयेत् ततः कुंभं निर्मलक्षौमसूत्रेण
संवेष्ट्य मूलेन कुंभमूर्तिं सकलत्वपुरुषोक्तरूपं देवतां ध्यात्वा तस्यामा

तं॰
सा॰
१८
18

वाप्यपूजयेत् मूलमंत्रमुच्चार्यो ऽमुक इहावह२ इहतिष्ठ२ इहसन्निधिंदेहि
इहसन्निरुध्यस्व अत्रावाहनादिकं कृत्वा कूर्मिमयं गुह्यदेवतांगेषु ग्रामा
सं कृत्वा वस्मितिधेनुमुद्रयामृतीकृत्य परमीकरणं कुर्यात् ततस्प्रा
णप्रतिष्ठादिकं कृत्वा षोडशोपचारैः पूजयेत् अर्घ्यादिपात्रनियमस्तुगौ
तमीये अर्घ्यस्य त्रीणि पात्राणि पाद्यस्यापि त्रयं भवेत् तथैवाचमनीया
निपात्राणि च विभागशः तथाकरणदौर्बल्यादेकमेव प्रशस्यते सा
मान्यविशेषार्घ्ययोर्ग्रहणमावश्यकत्वम् ॥ तथा च नवरत्नेश्वरः ॥ एक
पात्रं न कुर्वीत यदि मोहान्महेश्वरः मंत्रः पराङ्मुखो याति शापदस्य परे पदे
इहलोके दरिद्रस्स्यान्मृतेश्चा नरकं व्रजेत् ॥ तथा च राघवभट्टः ॥ व
स्वगुलविहीनेन न पात्रं कारयेद्बुधः सर्वत्रैव प्रशस्तोऽब्जः शिवसूर्यार्चनं
विना मूलमुच्चार्य एतत्पाद्यं अमुकदेवतायै नमः इति पादाम्बुजे एता
श्यामाक… दूर्वाब्जविष्णुक्रान्ताभिर्धीरितम् एतदर्घ्यममुकदेवतायै स्वाहा
अर्घ्यं दिशेत्ततो मूर्ध्नि शिरोमंत्रेण देशिकः ॥ इति वचनात् ॥ स्वधांम
त्रेणवदनेदद्यादाचमनीयकम् इमत्रस्वधापदंपाठं कुर्वन्तः स्वधाशब्दे
नामृतवाचकत्वात् इदमाचमनीयमिति वदन्ति ॥ तथा च ॥ म
धुपर्कं ततो दद्यान्मूलमंत्रेण देशिक इति वचनात् न च मधुपर्कमात्र
विषयमिदम् स्वधाग्रहणात् ततः कुर्यान्मधुपर्कं मुखाम्बुजे तेनैव मंत्र
नाकुर्यादभिराचमनीयकम् ॥ तथा च ॥ वाग्भवेन च मंत्रेण दद्या
दाचमनीयकमिति वचनाच्च तथा स्वधीत्याचमनीयकं त्रिवारं मु
खाम्बुजे स्वधीति मधुपर्कं च पुनराचमनीयकमात्ममंशमुवचनाद
धुपर्के पुनर्मूलमंत्रेण देशिकः वाग्भवेन च बीजेनेत्यत्र सहार्थेन तृती
यां वदन्ति तदिदमाचमनीयकं व अमुकदेवतायै स्वधाममंत्रे तत्र वच
नद्वयं स्त्रीशूद्रविषयमिति केचित् मैथिल्याख्य स्वधापाठं कुर्वन्ति
नस्यैतिवकारस्याग्रावायकत्वात् किंच स्वाहात्मकस्वाहाशब्दे ना
र्थवचनात् ततश्च मत्पाभिप्राद्यतावमनदानेपि स्वाहानुरोधेन स्वधां
त्रेणानुवंभिर्यानेन तथा नमः स्वधा स्वाहा वौषडिति यथाक्रमाभि

पाद्यात् जलं मंत्रेणेति वचनप्रमाणमूल्यमिति तान्त्रिकाः तेनाचमनी-
यं स्वधेति जातीलवंगककोलात्मकमाचमनीयं वदंति अर्घं स्वाहे-
ति ॥ गंधपुष्पाक्षतयवकुशाग्रतिलसर्षपदूर्वात्मकमर्घं शिरसि द-
द्यात् ॥ वैष्णवेत्वर्घादिक्रमेणैव देयमिति मधुपर्कः स्वधा आज्यं
दधिमधुसंमिश्रं तेन तदुक्तं मनीषिभिः पंचस्नानाचमनीयं स्वधा ततः
स्नानीयं निवेदयामि ततो वस्त्रयुगमयज्ञोपवीताभरणानि दद्यात्
ततो मंत्रपुटितमातृकावर्णेन तन्मामस्यानेन पूजयित्वा चंदनागुरुक-
र्पूरकालागुर्वात्मकं गंधं दद्यात् ॥ तथा च निवेद्य ॥ गंधचंदनक-
र्पूरकालागुरुभिर्वासिताः ततः पुष्पाणि वौषट् च ॥ तथावरणा-
र्चनामारभेत ॥ दाने सर्वत्र मूलमंत्रोच्चारणम् ततः गुग्गुल्वगुरु-
क्षीरशर्करामधुचंदनघृतात्मकं धूपं दद्यात् ॥ तथा ॥ गुग्गुल्व-
गुरुक्षीरशर्करामधुचंदनैः धूपोयमाज्यसंमिश्रो नीचैर्देवस्य देशि-
कः विशेषस्तंत्रांतरे ॥ तथा ॥ सिताज्यमधुसंमिश्रं गुग्गुल्व-
गुरुचंदनम् षडंगं धूपमेतन्नु सर्वदेवप्रियं सदा ॥ तथा च तंत्रे ॥
रोगरोगाह्वरोगादकेशः उत्तररूजतलघुपत्रविशेषः वक्रविवर्जि-
तकारिमुञ्जाधूपवर्तिविहस्तदरिभद्रा गुग्गुलं सरलं दारुपत्रं मला-
यसंभवम् ह्रीवेरमगुरुं कुष्ठं गुडं सर्जरसं चनम् हरीतकीनखो-
लाक्षा जटामांसी च पेलजम् षोडशांगं विदुर्धूपं देवप्रियं च कर्म-
णि मधुस्वाज्यघृतं तिगंधं गुग्गुल्वगुरुपेलजम् चंदनं सितदृष्टिसिद्धा-
र्थं दशांगो धूप उच्यते कर्पूरगर्भिणा वर्तिकया दीपं दद्यात् । तथा
च ॥ वर्त्तीकर्पूरगर्भिण्या सर्पिषा तिलजेन वा आरोप्य दर्पयेद्दी-
पान्वै सौरभशालिनः ॥ इति शारदायां ॥ गौतमीये विशेषस्तु ॥
तत्र तत्र जलं दद्यादुपचारांतरांतरैः ततो नैवेद्यानि दद्यात् गंधादिदाने
विशेषस्तंत्रांतरे मध्यमानामिकांगुष्ठैरंगुष्ठाग्रेण पार्वति दद्यात्प्र
विमलं गंधं मूलमंत्रेण साधकः अंगुष्ठतर्जनीभ्यां तु वक्रे पुष्पं निवेद-
येत् यथा गंधं तथा देवि धूपं दद्याद्यथाविधि मध्यमानामिकाभ्यां तु म

ध्यपर्वणि दैशिकः । अंगुष्ठाग्रेण देवेशि धूपं धृत्वा निवेदयेत् ततः सम
र्पयेद्धूपं घंटां वादयन् जयस्वनैः जपमंत्रेण तेनैव मंत्रमातः स्वाहेत्यन्दीर्घं च
अभ्युक्ष्य वारयेद्धूपं सम्यग्धूपं धूपयेत् ततः एवं दीपदानेऽपि घंटावादनं इति शै
वागमे धूपभाजनमत्रेणाभ्यर्च्य सुदर्शनेन अस्त्रेण पूजितां घंटां
वादयन् गुग्गुलं दहेत् एवं दीपदानेऽपि घंटावादनमिति ॥ तथा च गौत
मीये ॥ उत्थाय दृष्टिपर्यन्तं घंटां वामदिशि स्थिताम् वादयन् वामहस्ते
न दक्षहस्तेन चार्पयेत् ॥ यामले ॥ दीपं दक्षिणतो दद्यात् पुरतो वा न
पृष्ठतः वामतस्तु तथा धूपमग्रे वा न तु दक्षिणे नैवेद्यं दक्षिणे भाग
पुरतो वा न पृष्ठतः वामदक्षिणभागस्थे देवताया न तु साधकस्य तथा च
धूपदीपस्य तयोर्मध्ये देवताग्रे निवेदयेत् ॥ इति दर्शनात् ॥ घृतयुक्तं द
क्षिणे तैलयुक्तं वामे एवं सितावर्तिश्च दक्षिणे रक्ता चेद्वामे उभयं च देव
ता वामे आमाणे चैव दक्षिणे इति सांप्रदायिकं तदपि प्रमाणमूलम्
तथा च यामले ॥ दीपं दीक्षे घृतयुतं तैलयुक्तं च वामतः दक्षिणे च सि
तावर्तिश्च दक्षिणे रक्ता चेद्वामे उभयं च देवता वामे आमाणे चैव दक्षिणे
वामतो रक्तवर्तिकाम् पक्वापक्वविभागेन नैवेद्ये त्वपि संस्थितिः पुर
तो नियमो नास्ति दीपनैवेद्ययोः क्वचिदित्यादि ततो दंडवत्प्रणामादिका
वंदनम् ततः अष्टोत्तरशतं सहस्रं वा संजप्य गुह्यादिना जपं समर्पयेत्
अधुनैव होम इति क्रमदीपिका ततो मंत्रस्य दशसंस्कारः पूर्वोक्तेन
कार्याः ततो गुरुः शिष्यमानीय वो बद्ध्वा तेन शिष्यस्य नेत्रे वस्त्रेण
बद्ध्वा शिष्यांजलिं पुष्पैः पूरयित्वा गुरुः स्वयमेव मंत्रमुच्चरन् कलशो
देवताप्रीत्यै क्षेपयेत् ततो नेत्रवंधं धूरे कृत्वा सदर्भास्तरे आसीनः शिष्यस्या
त्मपूजा भूतशुद्ध्यादिकं विधाय तत्र मंत्रोक्तन्यासान् शिष्यस्य देहे कृत्वा
व कुंभस्थां देवतां पुनः संपूज्य नानोपचारैः संपूज्य पाद्यादिकं कृत्वा शिष्यमस्य सिं
उपवेशयेत् ततो मंगलाचारपूर्वकं ततः कुंभस्य मुद्रां हृत्वा तत्पल्लवेन स्थापयेत्
मुद्रितं पल्लवं शिष्यस्य शिरसि निधाय मातृकां मनसा जपन् मूलेन
साधिते न तोयेन मभिषेचयेत्, शिष्योऽपि
न लेनाचम्य वाससी परि

यायगुरोरासन्नियानुप्रविशेत् तामेवगुरुरात्मनोदेवतांशिष्यसंक्रान्तां
तयोरैक्यंसंभावयन् शिष्यंगंधादिभिःपूजयेत् ॐसहंसःस्वाहाहूंफडिति
मंत्रेणशिष्यस्यशिखांबद्ध्वाब्रह्मरन्ध्रककलान्यासः ॥ तद्यथा ॥ पादत
लाज्जानुपर्यंतं ॐनिवृत्त्यैनमः जानुनोर्नाभिपर्यंतं ॐप्रतिष्ठायैनमः
नाभेराकंठांतं ॐविद्यायैनमः कंठाद्याललाटं ॐशान्त्यैनमः कंठान्ना
भिपर्यंतं ॐविद्यायैनमः नाभेर्जानुपर्यंतम् ॥ ॐप्रतिष्ठायैनमः
जानुनोःपादपर्यंतं ॐनिवृत्त्यैनमः ततःशिष्यस्यशिरसिहस्तंदत्वा
ष्टोत्तरशतंजप्त्वाअमुकमंत्रंददामीतिशिष्यस्यहस्तेजलंदद्यात्
तथाचवासिष्ठे ॥ ततःशिष्यस्यशिरसिहस्तंदत्वाशतंजपेत् अष्टो
त्तरंततोमंत्रंदद्यादुदकपूर्वकं श्रावयोत्तस्यफलदोभवत्वेवमुदी
रयेत् ततोददस्वेतिशिष्योब्रूयात् ततःऋष्यादिसंयुक्तंमंत्रंगुरुर्द
क्षिणकर्णेत्रिःश्रावयेत् ॥ तथाचगौतमीये ॥ मायामजालंतस्य
देहेगुरुःसंन्यस्यततः दक्षकर्णेवदेन्मंत्रंत्रिवारंपूर्वमानसः ददे
तिद्विजातिविषयम् ॥ तथाचतंत्रे ॥ दक्षेकर्णेत्रिशोविद्यामेकवा
रेणचोच्चरेत् एवंविधिर्द्विजातीनांस्त्रीशूद्राणांचवामतः ॥ तथाच
विश्वसारे ॥ दक्षकर्णेवदेन्मंत्रमृष्यादिकसमन्वितम् तथातस्मिन्द
णेदेविजपेन्मंत्रंशताष्टकं शारदायांपुनः गुरोर्लब्ध्वापुनर्विद्यामष्ट
कृत्वाजपेत्सुधीः गुरुमंत्रदेवतानामैक्यंसंभावयन्धिया इतिवचनेन
ततद्भावनपरंजपविषयम् ततोगुरुचरणौदंडवत्पतितोवतिष्ठेत्
गुरुस्तु ॥ ॐउत्तिष्ठवत्सामुक्तोसिसम्यगाचारवान्भव इत्युत्थाप
येत् ततःशिष्यःकुशतिलजलान्यादाय ॐअद्यकृतैतदमुकमंत्र
ग्रहणप्रतिष्ठार्थंदक्षिणामिदंसुवर्णं अमुकगोत्रायामुकदेवशर्म
णेगुरवेतुभ्यमहंसंप्रददे ॥ शरीरमर्थंप्राणांश्चसर्वंतस्मैनिवेदयेत्
ततःप्रभृतिकुर्वीतगुरोःप्रियमनन्यधीः यद्यदिष्टतमंलोकेगुरवेतत्
निवेदयेत् सारतंत्रेदक्षिणानियमोयथा ॥ गुरवेदक्षिणांदद्यात्स
हायशिवात्मने सर्वस्वगात्रदर्धंवातदर्धंवानरात्मजया नचेत्तस्याचारि

तं॰
सा॰
२॰
20

णीशक्तिः कथमस्य भविष्यति ॥ अत्र ॥ सर्वस्वं दक्षिणां दद्यादर्धमर्धं दद्या
द्यशस्विनीः भूमिं वृत्तिकरीं दद्यात्पुत्रपौत्रानुयायिनीम् तथा गुरवे दक्षि
णां दद्यात्स्वर्णं वाससमन्वितम् गुरुसंतोषमात्रेण दुष्टमंत्रोपि सिध्यति
अन्यथा नैव सिद्धिः स्यादभिचाराय कल्पते दीक्षाग्रहणसामग्रीं गुरवे
ऽपि निवेदयेत् अन्यांश्च ब्राह्मणांस्तत्र यत्नतः परितोषयेत् ॥ विष्णुसारे
अष्टाधिकसहस्रं वा शतं वापि विधानतः स्वशक्तिरक्षणार्थाय गुरु
मंत्रं तदा जपेत् ततो मिष्टान्नपानादिना ब्राह्मणान् परितोष्य स्वयं भुंजीत
दीक्षादिवसे गुरुशिष्ययोरुपवासदोषमाह ॥ योगिनीहृदये ॥
मंत्रं दत्वा गुरुः शिष्यमुपवासं यदाचरेत् तस्य रुष्टः सदा देवः शापं दद्याद्भुजे
श्वरम् यद्यत्र होमः क्रियते तद्विधानम् ॥ इति कलावती दीक्षाप्रयो
गः ॥ अथ पंचायतनी दीक्षा ॥ तत्र यामले ॥ भवानी तु यदा मध्ये
पेशान्यामच्युतं यजेत् आग्नेय्यां पंचवक्त्रं च नैरृत्यां गणनायकम् वा
यव्यां तपनं चैव पूजाक्रम उदाहृतः यदा तु मध्ये गोविंदं पेशान्यां शं
करं यजेत् आग्नेय्यां गणनाथं च नैरृत्यां तपनं तथा वायव्यामंबिकां
चैव भोगमोक्षफलाप्तिकाम् शंकरस्तु यदा मध्ये पेशान्यामच्युतं य
जेत् आग्नेय्यां तपनं चैव नैरृत्यां गणनायकम् वायव्यां पार्वतीं चैव स्व
र्गमोक्षप्रदायिनीम् आदित्यस्तु यदा मध्ये पेशान्यां शंकरं यजेत् आग्ने
य्यां गणनाथं च नैरृत्यां केशवं तथा वायव्यामंबिकां देवीं स्वर्गसाध
नभूमिकाम् गणनाथो यदा मध्ये पेशान्यां केशवं तथा आग्नेय्या
मीश्वरं चैव नैरृत्यां तपनं तथा वायव्यां पार्वतीं चैव पूजयेन्मोक्षसा
धिनीम् । तथा गणेशविमर्शिन्याम् शंभौ मध्यगते हरीनहरभूदे
ध्याहरे शंकरे भास्करे नागमस्तता रवौ हरगणेशाम्बिकाः स्थापिताः
देव्यां विष्णुहरेकदंतरवयो लंबोदरे जेश्वरे नार्थीशंकरभानतोतिस्व
स्वदाम्नस्ताम्नते हानिदाः ॥ रामार्चनचंद्रिकायां गौतमीये च ॥
यदंगदेवतायाः पूजने विशेषस्तु कः तद्धाम गोपालविषयकमिति॰
केचित् बलत्वेनावैकल्पिकमिति शास्त्रार्थः एतेषां पूजनं तु गौतमीय

गंधादिभिरथाभ्यर्च्य षडंगार्चनमेव च विशाकृत्वा जपेन्मंत्रं नमस्कृत्य
समापयेत् अंगदेवतापूजाकाले च पीठपूजानंतरम् ॥ तथा च सन
त्कुमारीये ॥ पीठस्यार्चनमंगदेवपूजनं प्राणप्रतिष्ठा ततश्चाह्वान
मिति यत्तु देवपुष्पांजलिं दत्वा अंगदेवान् समर्चयेत् तत्तु प्रतिष्ठित
यंत्रादिपरम् यंत्रातिरिक्ताधारे पूजनम् ॥ कुलावल्याम् ॥ एक
पीठे स्थित्वा पूजां विना यंत्रं करोति यः अंगानि त्वं परित्यज्य देवता
शापमाप्नुयात् सर्वेषामंगमंत्राणां सिद्धादिविचारो नास्ति ॥ त
था च ॥ सिद्धादिशोधनं नैषामंगानां स्मृति राजवत् ॥ श्यामादेव
पंचायतनाभावः ॥ तथा च रुद्रयामले ॥ श्यामायां भैरवी तारा
छिन्नमस्ता च भैरवी मंजुघोषस्तथा रौद्रं पंचांगं नेष्यते बुधैः उप
विद्यास्तु सर्वासु षट्कर्मादिप्रसाधने नावरीयाद्यपेक्षास्ति ना
ऽंगादिष्वपूजनम् ॥ अथ मंत्रोपदीक्षा ॥ निर्बंधे च मुहूर्ते सर्वतो
भद्रे नवकुंभं विधाय च मोदकं गंधपुष्पाभ्यामर्चितं वस्त्रसंयुतं
सर्वौषधिनवरत्नपंचपल्लवसंयुतम् ततो देवतार्चनं कृत्वा कु
ने दष्टोत्तरशतम् पंचपल्लवमिति पनसाम्राश्वत्थवटबकुलानि
तथा च वासिष्ठे ॥ पनसाम्रं तथाश्वत्थं वटं बकुलमेव च पंचप
ल्लवमित्युक्तं मुनिभिस्तत्ववेदिभिः ॥ नवरत्नमिति ॥ मुक्तामा
णिक्यवैडूर्यगोमेदान् वज्रविद्रुमौ पद्मरागं मरकतं नीलं चेति य
थाक्रमात् निर्बंधे शिष्यं सकलकृतावेष्टनमग्निमुपवेशयेत्
मंत्रितैः प्राक्तणीतोयैः शांतिकुंभजलैस्तथा मूलमंत्रेणाष्टशते
मंत्रितैरभिषेचयेत् अष्टशतैरष्टोत्तरशतैः अथ संपादयेन्मंत्र
दस्तं शिरसि धारयेत् ममस्त्विति साद्वरं दद्यात्ततः शिष्योऽर्चयेद्गुरुम्
यथाशक्तितांतरैश्चैव शास्त्रवदभ्यर्च्य साद्यतम् नियायायाष्टौ जपेत्कर्णे
उपदेशानंतर्यविधिः ॥ इति मंत्रोपदीक्षा ॥ उपदेशांतरमाह ॥ चं
द्रसूर्यग्रहे तीर्थे सिद्धक्षेत्रे शिवालये मंत्रमात्रप्रकथनमुपदेशः
स उच्यते ॥ विश्वसारे ॥ महादीक्षा तथा दीक्षोपदेशास्तदनंतरम्

युगायुगे च कर्तव्य उपदेशः कलौ युगे ॥ अथ सर्वतोभद्रमण्डलम् ॥
चतुरस्रे चतुष्कोष्ठे कर्णसूत्रसमन्विते चतुर्ष्वपि च कोणेषु कोणसू-
त्रचतुष्टयम् मध्ये मध्ये यथा मत्स्या भवेयुः पातयेत्तथा पूर्वापरायते
द्वे द्वे मत्री याम्योत्तरायते पातयेत्तेषु मत्स्येषु समसूत्रचतुष्टयम् ए-
वं कोणसूत्रेषु कर्णसूत्राणि पातयेत् तदूर्ध्वं तेषु मत्स्येषु द्वयान्सू-
त्रचतुष्टयम् ततः कोष्ठेषु मत्स्याः स्युस्तेषु सूत्राणि पातयेत् यावद्द्व-
तद्वयं मत्री षट्पञ्चाशत्सदामपि तावत्तेनैव विधिना तत्र सूत्राणि
पातयेत् षट्त्रिंशता पदे मध्ये लिखेत्पद्मं सुलक्षणम् वहिः पङ्क्त्या
भवेत्पीठं शक्तियुग्मेन वीथिका द्वारशोभोपशोभाश्चाशिष्टाभ्यां प-
रिकल्पयेत् शास्त्रोक्तविधिना मन्त्री ततः पद्मं समालिखेत् पद्मक्षे-
त्रस्यं समस्य द्वादशांशांशं बहिः सुधीः तन्मध्यं विभजेद्वृत्तैस्त्रिभिः स-
मविभागतः आद्यं स्यात्कर्णिकास्थानं केसराणां द्वितीयकम् तृती-
यं तत्र पत्राणां मुक्तांशेन दलाग्रकम् वाह्यवृत्तान्तरालायमनेन वि-
धिना सुधीः निधाय केसराग्रेषु पूर्वतोर्धनिशाकरान् लिखित्वा सं-
धिंस्थानि तत्र सूत्राणि पातयेत् दलाग्राणि च यन्मानेन तन्मानानाहृत
मालिखेत् तदन्तरालं तन्मध्यं सूत्रस्योभयतः सुधीः आलिखेद्वास-
स्तेन दलाग्राणि समंततः दलमूलेषु युग्मशः केसराणि प्रकल्पयेत्
पतन्माधारं प्रोक्तं पङ्कजं तत्र वेदिभिः पदानि त्रीणि पादांशपीठको-
णेषु मार्जयेत् अवशिष्टैः पदैर्विद्वान्वीथीद्वाराणि कल्पयेत् पदानि
वीथिं मत्स्यानि मार्जयेत्पद्मभेदतः द्विद्वाराणि रचयेद्धि चतुष्को-
केलतः पदैस्त्रिभिरेकेन शोभाः स्युर्द्वारपार्श्वतः उपशोभाः स्युर्वे
केन त्रिभिः कोष्ठैरन्तरं अवशिष्टैः पदैः बहिः कोणानां स्याद्वृत्तद्वयं
रंजयेत्सर्वमभिर्वर्णैर्मण्डलं तन्मनोहरं । वृत्तन्मत्स्य सुक्ले । पंकजं शुक्ल-
वर्णेन वेत्सर्वयागकर्माणि शक्तियागेन रक्तं स्याद्धैव पीतं विनिर्दिशे-
न प्रतिष्ठासु च सर्वासु शुक्लमेव विनिर्दिशेत् पीतं हरिद्राचूर्णं
र्णं स्यान्निसितं तण्डुलसंभवम् ॐस्नमचूर्णमरुणं ॥

दलं दलयुगलाष्टकम् विलिख्याद्विप्र रंजयेच्छ्यामं मिश्रकं वर्णपंचकम् अग्र
स्थेष्वथ विस्ताराः सीमारेखाः सिताशुभाः कर्णिका पीतवर्णेन केसरा
स्त्वरुणेन च शुक्लवर्णानि पत्राणि तत्सन्धीः श्यामलेन च रजसा रंजये
न्मंत्री यद्वा पीतेन कर्णिका केसराः पीतवर्णाः स्युररुणानि दलानि
च संधयः कृष्णवर्णाः स्युः सितेनाथासितेन वा रंजयेत्पीठगर्भाणि
पादाः स्युररुणप्रभाः गात्राणि तस्य शुक्लानि वीथीभवतस्त्वपि
श्चालिखेत्कल्पलतिकादलपुष्पफलान्विताः वर्णैर्नानाविधैश्चित्रां
सर्वदृष्टिमनोहराः द्वाराणि श्वेतवर्णानि शोभारक्ताः समीरिताः उ
पशोभाः पीतवर्णाः कोणान्यसितभांसि च तिस्रो रेखा बहिः कुर्या
त्सितरक्ताः सिताः क्रमात् मंडलं सर्वतोभद्रमेतत्साधारणं स्मृतं
अथ लक्षसर्वतोभद्रम् ॥ चतुरस्रां भुवं भित्त्वा दिग्भ्यो द्वादश
धा स्त्रथीः पातयेत्तेषु सूत्राणि कोष्ठानां दृश्यते शतम् चतुश्चत्वा
रिंशदाद्यं पश्चात्षट्त्रिंशतं तु जम् कोष्ठे प्रकल्पयेत्पीठं पंक्त्या
नैवात्र वीथिका द्वारशोभे यथापूर्वमुपशोभा न दृश्यते अवशि
ष्टैः पदैः कुर्यात्षड्विंशत्कोणानि तत्त्ववित् विदध्यात्पूर्ववच्छेषमेवं वामं
डलं स्मृतम् ॥ अथ नवनाभं मंडलम् ॥ चतुरस्रे चतुःषष्टिपदा
न्यारचयेत्स्त्रथीः पदैश्चतुर्भिः पद्मं स्यान्मध्ये तत्परितः पुनः वीथी
चतस्रः कुर्वीत मंडलानावसायिकः दिग्गतेषु च कोष्ठेषु पंकजा
नि समालिखेत् विदिग्गतचतुष्काणि भित्त्वा षोडशधा स्त्रथीः मा
र्जयेत्स्वस्तिकाकारं श्वेतपीतारुणासितैः रजोभिः पूरयेत्तानि स्व
स्तिकानि पिधादिभिः प्राक्प्रोक्तेनैव मार्गेण शेषमस्य समापयेत्
नवनाभमिदं प्रोक्तं मंडलं सर्वसिद्धिदम् पंचाशन्मंडलं प्रोक्तमेत
त्स्वस्तिकवर्जितम् दीक्षायां देवपूजायां मंडलानां चतुष्टयम् सर्व
तंत्रानुसारेण प्रोक्तं सर्वसमृद्धिदम् अथ मंत्रिणां हितार्थाय त्रिलो
हीमुद्रा निरूप्यते सोमसूर्याग्निरूपास्तु वर्णा लोहत्रयं तथा रौप्य
मिंदुः स्मृतो हेम सूर्यस्ताम्रं हुताशनः लोहभागाः समुद्दिष्टाः सदा

शतसंख्यया त्रिलोहकारयेन्मुद्रामसंकलितसंगताम् एवसहस्रता
सोमाः स्पर्शाः सोमशुभोदयः आग्नेय्यां व्यापकाः सर्वे सोमसूर्याग्निदेवताः
स्वराः षोडश विख्याताः स्पर्शास्ते पञ्चविंशतिः व्यापका दश ते कामध
नर्थसम्प्रदायिनः साष्टसहस्रसंजप्यसष्टष्टुतां तां कुर्यात्ततः तस्यां संप
तयेन्मंत्री सर्पिषा पूर्वसंख्यया पूर्वसंख्ययाष्टोत्तरसहस्रसंख्यया
निहितप्रकुंभतो मुद्रामभिषेकोक्तवर्त्मना आवाहयेत्पूजयेद्देवीमुप
चारैस्समाहिताः अभिषिच्य विनीताय दद्यात्तां मुद्रिकां गुरुः इयं मुद्राद्व
द्रोगविषज्वरविनाशिनी व्यालचौरमृगादिभ्यो रक्षां कुर्याद्विशेषतः
युद्धे विजयमाप्नोति धारयेन्मनुजेश्वरः मन्त्रसिद्धिकरी पुंसां चतुर्व
र्गफलप्रदाम् धारयेन्मनुजो नित्यं देववत्सोऽभवेद्भुवि दुष्टदुःशत्रु
दर्पयंतिवाञ्छितसिद्धिमवाप्नुयात् अभिषिंचेत्पूर्वोक्तदीक्षापद्धत्या
क्रमेण घटं संस्थाप्य तत्कल्पोक्तदेवतामावाह्य यथोपचारैस्तः
संपूज्य साध्यमभिषिच्य तस्मै दद्यादित्यर्थः । ततो गुरवे दक्षिणां दत्वा
महान्तमुत्सवं कुर्यादिति । गोपांगनाकेलिविलासमुग्धं संसार
दावानलभंगदक्षम् ब्रह्मादिदेवासुरकविंदितांघ्रिं वंदे मुकुंदं जगदे
कनाथम् ॥ इति तन्त्रसारे प्रथमः परिच्छेदः ॥ १ ॥ अथ सामा
न्यजापपद्धतिः ॥ ब्राह्मे मुहूर्ते उत्थाय मुक्तस्वापः सहस्रदलकम
लकर्णिकावस्थितं श्वेतवर्णं द्विभुजं वराभयकरं श्वेतमाल्यानुलेपनं
स्वप्रकाशरूपं स्ववामस्थितरक्तशक्त्या स्वप्रकाशस्वरूपया सहितं ध्या
गुरुं विभाव्य मानसोपचारैराराध्य इति यथाशक्ति जप्त्वा नमस्कु
यीत ॥ ॐ अखण्डमण्डलाकारं व्याप्तं येन चराचरम् तत्पदं दर्शितं येन
तस्मै श्रीगुरवे नमः अज्ञानतिमिरान्धस्य ज्ञानाञ्जनशलाकया
चक्षुरुन्मीलितं येन तस्मै श्रीगुरवे नमः ततो मूलादिब्रह्मरन्ध्रान्तं मू
लविद्यां विभावयेत् उद्यद्दिनकरद्योतितां यावत्
बाह्यमर्णांतर्थसमाहितमनापावम् संहृत्य मनः अशे
षमपि चिंतयेत् ॥ भावप्रदीपे ॥ ततः आमण्डलव्यापिशरीरं
ब्राह्मे मुहूर्ते उत्थाय कृतमेत्रादि

कक्रियाः मउक्तं बलमासीनो मंत्रसिद्धिप्रदस्सदा षडंगन्यासमाच
र्य प्राणायामत्रयं तथा योनिमुद्रां विधायाथ मूलाधारे तु चिंतयेत्
शक्तिं कुंडलिनीं सूक्ष्मां जगच्चैतन्यरूपिणीम् प्रसुप्तभुजगाकारां सा
र्धत्रिवलयस्थितम् वायुरग्निसमुत्थाभ्यां वारंतीबोधयेत्ततः ब्रह्म
रंध्रपथेनैव परब्रह्म नियोजयेत् षट्चक्रभेदनेनैव परब्रह्मणपु
नः एवं कृत्वामृतेनैव संप्लाव्याधारमानयेत् एवं दिशो विधायाथ
देवीं हृत्कमले स्मरेत् संपूज्य मानसैर्द्रव्यैर्ध्यायेत्कल्पानुसारतः अ
ष्टोत्तरशतं विद्वान् जपेद्वर्णात्ममालया प्रातःकृत्यानंतरं वा मैत्रादि
कं कुर्यात् नमस्कृत्य समुत्थाय बहिर्ग्रामाद्देशिकः ततो मैत्रादिकं
कृत्वा कुर्याद्दंतविशोधनम् ततः मूलादिब्रह्मरंध्रांतं मूलविद्यां विभा
वयेत् तस्याविस्तारमाह गौतमीये इदानीं सर्वकृसंच प्रसंगात्कथ
यामि ते यत्कृत्वापि कर्तायाति मंत्रं यंत्रार्चनादिषु येन विना न सिद्धि
स्यान्नरकं च प्रपद्यते ॥ यामले तु ॥ प्रातःकृत्यमकृत्वा तु यो दे
वीं भक्तितोर्चयेत् निष्फला तस्य पूजा स्याद्धवहीना यथाक्रिया ॥
लक्षीकृत्वापि विपि ॥ संध्यायास्तु विहीनो यो न हि तत्फलमाप्नुयात्
इति वचनादावश्यकत्वम् वैदिकसंध्यानंतरं मंत्रसंध्या कर्तव्या ॥
तदुक्तं ॥ वैदिकीं तांत्रिकीं संध्यां यथानुक्रमयोगतः ॥ अथ संध्या
प्रयोगः ॥ तत्र शाक्तविषये ॥ ॐ आत्मतत्वाय स्वाहा ॐ विद्यातत्वा
य स्वाहा ॐ शिवतत्वाय स्वाहा इत्याचमेत् ॥ अमंत्रत्वाचमनमात्रं ॥
तथा च शाक्ते तु ॥ आत्मविद्याशिवैस्तत्वैराचमेत्साधकाग्रणीः व
ह्निजायां परे दत्वा शुद्धेन पयसा प्रिये ॥ मालिनीतंत्रे ॥ आचमेदात्म
तत्वाद्यैः प्रणवाद्यैः सहांतकैः मंत्रैस्त्रिधा तथा वक्त्रं नासादि श्रोत्रना।
भिमृशेत् कंदार्मूलं समस्पृश्य मंत्रीकुर्यात्तीर्थाभिवंदनम् ॥ ततो जले ॥
गंगे च यमुने चैव गोदावरि सरस्वति नर्मदे सिंधु कावेरि जलेस्मिन्सं।
निधिं कुरु इति तीर्थमावाह्य मूलेन कुंभेन त्रिवारं भूमौ जलं निक्षिप्य
सप्तधा तज्जलेन मूलेन मूर्धानमभिषिंचयेत् ततः षडंगन्यासं कृत्वा

नै॰
स्ना॰ महस्तेजलंनिधायदक्षिणहस्तेनजलमाच्छाद्यहंयंरंलंवंइतित्रिरभिमं
२३ त्र्यमूलमुच्चरन् गलितोदकबिंदुभिः तत्त्वमुद्रयासमयाऽभ्युक्षणंकृ
23 त्वाशेषजलंदक्षिणहस्तेनसमादायतेजोरूपंध्यात्वाइडयाकृष्यदे
हान्तःपापप्रक्षालनकृष्णवर्णेनतदुदकंपापरूपंध्यात्वापिंगलयाविरि
च्यपुरःकल्पितम् वज्रशिलायांफडितिमंत्रेणपापपुरुषंतज्जलेन
ताडयेत् ॥ इत्यघमर्षणम् ॥ तथाचगौतमीये ॥ प्राचाम्यविधि
नामंत्रीशुचौदेशेचसंविशेत् जलेसंयोज्यतीर्थानित्रिवारंमूलमं
त्रतः क्षिपेद्भूमौकुशाग्रेणसमयामूर्ध्निसेचयेत् ॥ तंत्रान्तरे ॥ वामह
स्तेजलंगृह्यगलितोदकबिंदुभिः समयाप्रोक्षणंकृत्वामूलमंत्रमनु
स्मरन् अवशिष्टोदकंदक्षेहस्तेसंगृह्यबुद्धिमान् इडयाकृष्यदेहान्ता
क्षालितंपापसंचयम् कृष्णवर्णंतदुदकंदक्षनासाविरेचयेत् दक्ष
हस्ततलेमंत्रीपापरूपंविचिन्त्यच पुरतोवज्रपाषाणेनिक्षिपेदस्त्रमु
च्चरन् ॥ अथवात्रापि ॥ षडंगमासमाचर्यवामहस्तेजलंततः गृही
त्वादक्षिणेनैवसंपुटंकारयेद्बुधः शिववायुजलपृथ्वीवह्निबीजैस्त्रि
धापुनः अभिमंत्र्यचमूलेनसमयातत्त्वमुद्रया निक्षिपेत्तज्जलंशेषमद्
भिर्दत्तेननिधायच ॥ हस्तंप्रक्षाल्याचम्य ॥ ह्रींहंसःॐघृणिःसूर्यइति
मंत्रेणवासूर्यायार्घ्यंदत्वासूर्यमंडलस्थायैअमुकदेवतायैनमइति
मंत्रेणदेवतायैदत्वा ततस्तद्गायत्र्यावाजलंत्रिवारंनिक्षिप्यततस्तद्देवता
गायत्रींजपेत् तथाचार्घ्यानंतरंस्नानार्णवे ततश्चप्रजपेद्धीमान्गाय
त्रींपरमेश्वरीम् गायत्रीतुस्नानप्रकरणेबोद्धव्या ॥ नंदिकेश्वरसंहि
तायाम् ॥ यावन्नदीयतेचार्घ्यंभास्करायमहात्मने तावन्नपूजयेद्वि
ष्णुंशंकरंचमहेश्वरीम् ॥ गौतमीये ॥ एवंनेकविधानांमंत्रैःसंध्याम
त्रफलाप्तये नकुर्याद्यदिमोहेन नदीस्नानफलमाप्नुयात् संक्षेपसंध्या
मथवाकुर्यान्मंत्रजलप्रक्षितः सायंप्रातश्चमध्याह्नेदेवंध्यात्वामनुंज
पेत् संध्यायांपतितायांवागायत्रींदशधाजपेत् ॥ अथस्नानविधिः
तत्र नद्यादौगत्वावैदिकस्नानंकृत्वातांत्रिकस्नानमाचरेत् ॥ तथाच

गौतमीये ॥ अथ स्नानं प्रकुर्वीत यथाशास्त्रविधानवित् मलप्रक्षा
लनं स्नानं स्वशास्त्रोक्तं समाचरेत् मंत्रस्नानं ततः कुर्यात्कर्मणां सिद्धिहे
तवे ॥ तद्यथा ॥ अमुकदेवताप्रीतये स्नानमहं करिष्ये इति संकल्प्य
तथा कुलचूडामणौ ताम्रपात्रे सदूर्वं च सतिलं सजलं ततः गृहीत्वा अ
मुकदेवस्य प्रीतये स्नानमाचरेत् ततः षडंगमातृकाप्राणायामौ कृत्वा
गंगे च यमुने चैवेत्यादिना कुशमुद्रया सूर्यमंडलात् स्नानतीर्थमा
गतमेवमिति धेनुमुद्रयामृतीकृत्य कवचेनावगुंठ्य अस्त्रेण संरक्ष्य
मूलेनैकादशभिमंत्र्य सूर्याभिमुखं विहाय दशधा निक्षिप्य तस्मिन्नि
ष्टदेवतावरणानि स्मृत्वा जले निमज्ज्य देवतां ध्यायेत् मूलमंत्रं यथाश
क्त्या जपन् उत्तमस्य उदकेन त्रिवारं जप्तेन कलशमुद्रया त्रिवारमा
त्मानमभिषिच्य वैदिकसंध्यातर्पणं सूर्यार्घ्यदानं कुर्यात् तांत्रिका
चमनप्राणायामादि नारियायतं कर्म कुर्यात् ॥ तथा च निबंधे ॥ ध्या
त्वा जलाञ्जलिं दत्त्वा तर्पयेदिष्टदेवताम् ॥ ॐ देवांस्तर्पयामि ॐ
ऋषींस्तर्पयामि ॐ पितॄंस्तर्पयामीति संतर्प्य गुरुं परमगुरुं परमेष्ठि
गुरुं च तर्पयेत् ॥ तथा च ॥ देवानृषीन्पितॄंश्चैव तत्तत्कल्पोक्तवि
धिना ततः गुरुं पंक्तिपुरा तर्प्य तर्पयेदिष्टदेवताम् ॥ वैष्णवे च वि
शेषः ॥ नारदं पर्वतं जिष्णुं निषधोद्धवदारुकम् विष्वक्सेनं च शैलेय
गुरुं च तर्पयेत्त्रिशः ॐ नारदं तर्पयामीत्यादिक्रमेण मूलमुच्चार्य अमुक
देवतां तर्पयामि नम इति विष्णुविषयम् ॥ तथा च गौतमीये ॥ श्री
दं मंत्रमुच्चार्य श्रीपूर्वं कृष्णमित्यपि तर्पयामि पदं चोक्त्वा नमोंतं तर्प
येत् ततः अस्मत्रमूलमुच्चार्य अमुकदेवतां तर्पयामि ॥ तथा च ॥ तर्प
यामि पदं प्रोच्य मंत्रांते देवतायाश्च नाम स्याद् द्वितीयांतं पश्चात् स्वं तर्पया
मि स्मृतम् ॥ शाक्तविषये तु मूलमुच्चार्य अमुकदेवीं तर्पयामि स्वाहा
होमतर्पणयोः स्वाहेति तत्तन्मंत्रवचनात् तथा च नीलतंत्रे ॥ मंत्रांतेना
म चोच्चार्य तर्पयामि ततः परम् स्वाहांते तर्पणं त्वेवमिति ॥ पंचत्रिंशति
संख्यं वा दशधा यथाविधि वा मूलमंत्रं समुच्चार्य श्रीकृष्णं तर्पयेत्सुधीः ॥

तं·
सा·
२४

24

6

इति गौतमीयवचनात् पंचविंशतिवारं वा दशधा वा त्रिधापि वा संतर्प-
येत् ॥ ॐ अद्य श्रीकृष्णमिश्रपलक्षणम् ॥ ततश्च तदावरणदेवतानां
प्रत्येकं तत्सकृत्तर्पयेत् तथा च कुलार्णवे ॥ एकैकमंजलिं तासां परिवा-
राय तर्पयेत् तत्राप्यशक्तश्चेन्मूलमुच्चार्य इष्टदेवतामात्रं तर्पयेत् त-
था च ॥ अशक्तो मूलमुच्चार्य देवीमात्रं च तर्पयेत् ततो जलादुत्था-
य धौतवाससी परिधायाचम्य ह्रीं हंसः इदमर्घ्यं सूर्याय स्वाहा तारादौ
तं ह्रीं हंसः मार्तंडभैरवाय प्रकाशशक्तिसहिताय इदमर्घ्यं स्वाहा
श्रीविद्याविषये ॥ ऐं ह्रीं श्रीं ह्रीं क्लीं सः ग्रहराशिनक्षत्रतिथियोग-
करणपरिवारसहिताय सूर्याय इदमर्घ्यं स्वाहा इदमर्घ्यं स्वाहा इदमर्घ्यं द-
त्वा ततो गायत्रीं शतधा दशधा वा जपेत् ॥ तथा च तंत्रे ॥ अष्टोत्तर-
शतावृत्त्या गायत्रीं प्रजपेत्सुधीः महापातकयुक्तोपि प्रजपेद्दशधा य-
दि सर्वसर्वसमहादेवि मुक्तो भवति तत्क्षणात् इति शक्ताशक्तिभे-
देन गायत्रीजपानंतरं तर्पणं वा तथा च ॥ सूर्यमंडलवासिन्यै देव-
तां यजेत्ततः परम् अर्घ्यमंजलिमादाय गायत्र्या वा त्रिरुत्क्षिपेत् ध्या-
त्वा जलांजलिं दत्वा तर्पयेदिष्टदेवताम् यथाशक्ति जपेद्देवीं गाय-
त्रीं तदनंतरम् तर्पणार्थं समाचम्य प्राणानायम्य साधकः गायत्री
त्रैलोक्यमोहनाय विद्महे नारायणाय धीमहि तन्नो विष्णुः प्रचोद-
यात् ॥ इति विष्णुगायत्री ॥ गोपालगायत्री च ॥ श्रीकृष्णाय विद्म-
हे दामोदराय धीमहि तन्नो विष्णुः प्रचोदयात् कामदेवाय विद्महे पु-
ष्पबाणाय धीमहि तन्नोऽनंगः प्रचोदयात् दाशरथाय विद्महे सीताव-
ल्लभाय धीमहि तन्नो रामः प्रचोदयात् ॥ इति रामगायत्री ॥ तत्पुरु-
षाय विद्महे महादेवाय धीमहि तन्नो रुद्रः प्रचोदयात् ॥ इति शि-
वगायत्री ॥ तत्पुरुषाय विद्महे वक्रतुंडाय धीमहि तन्नो दंती प्रचो-
दयात् ॥ इति गणेशगायत्री ॥ दक्षिणामूर्तये विद्महे ध्यानस्थाय धी-
महि तन्नो धीशः प्रचोदयात् ॥ इति दक्षिणामूर्तिगायत्री ॥ नाराय-
णाय विद्महे वासुदेवाय धीमहि तन्नो विष्णुः प्रचोदयात् ॥ इति नारा-

यणगायत्री ॥ आदित्याय विद्महे मार्तण्डाय धीमहि तन्नो सूर्यः प्रचोद
यात् ॥ इति सूर्यगायत्री ॥ शिवगायत्रीत ॥ सर्वसम्मोहिन्यै विद्महे
विश्वजनन्यै धीमहि तन्नः शक्तिः प्रचोदयात् त्वरितादेवि विद्महे महा
नित्यायै धीमहि तन्नो देवी प्रचोदयात् ॥ इति त्वरितायाः ॥ वागीश्व
राय विद्महे हयग्रीवाय धीमहि तन्नो हंसः प्रचोदयात् ॥ इति हयग्रीव
स्य ॥ ऐं वागीश्वरि विद्महे क्लीं कामेश्वरि धीमहि सौः तन्नः शक्तिः प्र
चोदयात् ॥ इति बालाभैरवगायत्री ॥ ऐं त्रिपुरादेवि विद्महे क्लीं का
मेश्वरि धीमहि तन्नः क्लिन्ने प्रचोदयात् ॥ इति त्रिपुरसुन्दरीगायत्री ॥
महादेव्यै विद्महे दुर्गायै धीमहि तन्नो देवी प्रचोदयात् ॥ इति दुर्गा
गायत्री ॥ महालक्ष्म्यै विद्महे महाश्रियै धीमहि तन्नः श्रीः प्रचोदया
त् ॥ इति लक्ष्मीगायत्री ॥ वाग्देव्यै विद्महे कामबीजाय धीमहि त
न्नो देवी प्रचोदयात् ॥ इति दुर्गागायत्री ॥ महालक्ष्म्यै विद्महे महा
श्रियै धीमहि तन्नः श्रीः प्रचोदयात् ॥ इति लक्ष्मीगायत्री ॥ वाग्दे
व्यै विद्महे कामबीजाय धीमहि तन्नो देवी प्रचोदयात् ॥ विरोचिन्यै
विद्महे छिन्नमस्तायै धीमहि तन्नो देवी प्रचोदयात् ॥ इति छिन्नम
स्तायाः ॥ कालिकायै विद्महे श्मशानवासिन्यै धीमहि तन्नो घोरे
प्रचोदयात् ॥ इति श्यामायाः ॥ तारायै विद्महे महोग्रायै धीमहि
तन्नो देवी प्रचोदयात् ॥ इति तारायाः ॥ ध्यानं ॥ ॐ उद्यदादित्य
संकाशां पुस्तकाक्षकरां स्मरेत् कृष्णाजिनाम्बरां ब्राह्मीं ध्यायेत्ता
रांकिते म्बरे ॥ मध्याह्ने ॥ श्यामवर्णां चतुर्बाहुं शंखचक्रलसत्क
राम् गदापद्मधरां देवीं सूर्यासनकृताश्रयाम् सायाह्ने वरदां देवीं
गायत्रीं संस्मरेदिति शुक्लां शुक्लाम्बरधरां वृषासनकृताश्रयाम्
त्रिनेत्रां वरदां पाशशूलां च नृकरोटिकाम् सूर्यमण्डलमध्यस्थां ध्या
येद्देवीं समभ्यसेत् त्रिपुरां दीनध्यानविशेषो यथा प्रातरारक
मले कृतमुण्डमालोपरि वाग्बीजरूपं विद्यायां विद्युत्पटलभासुराम्
पुस्तकाक्षत्वं दण्डपाशांकुशपालसत्करां सेव्यां गृहीतवपुषीं गुरु

विद्यात्र्यात्मिकाम् अथवा हृदंभोजकर्णिके सूर्यमंडले कामबी-
जात्मिकां देवीमलकरसारुणाम् पञ्चबाणपुष्पेक्षुचापपाशांकुशा-
न्विताम् परितस्त्वात्मशक्तिभिः षट्त्रिंशत्तत्त्वशक्तिभिः मायामाज्ञाम-
रोजस्थे चंद्रे चंद्राभसमद्युतिम् शक्तिबीजात्मिकां चापबाणपाशांकुशा-
न्विताम् भुवनिसात्तराकारां चटिकारशनान्विताम् चिंतयित्वा भग-
वतीनित्याभिः परिवारिताम् तारादौ मूलार्घ्यं दत्वा ताम्रादिपात्रे चंदना-
कुंकुमसमापराजितापुष्पाणि निक्षिप्य उद्यदादित्यमंडलमध्यवर्ति-
न्यै नित्यायै चेतनोदितायै श्रीमदेकजटायै स्वाहेत्यर्घ्यं दत्वा गायत्रीं जपेदि-
ति विशेषः अस्मत्रकालिकादिप्रयोगः ततः सूर्यमंडले देवतां विभा-
व्य मूलमंत्रं यथाशक्ति जप्त्वा संहारमुद्रया देवतां स्वहृदयमानीय ती-
र्थं नमस्कृत्य यागस्थानमाविशेत् ॥ इति स्नानविधिः ॥ ततः सामा-
न्यार्घ्यस्थापनादिप्रासनोपवेशनपर्यंतकर्मसमाप्य वामे ॥ ॐ गुरु-
भ्यो नमः परापरगुरुभ्यो नमः दक्षिणे ॐ गणेशाय नमः मध्ये ॐ
अमुकदेवतायै नमः तथा च गौतमीये कृतांजलिपुटो भूत्वा वामे गु-
रुत्रयं यजेत् गुरुं च परमादिं च परापरगुरुं तथा दक्षपार्श्वे गणेशं च म-
ध्ये देवं विभावयेत् ततः फडिति मंत्रेण गंधपुष्पाभ्यां करौ संप्रोक्ष्य ऊ-
र्ध्वतालत्रयं च दत्वा छोटिकाभिर्दशदिग्बंधनं कुर्यात् ततो रमि-
ति जलधारयाऽग्निप्राकारं विचिंत्य भूतशुद्धिं कुर्यात् ॥ तद्यथा ॥ अं-
के उत्तानौ करौ कृत्वा सोऽहमिति जीवात्मानं दीपकर्णिकाकारं मूला-
धार उत्थितकुंडलिन्या सह सुषुम्णावर्त्मना मूलाधारस्वाधिष्ठानम-
णिपूरकानाहतविशुद्धाज्ञाख्यषट्चक्राणि शिरोवस्थिताधोमुखस-
हस्रदलकमलकर्णिकांतर्गतपरमात्मनि तं संयोज्य तत्रस्थे पृथि-
व्यप्तेजोवाय्वाकाशगंधरसरूपस्पर्शशब्दनासिकाजिह्वाचक्षुस्त्व-
क्श्रोत्रपाणिपादपायूपस्थप्रकृतिमनोबुद्ध्यहंकारचतुर्विंशतितत्त्वा-
नि लीनानि विभाव्य यमिति वायुबीजं धूम्रवर्णं वामनासापुटे विचिंत्य
तस्य षोडशवारजपेन वायुना देहमापूर्य नासापुटे धृत्वा चतुष्षष्टिवा-

रजपेनकुंभकंकृत्वावामकुक्षिस्थकृष्णवर्णपापपुरुषंस्वदेहंसंशो॰
ष्यद्वात्रिंशद्वारजपेनदक्षिणनासयावायुंरेचयेत् दक्षिणनासापुटेरमि
तिवह्निबीजंरक्तवर्णंध्यात्वातत्षोडशवारजपेनवायुनादेहमापूर्यना
सापुटेधृत्वाचतुःषष्टिवारजपेनकुंभकंकृत्वापापेनसहदेहंदग्ध्वात॰
स्यद्वात्रिंशद्वारजपेनवामनासयाभस्मनासहवायुंरेचयेत् वमितिचं
द्रबीजंशुभ्रवर्णंवामनासायांध्यात्वाषोडशवारजपेनवायुंललाटेचं
द्रंनीत्वावमितिवरुणबीजस्यचतुःषष्टिवारजपेनतस्माल्ललाटचंद्रा॰
द्गलितसुधयामातृकावर्णात्मिकयासमस्तदेहंविरच्यलमितिपृ॰
थ्वीबीजस्यद्वात्रिंशद्वारजपेनदेहंसुदृढंविचिंत्यदक्षिणेनवायुंरेचये
त् मात्रासंख्यायावा॥ तदुक्तंगौतमीये॥ धूम्रवर्णंततोवायुबीजंय
बिंदुलांछितम् पूरयेद्देवतावायुंसुधीःषोडशमात्रया मात्रयाचचतु
ःषष्ट्याकुंभयेच्चसुषुम्णाया द्वात्रिंशन्मात्रयामंत्रीरेचयेत्पिंगलाख्यया
पूरयेदनयाचैवसंचिंत्यनीलमारुतम् रक्तवर्णंवह्निबीजंत्रिकोण॰
स्वस्तिकान्वितम् तेनपूरकयोगेनमात्रयाषोडशाख्यया मात्रयाचचतु
ःषष्ट्यानिर्दहेत्कुंभकेनतु वामपार्श्वस्थितंपापपुरुषंकज्जलप्रभम् ब्र
ह्महत्याशिरस्कंचस्वर्णस्तेयभुजद्वयम् सुरापानहृदायुक्तंगुरुतल्पक
टिद्वयम् तत्संसर्गिपदद्वंद्वमंगप्रत्यंगपातकम् उपपातकरोमाणंर
क्तश्मश्रुविलोचनम् खड्गचर्मधरंक्रूरमेवंकुक्षौविचिंतयेत् मूला
धारोत्थितेनैववह्निनासंदहेच्चतम् एवंसदेहंपतितोद्वात्रिंशन्
मात्रयाततः भस्मनासहतंमंत्रीरेचयेदिडयापुनः वामनासांभोवंदबी
जंकुंदेंदुद्युतिसमप्रभम् बालेंदुराजेसंयोज्यततःषोडशमात्रयास्व
मणार्घांचततःषष्टिमात्रयाबीजेमंदवम् धृत्वामृतमयींवृष्टिंपंचाश॰
द्वर्णरूपिणीम् तयादेहंविचिंत्यैवमनसापिंगलाथना द्वात्रिंशन्मात्र
यामंत्रीलंबीजेनदृढंनयेत् स्वस्थानेदेहंसंमंत्रेणपुनर्मूलेनवर्त्मना
जीवतत्त्वानिचानीयस्वस्थानेस्थापयेत्ततः इतिकृत्वाभूतशुद्धिंमातृ
कान्यासमाचरेत्॥ ज्ञानार्णवे॥ प्राणप्रतिष्ठयायस्माज्जीवंदेहेनिया

पयेत् शुचिर्हृतं तमसमुच्चार्य हंसस्तु विपरीतकः उच्चरेत् परमेशानि विपर्यय-
मतः शिभवेत् प्राणप्रतिष्ठामंत्रेण सर्वकर्माणि साधयेत् तेनैव विधि-
नो देवि स्थिरीकुर्यात्त्रिजगत्तनुम् हंस इति बीजं स्वहृदयमानीय कुलकु-
ण्डलिनी षट्चक्राणि भित्त्वा यथास्थानमानयेत् ॥ विशेषस्तु शक्तिविषये
हंस इति जीवादिकं परमशिवे संयोज्य सोहमिति मंत्रेण स्थानमानयेत्
तथा च गौतमीये ॥ सुषुम्णावर्त्मना सोहमिति मंत्रेण देशिकः सह-
स्रारे शिवस्थाने परमात्मनि योजयेत् ॥ तथा च वाराहे ॥ मूलाधा-
रात्ततो जीवं ब्रह्ममार्गेण देशिकः हंसेन पुष्करस्थाने परमात्मनि यो-
जयेत् सोहमेवं समाभाष्य जीवं हृदि समानयेत् ॥ त्रिपुरासारसमुच्चये
संयोज्य जीवं मध्यदुर्गमसाध्यनाडीमार्गेण पुष्करनिविष्टशिवे सह-
स्रे ॥ तथा च तंत्रान्तरे ॥ सोहमेवं समाभाष्य जीवं हृदि समानयेत्
भूतशुद्धिविशेषस्तु विशुद्धेश्वरे शरीराकारभूतेन भूतानां यद्विशो-
धनम् अव्ययब्रह्मसंयोगाद्भूतशुद्धिरियं मता ॥ ततो मातृकान्यासः ॥
तत्र मातृकानाम ऋष्यादिन्यासः अस्य मातृकामंत्रस्य ब्रह्मा ऋषिः गा-
यत्रीछंदः मातृका सरस्वती देवता हलो बीजानि स्वराः शक्तयः अव्य-
क्तं कीलकं लिपिन्यासे विनियोगः तद्यथा शिरसि ब्रह्मणे ऋषये
नमः मुखे गायत्रीछंदसे नमः हृदि मातृकासरस्वत्यै देवतायै नमः
पादयोः स्वरेभ्यः शक्तिभ्यो नमः गुह्ये हल्भ्यो बीजेभ्यो नमः सर्वांगे
अव्यक्तकीलकाय नमः ॥ तथा च ज्ञानार्णवे ॥ मातृकां शृणु दे-
वेशि न्यासमापन्निकृन्तनी ऋषिर्ब्रह्मास्य मंत्रस्य गायत्रीछंद उच्यते
देवता मातृका देवी बीजं व्यञ्जनमेव च शक्तयस्तु स्वरा देवि षडंगमा-
समाचरेत् ॥ ततः करांगन्यासौ ॥ अं कं खं गं घं ङं आं अंगुष्ठाभ्यां नमः
इं चं छं जं झं ञं ईं तर्जनीभ्यां स्वाहा उं टं ठं डं ढं णं ऊं मध्यमाभ्यां वषट्
एं तं थं दं धं नं ऐं अनामिकाभ्यां हुम् ओं पं फं बं भं मं औं कनिष्ठाभ्यां वौषट्
अं यं रं लं वं शं षं सं हं अः करतलपृष्ठाभ्यां फट् एवं हृदयादिषु । अं
कं खं गं घं ङं आं हृदयाय नमः इं चं छं जं झं ञं ईं शिरसे स्वाहा उं टं ठं डं

यूं शिखायै वषट् ऐं तं थं दं धं नं पं कवचाय हुं ओं पं फं बं भं मं औं नेत्राभ्यां
वौषट् अं यं रं लं वं शं षं सं हं ळं क्षं अः अस्त्राय फट् ॥ तथा चोक्तं ज्ञानार्णवे ॥
अं आं मध्ये कवर्गं तु इं ईं मध्ये चवर्गकम् उं ऊं मध्ये टवर्गं स्यात् एं ऐं मध्ये त
वर्गकम् ओं औं मध्ये पवर्गं तु बिंदुयुक्तं न्यसेत् प्रिये अनुस्वारविसर्गांत
यवर्गं सकलं तको हृदयं च शिरो देवि शिखा कवचकं तथा नेत्रमस्त्र
न्यसेद्देवि नमः स्वाहा क्रमेण तु वषट् हुं वौषट् तं च फट् तं तयोजयेत् प्रिये
षडंगो यं मातृकाया सर्वपापहरा स्मृताम् ॥ अथांतर्मातृका ॥ अ
कारादिषोडशवर्णान् स्वरान् स्वाविंदून् षोडशदलकमले कंठमूले न्यसेत्
ककारादिद्वादशवर्णान् द्वादशदलहृत्कमले न्यसेत् डकारादिद
शवर्णान् चतुर्दशदलकमले नाभौ न्यसेत् बकारादिषोडशवर्णान्
षट्दलकमले लिंगमूले न्यसेत् वकारादिचतुरो वर्णान् चतुर्दलकम
ले मूलाधारे न्यसेत् हक्षवर्णौ द्वयं द्विदलपद्मे भ्रूमध्ये न्यसेत् ॥ तथा
चोक्तं ज्ञानार्णवे ॥ अष्टपत्रांबुजे कंठे स्वरान् षोडश विन्यसेत् द्वादशाब्जे
हृत्पद्मे कादीन् द्वादश विन्यसेत् दशपत्रांबुजे नाभौ डकारादीन्न्य
सेद्दश षट्पत्रे लिंगमध्यस्थे बकारादीन्न्यसेत् षट् आधारे चतुरो
वर्णान् न्यसेद्वादी चतुर्दले हक्षौ भ्रूमध्यगे पद्मे द्विदले विन्यसेत् प्रिये
इत्यंतर्मातृकान्यासः सर्वरोगान् समाचरेत् ॥ अगस्त्यसंहितायाम् ॥
एकैकवर्णमेकैकपत्रांतर्विन्यसेत् प्रिये एवं मंत्रप्रविन्यस्य मनसा
तो बहिर्न्यसेत् ॥ ध्यानं वेत ॥ एकैकवर्णमुच्चार्य मूलाधारादि द्वि
रांतिकम् नमोंतमिति तन्न्यासः अंतरः परिकीर्तितः ॥ अथ मातृका
न्यासो मूलाधारे चतुर्दले ॥ स्वर्णामे च वशषस चतुर्वर्णविभूषिते
षट्दले वैद्युति निस्वाधिष्ठाने नलान्विषि बभमयरलयुक्ते वर्णैश्च
द्भिः सहिते मणिपूरे दशदले नीलजीमूतसन्निभे डादिफांतदले
युक्ते बिंदुभूषितमस्तकैः अनाहते द्वादशारे प्रवालरुचिसन्निभे
कादिठांतदलैर्युक्ते योगिनां हृदयंगमे विशुद्धे षोडशदले धूम्राभे
स्वरैर्भूषिते आज्ञाचक्रे तु चंद्राभे द्विदले हक्षवर्जिते सहस्रारे हिमनि

तं॰
सा॰
२८
27

भेसर्ववर्णविभूषिते अकथादित्रिरेखाग्रे हलक्षत्रयभूषिते तन्मध्ये
परविंदुचसृष्टिस्थितिलयात्मिकाम् एवं समाहितमना ध्यायेन्मासौ
यमांतरः ॥ ततो बाह्यमातृकान्यासः ॥ पंचाशल्लिपिभिर्विभक्तमु
खदोःपन्मध्यवक्षस्थलां भास्वन्मौलिनिबद्धचंद्रशकलामापीनतुं
गस्तनीम् मुद्रामक्षगुणं सुधाढ्यकलशं विद्यां च हस्तांबुजैर्बिभ्रा
णां विशदप्रभां त्रिनयनां वाग्देवतामाश्रये एवं ध्यात्वा न्यसेत् ॥
तथा गौतमीये ॥ ललाटमुखवृत्ताक्षिश्रुतिघ्राणेषु गंडयोः ओ
ष्ठदंतोत्तमांगास्यदोःपत्संध्यग्रकेषु च पार्श्वयोः पृष्ठतो नाभौ जठरे हृ
दयांसके ककुद्यंसे च हृत्पूर्वं पाणिपादयुगे तथा जठराननयोर्न्यसे
न्मातृकार्णान्यथाक्रमात् ॥ तथा च ॥ अं नमो ललाटे आं नमो मु
खवृत्ते इं नमो दक्षिणचक्षुषि ईं नमो वामचक्षुषि उं ऊं कर्णयोः ऋं ॠं
नासयोः लृं लॄं गंडयोः एं नमः ओष्ठे ऐं नमः अधरे ओं नमः ऊर्ध्वदंते
औं नमः अधोदंते अं नमो ब्रह्मरंध्रे अः नमो मुखे कं नमो दक्षबाहु
मूले खं नमः कूर्परे गं नमो मणिबंधे घं नमोऽङ्गुलिमूले ङं नमोऽङ्गु
ल्यग्रे एवं चं छं जं झं ञं नमो वामबाहुमूलसंध्यग्रकेषु च टं ठं डं ढं णं
दक्षपादमूलसंध्यग्रकेषु च तं थं दं धं नं वामपादमूलसंध्यग्रकेषु
च पं नमो दक्षपार्श्वे फं नमो वामपार्श्वे बं नमः पृष्ठे भं नमो नाभौ
मं नमो जठरे यादिक्षांत यं नमो हृदि रं नमो दक्षबाहुमूले लं नमः
ककुदि वं नमो वामबाहुमूले शं नमो हृदादिदक्षकरे षं नमो हृदा
दिवामकरे सं नमो हृदादिदक्षपादे हं नमो हृदादिवामपादे ळं नमो
हृदाद्युदरे क्षं नमो हृदादिमुखे न्यासोऽयमनेकविधः ॥ तथा च ॥
अथ संहारमातृकान्यासः ॥ तस्य ध्यानम् ॥ अक्षस्रजं त्वमृतकुंभ
मुदग्रटंकं विद्यां करैरविरतं दधतीं त्रिनेत्राम् अर्धेंदुमौलिमरुणामर
विंदवामां वर्णात्मिकां प्रणमत स्तनभारनम्राम् न्यासमत्र ॥ हकारा
दिक्षकारांतं न्यसेद्यथा ॥ मुखादिहृदयांतं हं नमः इत्यादि ॥ अथ स्थि
तिमातृकान्यासः ॥ डादिठांतः ॥ ओं आं यं तोनमोत्तो वामबिंदुबिंदु

वर्जिताः पंचाशद्वर्णविन्यासः क्रमादुक्तो मनीषिभिः ॥ इतिमतः अप
रंच ॥ चतुर्थी मातृकाप्रोक्ता केवला बिंदुसंयुताः सविसर्गा सैव सा
चरहस्यसृष्टणैकथ्यते विद्याकरी केवला च सोमसूर्याग्निकारिणी
सविसर्गा पुत्रदा च सबिंदुर्विघ्नदायिनी ॥ यामले ॥ भूतशुद्धिलिपि
न्यासौ विना यस्तु प्रपूजयेत् विपरीतफलं दद्यादभक्त्या पूजनं यथा
सामासन्यासेऽङ्गुलिनियमस्तु गौतमीये मनसा वान्यसेन्मासांगु
ष्ठेण वाथवा मुद्रेन अंगुष्ठानामिकाभ्यां वा चान्यथा निष्फलं भवेत् वि
शेषन्यासेतु नान्यनियमः प्रणामादिविद्यायां विशेषमातृकान्यासेव
क्रमः ॥ मंत्रमुक्तावल्यां ॥ ललाटे नामिकामध्ये विन्यसेन्मुखवृत्ततः।
के तर्जनीमध्यमानामा वृद्धमाना च नेत्रयोः अंगुष्ठकर्णयोश्चैव क
निष्ठांगुष्ठयोर्नसोः मध्यास्तिस्रो गंडयोश्च मध्यमासोष्ठयोन्यसेत्
अनामां दंतयोर्मूर्ध्नि मध्यमामुत्तमांगके मुखेनामां मध्यमा च हस्त
पादद्वयपार्श्वयोः कनिष्ठानामिकामध्यास्ताश्च पृष्ठेथ विन्यसेत् ताः सां
गुष्ठा नाभिदेशे सर्वाः कुक्षौ च विन्यसेत् हृदये च तलं सर्वमंसयो
श्च ककुत्स्थले हृत्सर्वहस्तपत्कुक्षिमुखे च तलमेव च एतास्तु मातृ
कामुद्राः क्रमेण परिकीर्तिताः अज्ञात्वा विन्यसेद्यस्तु न्यासः स्यात्तस्य
निष्फलः प्राणायामेऽङ्गुलिनियमस्तु ज्ञानार्णवे कनिष्ठानामिकांगुष्ठै
र्यन्नासापुटरोधनं प्राणायामः स विज्ञेयस्तर्जनीमध्यमे विना प्राणा
यामो द्विविधः सगर्भो निगर्भश्च सगर्भो मंत्रजापेन निगर्भो मात्रया भ
वेत् मात्रा च ॥ वामजानुनि हस्तस्य भ्रमणं यावता भवेत् कालेन।
मात्रा सा ज्ञेया मुनिभिस्तंत्रपारगैः ॥ अथ प्राणायामः ॥ मूलमंत्रस्य
बीजस्य प्राणस्य वा षोडशधा जपेन वामनासापुटेन वायुं पूरयेत् ॥
तथा च कालीक्रमे ॥ प्राणायामत्रयं कुर्यान्मूलेन प्रणवेन च अथवा
मंत्रबीजेन यथोक्तविधिना सुधीः तस्य चतुःषष्टिवारजपेन वायुं कुं
भयेत् तस्य द्वात्रिंशद्वारजपेन दक्षिणनासापुटेन वायुं रेचयेत् पुन
र्दक्षिणेनापूर्य उभाभ्यां कुंभयित्वा वामेन रेचयेत् पुनर्वामेनापूर्य उभा

ध्यां कुंभयित्वा दक्षिणेन रेचयेत् योगिके तु भुजर्मात्रा नियमाः तथा
चोक्तं तमीये ॥ मंत्रप्राणायामः प्रोक्तो योगिकं कथयामि ते पूरयेद्वा
मध्याविद्यां मंत्री षोडशांशं समाप्येन्मादि यद्वा चतुःषोडशवारं जपेत् पू
रकादिकं कुर्यात् ॥ तथा चोक्तं तंत्रांतरे ॥ पूरयेत्षोडशैर्वायुं धारयेच्च
तुर्गुणैः रेचयेत्कुंभकारेण अशकात्तु तुरीयकाः तदशाकस्य तो
...स्यादेवं प्राणस्य संक्षयः प्राणायामं विना मंत्रपूजनेन तु योगता
...मालविशेषोवकल्प्या ॥ अथ पीठन्यासः ॥ हृदि ॐ आधारश
क्त्यै नमः ॐ कूर्माय नमः ॐ अनंताय नमः पृथिव्यै क्षीरसमुद्राय नमः
श्वेतद्वीपाय नमः मणिमंडपाय नमः कल्पवृक्षाय नमः मणिवे
दिकायै नमः रत्नसिंहासनाय नमः एतन्मणवादिनैर्मांतपूजयेत्
ततो दक्षिणस्कंधे ॥ ॐ धर्माय नमः वामस्कंधे ॐ ज्ञानाय नमः वा
मोरौ ॐ वैराग्याय नमः दक्षिणोरौ ॐ ऐश्वर्याय नमः मुखे ॐ अध
र्माय नमः नाभौ ॐ अवैराग्याय नमः दक्षपार्श्वे ॐ अनैश्वर्याय नमः
तथा च शारदायाम् ॥ अंसोरुयुग्मयोर्विद्वान्प्रादक्षिण्येन देशिकः
धर्मं ज्ञानं च वैराग्यमैश्वर्यं च क्रमान्न्यसेत् मुखपार्श्वनाभिपार्श्वेष्वध
र्मादीन्प्रकल्पयेत् हृदि ॐ अनंताय नमः ॐ पद्माय नमः ॐ अं सूर्य
मंडलाय द्वादशकलात्मने नमः ॐ ··· सोममंडलाय षोडशकलात्म
ने नमः ॐ मं वह्निमंडलाय दशकलात्मने नमः सं सत्वाय नमः रं रज
से नमः तं तमसे नमः आं आत्मने नमः अं अंतरात्मने नमः पं परमा
त्मने नमः ह्रीं ज्ञानात्मने नमः इत्येते विन्यसेत् हृत्पद्मस्य केसरेषु पी
ठशक्तीः पीठमंत्रं च न्यसेत् ॥ ततऋष्यादिन्यासः ॥ ऋषिस्तु ॥ म
देशस्य मुखेशाल्यायः साक्षात्तपसा मनुम् संसाधयति शुद्धात्मा सत
स्य ऋषिरीरितः गुरुत्वान्मस्तके चास्य न्यासस्तु परिकीर्तितः सर्वेषा
मंत्रतत्वानां छादनाच्छंद उच्यते अक्षरत्वात्पदत्वाच्च मुखे छंदः प्रकी
र्तितः सर्वेषामेव मंत्राणां भाषणाच्छ्रवणात्तथा हृदयांभोजमध्यस्था
देवता तत्र तां न्यसेत् ऋषिछंदोपरिज्ञानान्मंत्रः फलभाग्भवेत् दो

वेत्स्यातिमंत्राणां विनियोगमजानताम् ॥ तंत्रांतरे ॥ ऋषिन्यासं मूर्ध्नि
देशे त्वदस्तु मुखपंकजे देवतां हृदये चैव बीजं तु गुह्यदेशके शक्तिं तु पा
दयोश्चैव सर्वांगे कीलकं न्यसेत् ततन्मंत्रोक्तमार्गांकुर्यात् ॥ तदुक्तं कु
लार्णवे ॥ आगमोक्तविधानेन न्यासं नित्यं करोति यः देवताप्रीतिमा
प्नोति मंत्रसिद्धिः प्रजायते योन्यासकवचछन्नो मंत्रं जपति तं प्रिये वि
घ्ना दृष्ट्वा पलायंते सिंहं दृष्ट्वा यथा गजाः अकृत्वा न्यासजालं यो मूढ
त्वा जपते मनुम् सर्वविघ्नैः स बाध्यः स्याद्व्याघ्राणां मृगशिशुर्यथा अथा
सनेंगुलिनियमः त्रिंशाकदशवितस्तिसंख्यया शैलसंभवेंगुली नाभि
ति वचनात् इति सर्वसाधारणम् वेलवेत अंतगुष्ठानुजवोरस्तं तु शा
त्वा भवेन्मुद्राहृदये शीर्षके च अथांगुष्ठाखलमुष्टिः स्त्रीत्वाधाकर
देहांगुलयोर्वमंतोस्य नाराचामुष्टिबाहुयुग्मकाष्ठ गतं जंमु
द्वितीयनिस्तु विधविधिकाः कथिता स्वमुद्राय त्राहिणीतर्जनीम
ध्यमेव ततः तत्तत्कल्पोक्तमुद्राप्रदर्शपूर्वध्यानं कृत्वा मानसैः संपूज्य
शंखस्थापनं कुर्यात् ॥ तथा च सनत्कुमारीये ॥ अकृत्वा मानसं या
गं न कुर्याद्बाह्यपूजनम् शंखस्थापनं तु दीक्षाप्रकरणे उक्तम् ततः पी
ठपूजा पीठस्यांतरे गुरुपंक्तीः पूजयेत् वायव्यादीशपर्यंतम् ॐ गु
रुभ्यो नमः ॐ परमगुरुभ्यो नमः ॐ परापरगुरुभ्यो नमः ॐ परमे
ष्ठिगुरुभ्यो नमः त्रिपुरादौ तु विशेषगुरुपूजा वक्ष्यमाणा पीठस्य दक्षि
णे ॐ गणेशाय नमः पीठमध्ये ॐ आधारशक्त्यै नमः ॐ कूर्माय न
मः ॐ शेषाय नमः ॐ पृथिव्यै नमः ॐ क्षीरसमुद्राय नमः ॐ श्वेत
द्वीपाय नमः ॐ मणिमंडलाय नमः ॐ कल्पतरवे नमः ॐ मणि
वेदिकायै नमः ॐ रत्नसिंहासनाय नमः अग्निकोणे ॐ धर्माय नमः ए
वं नैर्ऋति वायव्य ईशानेषु ज्ञानवैराग्यैश्वर्याणि पूजयेत् पूर्वादिचतुर्दिक्षु ॥
अधर्माज्ञानावैराग्यानैश्वर्याणि पूजयेत् मध्ये अनंतादिरूपं ज्ञानात्म
ने नमः इत्यंतं संपूज्य पूर्वादिकेसरेषु मध्ये तत्तत्कल्पोक्तपीठशक्ती
संपूज्य मध्ये पीठमंत्रं पूजयेत् नानादिविधादौ तु विशेषो वक्ष्यमाणः

पूर्वादि दिङ्नियमस्तु पूज्यपूजकयोर्मध्यं प्राचीति कीर्तितं बुधैः तद्दक्षि-
णं दक्षिणं स्यादुत्तरमुत्तरं स्मृतम् पृष्ठं तु पश्चिमं ज्ञेयं सर्वत्रैवं प्रयोजयेत्
अविशेषं यत्र नियमस्तु मत्स्यसूक्ते अनुक्तकल्पे यत्रास्त्र लिखितं स्याद्द-
लाष्टकम् षट्कोणकर्णिकं तत्र वेदद्वारोपशोभितम् ततः पुनर्ध्या-
त्वावाहनादिप्राणप्रतिष्ठान्तं कर्म कुर्यात् ततः षोडशोपचारेण पंचो-
पचारेण वा पूजां कुर्यात् षोडशोपचारनियमस्तु आसनं स्वागतं पा-
द्यमर्घ्यमाचमनीयकम् मधुपर्काचमस्नानवसनाभरणानि च सु-
गन्धिसुमनाधूपदीपनैवेद्यवन्दनम् प्रयोजयेदर्चनायामुपचारास्तु षो-
डश अथवा तेषामभावे पंचोपचारान् कल्पयेत् गन्धादयो नैवेद्यान्ताः पू-
जा पंचोपचारिका अर्चायाः पंच पंचैव गन्धाद्या इति भेदतः पुष्पपर्य-
न्तमुपचारं तत्तन्मन्त्रेण दत्वा षडङ्गेन पूजयेत् पुष्पदाने तु विशेषः पु-
ष्पं वा यदि वा पत्रं नेष्टं चाधोमुखं च तत् दुःखदं तत्समाख्यातं यथोत्प-
न्नं तथार्पयेत् अधोमुखं फलं नेष्टं पुष्पाञ्जलिविधौ न तु ततो मूर्ध्नि
हृत्पादे सर्वाङ्गके च मूलेन पंच पुष्पाञ्जलीं दत्वा तत्तत्कल्पोक्तावरणपू-
जां कुर्यात् तथा च ॥ ततः पुष्पाञ्जलीं दत्वा परिवारार्चनं चरेत् इति भेदः
ततो धूपदीपौ दद्यात् तथा च जयध्वनिमन्त्रमातः इति पुष्पाद्यैस्तैः घ-
ण्टां सम्पूज्य वामहस्तेन तां वादयन् तत्तन्मन्त्रेण नीचैः धूपं दद्यात् ॥
एवं सर्पिर्युक्तं दीपं दद्यात् ततो मूलेन पुष्पाञ्जलिं दत्वा नैवेद्यमानी-
य फडिति संप्रोक्ष्य चक्रमुद्रयाभिरक्ष्य तदुपरि मूलमष्टधा जप्त्वा धेनुमु-
द्रयामृतीकृत्य मूलमुच्चार्य नैवेद्यं दद्यात् ततः पुनराचमनीयं दत्वा ता-
म्बूलादि दद्यात् वैष्णवे तु नैवेद्ये विशेष उक्तः ततः सपरिवारां देवतां गन्धा-
दिभिरभ्यर्च्य नृत्यगीतैर्देवं सन्तोष्य जयजयेत्युक्त्वा विलोमार्घ्यं दत्वा पु-
ष्पाञ्जलिं दद्यात् दानेन ॥ आदौ मूलं ततो द्रव्यमालेख्यः ततः संप्रदानं
ततः कंपदमिति सर्वत्र तथा च कुलसारे आदौ मन्त्रं समुच्चार्य पश्चाद्देयं
सस्वरेण संप्रदानं नन्देते तु ततस्त्यागार्थकं पदम् एवं क्रमेण देवेभ्य
उपचारान् प्रकल्पयेत् सर्वत्र मन्त्रान्ते कर्मसन्निपातस्वनत्वलकोदकमा

दाय ततः पूर्वप्राणबुद्धिदेहधर्माधिकारतो जाग्रत्स्वप्नसुषुप्त्यवस्थासु
मनसा वाचा हस्ताभ्यां पद्भ्यामुदरेण शिश्ना यत्स्मृतं यदुक्तं यत्कृतं तत्सर्वं
ब्रह्मार्पणं भवतु स्वाहा मां मदीयं सकलं सम्यग्गुरुकदेवतायै समर्पये
ॐ तत्सत् नमस्कारानन्तरं वा ततोष्टोत्तरसहस्रं शतं वा जप्त्वा गुह्यातिगुह्य
गोप्त्री त्वं गृहाणास्मत्कृतं जपम् सिद्धिर्भवतु मे देवि त्वत्प्रसादात्त्वयि स्थिते
तथा च ॥ कस्तूरीशकलोन्मिश्रं ताम्बूलं च निवेदयेत् अस्मद्गोप्त्री त्वं
देवीति विशेषः इति जपं समर्प्य स्तुत्वा ऽष्टाङ्गप्रणामं कुर्यात् पद्भ्यां
कराभ्यां जानुभ्यामुरसा शिरसा दृशा वचसा मनसा चेति प्रणामोऽष्टाङ्ग ई
रितः बाहुभ्यां च सजानुभ्यां शिरसा वचसा दृशा पञ्चाङ्गोयं प्रणामः स्मृ
तः जानुस्तु रतः स्थितः भूमौ निपतयः कुर्यात् कृत्वाष्टाङ्गानतिं सुधीः
सहस्रजन्मजं पापं तत्क्षणाद्वैकुण्ठमाप्नुयात् तथा वेदविद्याधनं दत्वा
यत्फलं लभते नरः तत्फलं लभते भक्त्या सकृत्कृत्वा प्रदक्षिणम् कु
स्नरस्रपलत्वणं विषमारे प्राग्वहस्तेन सर्वत्र प्रदक्षिणं प्रकीर्तितं
नतिविशेषस्तु यामले ॥ त्रिकोणाकारा सर्वत्र नतिः शक्तिः प्रकीर्तिता
अर्धचन्द्रं महेशस्य द्विष्ठस्त्रस्य समीरितः तथा शिवप्रदक्षिणं मत्री अ
र्धचन्द्रक्रमेण च सव्यासव्यक्रमेणैव सोमसूत्रं न लङ्घयेत् जलनिः
सरणो मार्गः सोमसूत्र इतीरितः इति वचनात् प्रसार्य दक्षिणं हस्तं
ठयं नत्वा शिरः पुनः दर्शयेद्दक्षिणं पार्श्वं मनसापि प्रदक्षिणम् त्रिया
चैवेष्टये लग्न्यदेवताया प्रदक्षिणम् एकहस्तप्रणामश्च एकं चापि
प्रदक्षिणम् अकाले दर्शनं विष्णोर्हन्ति पुण्यं पुराकृतम् देवतां गम्या
वरणदेवतां विलाप्य नमस्येति विसृज्य संहारमुद्रया तेजः पुष्पं सा
र्थं स्वहृदयमानयेत् तथा च निधाय देवतां पश्चात्सीयहृत्सरसीरु
हे सुषुम्णावर्त्मना पुष्पमाघ्राय योजयेत्ततः ततपेशान्यां मण्डलि
कां कृत्वा निर्माल्यधारिणं दद्यात् वेल्लवेत ॐ विष्वक्सेनाय नमः शाक्तो
ॐ विशेषिकायै नमः शिवे ॐ चण्डेश्वराय नमः सूर्ये ॐ तेजश्चण्डाय
नमः गणेशे ॐ उच्छिष्टगणेशाय नमः कालिकादौ ॐ उच्छिष्टचण्डालि

तं·
स्ता· लेपनम् नैवेद्यं चापि भुञ्जीत दत्त्वा तद्भक्तिशालिने देवतायाश्चावशिष्टं सा
स्तु· लिलं शाम्भवमद्यताम् अग्नौ लग्नं मनुष्याणां ब्रह्महत्यां व्यपोहति मत्स्यमांसके
अनिवेद्य न भुञ्जीत मत्स्यमांसादिकं च यत् अन्नं विष्टा पयो मूत्रं यद्विष्णोरा
30 वनिवेदितम् ॥ तथा च भैरवीतन्त्रे ॥ हृदये वा बहिर्देवीं समभ्यर्च्य विधिव
त्ततः निर्माल्यवस्तु चोद्देशे नैवेद्यं महयेत्सुधीः इति अत्र तत्तद्देवतोप
लक्षणम् ॥ इति सामान्यपूजापद्धतिः ॥ यामाङ्कुशाद्यां प्रकृतिं मुनीन्द्रै
ः षड्गां त्रिशक्तिं शिवमन्त्रपूर्णाम् नित्यां चतुर्भिस्त्वरितां तथा सां भजा
मि नित्यं भुवनेश्वरीं ताम् अथ वक्ष्ये जगद्धात्रीमधुना भुवनेश्वरीम् ब्रह्मा
दयोऽपि यां नत्वा लोलेभिरिष्टिपदमर्जिताम् ॥ भुवनेश्वरीमन्त्रः ॥ नकु
लीशोऽग्निमारूढो वामनेत्रार्धचन्द्रवान् नकुलीशो हकारः अग्निः रे
वामनेत्रः ईकारः अर्धचन्द्रोऽनुस्वारः भुवनेश्वरीपदमित्येतन्मातृ
मूर्तिसंहितायाम् ॥ व्योमबीजं महेशानि अस्य पूजाप्रकारः सा
मान्यपद्धत्युक्तप्रातःकृत्यादिपीठन्यासान्तकर्म विधाय केसरे पूर्व
दिक्क्रमेण मध्ये पीठशक्तीर्यजेत तद्यथा ॥ जया विजया अजिता
अपराजिता नित्या विलासिनी दोग्ध्री अघोरा मध्ये मङ्गला वा कोत
ॐ जयायै नमः कर्णिकायां ह्रीं आसनाय नमः ततः ऋष्यादिन्यासः
भुवनेश्वरीमन्त्रस्य शक्तिः ऋषिः गायत्रीछन्दः हकारो बीजं ईकारः
शक्तिः रेफः कीलकम् भुवनेश्वरी देवता चतुर्वर्गसिद्ध्यर्थे विनियो
गः शिरसि शक्तये ऋषये नमः मुखे गायत्रीछन्दसे नमः हृदि भुव
नेश्वर्यै देवतायै नमः गुह्ये हं बीजाय नमः पादयोः ईं शक्तये नमः
सर्वाङ्गे कीलकाय नमः ततो मन्त्रन्यासं कुर्यात शिरसि ॐ हृल्लेखा
यै नमः वदने गगनायै नमः हृदि ॐ रक्तायै नमः गुह्ये ईं करालि
कायै नमः पादयोः अं महोच्छुष्मायै नमः एवं चतुर्धा प्राच्योदीच्यपश्चि
मेषु तामसेन एतान्सां बीजानि निर्दिबये ॥ सत्यादिं च हृत्स्वायान्य
सत्याभूतसप्तमाः ततः करांगन्यासं कुर्यात ह्रां अङ्गुष्ठाभ्यां नमः ह्रीं
तर्जनीभ्यां स्वाहा ह्रूं मध्यमाभ्यां वषट् ह्रैं अनामिकाभ्यां हुम् ह्रौं

कनिष्ठाभ्यां वौषट् ह्रः करतलपृष्ठाभ्यां फट् ह्रां हृदयाय नमः हृदि
ह्रीं शिरसे स्वाहा शिरसि ह्रूं शिखायै वषट् शिखायां ह्रैं कवचाय हुं
कवचे ह्रौं नेत्रत्रयाय वौषट् नेत्रयोः ह्रः अस्त्राय फट् चतुर्दिक्षु तथा च
षट्दीर्घभाजा बीजेन कुर्यादङ्गक्रियां मनोः ॥ स्वच्छन्दसंग्रहे ॥ स्वरां
विहाय बीजं तद्दीर्घषडङ्गकानि योजयेत् षडङ्गानि विधेयानि सर्वत्राय
विधिः स्मृताः अङ्गुलिनियमस्तु पूर्ववत् ॥ सर्वत्र करांगन्यासे प
वक्रमः ततो बाह्ये ॐ गायत्रीसहितब्रह्मणे नमः दक्षिणकपोले सा
वित्रीसहितविष्णवे नमः वामकपोले ॐ वागीश्वरीसहितमहेश्वरा
य नमः वामकर्णे ॐ श्रीसहितधनपतये नमः कुबेरतिसहितस्मराय
नमः सव्यकर्णे ॐ पुष्टिसहितगणपतये नमः दक्षकर्णे गण्डान्तराले
ॐ शंखनिधये नमः वामकर्णगण्डान्तरे मुखे ॐ भुवनेश्वर्यै देवतायै
नमः एवं कृत्वा मूलं दक्षिणस्तनवामस्तनदक्षिणांसवामांसहृदयप
ष्ठहृदयनाभिषु न्यसेत् तथा वर्णैर्भिन्नं न्यसेत् विस्तारे ॐकाराद्य
न्तयुक्तं नामान्ते च यथाविधि विधिना विन्यसेत् सर्वं पञ्चाक्षरस्य मतेन त
तो बाले ॥ ॐ ब्राह्म्यै नमः वामांसे ॐ माहेश्वर्यै नमः जठरे वैष्णव्यै
नमः दक्षिणपार्श्वे ॐ वाराह्यै नमः दक्षिणांसे ॐ इन्द्राण्यै नमः अपरग
ले ॐ चामुण्डायै नमः हृदि ॐ महालक्ष्म्यै नमः इति विन्यस्य मूलेन व्या
पकत्रयं कुर्यात् ॥ ततो ध्यानम् ॥ ॐ उद्यद्दिनद्युतिमिन्दुकिरीटां तुं
गकुचां नयनत्रययुक्ताम् स्मेरमुखीं वरदाङ्कुशपाशाऽभीतिकरां प्र
भजे भुवनेशीम् इति ध्यात्वा मानसैः संपूज्य प्राणविस्थापनं कुर्यात् ॥ य
न्त्रपूजा ॥ पद्ममष्टदलं बाह्ये वृत्तं षोडशभिर्दलैः विलिखेत्कर्णिकाम
ध्ये षट्कोणमतिसुन्दरम् चतुरस्रं चतुर्द्वारमेवं मण्डलमालिखेत् त
तो दीक्षापद्धत्युक्तक्रमेण प्राणविस्थापनं कुर्यात् ततः सामान्यपद्धत्युक्त
पीठपूजां कृत्वा पीठशक्तीः पूजयेत् ॥ तद्यथा ॥ पूर्वादिकेसरेषु जया
यै विजयायै अजितायै अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यै अघोरा
यै मध्ये मङ्गलायै प्रणवादिनमोन्तेन पूजयेत् तदुपरि सर्वशक्तिपद्मा

नै॰
सा॰
३१

31

सनायनमः ततः पूर्ववत्स्नानावाहनादिपुष्पदानपर्यंतं विधाय केसरे
षु अग्न्यादिकोणमध्ये दिक्षु च ह्रां हृदयाय नमः इत्यादिना षडंगेन पूजयि
त्वा पंचपुष्पांजलीन् दत्त्वा ततश्चावरणपूजा कर्णिकामध्ये ॐ हृल्लेखायै
नमः पूर्वे गगनायै नमः दक्षिणे रक्तायै नमः उत्तरे करालिकायै न
मः पश्चिमे महोच्छुष्मायै नमः षट्कोणे पूर्वे ॐ गायत्र्यै ॐ ब्रह्मणे नै
ऋते सावित्र्यै ॐ विष्णवे वायव्ये ॐ सरस्वत्यै ॐ रुद्राय वह्निकोणे ॐ श्रि
यै ॐ धनपतये पश्चिमे ॐ रत्यै ॐ स्मराय ऐशान्यां ॐ पुष्ट्यै ॐ गणपत
ये षट्कोणस्योभयपार्श्वयोः ॐ शंखनिधये ॐ पद्मनिधये केसरेषु अ
ग्निनिर्ऋतिवाय्वीशानमध्येषु चतुर्दिक्षु ह्रां हृदयाय नमः इत्यादिना षडं
गं पूजयेत् तथा च निबंधे ॥ केसरेष्वग्निकोणादि हृदयादीनि पूजयेत्
नेत्रमग्रे दिशास्वस्त्रं ध्यात्वा तथाङ्गदेवताः भरम्याद्यास्तु विशेषावरणाः
अष्टदलेषु पूर्वादि ॐ अनंगकुसुमायै ॐ अनंगकुसुमातुरायै ॐ अ
नंगमदनायै ॐ अनंगमदनातुरायै ॐ भुवनपालायै ॐ गगनवेगायै
ॐ शशिरेखायै ॐ गगनरेखायै नमः षोडशदलेषु पूर्वादि ॥ ॐ करालायै
विकरालायै ॐ उमायै ॐ सरस्वत्यै ॐ श्रियै ॐ दुर्गायै ॐ उषायै ॐ लक्ष्म्यै ॐ
श्रुत्यै ॐ स्मृत्यै ॐ धृत्यै ॐ श्रद्धायै ॐ मेधायै ॐ मत्यै ॐ कान्त्यै ॐ आर्या
यै तद्बहिः पूर्वादि ॐ अनंगरूपायै ॐ अनंगमदनायै ॐ अनंगमदना
तुरायै ॐ भुवनवेगायै ॐ भुवनपालिकायै ॐ सर्वशिशिरायै ॐ अनं
गवेदनायै ॐ अनंगमेखलायै नमः तद्बहिर्भूपुरे पूर्वादि ॐ लां इन्द्राय दे
वनाधिपतये [illegible] सायुधाय सवाहनाय सपरिवाराय ॐ रं
अग्नये तेजोधिपतये सायुधाय स्वाहा ॐ मां यमाय प्रेताधिपतये सायु
धाय स्वाहा ॐ क्षां नैर्ऋतये रक्षोधिपतये सायुधाय स्वाहा ॐ वं वरुणा
य जलाधिपतये सायुधाय स्वाहा ॐ वां वायवे प्राणाधिपतये सायुधाय
स्वाहा ॐ सां सोमाय ताराधिपतये स्वाहा
धिपतये सायुधाय स्वाहा इंद्रेशानयोर्मध्ये ॐ आं ब्रह्मणे प्रजा
पतये सायुधाय स्वाहा ॥ निर्ऋतिवरुणयोर्मध्ये ॐ ह्रीं अनंताय नागाधिप

॥ तथा च ॥

लोकपालास्ततः पूज्याः समंताद्बहिरस्त्रके । वज्रहस्तेशयोर्मध्ये ब्रह्मा वरु-
णयोर्मध्ये तथा ब्रह्मविष्णू सदा पूज्यौ दिगीशा प्राचीविदुर्बुधाः ॥ इंद्रादि लोकपा-
लानां बीजं मंत्राद्यं वाचिकाः स्वस्वबीजाद्भिर्या सर्वे स्वस्वतत्त्वाणि नमोंतकाः
इति वचनात्सर्वत्र प्रणवादि नमोंतता एतानि बीजानि ह स्वब्रीं मां सा
सहितैर्वरुणानिलयक्षेश्वरैः अनंतविधुं सद्वर्कैर रक्षोः पाशेन मायया अ-
नेन यजेत् लोकपालानां मूलपारिषदान्वितान् इति जातियपोपेतादि स्व-
स्व बीजादितो यजेत् सवाहनायेति दीपिकातः हि: स्ववीदि वज्राय शक्त्यै दं-
डाय खड्गाय पाशाय अंकुशाय गदाय शूलाय पद्माय चक्राय प्रणवादि
नमोंतेन प्रपूजयेत् ततो धूपादिविसर्जनांतं कर्म समापयेत् अस्य मंत्र-
स्य पुरश्चरणे द्वात्रिंशल्लक्षजपः ॥ तथाच ॥ प्रजपेन्मंत्रविन्मंत्रं द्वा-
त्रिंशल्लक्षमानतः त्रिमध्वक्तैः किंशुकैर्जुहुयाद्दृष्टद्रव्यैर्दशांशतः ॥ अष्टद्र-
व्याणि यथा ॥ अश्वत्थोदुंबरप्लक्षन्यग्रोधसमिधस्तिलाः सिद्धार्थ-
पायसाज्यानि द्रव्याण्यष्टौ विदुर्बुधाः त्रिमध्वं घृतं मधु शर्करा इति
वाग्भवं शक्तिभुवनिताराम बीजं त्रयात्मकम् मंत्रमस्य हरेर्मंत्री त्रिवर्गफ-
लप्रदायकम् न्यासपूजादिकं सर्वमेकाक्षरीवत् षडंगन्यासे तु विशेषः
पं ह्रीं श्रीं अंगुष्ठाभ्यां नम इत्यादि ह्रीं हृदयाय नम इत्यादि ॥ तथाच ॥ ष-
ड्दीर्घभाजा मध्येन वाग्भवाद्येन कल्पयेत् षडंगानि विधेयानि जाति-
युक्तानि देशिकः ॥ ध्यानं तु ॥ सिंदूरारुणविग्रहां त्रिनयनां माणिक्य-
मौलिस्फुरत्तारानायकशेखरां स्मितमुखीमापीनवक्षोरुहाम् ।
पाणिभ्यां मणिपूर्णरत्नचषकं रक्तोत्पलं बिभ्रतीं सौम्यां रत्नघटस्थस-
व्यचरणां ध्यायेत्परामंबिकाम् अस्य पुरश्चरणं जपो द्वादशलक्षः ॥
रविलक्षं जपेन्मंत्रं पायसैर्मधुरान्वितैः तद्दशांशेन जुहुयान्मंत्री इत्यादि
वचनात् वाग्बीजपुटिता माया विधेयं असरीमता अस्य मंत्रस्य पूर्ववर्ण-
न्यासः करांगन्यासस्तु ॥ पं ह्रीं पं अंगुष्ठाभ्यां नमः इत्यादि पं ह्रीं पं हृद-
याय नम इत्यादि तथाच ॥ मध्येन दीर्घयुक्तेन वाक्पुटेन प्रकल्पयेत्
ध्यानं तु ॥ श्यामांगीं शशिशेखरां निजकरैर्दानं च रक्तोत्पलं रत्नकांचन

तं०
स्ता०
१२
32

धकं परं भयहरं सविभ्रतीं शशिध्वतीम् शुक्लाहारलसत्पयोधरनतां
नेत्रत्रयोल्लासिनीं वंदे हंसरसं जितां हरवधूं रकारबिंदुस्थिताम् एवं
ध्यात्वा पूर्ववद्यजेत् अष्टपत्रेषु विशेषः अं ब्राह्म्यै ईं माहेश्वर्यै ऊं कौ
मार्यै ऋं वैष्णव्यै ऌं वाराह्यै ऐं इन्द्राण्यै औं चामुण्डायै अः महालक्ष्म्यै
अं असितांगाय इं रुरवे उं चण्डाय ऋं क्रोधाय ऌं उन्मत्ताय एं कपालि
ने ओं भीषणाय अं संहाराय यद्वा अं आं असितांगाय ब्राह्म्याभ्यां नमः दी
र्घा मातरः प्रोक्ता ह्रस्वाद्या भैरवाः स्मृताः अमन्तसं वै पूर्ववद्धोयमम
अस्य पुरश्चरणं जपो दशलक्षः ॥ इति भैरवः अतं रगत्वा मधुरान्वितैः प
लाशपुष्पैर्दशांशहोमः ॥ तथा च ॥ तत्त्वलक्षं जपेन्मंत्रं जुहुयाद्दशां
शतः पलाशपुष्पैः स्वादुरैः पुष्पैर्वा राजवृक्षजैः तत्त्वलक्षं च तद्विंश
तिलक्षमिति केचित् अनंतो बिंदुसंयुक्तो मायाया वह्निताग्नितारवान् पा
शादि महतो मंत्रः सर्ववश्यफलप्रदः अस्य पकाहरीवत् ॥ ऋषिश्छंदो
देवतान्यासः ॥ अंगमंत्रमस्त्र ॥ ह्रीं अंगुष्ठाभ्यां नम इत्यादि ॥ ह्रीं हृद
याय नम इत्यादिना च ॥ सर्वत्र बीजेन करांगन्यासौ कुर्यात् ॥ तद्ध्या
तथा च निबंधे ॥ ऋष्याद्याः पूर्ववत्प्रोक्ताः स्वबीजेनांगक्रिया मता ध्या
नम् ॥ ओं वरांकुशौ पाशमभीतिमुद्रां करैर्वहन्तीं कमलासनस्थाम्
बालार्ककोटिप्रतिमां त्रिनेत्रां भजेहमाद्यां भुवनेश्वरीं ताम् ॥ अस्या
पूजाप्रकाहरीवत् ॥ अष्टदलेषु ब्राह्म्यादि दिग्युगलेषु पूजयेत् ॥ अस्या
मवस्थाश्चाष्टादलेषु जाया अनुक्रमात् षोडशदलाभावः ॥ तथा च ॥
अंगानि केसरेषु स्युः पत्रस्था मातरः क्रमात् इन्द्रादयः पुनः पूज्या अ
स्त्राणि तद्बहिः अस्य पुरश्चरणं जपो द्वात्रिंशल्लक्षः ॥
स्मस्योऽबरलक्षाणां समिद्भिस्तिलैर्जुहुयात् अर्कैर्दशांशहोमः ॥ दधिमधुघृताक्ताभि
विप्रभुग्जपेन्मंत्रं तत्त्वलक्षं जितेन्द्रियः दधिमधुघृताक्ताभिः
विततमः दधिक्षीरघृताक्ताभिः समिद्भिः क्षीरभूरुहाम् तत्सहस्रयाति लैः
शुद्धैः पयोर्कैर्जुहुयात् ततः अत्र च तत्त्वपाठेन दशांशहोमः ॥ द
मिति वचनात् अथ तत् भुवनेश्वरीमंत्रान् निनतोक्तः ॥

अप्रसिद्धत्वात् उपेक्षिता इति ॥ अथान्नपूर्णा ॥ मायाहृद्भगवंमेते
माहेश्वरिपदं ततः अन्नपूर्णेद्वयुगलं मन्त्रः सप्तदशाक्षरः अयं मन्त्रः प्रण
वादिरष्टादशाक्षरः प्रणवादिर्वा श्रीबीजादिर्वाग्भवादिश्च कामादिश्च
मायां विना सप्तदशाक्षरः कल्पैकवचने तथा प्रतिपादनात् विशेषस्तु
यद्बीजमादिस्तेनैव नामकल्पना प्रणवाद्या यदा देवि तदा सप्तदशाक्ष
री अन्नदा मोक्षदा चैव सदा विभववर्धिनी मायाद्या च यदा देवी तदा
सा सकलेष्टदा श्रीबीजाद्या यदा देवि तदा सर्वविवर्धिनी वाग्बीजा
द्या यदा देवि तदा गीःपाण्डित्यप्रदायिनी कामाद्या च यदा देवी सर्वकामप्रदा
यिनी तारामायादिका विद्या भोगमोक्षैकदायिनी मायाश्रीयुग्म
बीजाद्यास्तु सदा विभवदायिनी श्रीमायायुगबीजाद्या सदा संपत्ति
प्रदा ॥ अथ पूजाप्रयोगः ॥ प्रातःकृत्यादि पीठन्यासांतं विधाय
हृत्पद्मेष्टकेसरेषु मध्ये च भुवनेश्वरीपीठमन्त्रान्तं पीठशक्तीर्वि
न्यस्य ऋष्यादिन्यासं कुर्यात् तद्यथा शिरसि ब्रह्मणे ऋषये नमः
मुखे पंक्तिछन्दसे नमः हृदि अन्नपूर्णायै देवतायै नमः तत्रैव एता
सां मन्त्रशक्तीनां ऋषिर्ब्रह्मा उदाहृतः पंक्तिछंदः समाख्यातं देवता
चान्नपूर्णिका ततः करांगन्यासौ ह्रीं अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां
स्वाहा इत्येवं मंत्रन्यासः ह्रीं हृदयाय नमः इत्यादि सर्वत्र बीजेन कुर्या
त् .... अंगानि मायया कुर्यात् ततो दे
वीं विचिंतयेत् यद्बीजाद्या भवेद्विद्या तद्बीजे नामकल्पना ॥ ततो
ध्यानम् ॥ रक्तां विचित्रवसनां नवचंद्रचूडामन्नप्रदाननिरतां स्तन
भारनम्राम् नृत्यंतमिंदुशकलाभरणं विलोक्य हृष्टाम् भजे भगवतीं
भवदुःखहर्त्रीम् एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्
ततः सामान्यपद्धत्युक्तपीठपूजां विधाय भुवनेश्वरीमंत्रोक्तविजया
दिपीठमंत्रांतं पूजां विधाय पुनर्ध्यात्वा आवाहनादिपंचपुष्पांजलिदान
पर्यंतं कर्म विधायावरणपूजामारभेत् तद्यथा केसरेषु अग्निकोणे
ह्रीं हृदयाय नमः नैर्ऋते ह्रीं शिरसे स्वाहा वायव्ये ह्रीं शिखायै व

तं॰ सा॰ ३३ 33

षट् ऐं श्रां ह्रीं कवचाय हुं मध्ये ह्रीं नेत्रत्रयाय वौषट् चतुर्दिक्षु
ह्रीं अस्त्राय फट् अष्टदले पूर्वादि ब्राह्म्यै माहेश्वर्यै कौमार्यै वैष्ण
व्यै वाराह्यै इन्द्राण्यै चामुण्डायै महालक्ष्म्यै सर्वत्र प्रणवादिनमोन्तेन
पूजयेत् तत्रैव दलेषु पूजयेद् ता ब्राह्म्याद्याः क्रमतः स्थिताः शूद्रस्य
प्रणवश्चतुर्दशस्वरो बिन्दुयुक्तः कालिकापुराणे मंत्रस्यैतत्करणे न
त्रं रुद्रादीन्नवग्रहांदीश्च पूर्ववत्पूजयेत् धूपादिविसर्जनान्तं कर्म समा
पयेत् अस्य पुरश्चरणे जपः षोडशसहस्रसंख्यः तथा च यथाविधि
जपेन्मंत्रं वसुयुग्मसहस्रकम् साज्यान्नेन तु कुर्यात् दशांशाशमनंतरं
अस्य अष्टादिमासो ब्राह्म्यादिपूजान्त तत्कल्पोक्ता ॥ अथ त्रिपुटामं
त्रः ॥ श्रीमायामदनैर्वाक्रोमंत्रो बीजत्रयात्मकः ॥ अथास्य पूजाप्रयो
गः ॥ प्रातःकृत्यादिपीठन्यासान्ते भुवनेश्वरीमंत्रोक्तजयादिपीठम
न्वितं विन्यस्य ऋष्यादिन्यासं कुर्यात् शिरसि सम्मोहनाय ऋषये नमः
मुखे गायत्रीछन्दसे नमः हृदि त्रिपुटायै देवतायै नमः ततः करादि
न्यासः श्रीं अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वाहा क्लीं मध्यमाभ्यां व
षट् श्रीं अनामिकाभ्यां हुं ह्रीं कनिष्ठाभ्यां वौषट् क्लीं करतलपृष्ठा
भ्यां फट् एवं श्रीं हृदयाय नमः ह्रीं शिरसे स्वाहा क्लीं शिखायै वषट्
श्रीं कवचाय हुं ह्रीं नेत्रत्रयाय वौषट् क्लीं अस्त्राय फट् तथा च निबं
धे ॥ ऋषिसम्मोहनश्छन्दो गायत्री देवता स्मृता त्रिपुटाख्याहि हृल्लेखै
बीजैरंगानि षट्क्रमात् ॥ ततो ध्यानम् ॥ पारिजातवने रम्ये मंड
पे माणिक्यकुट्टिमे रत्नसिंहासने रम्ये पद्मे षट्कोणशोभिते
कल्पवृक्षसमासीनां देवतां संस्मरेत् चापपाशांकुशसरसिजा अथ स्ता
पुष्पबाणान्नाविभ्राणां करसरसिजै रत्नमौलिं त्रिनेत्राम् हेमाब्जा
भ्यां कुचभरणतां रत्नमंजीरकांचीग्रैवेयाद्यैर्विलसिततनुं भावये
त्रिकमायाम् वामरादक्षिणे तां तूलकं उकसमुद्रकान् वहंतीं
भिः कुचार्ताभिः सखीभिः परिवारिता ॥ करुणामृतवा
रिणापापसंपतीसायकं दृशा ॥

श्रवुं जपं मंत्रं तत्र शंखं दधतीं पद्मगलमिति दक्षिणामूर्तिवच
नात् एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ततः सामान्योक्त
पीठपूजां विधाय केसरेषु भुवनेश्वरीमंत्रोक्त जयादिपीठमन्त्रं तैः संपू
ज्य पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजा
माचरेत् तत्राग्न्यादिषट्कोणे ॐ लक्ष्म्यै एवं क्रमेण हरये गौर्यै शिवा
य रत्यै कामाय षट्कोणस्योभयपार्श्वे शंखनिधये पद्मनिधये
प्रणवादिनमोंतेन पूजयेत् केसरेषु अग्न्यादिचतुष्कोणेषु मध्ये दि
क्षु च श्रीं हृदयाय नमः इत्यादिना षडंगेन पूजयेत् पत्रेषु ब्राह्म्याद्या
मातरः पूज्याः ॥ तथा च निबंधे ॥ हृल्लेखाविहिते पीठे पूजयेत्तां विधा
नवित् अग्न्यादिषु षट्कोणेषु लक्ष्म्याद्याः प्रतिपूजयेत् लक्ष्मीं हेम
प्रभां नीलीवरदाब्जयुगाभयां शंखचक्रगदांभोजधरं हेमनिभं हरिं
पाशांकुशाभयाभीष्टधरां गौरीं जपारुणाम् मृगटंकाभयाभीष्टधरं
स्फटिकनिभं शिवम् नीलोत्पलधरां सौम्यां रतिं कांचनसन्निभाम् इ
ष्टपाशांकुशेक्ष्वासपुष्पबाणधरं स्मरम् पूर्ववन्निधियुग्मं च यजेदु
भयपार्श्वयोः बहिरंगानि संपूज्याः पत्रेषु मातरः ततो बहिरिंद्रादी
न्स्वरूपान्पूजयेत् ॥ तथा च निबंधे ॥ लोकेशान्वनितारूपानर्च
येत्सौम्यविग्रहान् इति ॥ ततो धूपादिविसर्जनांतं कर्म समाप
येत् ॥ अस्य पुरश्चरणं जपो द्वादशलक्षः तथा च भानुलक्षं ज
पेदेनं मंत्रं तावत्सहस्रकम् विलासरवयथंस् मूलेन मधुसिक्तैः समिद्भि
रैः जपापुष्पैश्च जुहुयान्नाभयेदृश्यनागरुम् आरग्वधः शोणाल्पः
अयं मंत्रस्त्रिधा ॥ तथा च ॥ परादिर्वामवेदादि कामादिर्भवेदयम्
इति दक्षिणामूर्तिवचनात् ततोभिधास्ये त्वरितां त्वरितफलदायिनी
तारो माया वर्मबीजं महिमेशस्वरान्विताः कूर्मस्तदंत्यो भगवान् ष्ट
श्रीं ह्रीं चंद्रतद्रूपम् संवर्तो भगवान्मायाफं दंतो द्वादशान्तरः माया
बीजं भुवनेश्वरी वर्म हूं महिः लेकारः ईशस्वरः एकारः कूर्मश्च का
रः तदंत्यः खकारः भगपकारस्तयुक्तः तत्स्त्रीस्वरूपं दीर्घेन्दुबिंदु हूं स

तं॰
सा॰ वर्त्तः लकारः भगापकारः तदुक्तः अस्यार्द्धेनो मुनिः विराट्छन्दः त्वरिता
३४ देवता पुरुषार्थसिद्धये विनियोगः तथा मुनिरर्जुनस्त्वाख्यातो विराट्छ
34 न्दः समीरितम् देवता त्वरिता प्रोक्ता पुरुषार्थफलप्रदा अस्याः पूजाप्रक्र
तिः प्रातःकृत्यादिपीठन्यासान्तं कर्म विधाय केसरेषु जयादिपीठश
क्तीर्विन्यस्य तदुपरि मध्ये ह्रौं हं वज्रदेह फरु फरु हिंगुल हिंगुल ग
र्ज गर्ज हूं फट् ह्रौं पञ्चाननाय नमः ॥ तथा च ॥ संवर्तको बिंदुयुक्तः क
वचं सकलं वियत् वज्रदेह फरुद्वन्द्वं माभाष्य हिंगुलद्वयम् गर्जयुग्म
मवियत्सेन्दुवर्मास्त्रादीर्घो बिंदुमान् पञ्चाननाय हृदयं पीठमन्त्रः प्रकीर्त्ति
तः ततः ऋष्यादिन्यासः शिरसि अर्जुनऋषये नमः मुखे विराट्छन्द
से नमः हृदि त्वरितायै देवतायै नमः ततो मन्त्रन्यासः ॥ मूर्ध्नि ॐ न
मः भाले हूं नमः गले खें नमः हृदि चं नमः नाभौ छें नमः गुह्ये क्षं न
मः ऊर्वोः स्त्रीं नमः जान्वोः हूं नमः जंघयोः क्षें नमः पादयोः फट् न
मः ॥ तथा च निबंधे ॥ मायाविवर्जिता वर्णा मूर्ध्नि भाले गले हृदि
नाभिगुह्योरुयुग्मेषु जानुजंघापदेषु च विन्यस्य व्यापकं कुर्यान्मू
लेनैव साधकः ततो मूलेन व्यापकं कुर्यात् ततः करन्यासः व
ब्लें अंगुष्ठाभ्यां नमः ब्लें तर्जनीभ्यां स्वाहा स्त्रीं मध्यमाभ्यां वषट्
स्त्रीं हूं अनामिकाभ्यां हूं क्षें कनिष्ठाभ्यां वौषट् क्षें फट् करतलपृ
ष्ठाभ्यां फट् एवं हृदयादिषु विन्यसेत् तथा च कूर्माद्यैः समभिव्यर्णैः
पूर्वपूर्वविवर्जितैः ह्राभ्यां ह्राभ्यां षडंगानि कुर्यात्साधकसत्तमः ॥
ततो ध्यानम् ॥ ॐ श्यामां बर्हिकलापशेखरयुतामाबद्धपर्णांशु
कां गुंजाहारलसत्पयोधरभरामष्टाहिपान्बिभ्रतीम् ताडंकांगदमे
खलागुणरणन्मंजीरतां प्रापितां कैरातीं वरदाभयोद्यतकरां देवीं
त्रिनेत्रां भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ त
तः स्वात्मानमर्चयेत् पीठपूजां विधाय पद्मकेसरेषु पूर्वादिक्रमेण ॐ ज
यायै नमः एवं विजयायै अपराजितायै नित्यायै विलासिन्यै दोग्ध्र्यै
अघोरायै मध्ये मंगलायै प्रणवादिनमोन्तेन संपूजयेत् तथा च हृ

दलेके कल्पिते पीठे नवशक्तिसमन्विते पूजयेच्चरितां देवीं वक्ष्यमाणविधा
नतः पुनः मध्ये तं हुं ह्वं वज्रदेहाय हुं फट् ह्रिं ग्लं गं जं गं जं हं हूं तं पंचानना
यनमः ततः एकोनंकं मात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधा
यावरणपूजामाचरेत् अग्न्यादिकेसरेषु च हृं गायत्र्यै हृदयाय नमः
ओं ह्वंगायत्र्यै शिरसे स्वाहा ह्वां गायत्र्यै शिखायै वषट् ह्रीं हूं गायत्र्यै
कवचाय हुं मध्ये हूं हां गायत्र्यै नेत्रत्रयाय वौषट् दिक्षु हां फट् गा
गायत्र्यै अस्त्राय फट् ॥ तथा च निबंधे ॥ अंगैः प्रणीतां गायत्रीं
केसरेषु पूर्वेयत्क्रमात् दलेषु पूजयेद्देवताः श्रीबीजाद्यास्तु भूषिताः
हुंकारीं विचरीं चैव ओंकारं दनेवेपणीं स्त्रियाम् हूंकारीं तेमकारीं च
फट्कारीं मग्रतो यजेत् पूर्वादिषु दलेषु वा कंवतं श्रीं ह्रीं कारीं पूर्न
मः इत्यादि प्रागाद्यग्रतः श्रीं फट्कारिण्यै नमः द्वारस्याभयपार्श्वे ओं
जयायै नमः ओं विजयायै नमः तद्बाह्ये किंकराय रक्तरक्त
रितज्ञास्थिरो भव हुं फट् इति मंत्रेण किंकरं पूजयेत् द्वारस्य पार्श्व
योः पूर्वोक्तमेवशाकरगुजः जयाख्या विजयाख्या किंकरं मध्ये ततः
रक्तरक्तपदस्यान्ते वरितात्ज्ञास्थिरो भव वर्मास्त्रान्तेन मंत्रेण किंक
रं तद्बहिर्न्यसेत् अर्घ्यादिपूजानान्निनिबंधे अनुक्तत्वात् तथा च
धूपादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं जपो लक्षमि
त्यैः तद्दशांशो बिल्वसमिद्भिः अथ नित्यामंत्रः वाग्भवं का
मबीजं च नित्यक्लिन्नेमदोपुनः द्रांवेवदिविवर्महात्रोहरष्णाणां
यमीरितः । अस्य पूजाप्रयोगः प्रातः कृत्यादिपीठन्यासान्तं वि
धाय केसरेषु मध्ये च पूर्वादिक्रमेण जयादि ह्रीं श्रीं न्यासनायन
मः इत्यन्तं विन्यस्य करष्यादिन्यासं समाचरेत् तद्यथा ॥ शिरसि स
मोहनऋषये नमः मुखे निवृच्छंदसे नमः हृदि नित्यायै देवता
यै नमः ततः करांगन्यासः ऐं अंगुष्ठाभ्यां नमः ऐं तर्जनीभ्यां स्वा
हा ऐं मध्यमाभ्यां वषट् ऐं अनामिकाभ्यां हुं ऐं कनिष्ठाभ्यां वौष

ट् ऐं करतलपृष्ठाभ्यां फट् एवं हृदयादिनमः इत्यादिषडंगेषु न्यसे
त् ॥ तथा च निबंधे ॥ वाचा कृत्वा षडंगानि निर्मितां ध्यायेद्यथाविधि
ततो ध्यानम् ॥ ओं अर्धेन्दुमौलिममलाममराभिवन्द्यामम्बोजपाश
सृणिपूर्णकपालहस्ताम् रक्तांगरागवसनाभरणां त्रिनेत्रां ध्याये
च्छिवस्य वनितां मदविह्वलांगीम् एवं ध्यात्वा मानसैः संपूज्य शंख
स्थापनं कुर्यात् तत्र पीठपूजां विधाय केसरेषु जयादिपीठशक्तीः
संपूज्य मध्ये ह्रीं …… सनाय नमः इति संपूज्य पुनः ध्यात्वावाहना
दिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां कुर्यात् । तद्यथा ।
केसरेषु अग्न्यादिकोणचतुष्टयेषु ऐं हृदयाय नमः ऐं शिरसे स्वाहा
ऐं शिखायै वषट् ऐं कवचाय हुं मध्ये ऐं नेत्राभ्यां वौषट् दिक्षु ऐं अ
स्त्राय फट् पत्रेषु पूर्वादि ओं नित्यायै ओं निरंजनायै क्लिन्नायै क्लेदि
न्यै मदनातुरायै मदद्रवायै द्राविण्यै नारिण्यै सर्वत्र प्रणवादिन
मोन्तेन पूजयेत् तद्बाह्ये इन्द्रादीन् वज्रादींश्च पूजयेत् ततः धूपादिवि
सर्जनान्तकर्म समापयेत् अस्य पुरश्चरणं चतुर्लक्षजपः तथा च ॥
चतुर्लक्षं जपित्वा तु मधुराक्तैर्मधूकजैः कुसुमैर्हवनं कृत्वा तोष
येद्गुरुमात्मनः ॥ अथ वज्रप्रस्तारिणी ॥ वामायानन्तरं नित्ये क्लि
न्ने भूयो मदद्रवे स्वाहान्ते रविसंख्योयं मन्त्रो वश्यप्रदायकः अस्य पू
जायन्त्रं षट्कोणं द्वादशदलं चतुर्द्वारं चतुरस्रं च अस्याः पूजा प्रातः
कृत्यादिपीठन्यासान्तकर्म विधाय केसरेषु जयादिपीठमन्त्रं तं वि
न्यस्य ऋष्यादिन्यासं कुर्यात् शिरसि अंगिरसे ऋषये नमः मुखे त्रि
ष्टुप्छन्दसे नमः हृदि वज्रप्रस्तारिण्यै देवतायै नमः ततः करांग
न्यासः ऐं अंगुष्ठाभ्यां नमः ऐं तर्जनीभ्यां स्वाहा ऐं मध्यमाभ्यां वषट्
ऐं अनामिकाभ्यां हुं ऐं कनिष्ठाभ्यां वौषट् ऐं करतलपृष्ठाभ्यां फट्
एवं हृदयादिषु ॥ तथा च निबंधे ॥ अंगिरा ऋषिस्त्रिष्टुप्छंदो गु
निर्मितैरितनम् वज्रप्रस्तारिणी प्रोक्ता देवताभीष्टदायिनी वाग्भव

षडंगानि विदध्यान्मंत्रवित्तमः ॥ ततो ध्यानम् ॥ ॐ रक्ताब्धौ रत्न
पोतरविदलकमलाभ्यंतरे सन्निषण्णां रक्तांगीं रत्नमौलिस्फुरितश
शिकलां स्मेरवक्त्रां त्रिनेत्राम् बीजापूरेषुपाशांकुशमयनयनद्वः स
त्कपालान्निहस्तैर्बिभ्राणां मानतांगीं स्तनभरनमितामम्बिकामाश्र
यामः ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् पूर्ववत्पी
ठपूजां कृत्वा पुनः ध्यात्वावाहनादि पंचपुष्पाञ्जलिदानपर्यंतं विधा
यावरणपूजामाचरेत् केसरेष्वग्न्यादिकोणमध्ये दिक्षु च षं हृदया
यनमः इत्यादि षडंगं पूज्य अष्टदलेषु पूर्वादि ॐ हृल्लेखायै नमः
ॐ क्लेदिन्यै नमः ॐ क्लिन्नायै नमः ॐ क्षोभिण्यै नमः ॐ मदनातुरा
यै नमः ॐ निरंजनायै नमः ॐ रागवत्यै नमः ॐ मदनावत्यै नमः
ॐ मेखलायै नमः ॐ द्राविण्यै नमः ॐ वेगवत्यै नमः ॐ स्मरायै नमः
तथा हृल्लेखा क्लेदिनी क्लिन्ना क्षोभिणी मदनातुरा निरंजना रागव
ती सप्तमी मदनावती मेखला द्राविणी पश्चाद्वेगवती परा स्मरा तद्ब
हिर्ब्राह्म्यादिमातॄः पूजयेत् तद्बहिः इंद्रादीन् लोकपालान् पूजयेत् ॥
तथा च निबंधे ॥ मातरो दिग्विदिक्पूज्याः पुनः पूज्या दिगीश्वराः त
ततो धूपादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं लक्षजपः
तथा च ॥ मंत्रमेतं जपेल्लक्षं जुहुयात्तद्दशांशतः अयुतं राजवृक्षो
त्थैः घृताक्तैः स्वसमिद्वरैः राजवृक्षाशोणाल्लः ॥ इति भुवनेश्वरी
विद्यापरिच्छेदः ॥ अथ दुर्गामंत्रं वक्ष्ये दृष्टादृष्टफलप्रदम् मायाः
त्रिरूपां विज्ञाबिन्दुभूषितां समवाप्नुयात् पंचांतकः प्रतिष्ठावान्मारु
तो भौतिकासनः नारादि हृदयं तोयं मंत्रो वस्वक्षरः स्मृतः अत्रिदः
कारः दुर्गा उकारः पंचांतको गकारः प्रतिष्ठाख्याकारः मारुतो यः
कारः भौतिका एकारः अस्य पूजाप्रयोगः प्रातः कृत्यादि पीठन्या
सांतं विधाय केसरेषु मध्ये च पीठशक्तीर्विन्यसेत् ॥ तद्यथा ॥
ॐ प्रभायै नमः ईं मायायै नमः ऊं जयायै नमः एं सूक्ष्मायै नमः
ऐं विशुद्धायै नमः ओं नंदिन्यै नमः औं सुप्रभायै नमः अं विजया

येनमः अःसर्वसिद्धायैनमः तदुपरि ॐवज्रनखदंष्ट्रायुधायमहासिं
हायहूंफट्नमइतिविन्यसेत् ततःऋष्यादिन्यासः शिरसिनारदाय
ऋषयेनमः मुखेगायत्रीछंदसेनमः हृदिदुर्गायैदेवतायैनमः त
तःकरांगन्यासः ह्रींॐह्रींदुंदुर्गायैअंगुष्ठाभ्यांनमः ह्रींॐह्रींदुंदु
र्गायैमध्यमाभ्यांनमः ह्रींॐह्रींदुंदुर्गायैअनामिकाभ्यांहुं ह्रींॐ
ह्रींदुंदुर्गायैकनिष्ठाभ्यांवौषट् ह्रींॐह्रींदुंदुर्गायैकरतलपृ
ष्ठाभ्यांफट् एवंहृदयादिषु ॥ तथाचनिबंधे ॥ नमस्कारवि
युक्तेनमूलमंत्रेणसाधकः ह्रींमाद्यैःसदाकुर्वीतषडंगानियथावि
धि ॥ ततोध्यानम् ॥ ॐसिंहस्थाशशिशेखरामरकतप्रख्या
चतुर्भिर्भुजैः शंखंचक्रधनुःशरांश्चदधतीनेत्रैस्त्रिभिःशोभिता
आमुक्तांगदहारकंकणरणत्कांचीक्वणन्नूपुरादुर्गादुर्गतिहा
रिणीभवतुनोरत्नोल्लसत्कुंडला ॥ एवंध्यात्वामानसैःसंपूज्य
शंखस्थापनंकुर्यात् ततःपीठपूजांकृत्वाकेसरेषुमध्येच पूर्वादि
अंप्रभायैनमः ईंमायायैनमः ऊंजयायैनमः ऐंसूक्ष्मायैनमः
ऐंविशुद्धायैनमः ॐनंदिन्यैनमः ॐसुप्रभायैनमः ॐअविजयायैन
मः ॐअःसर्वसिद्धिदायैनमः ॥ तदुपरि ॥ ॐवज्रनखदंष्ट्रायसिं
हायहूंफट्नमः इतिपूजयेत् ॥ तथाच ॥ आद्यह्रस्वचयक्लीवर
हितैःपूजयेदिमाः प्रणवानंतरंवज्रनखदंष्ट्रायुधायच महासिंहा
यवर्णांतनतिसिंहमंत्रमितः दद्यादासनमेतेनमनुनामूलेनकल्पये
त् ततःपुनर्ध्यात्वावाहनादिपंचपुष्पांजलिदानपर्यंतंविधायावा
रणपूजामारभेत् अग्निनिर्ऋतिवायुईशानकोणेषुमध्येदिक्षुच
ॐह्रींदुंदुर्गायैहृदयायनमः इत्यादिनापूजयेत् ॥ ततःपत्रेषुपूर्वा
दि जंजयायैनमः विंविजयायैनमः प्रींप्रीत्यैनमः कींकीर्त्यैनमः
प्रंप्रभायैनमः श्रींश्रद्धायैनमः मेंमेधायैनमः धृंधृत्यैनमः ॥
तथाचनिबंधे ॥ जयाचविजयाकीर्तिःप्रीतिपश्चात्प्रभाततः श्रद्धा
मेधाधृतिःश्चारामाद्यस्तदादिकाः पत्राग्रेषु ॐशंखायनमः प

पूर्वचक्राय नमः ॐ गदायै नमः खड्गाय नमः पाशाय नमः अंकुशा
य नमः शराय नमः चापाय नमः तदग्रे इन्द्रादीन्वज्रादींश्च पूजये
त् ततो धूपादिविसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणमष्टल
क्षजपः ॥ तथा च ॥ अष्टलक्षं जपेन्मंत्रं तिलैर्मधुरलोडितैः पयो
पमा वा जुहुयात्तत्सहस्रं जितेंद्रियः ॥ अथ महिषमर्दिनीमंत्रः ॥
मांतं वियत्स्तनयनं खेतामर्द्दिनि वठद्वयम् अष्टादशीसमाख्याता वि
द्या महिषमर्द्दिनी नाम्नायणोतंत्रे ॥ वियद्धृमज्जाकालाग्नीरत्रिरिस्था
निमठद्वयम् अष्टादशीसमाख्याता विद्या महिषमर्द्दिनी वियद्मका
रः मज्जा षकारः काला मकारः अग्निरकारः ईश्वर इति वचनात् ॥ ई
कारयुक्तो हकारः अयं मंत्रो तारादिः मायादिर्वा श्रवादिः वधूबीजा
दिः कवचादिश्चैव वाक्तरो भवति ॥ तथा च विश्वसारे ॥ प्रणवा
द्यां जपेद्विद्यां मायाद्यां वा जपेत्सुधीः वधूबीजादिकं वापि कवचा
द्यां जपेत्तथा सर्वकाले तु सर्वत्र कामाद्यां वा जपेत्सुधीः वाग्भ
वाद्यां जपेत्तां तु देवी वाक्यविभूतये पुटिता बीजयुग्मेन मनुर्वेदयु
ग्मदेशके विना बीजैर्महाविद्यां निर्बीजां परिकीर्तिता दशाग
रीसमानास्ति विद्या त्रिभुवनेश्वरी प्रणवं च तथा माया भवेद्विद्या
पुनर्दशी कामं प्रणवं संयुक्तं भवेद्विद्या पुनर्दश विना बीजैर्महा
विद्या निर्बीजा परिकीर्तिता ॥ इति विश्वसारवचनात् ॥ अस्य
पूजाप्रान्तः कूर्मादिपीठन्यासांतं कर्म समाप्य केसरेषु मध्ये च दु
र्गामंत्रोक्तपीठशक्तीः पीठमंत्रं च न्यसेत् ततः पूर्वोक्तकरन्यासादि
न्यासं कृत्वा करांगन्यासौ कुर्यात् ॥ तद्यथा ॥ ॐ महिषहिंसके
हूं फट् अंगुष्ठाभ्यां नमः ॐ महिषशत्रोशार्वि हूं फट् तर्जनीभ्यां स्वा
हा ॐ महिषं द्वेषय द्वेषय हूं फट् मध्यमाभ्यां वषट् ॐ महिषं हन
हन देवि हूं फट् अनामिकाभ्यां हुं ॐ महिषसूदनि हूं फट् कनि
ष्ठाभ्यां वौषट् ॥ तथा च तंत्रे ॥ ॐ महिषहिंसिके हूं फट् हृदया
य नमो हृदि ॐ महिषशत्रोशार्वि हूं फट् शिरस्युदीरितम् महि

तं॰
सा॰
१०
37

वंहेषयं टंठं हुं फट् ततः शिखामन्त्रः ॐ महिषघ्नि हन हन देवि हुं फट् कवचमित्यपि ॐ महिषमर्दिनि हुं फट् अस्त्रं ताङ्गषट्कं भैरवि मन्त्रैरेतैः त्रीतिषुक्तैः पञ्चाङ्गानि प्रकल्पयेत् एतेन सर्वविघ्नप्रणाशादि ॥ ततो ध्यानम् ॥ ॐ गारुत्मोपलसन्निभां मणिमौलिकुण्डलमण्डिताम् नौमि भालविलोचनां महिषोत्तमाङ्गनिषण्णधीम् शङ्खचक्रकृपाणखेटकबाणकार्मुकशूलकराम् तर्जनीमपि बिभ्रतीं निजबाहुभिश्शशिशेखराम् एवं ध्यात्वा मानसैः सम्पूज्य शङ्खस्थापनं कुर्यात् ततः पीठपूजां विधाय केसरेषु मध्ये च पूर्वादि पीठशक्तीः पीठमनुयजेत् अत्र शङ्खनिषेधो विश्वसारे ॥ कालीवत्सजयेद्देवीं कालीवत्फलमाप्नुयात् नैवस्य वीयजेद्देवीं नतलस्य कदाचन नं शङ्खेनार्घपात्रं स्यात् कथितं पद्मयोनिना विश्वामित्रस्य पात्रेण मृदा वापि पिष्टं वा यजेत् ततः पुनर्ध्यात्वावाहनादि पञ्चमुद्राञ्जलिध्यानपर्यन्तं विधायावरणपूजामाचरेत् अग्निनिर्ऋतिवाय्वीशानकोणेषु दिक्षु च पूर्वादि वं दं ग पूजयेत् ततः पत्रेषु पूर्वादि दुं दुर्गायै नमः ईं ईश्वरवर्णिन्यै नमः ॐ आर्यायै नमः कं कनकप्रभायै नमः कृं कृत्तिकायै नमः अं अभयप्रदायै नमः ॐ कन्यायै नमः अः सरूपायै नमः एतेषु एवं चक्राय नमः रं शङ्खाय नमः लं खड्गाय नमः एवं खेटाय नमः शं बाणाय नमः धं धनुषे नमः शूं शूलाय नमः तं तर्जन्यै नमः [illegible]हृदि इन्द्रादीन् वज्रादींश्च पूजयेत् ततो धूपादि विसर्जनान्तकर्म कुर्यात् तस्य बलिदानमन्त्रस्तु प्रदीप्य प्रदीप्य दं ठं ठं गृह्ण गृह्ण पदद्वयम् मदीयं च बलिं देवि लपक पदद्वयम् साधय साधय हितं त्रूयात्तान्दद्याद्धितं पुनः सर्वसिद्धिप्रदं देवि तनः स्वाहा एवं चरेत् बलिदानस्य मन्त्रोऽयं महिमः परिकीर्तितः अस्य रक्षणे जपोऽष्टलक्षः अष्टसहस्रं तिलैर्होमः तथा च वसन्ते जपेन्मन्त्रं तत्समसंख्यातिलेक्षुभिरिमादिवचनात् अथ जयदुर्गामन्त्रः [illegible] ॐ युगां रक्तं मसाढां तमलोचनं हितं तालमपुर्गेयविधावर्ये कृष्णा

तनी

अस्य पूजा प्रातः क्रमादि दुर्गामंत्रोक्तऋष्यादिन्यासांतकर्म कृत्वा करा-
ंगन्यासौ कुर्यात् ॥ यथा ॥ ॐ दुर्गे अंगुष्ठाभ्यां नमः ॐ दुर्गे तर्जनी-
भ्यां स्वाहा ॐ दुर्गायै मध्यमाभ्यां वषट् ॐ भूतरक्षिणि अनामिका-
भ्यां हुम् ॐ दुर्गे दुर्गे रक्षणि कनिष्ठकाभ्यां वौषट् ॐ दुर्गे दुर्गे रक्ष-
णि करतलपृष्ठाभ्यां फट् एवं हृदयादिषु ॥ तथा च निबंधे ॥ ता-
रादि दुर्गे हृदयं दुर्गे च शिर ईरितम् दुर्गायै स्वाहा शिखा वर्म भूतरक्ष-
णि कीर्तितम् तारादि दुर्गे युगलं रक्षिणि अस्त्रमुदीरितम् ॥ ततो ध्या-
नम् ॥ ॐ कालाभ्राभां कटाक्षैरलिकुलभयदां मौलिबद्धेंदुरेखां
शंखं चक्रं कृपाणं त्रिशिखमपि करैरुद्वहंतीं त्रिनेत्राम् सिंहस्कं-
धाधिरूढां त्रिभुवनमखिलं तेजसा पूरयंतीं ध्यात्वा दुर्गां जयाख्यां
त्रिदशपरिवृतां सेवितां सिद्धिकामैः ॥ एवं ध्यात्वा मानसैः संपू-
ज्य अर्घ्यस्थापनं कुर्यात् ततः पूर्वोक्तपीठपूजां विधाय पूर्ववदा-
वरणपूजां कुर्यात् अस्य पुरश्चरणं पंचलक्षजपः घृतेन दशां-
शहोमः ॥ तथा च निबंधे ॥ बाणलक्षं जपेन्मंत्रं घृतेन जुहुया-
ततः दशांशं संस्कृते वह्नौ ब्राह्मणानपि पूजयेत् अष्टाक्षरोदि-
ते पीठे पूर्ववत् संजयेत् सुधीः ॥ अथ शूलिनीमंत्रः ॥ ज्वलज्वलपा-
दस्यांते शूलिनीति पदं ततः दुष्टग्रहं हुम् अस्त्रांते वह्निजायाविधिर्म-
नुः तस्य पूजा प्रातः क्रमादि दुर्गामंत्रोक्तपीठन्यासांतं कृत्वा ऋष्यादि-
न्यासं कुर्यात् यथा शिरसि दीर्घतपसे ऋषये नमः मुखे क-
कुप्छंदसे नमः हृदि शूलिन्यै देवतायै नमः ततः करांगन्यासौ
कुर्यात् यथा शूलिनि दुर्गे हुं फट् अंगुष्ठाभ्यां नमः शूलिनि वरदे
हुं फट् तर्जनीभ्यां स्वाहा शूलिनि विंध्यवासिनि हुं फट् मध्यमाभ्यां व-
षट् शूलिनि असुरमर्दिनि युद्धप्रिये त्रासय त्रासय हुं फट् अनामि-
काभ्यां हुम् शूलिनि देवसिद्धसुपूजिते नंदिनि रक्ष रक्ष महायोगी-
श्वरि हुं फट् कनिष्ठाभ्यां वौषट् एवं हृदयादिषु ॥ तथा च निबंधे ॥
दुर्गे हृद् वरदे शीर्षं विंध्यवासिनि तच्छिखा असुरांतेमर्दिन्यायुद्धप्र-

नं· स्तो· ३८
38

निविंध्यवासिनि हुं फट् मध्यमाभ्यां वषट् शूलिनि स्वरमर्दिनि शुद्ध
प्रियग्रामस्थग्रामस्थ हुं फट् अनामिकाभ्यां हुम् शूलिनि देवसिद्धसंपू
जिते नन्दिनि रक्ष रक्ष महायोगीश्वरि हुं फट् कनिष्ठाभ्यां वौषट् एवं
हृदयादिषु ॥ तथाङ्गनिबंधे ॥ ॐ हृदठरे देशीर्षं विंध्यवासिनि
नशिखा अस्त्रसंगतेमनिर्दिस्याद्युद्ध स्ववं प्रियेषु नः ग्रामस्थहिते तथैव
मे देवसिद्धसंपूजिते नन्दिनि स्यादन्तगं महायोगेश्वरि क्रमात्
शूलिमायाहुंफडन्तः पंचांगमनवः क्रमात् ॥ ततो ध्यानम् ॥
ॐ अश्वारूढामगेन्द्रस्थजलजलधरश्यामलां हस्तपद्मैः शूलं बाणं
कृपाणं सृणिजलजगदाचापपाशान्वहन्तीम् चन्द्रोत्तंसां त्रिनेत्रां
चतसृभिरमनाखेटकं बिभ्रतीभिः कन्याभिः सेव्यमानां प्रतिभ
टभयदां शूलिनीं भावयामि एवं ध्यात्वा मानसैः ॥

तं॰
सा॰
३९
39

पूर्वोक्तमृष्यादिन्यासं कुर्यात् ततो मंत्रन्यासः ॥ ॐ नमो ब्रह्मरंध्रे
ह्रीं नमो भ्रुवोर्मध्ये ऐं नमः क्लीं नमः चक्षुषोः ॐ नमः सौः नमः कर्ण
योः ऐं नमः ह्रीं नमः नासिकयोः श्रीं नमः मुखे नं नमः लिंगे मं न
मः गुदे ततः करांगन्यासो ऐं अंगुष्ठाभ्यां नमः ऐं तर्जनीभ्यां स्वाहे
त्यादि एवं हृदयादिषु तथा च निबंधे ॥ ब्रह्मरंध्रे भ्रुवोर्मध्ये नव
रंध्रेषु च क्रमात् मंत्रवर्णान्न्यसेन्मंत्री वाग्भवेनांगकल्पना ॥ त
थाध्यानम् ॥ वाणीं पूर्णनिशाकरोज्ज्वलमुखीं कर्पूरकुंदप्रभाम्
चंद्रार्धांकितमस्तकां निजकरैः संबिभ्रतीमादरात् वीणामक्षगुणं
सुधाढ्यकलशं विद्यां च तुंगस्तनीम् दिव्यैराभरणैर्विभूषिततनुं
हंसाधिरूढां भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कु
र्यात् ततः पीठपूजां विधाय केसरेषु च मध्ये च पूर्वोक्तपीठशक्तीः
पीठमंत्रं च यजेत् पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिसमाप्त्याः
वरणपूजामारभेत् देव्याः दक्षिणे ॐ सं भरताय नमः वाङ्मय्यै न
मः वामे प्राकृतायै नमः वामेऽथ केसरेषु अग्निकोणे ऐं हृदयाय न
मः नैरृते ऐं शिरसे स्वाहा वायव्ये ऐं शिखायै वौषट् ईशाने ऐं क
वचाय हुं मध्ये ऐं नेत्रत्रयाय वौषट् दिक्षु ऐं अस्त्राय फट् ततः पत्रेषु
पूर्वादि ऐं प्रज्ञायै नमः ऐं मेधायै श्रुत्यै शक्त्यै स्मृत्यै वागीश्वर्यै
सत्यै ततः पत्राग्रेषु ब्राह्म्याद्याः मातरः पूज्याः तद्बहिरिंद्रादीन्य ज
येत् ततो धूपादि विसर्जनांतकर्म समाप्य अस्य पुरश्चरणं द्वादश
लक्षजपः ॥ तथा च ॥ जपेद्द्वादशलक्षाणि तन्मंत्रं संस्थितां बुधैः
नागचंपकपुष्पैश्च जुहुयात्साधकोत्तमः वाचस्पतिसमो भूयस्स
त्कविरिति कीर्तयेत् वागाद्यो मंत्रराजोऽतो रुद्रसंख्याक्षरो मनुः अ
स्य पूजादिकं पूर्ववत् करांगन्यासस्तु ॥ ऐं अंगुष्ठाभ्यां नमः वाच
स्पते तर्जनीभ्यां स्वाहा अमृते मध्यमाभ्यां वषट् प्लव अनामिका
भ्यां हुम् स्नः कनिष्ठाभ्यां वौषट् एवं हृदयादिषु तथा च निबंधे
ऋष्यादिकानि विधिवद्वागाद्यैः पंचभिः पदैः ॥ ध्यानं च ॥ आसी

नाकमलैककरैर्जपवटीपद्मद्वयंपुस्तकंविभ्राणांतरुणेंदुबद्धमुकुटां
मुक्तेंदुकुंदप्रभाम् भालोन्मीलितलोचनांकुचभराक्रांतांभवेद्भूतये
भूयाद्वागधिदेवतामुनिगणैरासेव्यमानानिशम् अस्यपुरश्चरणे
मेकादशलक्षजपः तथाच ॥ रुद्रलक्षंजपेन्मंत्रंदशांशंजुहुयाद्धु
तैः तोयश्चशयनंविसर्गःसकेवलश्चतत्पुरम् अर्घीशेंदुयुतोवह्नि
विंदुमध्यांबुमानमनुः तोयंवकारःविसर्गःशयनंआकारः केवले
नआकाररहितेनककारेणतेनवाक् वाग्भवेनइत्यर्थः ॥ केचित्तु
लक्षितेलक्षणाभयादेवंवदंतिआकारयुक्तोवकारःकेमस्तकेव
लात् ॥ केवलोऽनुस्वारः तद्युक्तेनककारेणवर्तते तेनकामिति
नत्रनिरूढलक्षणयाप्रसक्तित्वात् वाग्भवमितिपर्यायाद्वा
स्तनस्तद्वादशस्वरसंयुक्तंसविंदुनादविभूषितम् विंदुनादसमायुक्तं
वह्निबीजसमुद्धरेत् षष्ठस्वरसमायुक्तंद्वितीयंबीजमुद्धरेत् चंद्रबी
जमसुहृत्सकवर्गयोजयेत्ततः त्रयोदशस्वराक्रांतंविंदुनादविभूषि
तम् इतिविश्वसारवचनात् वाग्भवबीजमेव अस्यपूजायांपूर्ववत्
करांगन्यासस्तद्विरुक्तैस्त्रिभिर्बीजैर्विधेयः तथाचनिबंधे ॥ अंगा
निकल्पयेन्मंत्रीद्विरुक्तैर्जातिसंयुतैः ॥ ध्यानंतु ॥ शुक्लांहारावदा
तरुचिरशशिकलालंकृतांबाहुभिःस्वैः व्याख्यांवर्णाक्षमालां
मणिमयकलशंपुस्तकंचोद्वहंती आपीनोत्तुंगवक्षोरुहभर
विनतन्मध्यदेशांमधीशांवाचामीडेविरायत्रिभुवननमितांपुंड
रीकेनिषण्णाम् अस्यपुरश्चरणंत्रिलक्षजपः तथाच ॥ त्रिलक्षंच
जपेन्मंत्रंजुहुयात्तद्दशांशतः पायसैराज्यसंयुक्तैः संस्कृतेहव्यवा
हने अथपारिजातसरस्वतीमंत्रः मंत्रदेवप्रकाशिन्यां सचप्रणव
प्लत्वांसंपुटितहकारसकारौकारोबिंदुयुक्तः सरस्वतीजातान्
तिः ॥ अस्यपूजाप्रातःकृत्यादिपीठमन्वंतंविधाय ऋष्यादिन्यासं
कुर्यात् शिरसिकण्वऋषयेनमः मुखेविराट्छंदसेनमः हृदिस
रस्वतीदेवतायैनमः ततोमातृकाकरांगन्यासौकुर्यात् मूर्ध्निभ्रू

तं.
सा. मध्यनेत्रकर्णनासास्यदृष्टपवदनगुदपादेष्वपकारादशार्णान्न्यसेत्
४. दक्षिणामूर्तिसंहितायां तु संपसत्तादीभैरव्यावाग्भवं बीजमालिखेत्
तारेणपरयादेविसंपुटीकृत्यसंमन्त्रवित् सारस्वतेस्मिन्मन्त्रेस्यब्रह्मर्णोमु
40 नुरीरितः दक्षिणामूर्तिः ऋषिः प्रोक्तो गायत्री छन्द ईरितम् पारिजा
तेश्वरी देवी देवता परिकीर्तिता तृतीयं च द्वितीयं च बीजशक्तिस्व
तारकम् कीलकं परमेशानि महासारस्वतप्रदा षड्दीर्घस्वरसं
भिन्नबीजेनाङ्गानि विन्यसेत् ततो ध्यानम् ॥ ॐ हंसारूढा वरद
स्मितहारेन्दुकुन्दावदाता वाणीमन्दस्मितयुतमुखी मौलिबद्धेन्दुरेखा
विद्यावीणामृतमयघटाक्षस्रजादीप्तहस्ता शुभ्राब्जस्थामवदभि
वद्धिमतप्राप्तये भारती स्यात् ॥ अस्याः पूजादिकं पूर्वोक्तं कार्द
शाक्षरीवत् पुरश्चरणं तु द्वादशलक्षजपः ॥ इति सरस्वतीमन्त्राः
अथ गणपतेर्मन्त्रान्सर्वान्सर्वार्थसाधकान् यज्ज्ञात्वा मानवो नित्यं
साधयति मनोरथान् ॐ पञ्चान्तकं शशिधरं बीजं गणपतेर्विदुः ग
णकः स्यादृषिश्छन्दो निचृद्देवोऽस्य विघ्नराट् शारदायाम् ॥ वाग्भवं वा
मनेत्राढ्यं बिन्दुमान्भुवनेश्वरी ऊक्षाणि त्रीणि बीजानि सिद्धिः सारस्वतार्थि
नाम् पञ्चान्तकं गकारः अस्य पूजाप्रयोगः प्रातः कृत्यादि पीठन्यासं
तं विधाय केसरेषु मध्ये च ॐ तीव्रायै नमः ज्वालिन्यै नमः नन्दायै
नमः भोगदायै नमः कामरूपिण्यै नमः उग्रायै नमः तेजोवत्यै नमः
सत्यायै नमः विघ्ननाशिन्यै नमः तदुपरि सर्वशक्तिकमलासनाय
नमः तथा च ॥ तीव्रा च ज्वालिनी नन्दा भोगदा कामरूपिणी उग्रा
तेजोवती सत्या नवमी विघ्ननाशिनी सर्वादिशक्तिकमलासनायेति
दद्याद्विधि पीठमन्त्रोऽयमेतेन प्रदद्यादासनं विभोः तत्र षडङ्गादिन्या
सा यथा शिरसि गणकऋषये नमः मुखे निचृच्छन्दसे नमः हृदि ग
णपतये देवतायै नमः ततः कराङ्गन्यासौ गां अङ्गुष्ठाभ्यां नमः गीं त
र्जनीभ्याम् इत्यादि ॥ अङ्गन्यासोऽप्येवं तथा च निबन्धे ॥ षड्दीर्घभाजा
बीजेन कुर्यादङ्गानि षट्क्रमात् ततो ध्यानम् ॥ ॐ गजवदनमचि

सितीस्त्रगंदंतत्रिनेत्रं हरदुदारमनंतंतं दंतमास्येदयं तम् परशुचषकपा
म्रद्दष्टहस्तारविंदम् हरिद्गालनिविष्टश्रीगणेशं भजामि एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनं कुर्यात् ततः पीठपूजां विधाय केसरेषु
मध्ये च तीव्रादिपीठमन्त्रं तु पूजयेत् ततः पुनर्ध्यात्वा ऽवाहनादिं च
पुष्पांजलिदानं विधाया ऽवरणपूजां कुर्यात् कर्णिकायां पूर्वादिदि
क्षु ॐ गणपतये नमः ॐ गणनाथाय नमः ॐ गणक्रीडाय नमः
ततः केसरेषु अग्निनिर्ऋतिवाय्वीशानमध्ये दिक्षु च गां हृदयायेत्या
दिनापि पूजयेत् पत्रमध्येषु पूर्वादिक्रमेण वक्रतुंडमेकदंतं मनोहर
गजाननौ लंबोदरात्मा विकटं विघ्नराजमनन्तरम् धूम्रवर्णं पूजयेत्
वाक्येन ॐ वक्रतुंडाय नमः इत्यादिना पूजयेत् दलाग्रेषु ब्राह्म्याद्याः
मातराः पूज्याः पूर्वादिक्रमेण तद्बहिः इन्द्रादीन् वज्रादींश्च पूजयेत् ततः
तो धूपदीपादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं चतुर्ल
क्षजपः ॥ तथा च ॥ वेदलक्षं जपेन्मंत्रं दशांशं जुहुयात्ततः मोदकैः
पृथुकैर्लाजसक्तुभिरिक्षुपर्वभिः नारिकेलैस्तिलैः शुक्लैः सुप
क्वैः कदलीफलैः अष्टद्रव्याणि विघ्नस्य कथितानि मनीषिभिः श्री
शक्तिस्मरभूविघ्नबीजानि प्रथमं वदेत् ॐ तं गणपतिं पश्चाङ्ङेंतं वरव
रदं पदम् उक्त्वा सर्वजनं मे ततो वशमानय ठद्वयम् अष्टाविंशत्यक्षरो
यं ताराद्यो मनुरीरितः स्मृतिस्थमांसमेघाविंदुयुक्तं भूबीजमीरितम्
स्मृतिर्गकारः मांसं लकारः अस्य पूजाप्रयोगः प्रातः कृत्यादि पी
ठन्यासांतं विधाय पूर्वोक्तपीठमन्त्रं तत् पीठशक्तीर्विन्यस्य ऋष्यादि
न्यासमाचरेत् शिरसि गणक ऋषये नमः मुखे निचृद्गायत्रीछंदसे न
मः हृदि गणपतये देवतायै नमः ततः करांगन्यासौ ॐ श्रीं ह्रीं क्लीं
ग्लौं गं गां अंगुष्ठाभ्यां नमः एवं ६ सर्वं के चित्तु गां हृदयाय नमः
इत्यादिना तत्र षडङ्गबीजन्यासबीजेनैवेति वचनात् विशिष्टस्यैव
ग्रहणम् ततो ध्यायेत् नवरत्नमयं द्वीपं स्मरेदिक्षुरसांबुधौ त
दीविषो तपर्यंतमंदमारुतसेवितम् मंदारपारिजातादिकल्पवृ

तं.
सा.
४१
41

दललताकुलम् उद्भूतरत्नधाराभिररुणीकृतभूतलम् उद्यद्दिनकरेन्दु
भानुद्भासितदिगम्बरम् तस्य मध्ये पारिजातं नवरत्नमयं स्मरेत् ऋतु
भिः सेवितं षड्भिरनिशं प्रीतिवर्धनम् तस्याधस्तान्महापीठे रचिते मा
तृकाम्बुजे षट्कोणान्तस्त्रिकोणस्थं महागणपतिं स्मरेत् गजवदने
ति एवं ध्यात्वा मानसैः संपूज्य ॥ अथ पूजायन्त्रम् ॥ त्रिकोणं बहिः
षट्कोणम् अन्यत्सर्वं मातृकायन्त्रवत् शङ्खस्थापनं कृत्वा पीठपू
जां विधाय पूर्वोक्तपीठशक्तीः पीठमनुं च संपूज्य पुनर्ध्यात्वा आवा
हनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामाचरेत् त्रिकोण
मध्ये पूर्वादिचतुर्दिक्षु पूर्वे बिल्वस्याधः श्रियं श्रीपतिं दक्षिणे व
टस्याधः गौरीं गौरीपतिम् पश्चिमे पिप्पलस्याधः रतिं रतिपतिं
उत्तरे प्रियङ्गुस्याधः महीं वराहं षट्कोणे अग्रकोणे सिद्धिसहिता
ऽमोदं अग्निकोणे ॥ समृद्धिसहितप्रमोदं ईशाने कान्तिसहितसुमु
खं पश्चिमे मदनावतीसहितदुर्मुखं नैर्ऋत्ये मदद्रवासहितविघ्नं
वायव्ये द्राविणीसहितविघ्नकर्तारं पूजयेत् षट्कोणस्योभयपार्श्व
योः वसुधासहितशङ्खनिधये नमः वसुमतीसहितपद्मनिधये नमः
ततः केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च षड्बीजमन्त्राङ्गान्हृदयाद्यष्टा
दिक्षु पूजयेत् पत्रमध्ये ब्राह्म्याद्याः संपूज्य भूपुरे इन्द्रादीन्वज्रादींश्च
पूजयेत् ततो धूपादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं जप
स्तः चत्वारिंशत्सहस्रादिकस्तत्त्वलक्षणः ॥ तथा च ॥ ध्यायेन्मन्त्रं जपे
न्मन्त्री चतुर्लक्षं समाहितः सप्तसहस्रसंयुक्तं चत्वारिंशत्सहस्रकम्
दशांशं जुहुयाद्द्रव्यैरष्टभिर्मोदकादिभिः शक्तिरुद्धं निजं बीजं महाग
णपतिं वदेत् ई. तमग्निवधूभ्यां क्रोंमन्त्रोऽयं द्वादशाक्षरः ॥ अस्य पूजा
प्रयोगः ॥ प्रातः कृत्यादि तीव्रादिशक्तिपीठमनुसहितपीठन्यासं वि
धाय ऋष्यादिन्यासं कुर्यात् यथा शिरसि गणकऋषये नमः मुखे
निचृद्गायत्रीछन्दसे नमः हृदि शक्तिगणाधिपतये देवतायै नमः तं
ध्याव निर्वये ॥ गणकस्य ऋषिश्छन्दो गायत्री निचृदादिका उदिता

देवतां मंत्रेणाग्नाशक्तिगणाधिपः ततः करांगन्यासौ ह्रीं अंगुष्ठाभ्यां न
मः गं तर्जनीभ्यां स्वाहा ह्रीं मध्यमाभ्यां वषट् महागणपतयेऽनामि
काभ्यां हुम् स्वाहा कनिष्ठिकाभ्यां वौषट् सर्वदाय सर्वार्थकारतलपृष्ठा
भ्यां फट् एवं हृदयादिषु तथा च निबंधे अस्त्रैस्सप्तभिर्मंत्रस्य पदै रंगा
नि कल्पयेत् ॥ ॐ ततो ध्यानम् ॥ मुक्तागौरम् ॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात् ततः पीठपूजां विधाय तीव्रादिपीठमंत्र
ण यजेत् पुनर्ध्यात्वाऽवाहनादिपंचपुष्पांजलिदानपर्यंतं विधायाऽ
वरणपूजामारभेत् पूर्वोक्त चत्वारि मिथुनानि षट्कोणे आमोदादीन्
केसरेषु पूर्वादि मध्ये दिक्षु च ह्रीं हृदयायेमादि पूर्ववत् पत्रेषु ब्राह्म्या
द्या मातृकाः तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत् ततो धूपादिविसर्ज
नांतं कर्म समापयेत् ॥ यंत्रमस्य महागणपतियंत्रवत् ॥ अस्य पुर
श्चरणं लक्षजपः तथा च ॥ लक्षमेकं जपेन्मंत्रमष्टोपेतं दशांशतः
जुहुयादर्चितेवक्रो दिनशो देवमर्चयेत् शक्तिरुद्धं निजबीजवशा
मानपंचकयम् तारायोमत्रयाख्यातो रुद्रसंख्याक्षराणितः अस्य पूजा
पूर्ववत् ॥ अंगमंत्रस्तु ॥ एकेन त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्यां मस्तकेन
कल्पयेत् ॥ तथा च निबंधे ॥ एकेनाक्षैस्त्रिभिर्द्वाभ्यां त्रिभिर्द्वाभ्या
मनंतरम् समस्तेनास्त्रसंख्यातमक्षरक्लृप्तिरियं मता एतांस्तुष्टा
दिषु हृदयादिषु च न्यसेत् ॥ ध्यानं यथा ॥ हस्तैर्बिभ्रतमिक्षुदंडम् ॥
अस्य पुरश्चरणं जपलक्षत्रयः ॥ तथा च ॥ लक्षत्रयं जपेन्मंत्रमिक्षुदं
डैर्दशांशतः अष्टोपेतान्सपुष्पैर्वा जुहुयान्मंत्रसिद्धये ॥ अथ हेरंब
मंत्रः ॥ हुकारः क्रोधगकारस्सविंदुः प्रणवादिकः नमोंतश्चतुरक्ष
रश्चतुर्वर्गफलप्रदः पंचांतको बिंदुयुतो वामकर्णविभूषितः तारादि
हृदयांतोऽयं हेरंबमंत्र ईरितः चतुर्वर्गात्मकोऽन्त्यार्णो चतुर्वर्गफलप्र
दः षड्दीर्घभाजा बीजेन षडंगानि प्रकल्पयेत् ॥ अस्य गणक ऋषिः ॥
गायत्रीछंदः हेरंबो देवता गकारो बीजम् बिंदुः शक्तिः गां गीं गूं गैं गौं
गः इत्येतैः षडंगानि ॥ ततो ध्यानम् ॥ मुक्ताकांचनकुंदकुंभे

एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् गणेशोक्तपीठशक्तीः ततः सं-
पूज्य ॐ ह्रूं महासिंहाय गं हेरंबाय नम इति पूजयेत् ॥ तथा च ॥ प्रा-
णवं कवचं ठद्वयं महासिंहाय गं ततः हेरंबेति पदं पश्चाद्दासनाय हृदन्वितः
अयमासनमंत्रस्यात्स्वदद्यादस्य नाम सः तारादि विघ्नबीजेन मूर्तिं तु
संप्रकल्पयेत् प्रासादभ्यामंत्रः ॥ ततः ॐ गं इति मंत्रेण मूर्तिं संकल्प्या
ऽवाहनादि पंचपुष्पांजलिदानपर्यंतं विधायाऽऽवरणपूजामारभेत् यथा
ग्न्यादिकोणे मध्ये दिक्षु च गां हृदयाय नम इत्यादिना पूजयेत् पत्रेषु
लोकपालान् तद्बहिरिंद्रादीन् वज्रादींश्च पूजयेत् ततो धूपादि विस-
र्जनांतं कर्म समापयेत् अस्य पुरश्चरणे त्रिलक्षं जपः ॥ तथा च ॥ लक्ष-
त्रयं जपेन्मंत्री दशांशं जुहुयात्तिलैः गं क्षिप्रप्रसादनाय हृदयं तथा च
संवर्तकोनेत्रयुक्तः पार्श्वे वन्याससेनसंस्थितः प्रसादनाय हृन्मंत्रः स्वबीजा
द्यो दशाक्षरः अस्य पूजा प्रातः कृत्यादि गणेशशक्तिपीठन्यासांतं कर्म
समाप्य ऋष्यादिन्यासं कुर्यात् शिरसि गणक ऋषये नमः मुखे विरा-
ड्छंदसे नमः हृदि क्षिप्रप्रसादनाय देवतायै नमः ॥ तथा च ॥ गण-
कोऽस्य निरस्यास्या हिराट्छंद उदीरितः क्षिप्रप्रसादनो विघ्नो देवतास्य
समीरिता दीर्घयुक्तेन बीजेन षडंगानि प्रकल्पयेत् एकाक्षरवत्
अंगन्यासं कृत्वा ध्यायेत् ॥ पाशांकुशौ कल्पलताविषाणमित्यादि
इति ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ततः पूर्वोक्तपीठपूजां
विधाय पुनर्ध्यात्वा वाहनादि पंचपुष्पांजलिदानपर्यंतं विधायाऽऽवर-
णपूजां कुर्यात् अग्न्यादि गां हृदयायेत्यादि पूजयेत् पत्रेषु विघ्नं विना-
यकं शूरं वीरं वरदं शांकरं इभवक्त्रं चैकरदं लंबोदरमनंतरं पत्रा-
ग्रे वा तस्याग्रातः बहिरिंद्रादीन् वज्रादींश्च पूजयेत् ततो धूपादि विसर्जनां-
तं कर्म समापयेत् अस्य पुरश्चरणे लक्षं जपः ॥ तथा च ॥ लक्षं जपे-
न्मपशांतेन जुहुयाद्घृतैस्तिलैः मधुरत्रितयैर्द्रव्यैरथवाभीष्टरीरितैः

अथ हरिद्रागणेशमंत्रः ॥ पंचांतकोधरासंस्थो विंदुभूषितमस्तकः
एकाक्षरो महामंत्रः सर्वकामफलप्रदः अस्य वसिष्ठ ऋषिः गायत्रीछंदः
हरिद्रागणपतिर्देवता गकारो बीजं नकारः शक्तिः बीजेनैव षडंग
कम् ॥ ध्यानं तु ॥ हरिद्राभं चतुर्बाहुं हारिद्रवसनं प्रभुम् पाशांकु
शधरं देवं मोदकं दंतमेव च एवं ध्यात्वा गणपतिं पूजयेत् आवाहन
पूजादिकमेकाक्षरगणपतिमंत्रपूजावत् अस्य पुरश्चरणं चतुर्लक्ष
जपः त्रिमधुरयुक्तहरिद्राभिः मिश्रितैस्तंडुलैः तंत्रांतरे मंत्रोद्धारमेव
द्वेषशोषणकमलानने ईंबीजं समुद्धृत्य निजबीजं समुद्धरेत् च
तुर्दशस्वरेणाढ्यं बिंदुभूषितमस्तकम् एकाक्षरी महाविद्या कथि
ता पद्मयोनिना अस्य पूजादिकं सर्वं महागणपतिमंत्रवत् कं गां ग
णामस्त्वबीजेन षड्दीर्घविभक्तेन अस्य भेदांतरम् लक्ष्म्याद्या वापि कुर्वी
ग्लौं वा माद्या वा जपेत्सुधीः कामाद्या वा वधूबीजाद्या वा वा प्रजपेत्सदा
ॐकाराद्यां महाविद्यां निजबीजादिकां तथा ह्यक्षरी च महाविद्या अ
ष्टार्णा वाष्टसंयुता चतुर्वर्णात्मिका विद्या वह्निजायावधिः प्रिये एषा
विद्या महाविद्या त्रैलोक्ये च सुदुर्लभा चतुर्वर्गप्रदा साक्षान्महापात
कनाशिनी एतासां पूजादिकं महागणपतिमंत्रवत् ॥ अथ लक्ष्मी
मंत्रः ॥ अथ वक्ष्ये श्रियामंत्रान्सौभाग्यश्रीफलप्रदान् यस्याः कटा
क्षं मंत्रेण त्रैलोक्यमपि वर्धयेत् वांतं वह्निसमारूढं वामनेत्रेंदुसंयु
तम् बीजमेतत् श्रियाः प्रोक्तं सर्वकामफलप्रदम् ॥ अस्य पूजाप्रयो
गः ॥ प्रातः कृत्यादि पीठन्यासांतं कर्म विधाय भृग्वादिन्यासं तु कुर्या
त् शिरसि भृगवे ऋषये नमः मुखे निचृच्छंदसे नमः हृदि श्रियै देव
तायै नमः ॥ तथा च ॥ ऋषिर्भृगुर्निचृच्छंदो देवता श्रीः समीरिता
षड्दीर्घाढ्यस्वबीजेन कुर्यादंगानि मंत्रवित् केसरेषु मध्ये ॐ वि
भूत्यै नमः एवं कांत्यै कीर्त्यै सन्नत्यै पुष्ट्यै श्रीआसनाय नमः त
तः करांगन्यासौ श्रां अंगुष्ठाभ्यां नमः श्रीं तर्जनीभ्यां स्वाहा श्रूं मध्य
माभ्यां वषट् श्रैं अनामिकाभ्यां हुं श्रौं कनिष्ठाभ्यां वौषट् श्रः करत

लप्ष्टष्ठाम्बुं फट् एवं हृदयादिषु ॥ तथाच निबंधे ॥ अंगानि दीर्घयुक्ते
न रमाबीजेन कल्पयेत् ॥ ततो ध्यानम् ॥ ॐ कांता कांचनसन्निभा हि
मगिरिप्रख्यैश्चतुर्भिर्गजैर्हस्तोत्क्षिप्तहिरण्मयामृतघटैरासिच्यमानां श्रि
यम् बिभ्राणां वरमब्जयुग्ममभयं हस्तैः किरीटोज्ज्वलां क्षौमाबद्धनितंब
बिंबललितां वंदे रविंदस्थिताम् एवं ध्यात्वा मानसैः संपूज्य शंखस्थाप
नं कुर्यात् ततः पीठपूजां विधाय पूर्वादिकेसरेषु मध्ये च विभूत्यादि पी
ठमंत्रं संपूज्य पुनर्ध्यात्वा आवाहनादि पंचपुष्पांजलिदानपर्यंतं।
विधाय आवरणपूजामाचरेत् ॥ तद्यथा ॥ अग्न्यादिकेसरेषु मध्ये च दि
क्षु च श्रां हृदयाय नमः इत्यादिना षडंगानि संपूज्य पूर्वादि ॥ ॐ वासु
देवाय नमः ॐ संकर्षणाय नमः ॐ प्रद्युम्नाय नमः ॐ अनिरुद्धाय।
नमः विदिक्षु दिग्दलेषु ॐ दमकाय नमः एवं सलिलाय गुग्गुलवे
कुरुण्टकाय ततो देव्या दक्षिणे ॐ शंखनिधये नमः ॐ वसुधायै नमः
वामे ॐ पद्मनिधये नमः ॐ वसुमत्यै नमः पत्राग्रेषु पूर्वादि ॐ वला
कायै नमः ॐ विमलायै नमः ॐ कमलायै नमः ॐ वनमालिकायै नमः
विभीषिकायै नमः ॐ मालिकायै नमः ॐ शांकर्यै नमः ॐ वसुमा।
लिकायै नमः सर्वत्र प्रणवादिना यजेत् तद्बहिरिंद्रादीन्वज्रादींश्च पू
जयेत् ततो धूपादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं द्वाद
शलक्षजपः ॥ तथाच ॥ भानुलक्षं जपेन्मंत्रं दीक्षितो विजितेन्द्रियः
तत्सहस्रं च जुहुयात्कमलैर्मधुराप्लुतैः जपांते जुहुयान्मंत्री तिलै।
र्वा मधुराप्लुतैः बिल्वफलैर्वा जुहुयात्त्रिभिर्वा साधकोत्तमः वाग्भवव
निताबिंदुमाया मकरकेतनः वसुबीजात्मको मंत्रश्चतुर्वर्गफल
प्रदः अस्य पूजादिकं सर्वं पूर्ववत् द्रष्टव्यम् ॥ ध्याने तु विशेषः ॥ ॐ
माणिक्यप्रतिमप्रभां हिमनिभैस्तुंगैश्चतुर्भिर्गजैर्हस्तग्राहितरत्नकुं
भसलिलैरासिच्यमानां सदा हस्ताब्जैर्वरदानमंबुजयुगाभीतीर्दधा
नां हरेः कांतां कांक्षितपारिजातलतिकां वंदे सरोजासनाम् ॥ अस्य पु
रश्चरणं द्वादशलक्षजपः भानुलक्षं जपेन्मंत्रं हविष्याशी सरोरुहैः जु

कुर्याद्दशांशतः पुष्पैस्त्रिमध्वक्तैर्जितेंद्रियः इतिवचनात् मंत्रांतरमाह नमः
कमलांतेवाग्भिमैश्वर्यमिति प्रोक्तोदशाक्षरः दीर्घाद्याद्विविसर्गांतो
ब्रह्मभाद्वर्णंक्षयता वांतेस्मिन्मैश्रियावहोमनुः प्रोक्तोदशाक्षरः पूर्वव
त्मोऽस्य मंत्रस्य विन्यस्य ऋष्यादिन्यासं कुर्यात् शिरसि दक्षाय ऋषये न
मः मुखेविराट्छंदसे नमः हृदि श्रियै देवतायै नमः ततः कराग
न्यासः ॐ दक्षाय नमः अंगुष्ठाभ्यां नमः ॐ पद्मिन्यै नमः तर्जनीभ्यां स्वा
हा ॐ विष्णुपत्न्यै नमः मध्यमाभ्यां वषट् ॐ वरदायै नमः अनामिक
काभ्यां हुम् ॐ कमलरूपायै नमः कनिष्ठाभ्यां फट् ॐ दक्षाय नमः हृ
दयाय नमः ॐ पद्मिन्यै नमः शिरसे स्वाहा ॐ विष्णुपत्न्यै नमः शिखा
यै वषट् ॐ वरदायै नमः कवचाय हुं ॐ कमलासनायै नमः अस्त्रा
य फट् तथा च निवंधे दक्षाय हृदयमाख्यातं पद्मिन्यै शिर ईरितम् वि
ष्णुपत्न्यै शिखा प्रोक्ता वरदायै तनुच्छदम् अस्त्रं कमलरूपायै नमोंऽतः
प्रणवादिकः ॥ ततो ध्यानम् ॥ आसीना सरसीरुहे स्मितमुखी ह
स्तांबुजैर्बिभ्रती दानं पद्मयुगाभये च वपुषा सौदामिनी सन्निभा मु
क्ताहारविराजमानपृथुलोत्तुंगस्तनोद्भासिनी पायाद्वः कमलाकटा
क्षविभवैरानंदयंती हरिम् एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं
कृत्वा श्रीकमलपीठशक्तिसहितपीठमनवंतापीठपूजां विधाय पुनर्ध्या
त्वावाह्य पंचपुष्पांजलिदानपर्यंतं विधाय आवरणपूजामारभेत् केस
रेषु आग्नेयादिकोणचतुष्टये मध्ये च षडंगानि पूजयेत् पूर्वादिदलेषु
पूर्ववत् बलाकादि पूजयेत् ततो धूपादि विसर्जनांतं कर्म समाप
येत् अस्य पुरश्चरणं जपो दशलक्षः तथा च दशलक्षं जपेन्मंत्रमेत
द्विद्वान् जितेंद्रियः दशांशं जुहुयात्पद्मैः त्रिमधुराक्तैः सरोरुहैः तारो वाग्भ
वं मायारमाकामः हंसो जगत्याः सेनमः तथा च ॥ वाग्भवं शंभुवनि
तारमा मकरकेतनः तार्तीयं च जगत्पार्श्वं वह्निवीजसमुज्ज्वलः अर्द्धे
शाङ्कोभगरास्मैहृन्मंत्रोद्वादशाक्षरः महालक्ष्म्याः समुद्दिष्टः सर्वाराधस
वसिद्धिदः अस्य पूजा प्रातः कृत्यादि श्रीवीजोक्तपीठन्यासांतं विधाय अत्र

तं॰
सा॰ ष्यादिन्यासं कुर्यात् शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्रीछन्दसे नमः
४४ हृदि महालक्ष्म्यै देवतायै नमः मूलेन करौ संशोध्य अङ्गुष्ठादिक्रमेण ता
रादिनमोन्तेन पञ्चबीजानि न्यसेत् यथा ॐ ऐं नमः ॐ ह्रीं नमः ॐ श्रीं नमः
44 ॐ क्लीं नमः ॐ हसौः नमः ॐ जगत्प्रसूत्यै नमः करतले ततो मस्तकादि
चरणं यावत् मूलेन व्यापकं न्यसेत् ततो मूर्धास्यहृदयगुह्यपादेषु पञ्च
बीजानि न्यसेत् शेषाक्षराणि हृदये समस्तधातुषु ॥ तथा च निबन्धे ॥
हस्तौ संशोध्य मूलेन तारादिहृदयान्तकम् बीजानां पञ्चकं न्यसेदङ्गु
लेषु यथाक्रमम् मन्त्रशेषं न्यसेन्मन्त्री तलयोरुभयोरपि मूर्धादिचर
णं यावन्मन्त्रेण व्यापकं न्यसेत् मूर्धास्यहृद्गुह्यपादेषु पञ्च बीजानि विन्य
सेत् शेषान्न्यसेत्समस्तवर्णान् हृदये समस्तधातुषु ततः कराङ्गन्यासौ ऐं ज्ञा
नाय अङ्गुष्ठाभ्यां नमः ह्रीं ऐश्वर्याय तर्जनीभ्यां स्वाहा श्रीं शक्त्यै मध्य
माभ्यां वषट् क्लीं बलाय अनामिकाभ्यां हुं हसौः वीर्याय कनिष्ठाभ्यां
वौषट् ॐ जगत्प्रसूत्यै तेजसे करतलपृष्ठाभ्यां फट् एवं हृदयादिषु त
था च निबन्धे ॥ अङ्गानि पञ्चभिर्बीजैरस्त्रं शेषाक्षरैर्न्यसेत् ज्ञानैश्वर्या
दिभिर्युक्तैश्च तदन्तैः सजातिभिः ज्ञानमैश्वर्यशक्ती च बलवीर्ये स
तेजसी ज्ञानैश्वर्यादयः प्रोक्ताः षट्क्रमाद्भगयोजितः ॥ ततो ध्यानम्
ॐ बालार्कद्युतिमिन्दुखण्डविलसत्कोटीरहारोज्ज्वलां रत्नाकल्पविभू
षितां कुचनतां शालेः करे मञ्जरीम् पद्मां कौस्तुभरत्नमप्यविरतं सं
बिभ्रतीं सस्मितां फुल्लाम्भोजविलोचनत्रययुतां ध्यायेत्परामम्बिकाम्
इति ध्यानम् ॥ विस्तरेणात्र शारदायां द्रष्टव्यम् ॥ इति ध्यात्वा मानसैः
संपूज्य शङ्खस्थापनं कुर्यात् श्रीबीजोक्तपीठपूजां विधाय पुनर्ध्यात्वा
वाहनादिपञ्चपुष्पाञ्जलिदानपर्यन्तं विधायावरणपूजामारभेत् यथा
देव्या दक्षिणे शङ्करानन्दनाथाय नमः एवं वामे पद्मनाथानन्देन नमः केसरेषु
आग्नेयादिकोणमध्ये च दिक्षु ऐं ज्ञानाय हृदयाय नमः इत्यादिना पूजयेत्
पत्रेषु पूर्वादि ॐ उमायै नमः एवं श्रियै नमः ॐ सरस्वत्यै नमः ॐ दु
र्गायै नमः ॐ धरण्यै नमः ॐ गायत्र्यै नमः ॐ देव्यै नमः ॐ म

ऊर्ध्वायै नमः दक्षिणे जङ्कुसूत्राय्यै नमः वामे सूर्यसूत्राय्यै नमः तथांशप
निधये पद्मनिधये पश्चिमे धृतातपत्रं वरुणं पूजयेत् तथा जङ्कुसूर्य
सूत्रे पूर्वे पाशहस्तानलनाद्यंते शंखपद्मनिधी पूर्वे पाशयोर्धृतवाम
रौ धृतातपत्रं वरुणं पूजयेत् पश्चिमे पुनः तद्बाह्ये द्वादशराशीन् वज्र
हस्तं सेकेन पूजयेत् तद्बाह्ये ऐरावतं पुंडरीकं वामनं कुमुद
मंजनं पुष्पदंतं सार्वभौमं सुप्रतीकान् इंद्रादीन् वज्रादींश्च संपूज्य धू
पादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं द्वादशलक्षजपः
तद्दशांश ॥ मातुलुंगजपेन्मंत्रं दशांशं जुहुयाद्घृतैः जुहुयात् श्रीफ
लैः पद्मैः प्रत्येकमयुतद्वयम् तर्पयेत्सलिलैः शुद्धैः सहस्रयेरयुतद्व
यम् अयुतद्वयमित्यत्र वा वचनव्यवस्था शंभुपत्नीश्रियारुद्धा कासौ
भगवती महा ब्रह्मादिः सो यथा दीर्घा लक्षादिर्भगवान्मरुत् प्रसीद
युगलं भूयः श्रीरुद्धाभुवनेश्वरी महालक्ष्मि नमोंता स्यात्स्वाहांतादिर
यं पुनः महीलकारः भगवती पकारः ब्रह्माककारः आदिसोमका
रः आकारयुक् लक्षादिर्लकारः मरुत्यकारः पकारयुक्ः प्रातः
कृत्वादि पूर्वोक्तं अस्त्रादिन्यासं विधाय करांगन्यासं कुर्यात् श्रीं ह्रीं
श्रीकमले श्रां ह्रीं श्रीं अंगुष्ठाभ्यां नमः एवं कमलालये ३ तर्ज
नीभ्यां स्वाहा ३ प्रसीद ३ मध्यमाभ्यां वषट् ३ प्रसीद ३ अनामिकाभ्यां
हुम् ३ महालक्ष्मि ३ कनिष्ठाभ्यां फट् एवं हृदयादिषु विन्यसेत्
निवेद्य ॥ कमले हृदयं प्रोक्तं शिरः स्यात्कमलालये शिखा प्रसीद
तेनैव कवचं चतुरक्षरैः अस्त्रमेतैः पदैः कुर्यात्त्रिबीजपुटितैः क्रमा
त् ॥ ध्यानम् ॥ सिंदूरारुणकांतिमब्जवसतिं सौंदर्यवारांनिधिं
कोटीरांगदहारकुंडलकटीसूत्रादिभिर्भूषिताम् हस्ताब्जैर्वसुपा
त्रमब्जयुगलादर्शान्वहंतीं परां आवीतां परिचारिकाभिरनिशं ध्या
येत्प्रियां शार्ङ्गिणः ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात्
पूर्ववत्पीठपूजां विधाय पुनर्ध्यात्वाऽवाहनादिपंचपुष्पांजलिदान
पर्यंतं विधायावरणपूजामारभेत् केसरेषु अग्न्यादिकोणेषु हृदव

तं·
स्ता·
४५
45

श्रीं ह्रीं श्रीं कमलेहृदयायनमः इत्यादिनापूजयेत् दलमूलेषुपूर्वादि ॐ
श्रीधरायनमः ऍंहृषीकेशायनमः वैंकुंठायनमः ॐविश्वरूपाय
नमः ॐवासुदेवायनमः ॐसंकर्षणायनमः ॐप्रद्युम्नायनमः ॐ
अनिरुद्धायनमः दलमध्येषु भारत्यैपार्वत्यैचांड्यैशच्यैमदनकाका
यमलिलायगुग्गुलवे कुरुंडकायदलाग्रेषु अनुरागंविसंवादंविज्ञ
यंवलभंमदंहर्षबलंतेजलोकनाथमनंतरम् इतिमहालक्ष्मीवा
णांपूजयेत् वाक्यंतु अनुरागायमहालक्ष्मीबाणायनमः इत्यादि
क्रमेण तद्बहिरिंद्रादीन्वज्रादींश्चपूजयेत् ततोधूपादिविसर्जनांतक
र्मसमापयेत् अस्यपुरश्चरणंलक्षजपः तथाच ॥ लक्षंजपेत्फलवि
ल्वैर्जुहुयान्मधुरोक्षितैः दशांशंसंस्कृतेवह्नौप्राक्प्रोक्तेनचवर्त्मना
रतिलक्ष्मीमंत्रः ॥ अथसूर्यमंत्रः ॥ तारोघृणिर्भृगुःपश्चाद्धामक
र्णविभूषितः वह्न्यामनोमरुच्छेषःसनेत्रोऽदित्यपश्चिमः । इतिमंत्रः
अष्टाक्षरोमनुःप्रोक्तोभानोरमिततेजसः अस्यपूजाप्रातःकृत्यादि
प्राणायामंविधायपीठन्यासंकुर्यात् तत्रविशेषःहृदयसप्तर्कादिदि
क्षमध्येच प्रभूतंविमलंसारंसमाराध्यंपरमसुखं विविन्यस्यआधार
शक्त्यादि ॐअंसूर्यमंडलायद्वादशकलात्मनेनमः इत्यंतंन्यसेत् ॥
तथाचनिबंधे ॥ पीठस्यन्यासेप्रथमंदिक्षुमध्येचसंयजेत् प्रभूतं
विमलंसारंसमाराध्यमनंतरम् परमादिसुखंपीठस्यबिंबाभंप्रक
ल्पयेत् ततःकेसरेषुमध्येच रांदीप्तायैनमः एंवींसूक्ष्मायैनमः
रुंजयायैनमः रेंभद्रायैनमः रैंविभूत्यैनमः रोंविमलायैनमः रौं
अघोरायैनमः रंविद्युतेनमः रःसर्वतोमुख्यैतदुपरिब्रह्मविष्णुशि
वात्मकायसौराययोगपीठायनमः ॥ तथाच ॥ दीप्तासूक्ष्माजयाभ
द्राविभूतिर्विमलापुनः अमोघाविद्युतासर्वतोमुखीपीठशक्तयः दी
साद्रीमशिखाकाराबीजन्यासांविदुःक्रमात् अर्कीवह्निसवितयस्ते
र्गांबिंदुग्भिसंयुतान् वदेत्पदंचतुर्थ्यंतंब्रह्मविष्णुशिवात्मकम् सौ
राययोगपीठायनमः पदमनंतरम् ततःऋष्यादिन्यासः शिरसि

देवभागऋषये नमः मुखे गायत्रीछंदसे नमः हृदि आदित्यायै देवतायै न
मः तथाच देवभागो मुनिः प्रोक्तो गायत्री छंद ईरितम् आदित्यो देवता प्रो
क्तो दृष्टादृष्टफलप्रदः इत्यादि ततः करांगन्यासौ सत्याय ज्वालामणे
स्वाहा अंगुष्ठाभ्यां नमः एवं ब्रह्मणे तर्जनीभ्यां स्वाहा विष्णवे मध्यमाभ्यां
वषट् रुद्राय अनामिकाभ्यां हुम् अग्नये कनिष्ठाभ्यां वौषट् सर्वाय ज्वा
लामणे हुं फट् करतलपृष्ठाभ्यां फट् एवं हृदयादिषु तथाच ॥ सत्या
य हृदयं प्रोक्तं ब्रह्मणे शिर ईरितम् विष्णवे स्याच्छिखा वर्म रुद्राया परि
कीर्तितम् अग्नये नेत्रमाख्यातं सर्वायास्त्रमुदाहृतम् तेजोज्वालामणे
हुं फट् छिद्रांतः पृष्ठगोचितः ततो मूर्तिन्यासः ॥ यथा शिरसि ॐ आ
दित्याय नमः मुखे रविं हृदये भानुं गुह्ये भास्करं चरणयोः सूर्याय न
मः तथाच ॥ आदित्यं विन्यसेन्मूर्ध्नि रविं च मुखतो न्यसेत हृदये
भानुमानं भास्करं गुह्यदेशतः सूर्यं चरणयो न्यस्येद्वर्णैः सद्यादिपंच
भिरिति ततो मंत्रन्यासः ॥ मूर्ध्नि ॐ नमः आस्ये ह्रां नमः कर्णयोर्ह्रिं
नमः हृदि ह्रूं नमः कुक्षौ ह्रैं नमः नाभौ ह्रौं नमः लिंगे ह्रः नमः पादयोः
स्नमः तथाच ॥ मूर्ध्नास्यकर्णहृदयकुक्षिनाभिषु जानुषु मंत्रव
र्णान्न्यसेद्दिष्टान्प्रत्येकं प्रणवादिकाम् ततो ध्यानम् ॥ ॐ रक्ताब्जयुग्मा
भयदानहस्तं केयूरहारांगदकुंडलाढ्यम् माणिक्यमौलिं दिननाथ
मीडे बंधूककांतिं विलसत्त्रिनेत्रम् ॥ एवं ध्यात्वा मानसैः संपूज्य शंखे
स्थापनं कुर्यात् ततो गुरुपंक्तिं संपूज्य तन्मंत्रोक्तपीठपूजां कुर्यात्
ॐ खखखोल्काय नमः इति मंत्रेण संकल्प्य पुनर्ध्यात्वा आवाहना
दि पंचमुद्रांजलिदान पर्यंतं विधाया वरणपूजामारभेत् तथाच निवे
ये ॥ नासादिखखखोल्काय मनुना मूर्तिकल्पना साद्धिर्णं सर्वलो
कानां तन्मात्रावाहयेत केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च सत्या
य तेजोज्वालामणे हुं फट् स्वाहा हृदयाय नमः एवं ब्रह्मणे शिरसे स्वा ८
हा विष्णवे शिखायै वषट् रुद्राय कवचाय हुम् अग्नये नेत्रत्रया
य वौषट् सर्वाय अस्त्राय फट् दिक्पत्रेषु ॐ आदित्याय नमः एवं र

विंदुभांतुरं भास्करं रविकोणेषु अग्न्यादिं उग्रायैनमः प्रं प्रज्ञायैनमः प्रं
प्रभायैनमः सं सत्यायैनमः ॥ तथाच तंत्रे ॥ अग्न्यादिषु पूजयेद्दीप्तादि
कोणेष्वर्कमूर्तयः आदित्याद्यास्ततस्तोर्द्ध्वः शक्रपः कोणपत्रगः स्वस्व
नामादिवर्णैः स्युस्तासां बीजान्यनुक्रमात् ततः पत्राग्रेषु ब्राह्म्याद्याः सं
पूज्याः पुरतोऽरुणमर्चयेत् तद्बहिः पूर्वादौ च इंद्रादींश्च पूजयेत् ॐ चं
द्राय एवं मंगलाय बुधाय बृहस्पतये शुक्राय शनैश्चराय राहवे
केतवे तथाच पत्राग्रसंस्था ब्राह्म्याद्याः पुरतोऽरुणमर्चयेत् चंद्रादी
न्पूजयेत्समासादुद्धानेष्टो ततो वह्निः ततः इंद्रादीन्वज्रादींश्च पूजयेत् त
तो धूपादिविसर्गांतं कर्म समापयेत् अस्य पुरश्चरणमष्टलक्षं जपः
तथाच वसुलक्षं जपेन्मंत्रं समसिद्धिः तीरशाखिनाम् ततस्सहस्रं च जुहु
यात्क्षीराक्ताभिर्जितेंद्रियः आकाशमग्निर्दैर्घ्येंदुसंयुतं मायामनुः स·
विसर्गः ॥ तथाच ॥ आकाशमग्निर्दैर्घ्येंदुसंयुतं भुवनेश्वरीम् सर्गा
न्वितं भृगुर्भानोऽमहत्तरो मनुरीरितः अस्य पूजाप्रयोगः ॥ प्रातःकृत्या
दि पूर्वोक्तमंत्रोक्तपीठन्यासं विधाय पूर्वोक्तऋष्यादिन्यासं कुर्यात् ततो
मंत्रन्यासः आधारादिपादपर्यंतं ह्रीं नमः कंठादाधारपर्यंतं मः नमः
तथाच ॥ मूर्धादिकंठपर्यंतं क्रमाद्धीनत्रयं न्यसेत् षड्दीर्घस्वरयुक्ते
न मध्येनांगविकल्पयेत् ॥ ततो ध्यानम् ॥ ॐ रक्तांबुजासनमशेष
गुणैकसिंधुं भानुं समस्तजगतामधिपं भजामि पद्मद्वयाभयवरान्दध
तं कराब्जैर्माणिक्यमौलिमरुणं दिननाथमीडे ॥ एवं ध्यात्वा मानसैः
संपूज्य शंखस्थापनं कुर्यात् पीठं संपूज्य पूर्वोक्तमंत्रेण मूर्तिं संकल्प्य
पुनर्ध्यात्वाऽऽवाहनादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजां
कुर्यात् केसरेषु अग्निनिर्ऋतिवाय्वीशानकोणेषु मध्ये दिक्षु च ह्रां हृ
दयाय नमः इत्यादि द्वादशलक्षं जपः तथा भानुलक्षं जपेन्मंत्रमाज्येन·
न दशांशतः तिलैर्वा मधुरासिक्तैर्जुहुयाद्विजितेंद्रियः आकाशम·
ग्निपवनमध्यानोऽयौ मबिंदुमत् मान्तो उभैरवनाम बीजमेतदुदाहृतम्
पुटितं बिंबबीजेन सर्वकामफलप्रदम् ॐ रतं दहननेत्रेंदुसहितं तदु

दाहृतम् अस्यपूजाप्रातः कुर्यादिपत्तन्मे ॐकर्णपीठमासांतकर्मविधा·
यपूर्ववद्धृदयादिन्यासं कुर्यात् ततो मूर्तिन्यासः ह्रां सूर्याय नमः ह्रीं भा
स्कराय नमः ह्रूं भानवे नमः मध्यमयोः ह्रैं रवये नमः अनामिकयोः
ह्रौं दिवाकराय नमः कनिष्ठयोः ततः शिरसि वदने हृद्गुह्यपाददेशेषु
ततष्ठौज्ञादिकान्न्यसेत् ॥ तथाच निबंधे ॥ पंचरूपाणिबीजेन पंच
मूर्तीः प्रविन्यसेत् अंगुष्ठादिकनिष्ठांतं मण्डलीशुक्रमादितः सूर्यस्तु
भास्करो भानुस्ततो रविर्दिवाकरो शिरोवदनहृद्गुह्यपाददेशेषु ता।
न्यसेत् ततः करांगन्यासो यथा ह्रां अंगुष्ठाभ्यां नमः ह्रीं तर्जनीभ्यां स्वा
हा ह्रूं मध्यमाभ्यां वषट् ह्रैं अनामिकाभ्यां हुं ह्रौं कनिष्ठाभ्यां वौषट्
ह्रः करतलपृष्ठाभ्यां फट् एवं हृदयादीनां न्यसेत् ॥ तथाच निबंधे
दीर्घयुक्तेन बीजेन नेत्रांतांगानि विन्यसेत् ततो मूलबीजेन व्याप·
कं कृत्वा ध्यायेत् ॥ तथाच ॥ व्यापकं मूलबीजेन कुर्वीत तदनंत
रम् ॥ ततो ध्यानम् ॥ ॐ हेमांभोजप्रवालप्रतिमनिजरुचिं चारुखट्व
ट्वांगपद्मौ चक्रं शक्तिं सपाशां सृणिमतिरुचिरामक्षमालाकपालाम्
हस्तांभोजैर्दधानं त्रिनयनविलसद्वेदवक्त्राभिराममार्तंडं वल्लभार्धं
मणिमयमुकुटं हारदीप्तं भजामः एवं ध्यात्वा मानसैः संपूज्य शंखे
स्थापनं कुर्यात् ततो पूर्वादिक्रमेण पीठं संपूज्य पूर्वादिक्षु कर्णिका
याम् उं उषायै नमः पं प्रज्ञायै नमः प्रं प्रभायै नमः सं संज्ञायै नमः
इति संपूज्य ॥ मूलेन मूर्तिं संकल्प्य पुनर्ध्यात्वाऽऽवाहनादि पंचपुष्पा
जलिदानपर्यंतं विधायावरणपूजां कुर्यात् ॥ तथाच निबंधे ॥ पीठे
दीप्तादिभिर्युक्ते कर्णिकायामङ्गादिकः पूर्वादिदिक्षु संपूज्य मूर्तिमू
लेन कल्पयेत् ततः पूर्वादिदिक्षु ॥ ॐ सूर्याय नमः ॐ भास्कराय नमः
ॐ भानवे नमः ॐ रवये नमः कोणेषु ॐ दिवाकराय नमः तथा सूर्या
दीश्वरादिक्षु विदिक्षु संसमर्चयेत् ततोऽग्निनिर्ऋतिवाय्वीशानेषु
जे हृदयाय नमः इत्यादि पूजयेत् देवाग्रे ह्रौं नेत्रत्रयाय वौषट् तथा अं
गपूजा यथापूर्वकेन नमोशानादिगानम् ततः पूर्ववद्वज्रादीन् संपूज्य

तं॰ सा॰ ४० 47

भूगृहे लोकपालांश्च पूजयेत् ॥ तथाच निबंधे ॥ ग्रहानष्टौ ततो वाथ लो
कपालांस्ततः परम् ततो धूपादि विसर्गांतं कर्म समापयेत् अस्य पुरश्च
रणं जपो लक्षत्रयसंख्यः त्रिमधुरोपेतैः कमलैर्दशांशहोमः तथाच
लक्षत्रयं जपेन्मंत्री बीजं बिंदुपुटीकृतम् दशांशं कमलैः फुल्लैर्जुहु
यान्मधुरोक्षितैः इमं मंत्रं जपेन्मंत्री कीर्तिपुत्रार्थं धनद्युतिम् वाक्सि
द्धिमतुलां लक्ष्मीं सौभाग्यमपि साधयेत् विघदंर्थेदुललितं तदादि
सर्गसंयुतः अजपाख्यो मनुः प्रोक्तो ह्यक्षरस्त्वरपादपः अस्य पूजा प्रा
तः कूर्मादि पीठमंत्रं तं समाप्य ऋष्यादिन्यासं कुर्यात् शिरसि ब्रह्मणे ऋ
षये नमः मुखे गायत्रीछंदसे नमः हृदि गिरिजापतये देवतायै नमः
ततः करांगन्यासः हंसां अंगुष्ठाभ्यां नमः हंसां हृदयाय नम इत्यादि त
थाच निबंधे ॥ हंसां षड्दीर्घयुक्तेन कुर्यादंगक्रियां मनो ॥ ततो ध्या
नम् ॥ ॐ उद्यद्भानुस्फुरिततडिदाकारमर्धांबिकेशं पाशाभीती वर
दपरशुं संदधानं कराब्जैः दिव्याकल्पैर्नवमणिमयैः शोभितं विश्वमू
लं सौम्याग्नेयं वपुरवतु वश्चंद्रचूडं त्रिनेत्रम् ॥ एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनं कुर्यात् तत्र तंत्रोक्तपीठपूजां विधायाः वरणपूजामारभे
त् केसरेषु ततोऽग्निनिर्ऋतिवाय्वीशानकोणेषु दिक्षु च हंसां हृदयाय
नमः इत्यादि पूजयेत् ततो दिग्दलेषु अनंतवंसनरंवरविदिग्दलेषु
अतनागोज्ञाश्वेरिजनः अब्जैः पूजयेत् तद्बाह्ये इंद्रादीन्वज्रादींश्च पूजयेत्
ततो धूपादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं द्वादशलक्ष
जपः घृतयुक्तपायसेन दशांशहोमः तथाच ॥ भानुलक्षं जपेन्मंत्रं
पायसेन ससर्पिषा दशांशं जुहुयात्सम्यक् ततः सिद्धो भवेन्मनुः । इ
ति सूर्यमंत्रः ॥ ॐ क्लीं स्मरं तं गोपकुमारं मध्ये नंदांगने धूलिविभूषितां
गम् रिङ्गं रिङ्गं नवनीतचौरं तमादिदेवं पुरुषं प्रपद्ये ॥ अथ वक्ष्ये म
हामंत्रान्विष्णोः सर्वार्थसाधकान् यस्य संस्मरणात्सेतो भवाब्धेः पारमा
श्रिताः ॥ अथ विष्णुमंत्राः ॥ तत्रैव समाचमनं गौतमीये ॥ केशवा
द्यैस्त्रिभिः पीत्वा द्वाभ्यां प्रक्षालयेत्करौ द्वाभ्यामोष्ठौ च संस्पृश्य द्वाभ्याम्

ग्रान्मुखस्ततः एकेनहस्तेनप्रक्षाल्यपादोरपितिष्ठेकतः संप्रोक्ष्यैकेन
मूर्धानं ततः संकर्षणादिभिः आस्यनासाक्षिकर्णांगुष्ठनाभावुरसि
केभुजौ एतेशात्देवीभवेदाचमनीयंवैस्मवान्वये एवमाचमनंकृत्वा
साक्षान्नारायणोभवेत केशवादयः केशव नारायण माधव गो
विन्द विष्णु मधुसूदन त्रिविक्रम वामन श्रीधर हृषीकेश प
द्मनाभ दामोदर संकर्षण वासुदेव प्रद्युम्न अनिरुद्ध पुरुषोत्त
म अधोक्षज नृसिंह अच्युत जनार्दन उपेन्द्र हरे श्रीकृष्ण वा
कांत केशवायनमइत्यादि ॥ तथाच ॥ सचतुर्थीनमोंतश्च ना
मभिर्विष्णोस्तुधीः तारोनमोनारायणायच ॥ तथाच ॥ तारंनमः
पदंसूर्यान्नारायणाद्दीर्घसमन्वितो एवनानाष्टमंत्रोयंप्रोक्तोवस्वक्षरा
न्वितः अस्यपूजाप्रयोगः ॥ प्रातःकृत्यादिमात्रकांतंविधायके
शवकीर्त्यादिन्यासंकुर्यात ॥ तस्यध्यानम ॥ ॐउद्यत्प्रद्योतन
शतरुचितमहेमावदातंपार्श्वद्वन्द्वेजलधिसुतयाविश्वधात्र्याच
जुष्टम नानारत्नोल्लसितविविधाकल्पमापीतवस्त्रंविष्णुंवंदेदरक
मलकौमोदकीचक्रहस्तम ॥ एवंध्यात्वान्यसेत अंकेशवायकीर्त्यै
नमः ललाटे आंनारायणायकांत्यैनमोमुखे इंमाधवायतुष्ट्यैन
मोदक्षनेत्रे ईंगोविंदायपुष्ट्यैनमोवामनेत्रे उंविष्णवेधृत्यैनमोदक्ष
कर्णे ऊंमधुसूदनायशांत्यैनमोवामकर्णे ऋंत्रिविक्रमायनमो
दक्षनासापुटे ॠंवामनायदयायैवामनासापुटे लृंश्रीधरायमे
धायैनमोदक्षगंडे लॄंहृषीकेशायहर्षायैनमोवामगंडे एंपद्मना
भायश्रद्धायैनमः ऊर्ध्वोष्ठे ऐंदामोदरायलज्जायैनमः अधरे ओंवासु
देवायलक्ष्म्यैनमः ऊर्ध्वदंतपंक्तौ औंसंकर्षणायसरस्वत्यैनमः अ
धोदंतपंक्तौ अंप्रद्युम्नायप्रीत्यैनमोमस्तके अः अनिरुद्धायरत्यैन
मोमुखे कंचक्रिणेजयायैनमः खंगदिनेदुर्गायैनमः गंशार्ङ्गिणे
प्रभायैनमः घंखड्गिनेसत्यायैनमः ङंशंखिनेचंडायैनमः दक्षकर
मूलसंध्यग्रेषु चंहलिनेवाण्यैनमः छंमुसलिनेविलासिन्यैनमः

तं·
सा·
४८

48

जं शूलिने विजयायै नमः झं पाशिने विरजायै नमः ञं अंकुशिने वि-
श्वायै नमः वामकरमूलसंध्यग्रेषु टं हंसदाय विनदायै नमः ठं नंदजा-
य सुनंदायै नमः डं नंदिने सर्वस्यै नमः ढं नराय ऋद्ध्यै नमः णं नरक-
जिते समृद्ध्यै नमः दक्षिणपादमूलसंध्यग्रकेषु तं हरये शुद्ध्यै नमः
थं कृष्णाय बुद्ध्यै नमः दं सत्याय भुक्त्यै नमः धं सात्वताय मत्यै नमः नं
शौरये क्षमायै नमः वामपादमूलसंध्यग्रकेषु पं शूराय रमायै
नमः दक्षपार्श्वे फं जनार्दनाय उमायै नमः वामपार्श्वे बं भूधराय
क्लेदिन्यै नमः पृष्ठे भं विश्वमूर्तये क्लिन्नायै नमो नाभौ मं वैकुंठाय व-
सुधायै नमः उदरे यं त्वगात्मने पुरुषोत्तमाय वसुधायै नमः हृदि
रं असृगात्मने बलिने परायै नमो दक्षांसे लं मांसात्मने बला-
नुजाय परायणायै नमः ककुदि वं मेदसात्मने बालाय सूक्ष्मायै
नमो वामांसे शं अस्थ्यात्मने वृषघ्नाय संध्यायै नमः हृदादिदक्ष-
करे षं मज्जात्मने वृषाय प्रज्ञायै नमः हृदादिवामकरे सं शुक्रात्म-
ने हंसाय प्रभायै नमः हृदादिदक्षपादे हं प्राणात्मने वराहाय निशा-
यै नमः हृदादिवामपादे लं जीवात्मने विमलाय अमोघायै नमः हृ-
दयाद्युदरे क्षं क्रोधात्मने नृसिंहाय विद्युतायै नमः हृदयादिमुखे
गौतमीये केशवादिरयं न्यासो न्यासमात्रेण देहिनाम् अच्युतत्व-
दो ह्येष सर्वसंपत्संपन्नसंश्रयः इति कृते यत्कृतो भवति पुंवत्सकल-
वैष्णवमंत्रजपादिषु इति दर्शनात केशवकीर्तिन्यासो नित्य-
त्वम् मातृकार्णं समुच्चार्य केशवाय इति स्मरेत कीर्त्यै च नमसा यु-
क्तमित्यादिन्यासमाचरेत केशवाय ततः कीर्त्यै कांत्यै नारायणाय
च इत्यागस्त्यसंहितावचनाद्वार्यक्रमः तत केशवकीर्तिन्यासं नमइ-
ति तथा भुक्तिमुक्तिमिच्छतां न्यासः श्रीबीजादिकर्तव्यः यथा श्रीं
श्रीं केशवाय कीर्त्यै नमः इति तथा च पंचप्रविन्यासे न्यासं लक्ष्मीबीज-
पुरस्सरम् स्मृतिं श्रुतिं महालक्ष्मीं प्राप्यते हरिणा व्रजेत ॥ ततः त-
त्वन्यासः मादिकांतान यथार्णान सबीजानेकेशवेन नमः परा

येष्वप्यस्यार्थबीजतत्त्वात्मने नमः ॥ इति गौतमीये ॥ सर्वत्र तत्त्वप्रयो
गः यथा मं नमः पराय जीवतत्त्वात्मने नमः सकलवपुषि भं नमः
पराय प्राणतत्त्वात्मने नमः कण्ठे बं नमः पराय मतितत्त्वात्मने नमः
फं नमः परायाहंकारतत्त्वात्मने नमः पं नमः पराय मनस्तत्त्वात्मने
नमः एतत्त्रितयं हृदि ॥ नं नमः पराय शब्दतत्त्वात्मने नमः मस्तके
धं नमः पराय स्पर्शतत्त्वात्मने नमः मुखे दं नमः पराय रूपतत्त्वा
त्मने नमो हृदि थं नमः पराय रसतत्त्वात्मने नमः गुह्ये तं नमः परा
य गन्धतत्त्वात्मने नमः पादयोः णं नमः पराय श्रोत्रतत्त्वात्मने नमः
कर्णयोः ढं नमः पराय त्वक्तत्त्वात्मने नमः त्वचि डं नमः पराय नेत्रत
त्त्वात्मने नमः नेत्रयोः ठं नमः पराय जिह्वातत्त्वात्मने नमो जिह्वायां
टं नमः पराय घ्राणतत्त्वात्मने नमः घ्राणयोः ञं नमः पराय वाक्तत्त्वा
त्मने नमो नेत्रयोः झं नमः पराय उपस्था (पाणि) तत्त्वात्मने नमः पाण्योः जं
नमः पराय पादतत्त्वात्मने नमः पादयोः छं नमः पराय पायुतत्त्वात्म
ने नमो गुह्ये चं नमः पराय उपस्थातत्त्वात्मने नमो लिंगे ङं नमः पराय
आकाशतत्त्वात्मने मूर्ध्नि घं नमः पराय वायुतत्त्वात्मने नमो मुखे गं
नमः पराय तेजस्तत्त्वात्मने नमो हृदि खं नमः पराय जलतत्त्वात्मने न
मः लिंगे कं नमः पराय पृथिवीतत्त्वात्मने नमः पादयोः गौतमीये
बीजं हृत्पुण्डरीकतत्त्वं हृदि प्रविन्यसेत् हं बीजं सूर्यमण्डलतत्त्वं हृदि प्रवि
न्यसेत् सं बीजं चन्द्रमण्डलतत्त्वं हृदि प्रविन्यसेत् रं बीजं वह्निमण्डलत
त्त्वं तत्र प्रविन्यसेत् प्रमाणं शं नमः पराय हृत्पुण्डरीकतत्त्वात्मने नमो
हृदि हं नमः पराय द्वादशकलाव्याप्तसूर्यमण्डलतत्त्वात्मने नमो हृदि
सं नमः पराय षोडशकलाव्याप्तसोममण्डलतत्त्वात्मने नमो हृदि रं न
मः पराय दशकलाव्याप्तवह्निमण्डलतत्त्वात्मने नमो हृदि तथा द्विषट्
षुगष्टदशकलाव्याप्ता इति दर्शनात् षं नमः पराय परमेष्ठितत्त्वात्म
ने नमो वामदेवाय मस्तके ॥ तथा च गौतमीये ॥ षं बीजं परमेष्ठित
त्त्वं वामदेवं च मूर्धनि यं बीजमथ पुंस्तत्त्वं संकर्षणमथो मुखे लं रं बीजं

तं.
स्मा.
४९
५१

कोपतत्त्वं नृसिंहं सर्वगात्रके एवं तत्त्वानि विन्यस्य प्राणायामं समाच
रेत् ततस्मादि यं नमः पराय पुरुषाय तत्त्वात्मने संकर्षणाय नमो मुखे लं
नमः पराय विश्वतत्त्वात्मने प्रद्युम्नाय नमो हृदि वं नमः पराय निवृत्तित
त्त्वात्मने अनिरुद्धाय नमो लिंगे लं नमः पराय सर्वतत्त्वात्मने नमो नारा
यणाय नमः पादयोः क्ष्रौं नमः पराय कोपतत्त्वात्मने नृसिंहाय नमः
सर्वगात्रे फलं तत्तथा ततन्यासं ततः कुर्यात् आत्मकस्मिन् हृदि ततैव कु
तेनये नदेवस्य रूपतामेव यात्यसौ ततो यथाविधि प्राणायामं कृत्वा
पीठन्यासं विधाय केसरेषु मध्ये च पूर्वादि ओं विमलायै नमः एवं उत्क
र्षिण्यै नमः ज्ञानायै नमः क्रियायै नमः योगायै नमः प्रह्व्यै नमः स
त्यायै नमः ईशानायै नमः अनुग्रहायै नमः तदुपरि ओं नमो भगव
ते विष्णवे सर्वभूतात्मने वासुदेवाय सर्वात्मसंयोगयोगपद्मपीठा
त्मने नमः तथा च निबंधे नमो भगवते कुर्याद्विष्णवे च पदं वदेत्
सर्वभूतात्मने वासुदेवायेति वदेत्ततः सर्वात्मसंयोगपद्मयोगप
द्मपदं पुनः पीठात्मने हृदंतोयं मंत्रम्पाणादिरीरितः ततः अंगन्यास
स्तद्यथा ॥ शिरसि साध्यनारायणाय ऋषये नमः मुखे गायत्रीछंदसे नमः
हृदि श्रीविष्णवे देवतायै नमः ततः करांगन्यासौ क्रुद्धोल्काय अंगुष्ठाभ्यां
नमः महोल्काय तर्जनीभ्यां स्वाहा वीरोल्काय मध्यमाभ्यां वषट् द्युल्का
य अनामिकाभ्यां हुम् सहस्रोल्काय कनिष्ठाभ्यां फट् एवं हृदयादिषु
तथा च निबंधे ॥ क्रुद्धोल्काय हृदयांतं महोल्काय शिरः स्मृतं वीरो
ल्काय शिखा प्रोक्ता द्युल्काय कवचं स्मृतं सहस्रोल्कायास्त्रमुक्तं मनाक्कि
निरियमता ततो मंत्रेण षडंगं कुर्यात् ओं हृदयाय नमः नं शिरसे स्वाहा मो
शिखायै वषट् नां कवचाय हुं रां नेत्राभ्यां वौषट् यं अस्त्राय फट् णां नमो
दक्षिणपार्श्वे यं नमो वामपार्श्वे ओं नमः सुदर्शनाय अस्त्राय फट् इति मंत्रेण
दिग्बंधनं कृत्वा मंत्रन्यासं कुर्यात् तथा च मंत्रन्यासं ततः कुर्यात् सर्वकामफ
प्रदं यं विना न समग्रा स्याद्वासुदेवांगनिष्फलं तथा तद्यथा आधारे ओं नमो हृदये
नं नमो वक्त्रे मों नमो दोर्युगले नां नमः रां नमः पादयोः यं नमो णां नमः नाभौ

यनमः पंवकंठे नाभौ हृदि कुक्षयोः पार्श्वयोः पृष्ठे च मूर्ध्नि आस्ये नेत्रयोः
श्रवणयोः घ्राणयोः हस्तयोः सर्वांगुलीषु तथा पादयोः सर्वांगुलीषु च
विन्यसेत् हृदये सप्तधातुषु प्राणेषु मूर्ध्नि नेत्र आस्ये हृदि कुक्षौ ऊरौ जंघा
यां पादयोः गंडयोः स्तनयोः चक्रे शंखे गदायां पद्मे च विन्यसेत् ततो मूर्ति
पंजरन्यासः ललाटे ॐ अं केशवाय धात्रे नमः नाभौ ॐ आं नारायणाय
अर्यम्णे नमः हृदि ॐ इं माधवाय मित्राय नमः गलकूपतले ॐ ईं गोवि
न्दाय वरुणाय नमः दक्षिणपार्श्वे ॐ उं विष्णवे अंशवे नमः दक्षिणांसे ॐ ऊं
मधुसूदनाय भगाय नमः गलदक्षिणभागे ॐ ऋं त्रिविक्रमाय विवस्वते न
मः वामपार्श्वे ॐ ॠं वामनाय इन्द्राय नमः वामांसे ॐ लृं श्रीधराय पूष्णे
नमः गलवामभागे ॐ ॡं हृषीकेशाय पर्जन्याय नमः पृष्ठे ॐ एं पद्म
नाभाय त्वष्ट्रे नमः ककुदि ॐ ऐं दामोदराय विष्णवे नमः शिरसि
द्वादशान्तं न्यसेत् ॥ तथा च ॥ ललाटे केशवं धात्रा नाभौ नारायणं
पुनः अर्यम्णा हृदि मित्रेण माधवं कंठदेशतः वरुणेन गोविंदं पुन
र्दक्षिणपार्श्वके अंशुना विष्णुं संन्यस्य भगेन मधुसूदनम् गले विवस्वता
युक्तं त्रिविक्रमम् अनंतरम् वामपार्श्वे इन्द्रेण वामनाख्यं अथांसके पू
ष्णा श्रीधरनामानं गले पर्जन्यसंयुतम् हृषीकेशं कुंय पृष्ठे पद्मनाभ
ततः परम् त्वष्ट्रा दामोदरं पश्चाद्विष्णुना ककुदि न्यसेत् द्वादशान्ते न्या
सफलमाह चैतन्न्यासमात्र वपुरर्ककोटितेजो मूर्ध्नि स्थाव पुरं विलसवा
सुदेवः कुथसंयुतविमलपायसीवसिक्तं प्राप्नोति प्रकटितं मत्रविष्
कीर्णम् न्यासफलं तत् तन्मूर्तिपंजरन्यासाभिहितः परमेष्ठिना सकृ
न्न्यासाद्भवेन्मंत्री विष्णुरेव न संशयः ॥ मूर्तिपंजरन्यासस्तु ॥ वासुदे
वमंत्रे केवलं क्लीं बीजविवर्जितम् सैकबिंदुयुक्तं च वक्तव्या केशवादि
कम् तथाथान्यथिकं वोल्का नामन्यासस्तदादितः नारदीयतंत्रादुक्त
क्रमो ग्राह्यः नतु केशवधात्र्यंभ्याधात्री सहित केशवाय नमः इत्यादि ॥
ततः किरीटकेयूरहारमकरकुंडलशंखचक्रगदांबुजहस्तपीतांबरध
रश्रीवत्सांकितवक्षस्थलश्रीभूमिसहितस्वात्मज्योतिर्द्युयदीपिकाय

तं॰
सा॰
५०

50

सहस्रादित्यतेजसे नमः इति मंत्रेण व्यापकं विन्यस्य मुद्रा प्रदर्श्य ध्यानं कु
र्यात् तद्यथा ॐ उद्यत्कोटिदिवाकराभमनिशं शंखं गदां पंकजं चक्रं बि
भ्रतमिंदिरावसुमतीसंशोभिपार्श्वद्वयम् कोटीरांगदहारकुंडलधरं पी
तांबरं कौस्तुभोद्दीप्तं विश्वधरं स्ववक्षसि लसच्छ्रीवत्सचिह्नं भजे ॥ एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ततो वैष्णवी पात्रं तद्गोत
मीये ताम्रपात्रं तद्विप्रैर्विष्णोरतिप्रियं मतम् तच्चैव सर्वपात्राणां मु
ख्यं शंखं प्रकीर्तितम् मृत्पात्रं तत्तथा प्रोक्तं सौवर्णं राजतं तथा पंचपा
त्रं हरे शुद्धं नान्यत् तत्र नियोजयेत् नैवेद्यदाने तत्रैव सर्वेषामनामपात्रमा
ग्नेयवायकजे दले इत्यादि ततः सामान्यपीठपूजां ततो विमलादिशा
क्तिसहितपीठपूजां कृत्वा पुनर्ध्यात्वाऽऽवाहनादिपंचपुष्पांजलिदा
नपर्यंतं विधायावरणपूजामारभेत् तद्यथा ॥ केसरेष्वग्निकोणे ॐ कु
द्धोल्काय हृदयाय नमः नैरृते महोल्काय शिरसे स्वाहा वायव्ये वी
रोल्काय शिखायै वषट् ईशाने द्युल्काय कवचाय हुम् दिक्षु सहस्रो
ल्काय अस्त्राय फट् ततः केसरेषु पूर्वादि ॐ नमः नं नमः मों नमः नां
नमः रां नमः यं नमः णां नमः यं नमः ततो दलेषु पूर्वादिदिक्षु ॐ वा
सुदेवाय नमः एवं संकर्षणाय नमः प्रद्युम्नाय नमः अनिरुद्धाय नमः
आग्नेयादिकोणेषु ॐ शांत्यै नमः एवं श्रियै नमः सरस्वत्यै नमः ततः पत्रा
ग्रेषु पूर्वादि ॐ चक्राय नमः शंखाय नमः एवं गदायै पद्माय कौस्तु
भाय मुसलाय खड्गाय वनमालायै बहिरेषु ॐ गरुडाय दक्षिणे ॐ
शंखनिधये पद्मनिधये नमः पश्चिमे ॐ ध्वजाय अग्निकोणे ॐ विघ्नाय
नैरृते ॐ शार्ङ्गाय वायुकोणे ॐ गरुडाय नमः ईशाने ॐ सेनान्याय न
मः ततः इंद्रादीन् वज्रादींश्च पूजयेत् ततो धूपदीपौ दत्वा नैवेद्यं नि
वेदयेत् तद्यथा नैवेद्यमानीय देवाय मूलेन पाद्याचमनीयं दत्वा फ
ट् इति मंत्रेण नैवेद्यं संप्रोक्ष्य चक्रमुद्रया संरक्ष्य यमिति मंत्रेण दोषसमूहं संशो
षयामिति मंत्रेणामृतं ध्यात्वा वामकरमाधाय समाभिपूर्णं वमिममृतीकृत्य मूल
मंत्रं ध्यात्वा तत्सा धेनुमुद्रयामृतीकृत्य गंधपुष्पैर्नैवेद्यं संपूज्य कृतांजलिः सन्
हरिं प्रार्थयेत् तत्सत्त्ववतामरः पक्वा ... दक्षितावि भाग्यमस्त्वा हे

ततो निवेदनादिमंत्रमुच्चार्य नैवेद्ये जलं दद्यात् एतन्नैवेद्यममुकदे-
वतायै नमः ततो नैवेद्यं हस्ताभ्यामुद्धृत्य ॐ निवेदयामि भवते जु-
षाणेदं हविर्हर इति नैवेद्यं समर्प्य अमुकदेवतायै एतज्जलममृ-
तोपस्तरणमसि इति जलं दत्वा वामहस्तेन ग्रासमुद्रां प्रदर्श्य द-
क्षहस्तेन प्राणादिमुद्राः प्रदर्शयेत् यथा ॐ प्राणाय स्वाहा इति
कनिष्ठानामिकांगुष्ठेन स्पर्शयेत् ॐ अपानाय स्वाहा तर्जनीम-
ध्यमेंऽगुष्ठेन स्पर्शयेत् ॐ व्यानाय स्वाहा इत्यंगुष्ठेन अनामिका
मध्यमे स्पृशेत् ॐ उदानाय स्वाहा इत्यंगुष्ठेनानामिकामध्यमा
तर्जनीः स्पृशेत् पंचादितः ॐ समानाय स्वाहा सर्वांगुलीरंगु-
ष्ठेन स्पर्शयेत् ततोऽङ्गुष्ठाभ्यामनामाग्रस्पृशन् ह्रौं नमः परात्म-
ने अनिरुद्धाय नैवेद्यं कल्पयामि इति नैवेद्यमुद्रां प्रदर्श्य मूलमु-
च्चार्य अमुकदेवं तर्पयामि इति चतुर्थी समर्प्य अमुकदेवतायै ए-
तज्जलममृतापिधानमसि इति जलं दत्वा आचमनीयादिकानि
दद्यात् वैश्वदेवं सर्वत्र नैवेद्यदानेऽयमेव विधिः ततः सामामक्र-
मेण विसर्जितं कर्म समापयेत् अस्य पुरश्चरणं षोडशलक्षजपः
तथा च ॥ त्रिकालं दंप्रजपेन्मंत्रमेनं समाहितः तद्दशांशं स-
सिजैर्जुहुयान्मधुरान्वितैः ॥ अथ रामचंद्रमंत्रः ॥ अनंतोऽग्न्यास-
नसेंदुबीजं रामाय हृन्मनुः षडक्षरोऽयमादिष्टो भजतां कामदाय-
कः ॥ अस्य पूजाप्रयोगः ॥ प्रातःकृत्यादि विश्वोक्तपीठन्यासां-
तं विधाय ऋष्यादिन्यासं कुर्यात् ॥ तद्यथा ॥ शिरसि ब्रह्मणे ऋष-
ये नमः मुखे गायत्रीछंदसे नमः हृदि श्रीरामाय देवतायै नमः ततः
करांगन्यासौ रां अंगुष्ठाभ्यां नमः रीं तर्जनीभ्यां स्वाहा रूं मध्यमा-
भ्यां वषट् रैं अनामिकाभ्यां हुम् रौं कनिष्ठाभ्यां वौषट् रः करत-
लपृष्ठाभ्यां फट् एवं हृदयादिषु ॥ तथा च निबंधे ॥ दीर्घभाजा
स्वबीजेन कुर्यादंगानि षट् क्रमात् ततो मंत्रन्यासः ब्रह्मरंध्रे रां न-
मः भ्रुवोर्मध्ये रां नमः हृदि मां नमः नाभौ यं नमः लिंगे नं नमः

तं०
सा०
५८
S1

पादयोः मः नमः ॥ ततो मूर्तिपंजरादिविधिं विधाय ध्यायेत् का-
लांभोधरकांतिकांतमनिशं वीरासनाध्यासिनं मुद्रां ज्ञानमयीं द-
धानमपरं हस्तांबुजं जानुनि सीतां पार्श्वगतां सरोरुहकरां विद्यु-
न्निभां राघवं पश्यंतं मुकुटांगदादिविविधाकल्पोज्ज्वलांगं भजे एवं
ध्यात्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ॥ ततः पीठपूजां वि-
धाय वैष्णवोक्तपीठशक्तीः पीठमंत्रेण संपूज्य पुनर्ध्यात्वाऽऽवाह-
नादिपंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् दे-
ववामपार्श्वे श्रीसीतायै नमः अग्रे शार्ङ्गाय नमः दक्षिणवामपार्श्वे
शराभ्यां नमः चापाय नमः तद्बहिः केसरेषु आग्नेयादिकोणमध्ये दि-
क्षु च हृदयाय नमः इत्यादि षडंगं पूजयेत् ॥ ततो दलेषु पूर्वादि
ॐ हनुमते नमः ॐ सुग्रीवाय नमः ॐ विभीषणाय नमः एवं
भरताय नमः ॐ लक्ष्मणाय अंगदाय शत्रुघ्नाय जांबवते नमः
दलाग्रेषु ॐ सृष्टये नमः जयंताय विजयाय सुराष्ट्राय राष्ट्रव-
र्धनाय अकोपाय धर्मपालाय सुमंत्राय ततः इंद्रादीन् संपूजयेत्
ततो धूपादिविसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं षट्लक्ष-
जपः तथा च ॥ रसलक्षं जपेन्मंत्रं दशांशं कमलैः शुभैः जुहु-
यात्सचितैर्वन्हौ ब्राह्मणान्भोजयेत्ततः अयं षडक्षरः ॥ तथा च ॥
सा कामपाकिवान्त श्रीताराद्यः पंचवर्णकः षडक्षरः षड्विधः स्या-
च्चतुर्वर्गफलप्रदः ब्रह्मा संमोहनः शक्तिः दक्षिणामूर्तिरुच्यते
अगस्त्यः श्रीशिवः प्रोक्ता मुनयोऽत्र क्रमादिमे अथवा कामबीजादे-
र्विश्वामित्रो मुनिर्मतः छंदो गायत्री संज्ञं च श्रीरामश्चैव देवता
ध्यानपूजादिकं पूर्ववत् ॥ जानकीवल्लभायाद्यभवेत्स्वाहावकवल्लभा-
क्रमादिरेष कथितो राममंत्रो दशाक्षरः तथा च ॥ जानकीवल्लभं देवं तं
वन्हेमीयात्क्रमादिकम् दशाक्षरोऽयं मंत्रः स्याद्वसिष्ठः स्यान्मुनिर्विराट्
छंदस्तु देवता रामः सीतापाणिपरिग्रहः आद्यं बीजं द्विठः शक्तिः का-
मेनांगक्रियामता शिरोललाटभ्रूमध्ये तालुकंठेषु हृत्स्वपि ॥

नोऽस्य कृत्वा तु पंचेषुदशार्णो श्रमनो जपेत् ॥ ततो ध्यानम् ॥ अयो-
ध्यानगरे चित्ररत्नसौवर्णमंडपे मंदारपुष्पैराबद्धविताने तोरणां-
किते सिंहासनसमारूढं पुष्पकोपरि राघवम् रक्षोभिर्हरिभि
र्देवैर्दिव्ययानगतैः शुभैः संस्तूयमानं मुनिभिः गंधर्वैः परिशोभि
तम् सीतालंकृतवामांगं लक्ष्मणेनोपशोभितम् श्यामं प्रसन्नव-
दनं सर्वाभरणभूषितम् ध्यात्वैवं जपेन्मंत्रं वर्णलक्षमनन्यधीः
वह्निनारायणौ नाद्योजटः केवलश्च वै षडक्षरो मंत्रराजोऽयं सर्वा-
भीष्टफलप्रदः श्रीमायामन्मथैकैकबीजाद्यंतगतो मनुः च
तुर्वर्णस्स एव स्यान्नर्णो वांछितप्रदः स्वाहांतो हुंफडंतो वा मा
लांतो वा भवेन्मनुः तथा तारमायारमानंगवाक्स्वबीजैः स्व
षड्विधः षडक्षरो मंत्रराजस्स्यात्सर्वाभीष्टफलप्रदः षडक्षरः षड्
भद्रांतो मंत्रोऽयं वक्त्राक्षरः रामाय हुंमनुः प्रोक्तो मंत्रः पंचाक्षरः
परः पंचाशन्मातृकावर्णप्रत्येकपूर्वको मनुः लक्ष्मीवाग्मन्म
थादिस्वतारादिः स्यादनेकधा तेन श्रीरामाय नम इत्यादि ॥ षड-
क्षरोक्तसेवामादौ ल स्वीबीजादिना मन्त्रांतरदानेसमाक्षरः व
ह्निस्थं शायनं विद्याभर्यं चंद्रविभूषितम् एकाक्षरो मनुः प्रोक्तो मंत्र
राजस्सुरद्रुमः ब्रह्मा मुनिः स्याद्गायत्री छंदो रामश्च देवता एका-
क्षरी तु द्वादशलक्षजपः भानुलक्षं जपेन्मंत्रं इति वचनात् अ
स्यैव बहुलक्ष इति विशेषः पूजादिकं सर्वं षडक्षरवत् ॥ अथ
श्रीकृष्णमंत्रः ॥ गोपीजनपदस्यांते वल्लभाय द्विठावधिः अष्टद
शाक्षरो मंत्रोऽष्टाष्टफलप्रदः अयं मंत्रः कामबीजादिः राशिन
क्षत्रविचारेण बीजरहितेन विचारः बीजपूर्वं जपस्यास्यारहस्य
कथितं मुने गुप्तबीजस्वभावत्वात् दशाक्षरं इह स्थाने इति गौतमी-
यात् ॥ तथा च दत्तात्रेयतमीये ॥ भोगमोक्षैकनिलयो गुप्तबीजोद
शाक्षरः उद्धरेत्तु पृथक्केन कामबीजं महामुने उग्रो गात्फलदो मं
त्रो नान्यथा कल्पकोटिभिः अस्य प्रयोगः प्रातः कृत्यादि पीठन्यासां

तं॰
सा॰ तं विधाय प्राणायामं कुर्यात् ॥ तथाचोक्तं तन्त्रीये ॥ एवं तत्त्वानि वि-
५१ न्यस्य प्राणायामत्रयं चरेत् तथा कामबीजस्य एकवारजपेन द-
क्षिणनासापुटे वायुं रेचयेत् पुनः सप्तवारजपेन वामनासया वा-
52 युं पूरयेत् ततस्तन्नासापुटाभ्यां विंशतिवारजपेन वायुं कुम्भयेत्
पुनर्वामेन रेचयेत् दक्षया पूरयेत् उभाभ्यां कुम्भयेत् तथा च ॥
एकेन रेचयेत् कामबीजेन वह्निस्थं कस्यचित् पूजयेत्सप्तसप्तेन विं-
शमानेन धारयेत् सर्वेषु कृष्णमन्त्रेषु बीजेनानेन रेचयेत् षष्ठी-
पवनं संयमनं तु सपापाचरेयमिदं जन्मसमो मन्त्रमिच्छति यदि द-
शावारं जपति तदा दशान्तरेण चेत्तदाष्टाविंशतिरेचयेत् पूरयेद्व-
मन्त्रं कुठारयेत्तत्प्रमाणतः प्राणायामो भवेदेको रेचपूर्वककु-
म्भकैः अष्टादशान्तरेणैव द्वादशैवं समापयेत् अथ मन्त्रमिव-
र्णोन्तु एकत्वमित्युक्तत्वात् अथ तत्र तत्तन्मन्त्रवर्णसंख्याकै रेच-
कादित्रयं कुर्यात् रेचयेन्मारुतं दक्षया पूरयेद्वाममध्यमया नासापु-
टेन धारयेदित्यादि एतत् श्रीकृष्णविषयं नान्यत्र तथा पीठन्यासं
विधाय केसरेषु मध्ये च विमलादिपीठशक्तीः पीठमनुं च विन्य-
स्य ऋष्यादिन्यासं कुर्यात् शिरसि नारदऋषये नमः मुखे विरा-
ट्छन्दसे नमः हृदि श्रीकृष्णदेवतायै नमः गुह्ये कामबीजाय न-
मः पादयोः स्वाहाशक्तये नमः मन्त्राधिष्ठातृदुर्गायै नमः इति दु-
र्गां नमस्कुर्यात् ततः प्रणवपुटितमूलमन्त्रं करयोर्मध्ये पृष्ठे पार्श्व-
च त्रिशो विन्यस्य प्रणवपुटितान्मन्त्रवर्णान् सुविन्यस्य अङ्गुलिपर्वसु
नमोन्तान् विन्यसेत् दक्षिणाङ्गुष्ठे त्रिषु पर्वसु ॐ गों ॐ नमः दक्षतर्ज-
न्यां ॐ पीं ॐ नमः दक्षमध्यमायां ॐ जं ॐ नमः दक्षानामिकायाम्
ॐ नं ॐ नमः दक्षकनिष्ठिकायाम् ॐ वं ॐ नमः वामकनिष्ठायां
ॐ ल्लं ॐ नमः वामनामिकायाम् ॐ भं ॐ नमः वाममध्यमायाम्
ॐ यं ॐ नमः वामतर्जन्यां ॐ स्वां ॐ नमः वामाङ्गुष्ठे ॐ हां ॐ नमः
अयं तदर्शितन्यासः एवं तद्दक्षिणाङ्गुष्ठपर्वाद्वामकनिष्ठान्तपुनः

सृष्टिस्थित्येनेन इति पंचधा कुर्यात् अशक्तश्चेत् स्थितिमात्रं कुर्यात् न्यास-
त्रयं सदा कार्यमशक्तस्यामेकमेव हि इति गौतमीयवचनात् ततः स्थि
तिक्रमेणांगुलिषु दशार्णीं विन्यसेत् तद्यथा गों नमो दक्षिणांगुष्ठे
पीं नमः तर्जन्यां जं नमः मध्यमायां वं नमो नामिकायां वं नमः कनि
ष्ठायां वामांगुष्ठे लं नमः तर्जन्यां भां नमः मध्यमायां यं नमः अनामि
कायां स्वां नमः कनिष्ठायां ह्रां नमः ततः करयोः षडंगन्यासः आ
चक्राय स्वाहांगुष्ठाभ्यां नमः विचक्राय स्वाहा तर्जनीभ्यां स्वाहा सु
चक्राय स्वाहा मध्यमाभ्यां वषट् त्रैलोक्यरक्षणचक्राय स्वाहा अना
मिकाभ्यां हुं असुरान्तकचक्राय स्वाहा कनिष्ठाभ्यां फट् ततो मूल
मंत्रपुटितो मातृकावर्णान् सविन्दून् मातृकास्थानेषु न्यसेत् ततः प्रण
वपुटितं मूलमंत्रमाकेशात्पादं आपादात्केशांतं त्रिवारं विन्यस्य सं
हारासृष्टिभेदेन दशतत्त्वानि विन्यसेत् संहृतामनुगतोम ·· वर्धस
ष्टिवसितिमवेस्त्रतियातः तद्यथा पादयोः गों नमः पराय पृथिवीत
त्त्वात्मने नमः लिंगे पीं नमः पराय जलतत्त्वात्मने नमः हृदि जं नमः प
रायतेजस्तत्त्वात्मने नमः मुखे वं नमः पराय वायुतत्त्वात्मने नमः शि
रसि वं नमः परायाकाशतत्त्वात्मने नमः हृदि लं नमः परायाहंकार
तत्त्वात्मने नमः भां नमः पराय महत्तत्त्वात्मने नमः सर्वांगे यं नमः परा
याकाशतत्त्वात्मने नमः हृदि लं नमः परायाहंकारतत्त्वात्मने नमः
प्रकृतितत्त्वात्मने नमः स्वां नमः पराय पुरुषतत्त्वात्मने नमः हां न-
मः पराय परतत्त्वात्मने नमः। इति संहारक्रमः। सर्वांगे हां नमः परा
यपरतत्त्वात्मने नमः स्वां नमः पराय पुरुषतत्त्वात्मने नमः भं नमः
पराय प्रकृतितत्त्वात्मने नमः हृदि भां नमः पराय महत्तत्त्वात्मने नमः
लं नमः परायाहंकारतत्त्वात्मने नमः शिरसि वं नमः परायाकाशत
त्त्वात्मने नमः मुखे वं नमः पराय वायुतत्त्वात्मने नमः हृदि जं नमः परा
यतेजस्तत्त्वात्मने नमः लिंगे पीं नमः पराय जलतत्त्वात्मने नमः पा-
दयोः गों नमः पराय पृथिवीतत्त्वात्मने नमः। इति सृष्टिक्रमः। ततः हृ

ष्ट्यादिन्यासः ॥ रुद्राङ्गुलिनियमोनिबंधे ॥ शिरसिविहितामध्यासेवा
हितर्जनिकान्विता अवसिरहिताङ्गुष्ठाज्येष्ठान्वितोपकनिष्ठिका ना
सिचदनेसर्वाः सन्न्यासोहृदितर्जनीप्रथमससहितामध्यनाभौक्रता
विवताध्वजे तापर्वाङ्गुष्ठयोर्जानुनोः सांगुष्ठास्तुपदद्वये तद्यथा शिरसि
गोंनमः मध्यमाभ्यांगुल्यानेत्रयोः पौंनमः तर्जनीमध्यमाभ्यांकर्णयोः
जंनमः अंगुष्ठरहिताभिः अंगुलीभिः घ्राणेनंनमः अंगुष्ठानामिका
भ्यां मुखेवंनमः सर्वांगुलीभिः हृदिलंनमः अंगुष्ठतर्जनीभ्यां उद
रेभंनमः अंगुष्ठमध्यमाभ्यां लिंगेयंनमः अंगुष्ठरहिताभिः अंगुली
भिः जानुनोः स्रांनमः अंगुलरहिताभिः अंगुलीभिः पादयोः हांनमः
सर्वांगुलीभिः इयंतुसृष्टिक्रमः ॥ अथस्थितिक्रमः ॥ हृदिगोंन
मः अंगुष्ठतर्जनीभ्यां उदरेपौंनमः अंगुष्ठतर्जनीभ्यां लिंगेजंनमः
अंगुष्ठरहिताभिः अंगुलीभिः जानुनोः नंनमः अंगुष्ठरहिताभिः पा
दयोः वंनमः सर्वांगुलीभिः शिरसिलंनमः मध्यमांगुल्यानेत्रयोः भं
नमः तर्जनीमध्यमाभ्यां कर्णयोः यंनमः अंगुष्ठरहिताभिरंगुलीभिः
घ्राणेस्रांनमः अंगुष्ठनामिकाभ्यां मुखेहांनमः सर्वांगुलीभिः लिंगे
जंनमः अंगुष्ठरहिताभिः उदरेनंनमः अंगुष्ठमध्यमाभ्यां हृदिवंनमः
अंगुष्ठतर्जनीभ्यां मुखेलंनमः सर्वांगुलीभिः घ्राणयोः भंनमः अंगु
ष्ठानामिकाभ्यां कर्णयोः यंनमः अंगुष्ठरहिताभिः नेत्रयोः स्रांनमः
तर्जनीमध्यमाभ्यां शिरसिहांनमः मध्यमांगुल्या पुनः सृष्टिस्थिती
चविन्यसेत् तथाच स्थानार्णयोर्विनियमोनांगुलिस्यात्तयोर्भवेत्
विद्यार्थीब्रह्मचारीचपुनःसृष्टिंसमाचरेत् गृहस्थस्तुपुनःसृष्टिस्थि
तीचकुर्यात् वनितैवराज्यपुत्रकस्यसंहारांतंविन्यसेत् एतेनविद्या
र्थीब्रह्मचारीवनस्थोगृहस्थानांचपंचधायातिविरक्तानांचत्रि
धान्यासः ॥ तथाचनिबंधे ॥ न्यासः संहारांतोमस्करि
वैखानसयुविहितोयम् स्थित्यंतोगृहमेधिषुसृष्ट्यंतो॰
वर्णिनामितिप्राहुः

वेणाग्रयुक्तिगृहस्थस्य संहारं केचिदाहुराचार्याः सहजानोवनवासिनि-
स्थितिं विद्यार्थिनां सृष्टिम् केचित्न्यासत्रयं वैपरीत्यमामनंति तेन
सर्वैरेव त्रिधा न्यासः कर्तव्यः ॥ अथ विभूतिपंजरन्यासः ॥ तत्रवि
वेचे वाग्भवपरं न्यासपरं भूत्यभिधं भूतिकरं मंत्रदशार्णहृतिमयं प्रणत
रंप्रमितमेः तद्यथा आधारे गं नमः नाभौ पीं नमः कुक्षौ जं नमः
हृदि नं नमः गले वं नमः मुखे लं नमः अंसयोः भं नमः यं नमः कु
र्वोः स्वां नमः हां नमः ग्रीवायाम् गों नमः नाभौ पीं नमः कुक्षौ जं
नमः हृदि नं नमः स्तनयोः वं लं नमः पार्श्वयोः भं यं नमः श्रोण्ये
स्वाहा नमः शिरसि गों मुखे पीं नेत्रयोः जं नमः कर्णयोः वं लं ना-
सापुटयोः भं यं कपोलयोः स्वां हां एवं दक्षिणकरस्य मूलसंध्यग्र
पुंपं वद्दक्षिणहस्तांगुलीषु च एवं वामकरमूलसंध्यग्रेके पुंपं च एवं
वामांगुलीषु मूर्ध्नि गों तत्पूर्वे पीं तद्दक्षिणे जं तत्पश्चिमे नं तदुत्तरे वं मू
र्ध्नि सकले लं भ्रुवोः भं यं ऊर्वोः स्वां हां शिरसि गों नेत्रयोः पीं मुखे
जं कंठे हृदि वं उदरे लं मूलाधारे भं लिंगे यं जानुनोः यं जंघयोः
स्वां पादयोः हंसर्वांगे दिन्मेभ्यो न्यानिन्यसेत् ततः पूर्ववन्मूर्तिपंजरन्यासः
पुनः सृष्टिस्थिती ततो गंपंचांगन्यासो तद्यथा हृदि गों नमः शि
रसि पीं शिखायां जं सर्वांगे नं दक्षे वं स्तनपार्श्वे लं वामपार्श्वे भं कटि
देशे यं पृष्ठे स्वां मूर्ध्नि हां आचक्राय स्वाहा हृदयाय नमः विचक्राय
शिरसे सुचक्राय स्वाहा शिखायै वषट् त्रैलोक्यरक्षणचक्राय कव-
चाय हुं असुरांतकचक्राय स्वाहा अस्त्राय फट् इति मंत्रेण दिग्बंध
नं कुर्यात् किरीटादिकं तु सर्वत्र। ततो ध्यानम्। स्मरेद्वृंदावने रम्ये
मोहयंतमनारतम् गोविंदं पुंडरीकाक्षं गोपकन्यासहस्रशः आत्मनो
वदनांभोजे प्रेषिताक्षिमधुव्रताः पीडिताः कामबाणेन चिरमाश्लेषणो
त्सुकः मुक्ताहारलसत्पीनतुंगस्तनभरानताः स्रस्तधम्मिलवसना
मदस्खलितभाषणाः दंतपंक्तिप्रभोद्भासिस्पंदमानाधरांचिताः वि
लोभयंतीविविधैर्विभ्रमैर्भावगर्विताः ॥ फुल्लेंदीवरकांतिमिंदुवद

त्रै॰
सा॰
५४ नवद्दीवं तमप्रियं श्रीवत्साकमुदारकौस्तुभधरं पीतांबरं सुन्दरम्
गोपीनां नयनोत्पलार्चिततनुं गोगोपसंघावृतं गोविंदं कलवेणुवा
दनपरं दिव्यांगभूषं भजे ॥ एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं
59 कुर्यात् ततो वैष्णवोक्तपीठमन्त्रैः पीठपूजां विधाय पुनर्ध्यात्वाऽवा
हनादि पंचपुष्पांजलिं ध्यानपर्यंतं विधाय देवशरीरे सृष्टिस्थितिद
शांगपंचांगन्यासक्रमेण पूजयेत् ततो मुखे वेणवे नमः हृदि वन
मालायै नमः ॐ कौस्तुभाय नमः ॐ श्रीवत्साय नमः ततो परं पंच
पुष्पांजलिं दद्यात् तथा च गौतमीये दक्षिणे वामदेवाख्यं स्वच्छचेतसम्
मव्ययम् वामे च रुक्मिणीं नित्यं सर्वकारज्ञो गुणान्विताम् सर्वाणि पु
ष्पाणि सर्वतन्तो दद्यात् शुक्लं चंदनपंकिलां श्वेततुलसीं रक्तं च चंदन
पंकिलां रक्ततुलसीं मूलेन दक्षिणवामपार्श्वयोः दद्यात् एवं द्वे द्वे
करवीरद्वयेन मूर्ध्नि पद्मद्वयेन तथा तुलसीद्वयं पद्मद्वयं शिरसि दः
द्यात् तथा च गौतमीये ततः आवरणपूजा पूर्वे दामाय नमः दक्षे सुदा
माय नमः पश्चिमे वसुदामाय नमः उत्तरे किंकिणे केसरेषु आग्नेयकोणे
आचक्राय स्वाहा हृदयाय नमः निरृते विचक्राय स्वाहा शिरसि सुच
क्राय स्वाहा वायोः सचक्राय शिखायै ईशाने त्रैलोक्यरक्षणचक्राय स्वा
हा कवचाय हुं चतुर्दिक्षु असुरांतचक्राय स्वाहा अस्त्राय फट् ततः पत्रे
षु पूर्वादि रुक्मिण्यै एवं आग्नेये सत्यभामायै नाग्निजित्यै मित्रविन्दा
यै सुभद्रायै जांबवत्यै सुशीलायै पत्राग्रेषु पूर्वादि वासुदेवाय देव
क्यै नंदाय यशोदायै बलभद्राय सुभद्राय गोपालादीन् संपूजयेत्
तद्बाह्ये मध्ये च पूर्वादि ॐ मंदाराय नमः ॐ संतानकाय ॐ पारिजाता
य ॐ कल्पवृक्षाय ॐ हरिचंदनाय तद्बाह्ये इन्द्रादीन् वज्रादीन् संपूजयेत्
ततः कृष्णाष्टकेन पूजयेत् ॐ श्रीकृष्णाय नमः एवं वासुदेवाय देवकी
नंदनाय नारायणाय यदुश्रेष्ठाय वार्ष्णेयाय धर्मसंस्थापकाय असु
रक्रांतभारहारिणे यद्वा चंद्रवज्रादीन् पूजयेत् । तथा गौतमीये । अथ
वांगादिकपालिभिस्तदा ते परिवारयेत् एवं वाभ्यर्च्यं कृष्णकाममहतां

स्वभाजनम् एतद्यजेनाशक्तश्चेत् कृष्णाष्टकेन पूजयेत् ततो धूपादि
विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं दशलक्ष तथा च दशल
क्षमहद्यफलप्रदं मंत्रं प्रतिजाप्य निर्मलमति दशांशतः क्रमात् गुरुयात्मिता
ज्यमधुराक्तैर्नवैररुणांबुजैर्हुतवहे दशांशयुतम् अथ महर्षियुगल
वर्णविन्यासं तु पंचलक्षं अमलमतिरलाभेपायसैरंबुजानां ससितहुत
हविर्भिर्कैरारभेत् कर्म होमम् दशांशतो रादौ श्रीमायाकामः मायाश्रीः
कामः काममायाश्रीः त्रिविधस्त्वयो दशांशतो भवति तथा च श्रीश
क्तिमारपूर्वश्च शक्तिश्रीमारपूर्वकः कामशक्तिरमापूर्वो दशार्णाम
नवस्त्रयः इति सनत्कुमारकल्पोक्तः एतेषां पूजाप्रयोगः प्रातः कृ
त्यादि वैष्णवोक्तपीठन्यासं विधाय ऋष्यादिन्यासं कुर्यात् यथा शिर
सि नारदऋषये नमः मुखे गायत्रीछंदसे नमः हृदि श्रीकृष्णादेवता
यै नमः ततः करांगन्यासौ आचक्राय स्वाहा अष्टाध्यानमस्त्रमादिर
शाक्षरवत् ततः फलार्थी चेत् ॥ दशानत्वमूर्तिपंजरं न्यसेत् ततः कि
रीटमंत्रेण व्यापकं कृत्वा यथाशक्ति मुद्रां बद्ध्वा ॐ नमः सुदर्शनाया
स्त्राय फट् इति मंत्रेण दिग्बंधनं विधाय ध्यानं कुर्यात् आद्ये मनो दशा
क्षरवत् ध्यानं द्वितीये रत्नाभिषेकवत् तृतीये तु ध्यानम् शंखचक्रध
नुर्बाणपाशांकुशधरोऽरुणः वेणुं धमेद्वा तदोर्भ्यां व्यस्तः कृष्णो दिवा
करे गौतमीये अत्रापि दशाक्षरवत् ध्यानं तथा च रमादिकामादि
मंत्रद्वयमधिकृत्य अनयोर्मंत्रयोर्मंत्री आचक्राद्यैः षडंगकम् कुर्या
द्दशार्णवत्सर्वं ध्यानपूजादिकं सुधीः एवं ध्यात्वा मानसैः संपूज्य पश्चा
त्स्थापनं कुर्यात् वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वा ऽऽवाहनादि
पंचपुष्पांजलिदानपर्यंतं विधाय पूर्वोक्तवेणवादिपूजां कृत्वावरणपू
जामारभेत् अस्यावरणानि अंगैरिंद्रवज्राद्यैः ततः कृष्णाष्टकेन सम्पू
ज्य धूपादि विसर्जनांतं कर्म समापयेत् एतेषां पुरश्चरणं पंचलक्षजपः
तथा च ॥ पंचलक्षं जपेन्मात्रं दशयुतं पायसेन तु कृष्णाय परमात्माभाग्गो
विंदाय ततः परम् गोपीजनपदस्यांते वल्लभाय द्विठावधि कामबीजादि

गान्मन्तोमन्त्रराष्टादशाक्षरः अस्यपूजाप्रयोगः प्रातःकृत्यादिवैष्णवोक्तपी
ठमन्त्रान्तंविन्यस्य ऋष्यादिन्यासंकुर्यात् यथा शिरसिनारदऋषयेनमः मु
खेगायत्रीछन्दसेनमः हृदिश्रीकृष्णदेवतायैनमः गुह्येक्लींबीजायपाद
योः स्वाहाशक्तयेनमः ततः प्रणवसंपुटितंमन्त्रंत्रिशःकरयोःव्यापयकराङ्ग
न्यासौकुर्यात् क्लींअङ्गुष्ठाभ्यांनमः गोविन्दायतर्जनीभ्यांस्वाहा गोपीजन
मध्यमाभ्यांवषट् वल्लभायअनामिकाभ्यांहुं स्वाहाकरतलपृष्ठाभ्यांफ
ट् ततोमूलेनमूर्धादिपादपर्यन्तंत्रिशोव्यापयन्न्यसेत् ततोनयनमुखहृ
दयगुह्यांघ्रिषुमन्त्रस्यपंचकंनमोन्तंन्यसेत् पदपंचकंच वतस्थतस्तथाङ्ग
ततोङ्गन्यासं हृदयायक्लींकृष्णायनमः गोविन्दायशिरसे गोपीजनशि
खायै वल्लभायकवचाय स्वाहाअस्त्रायफट् ततोदशमूर्तिन्त्वंपंचरा
न्यासोविधायकिरीटमन्त्रेणव्यापकंविधाययथाशक्तिमुद्राबद्ध्वा ॐन
मःसुदर्शनायास्त्रायफट् इतिमन्त्रेणदिग्बन्धनंकृत्वादशाक्षरोक्तध्यानं
कृत्वामानसैःसंपूज्य शंखस्थापनंकुर्यात् ॥ ततोवैष्णवोक्तपीठमन्त्र
न्तेविधायक्लीमित्यादिभिः तदङ्गेषुन्यासक्रमेणसंपूज्य पंचपुष्पाञ्जलिंद
द्यात् ततोवेणुवादिश्रजनंकृत्वाष्टादशाक्षरोक्तपीठमन्त्रान्तंविधायक्लीमि
त्यादिभिःतदङ्गेषुन्यासक्रमेणसंपूज्य वरणपूजांकृत्वापुष्पविसर्जनान्तंकर्म
समापयेत् अस्यपुरश्चरणंदशाक्षरपटलवत्क्रम शाक्तिश्रीपूर्वकोष्टद
शाक्षरोविंशार्णकः अस्यपूजाप्रयोगः ॥ प्रातःकृत्यादिवैष्णवोक्तपीठम
न्त्रान्तंपीठन्यासंकृत्वा ऋष्यादिन्यासंकुर्यात् शिरसिब्रह्मणेऋषयेनमः
मुखेगायत्रीछन्दसेनमः हृदिकृष्णायदेवतायनमः गुह्येक्लींबीजायनमः
पादयोःस्वाहाशक्तयेनमः ततःकराङ्गन्यासौ ह्रींश्रींक्लींअङ्गुष्ठाभ्यांनमः
कृष्णायतर्जनीभ्यांस्वाहा गोविन्दायमध्यमाभ्यांवषट् गोपीजनअनामि
काभ्यांहुं वल्लभायकनिष्ठाभ्यांवौषट् स्वाहाकरतलपृष्ठाभ्यांफट् ततो
मन्त्रन्यासः मूर्ध्निह्रींनमः कपोलेश्रींनमः भ्रूमध्येक्लींनमः नेत्रयोःकृं
नमः कर्णयोःष्णांनमः नासायांयंनमः वदनेगोंनमः चिबुकेविंनमः कण्ठे
दांनमः दोर्मूलेयंनमः हृदिगोंनमः उदरेपींनमः नाभौजंनमः लिंगेनं

मः आधारे वं नमः कट्यां लं नमः जान्वोर्भां नमः जंघयोः यं नमः गुल्फयोः
स्वां नमः पादयोः हां नमः इति सृष्टिः हृदि क्लीं नमः उदरे श्रीं नमः नाभौ क्लीं
लिंगे हुं आधारे स्वां कट्यां यं जान्वोः गों जंघयोः विं गुल्फयोः दां पादयोः
यं मूर्ध्नि गों कपोले पीं भ्रूमध्ये जं नेत्रयोः नं कर्णयोः वं नमो लं वदने भां
चिबुके यं कण्ठे स्वां दोर्मूले इति स्थितिः पादयोः क्लीं नमः गुल्फयोः श्रीं जंघ
योः क्लीं जान्वोः हुं कट्यां स्वां आधारे यं लिंगे गों नाभौ विं उदरे दां हृदि यं दो
र्मूले गों कण्ठे पीं चिबुके जं नमो भं कर्णयोः लं नेत्रयोः भां भ्रूमध्ये यं भाले
स्वां मस्तके हां नमः इति संहारः पुनः सृष्टिस्थिती च कृत्वा मूर्तिपंजरं वि।
न्यस्य पुनः सृष्टिस्थिती कृत्वा मूर्तिपंजरं विन्यस्य पुनः सृष्टिस्थिती विन्यस्य
षडंगानि समाचरेत् क्लीं श्रीं क्लीं हृदयाय नमः इति षडंगानि न्यसेत् ततः
पूर्ववन्मुद्रां बद्ध्वा किरीटमुद्रां च बद्ध्वा ध्यायेत् ध्यानं यथा हारवत्यां महः
स्फार्कभास्वरैः भवनोत्तमैः अनल्पैः कल्पवृक्षैश्च परीते मणिमण्डपे ज्वल
द्रत्नमयस्तम्भद्वारतोरणकुड्यके फुल्लस्रगुल्लसच्चित्रवितानालम्बिमौ।
क्तिके पद्मरागस्थलीराजद्रत्ननद्योघमध्यतः अनारतगलद्रत्नधारस्य
स्वस्तरोरधः रत्नप्रदीपावलिभिः प्रदीपितदिगन्तरे उदिदादित्यसंकाशम
णिसिंहासनेऽम्बुजे समासीनोऽच्युतो ध्येयो द्रुतहाटकसन्निभः समानोदित
चंद्रार्कतडित्कोटिसमद्युतिः सर्वांगसुंदरः सौम्यः सर्वाभरणभूषितः
पीतवासाः शंखचक्रगदापद्मोज्ज्वलत्करः अनारतोच्छलद्रत्नधारौघकल
शं स्पृशन् वामपादाम्बुजाग्रेण मुष्णात पल्लवच्छविम् रुक्मिणीसत्यभामास्य
मूर्तिरत्नौघधारया सिंचत्पोद्दत्तवामस्तेसदोष्यकमलोदया नाग्न।
जितेसुनंदायदिशांसोकलशौ तयोः नाम्नाचदत्तवामस्थामित्रविंदासु।
लक्षणा रत्ननद्योमसुहृत्सरत्नपूर्णौ घटौ तयोः जांबवती सुशीला च दिशं
सौदत्तवामके बहिर्षोडशसाहस्रं संख्याताः परितः स्त्रियः ध्येया कनक
रत्नौघधारयकमलोज्ज्वलाः तद्बहिश्चाष्टनिधयः पूरयंतीय नैर्धनाम् त
द्बहिश्च समस्तसर्वे वृष्णयो बहुसरोदयः एवं ध्यात्वा मानसैः संपूज्य शंखस्था
पनं कुर्यात् तस्य पूजायंत्रं अष्टकोणमध्ये अष्टदलपद्मं विलिख्य षट्कोणम

तं.
मा. षेकामबीजं विलिख्य तंशिष्टैस्स्मरदशभिर्वेष्टयेत् ततः षट्कोणस्य प्राक्
५६ रक्षोनिलकोणेषु श्रीबीजं शेषेषु भुवनेशीं लिखेत् ततः षट्संधिषु क्लीं
कृष्णाय नम इति षड्वर्णान् लिखेत् ततः केसरेषु कामदेवाय विद्महे पुष्प
56 बाणाय धीमहि तन्नोऽनङ्गः प्रचोदयात् त्रीणि त्रीण्यक्षराणि पूर्वादिक्रमेण
लिखेत् ततः पत्रेषु पूर्वादि नमः कामदेवाय सर्वजनप्रियाय सर्वसम्मोह
नाय ज्वल ज्वल प्रज्वल प्रज्वल सर्वजनस्य हृदयं मम वशं कुरु कुरु स्वाहा
इति मालामन्त्रस्य षट् षडक्षराणि दलेषु विलिखेत् तद्बाह्ये मातृकया सं
वेष्टयेत् ततो भूबिम्बे दिक्षु श्रीबीजं विदिक्षु मायाबीजं विलिखेत् बाह्ये
ष्टवज्राणि तथा च ॥ विलिख्याङ्गं पङ्के नलिखेदष्टदलाम्बुजम् कर्णिका
यां तु षट्कोणं साध्यं तत्र मन्मथम् शिष्टैस्स्मरदशभिरक्षरैर्वेष्टयेत्
स्मरम् प्राग्रक्षोनिलकोणेषु श्रियं शिष्टेषु संविदम् षडक्षरं षट्संधिषु
केसरेषु त्रिशस्त्रिशः विलिखेत्स्मरगायत्रीं मालामन्त्रं दलाष्टके षट्शः
संलिख्य तद्बाह्ये वेष्टयेन्मातृकाक्षरैः भूबिम्बं च लिखेद्बाह्ये श्रीमाये दि
विदिक्षु च भूपुरं च चतुरस्रं स्यादष्टवज्रविभूषितम् एतद्यन्त्रमष्टद
शाक्षरद्वादशाक्षरविंशत्यक्षरचतुर्दशाक्षरएकाक्षराणामिति गौ
तमीये पद्ममष्टपलाशं च चतुरस्रं सलक्षणम् चतुर्द्वारसमायुक्तं का
मगर्भितकर्णिकम् सामान्यं यन्त्रमुद्दिष्टमष्टादशाक्षरस्य तु चतुरस्रं
चतुर्द्वारं पद्ममष्टदलान्वितम् षट्कोणं कामगर्भं स्यात् समदशार्णवे
ष्टितम् षडक्षरं मनुवरं षट्कोणे विलिखेत्ततः इतियद्विशेषयंत्रमुक्तं
तद्दशाक्षविषयम् अन्यथा तापिन्यादिविरोधस्स्यात् ततः पीठमन्त्रं
पीठपूजां विधाय सृष्टिं स्थितिं षडङ्गं च संपूज्य ॐ किरीटाय नमः एवं
कुण्डलाभ्यां नितम्बे पीतवस्त्राय चक्राय शङ्खाय गदायै पद्माय वनमा
लायै श्रीवत्साय कौस्तुभाय प्रणवादिनमोन्तेन पूजयेत् पुनः पंचपु
ष्पाञ्जलिं दत्वा आवरणपूजामारभेत षट्कोणेष्वग्न्यादि ह्रीं श्रीं क्लीं हृदया
य नमः कृष्णाय शिरसे इत्यादिना पूजयेत् ततो विदिक्पत्रस्य मूले ॐ
वासुदेवाय नमः एवं संकर्षणाय इत्यादि प्रणवादिनमोन्तेन पूजयेत्

पूर्वदिक्पत्रमूलेषु ॐ शांत्यै नमः श्रियै सरस्वत्यै रत्यै पत्रेषु पूर्वादिषु सर्व
वद्रुक्मिण्याद्याः पूजयेत् अग्रे षोडशसहस्रमहिषीभ्यो नमः तद्बहिः पूर्वा
दि ॐ कुंदनिधये नमः एवं नीलनिधये मुकुंदनिधये मकरनिधये आ
नंदनिधये कच्छपनिधये शंखनिधये पद्मनिधये तद्बहिरिंद्रादीन्वज्रा
दींश्च पूजयेत् ततो धूपादिविसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणे
वत्सलेन जपः तथा च ध्यात्वैवं परमात्मानं विंशत्यर्णमनुं जपेत् वत्स
लेत्वाकृते दाज्येश्चत्वारिंशत्सहस्रकम् वाग्भवं कामबीजं च कृष्णाय भु
वनेश्वरीम् गोविंदाय रमां गोपीजनवल्लभाइं तच्छिरः चतुर्दशाक्षरो गोपे
नः शुक्लकृत्सर्वमूर्धांतैः द्वाविंशत्यक्षरो मंत्रो वागीशत्वप्रदायकः अ
स्य पूजाप्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठमन्त्रं तत्पीठन्यासं विधाय अ
ष्टादशाक्षरवत् अक्षरादिन्यासं करांगन्यासौ विधाय मुद्रादि दिग्बंधनं कृ
त्वा ध्यायेत् तद्यथा वामोर्ध्वहस्ते दधतं विद्यासर्वस्वपुस्तकम् अक्षमा
लां च दक्षोर्ध्वे स्फाटिकीं मातृकामयीं शब्दब्रह्ममयं वेणुमधःपाणिद्वये
रितम् गायंतं पीतवसनं श्यामलं कोमलच्छविम् बर्हिबर्हकृतोत्तंस
सर्वज्ञं सर्ववेदिभिः उपासितं मुनिगणैरुपतिष्ठेद्धरिं सदा एवं ध्यात्वा वि
शत्यर्णं वा पूजयेत् विशेषस्तु मुष्टिस्थिमोः पूजनेनास्ति अस्य पुरश्चरणे
वत्सलेहः वत्सलत्वं जपेन्मंत्रमनुं मंत्री हुतं संयतः पलाशपुष्पैः सप्तोत्तैः
चत्वारिंशत्सहस्रकम् गुरुर्याकर्मणानेन मंत्रसिद्धो भवेद्ध्रुवम् वाग्भवं
कामबीजं च मायां लक्ष्मीमनंतरम् दशार्णमनुरत्नाख्यं भवेत्कालरः
परः अस्य पूजाप्रयोगः प्रातःकृत्यादि वैष्णवोक्तपीठन्यासं कृत्वा ऋष्या
दिन्यासं कुर्यात् तद्यथा शिरसि ब्रह्मणे ऋषये नमः मुखे गायत्री छंद
से नमः हृदि कृष्णाय देवतायै नमः न्यासपूजाजपहोमादि सर्वं दशा
क्षरवत् ध्याने तु विशेषः ॐ ध्यायेद्वृंदावने रम्ये कांचनभूमिमध्यगे
नानापुष्पलताकीर्णे वृक्षवृंदैः सुमंडिते कल्पाटवीतले सम्यक् श्रीम
न्माणिक्यमंडपे नारदाद्यैर्मुनिश्रेष्ठैः स्तुवद्भिः परिवारिते रत्नसिंहा
सने ध्यायेदुपविष्टं भुजंगोपरि सहस्रजलदश्यामं रक्तपद्मनिभेक्षणम्

सूर्यितः पद्मादि सर्वे
स्वाहांतं तांत्रा तेन
पंक्तिः कृष्णाय ह्रीं
गोविंदाय श्रीं गोपी
जनवल्लभाय स्वाहा
सौः

तं·
मा·
५८
57

रक्तपादनिभपादपाणिभ्यां परिमण्डितम् नवरत्नसमारब्धभूषणैः परि
भूषितम् श्रीगुरुवक्षसि श्रीवत्सकौस्तुभशोभिताम्बरम् ताराहाराव·
लीरम्यां श्रीवत्साङ्कितवक्षसम् रोचनातिलकं प्रान्ते शोभया भ्रमरा
यितम् कन्दर्पचापसदृशां वलिमालाविराजितम् अनेकरत्नसंरब्ध
स्फुरन्मकरकुण्डलम् वर्हिर्वर्हकृतोत्तंसं सर्वज्ञैस्सर्ववेदिभिः उपा
सितं मुनिगणैरुपतिष्ठेद्धरिं सदा । इति ध्यानम् सर्वमन्यद्दशाक्षर
वत् ॥ कामान्तरं यथा संस्थं शान्तिविन्दुविभूषितम् त्रैलोक्यमोहनो
विष्णुः कथितस्तव यत्नतः अस्य पूजाप्रयोगः ॥ प्रातः कृत्यादि वैष्णवो
क्तपीठशक्तिपर्यन्तं विन्यस्य तदुपरि पक्षिराजाय स्वाहा इति पीठमं·
त्रं न्यसेत् ततः ऋष्यादिन्यासः तद्यथा संमोहनऋषये नमः शिरसि
गायत्रीछन्दसे नमो मुखे त्रैलोक्यमोहनाय विष्णवे देवतायै नमः हृ
दि ततः करागन्यासौ क्लां अङ्गुष्ठाभ्यामित्यादिना च तथा च निबन्धे दीर्घ
षट्स्वयुक्तायेन कामबीजेन कल्पयेत् ततो बाणन्यासः क्लां शोषणबाणा
य नमः एवं तर्जन्यादिषु क्लीं संमोहन क्लूं संदीपन क्लैं तापन क्लौं म
दनान्न्यासेत् सर्वत्र बाणप्रयोगः तथा च मस्तकमुखहृदयलिङ्गपादेषु
तान्न्यसेत् ततो ध्यायेत् भग्नविद्रुमसंकाशं सर्वतेजोमयं वपुः किरीटि
नं कुण्डलिनं केयूरवलयान्वितम् मुक्तामणिरत्नसन्नद्धतुलाकोटिसमुज्ज्व
लम् नानालंकारसुभगं पीताम्बरयुगावृतम् गरुडोपरि सन्नद्धरक्तप
ङ्कजमध्यगम् ततः सिंहेमसंकाशं लक्ष्मीवामोरुसंस्थितम् सर्वालंका
रसुभगं शुक्लवासोयुगावृतम् सकामालीलया देवीमोहयन्तं पुनः पु
नः शङ्खचक्रगदापद्मपाशाङ्कुशधनुश्शरान् धारयन्तं जगन्नाथं रक्तप
द्मारुणेक्षणम् एवं ध्यात्वा मानसैः संपूज्य शङ्खस्थापनं विधाय न्यास
क्रमेण पीठपूजां कृत्वाऽवाहनादिं पञ्चपुष्पाञ्जलिं दत्वा न्यासक्रमेण श
रीरे बाणाङ्गं संपूज्य ॐ किरीटाय नमः एवं कुण्डलाभ्यां भूर्भिकर्णिकयोः शं
खाय नमः चक्राय नमः गदाय नमः पद्माय नमः पाशाय नमः अङ्कु
शाय नमः धनुषे नमः शराय नमः इत्येषु पूजयेत् स्तनद्वे श्रीवत्सा

यनमः कौस्तुभायनमः गलेवनमालायैनमः नितंवेनमः पीतवसना
यनमः वामांगेनमः लक्ष्म्यैनमः ततः केसरेषु अग्न्यादिकोणेमध्ये
दिक्षुच क्लींहृदयायनमः इत्यादिनापूजयेत् ततःपूर्वादिदिक्षुवाणेन
पूजयेत् केसरेषुपंचवर्गमपूजयेत् पत्रेषुपूर्वादिदिक्षु ॐलक्ष्म्यैनमः प
वंसरस्वत्यैनमः रत्यैनमः प्रीत्यैनमः कीर्त्यैनमः कान्त्यैनमः तुष्ट्यैनमः
पुष्ट्यैनमः तद्बहिर्लोकपालान्पूजयेत् नात्रवज्रादिपूजनंकुर्यात् ततो
धूपादिविसर्जनांतंकर्मसमापयेत् अस्यपुरश्चरणंदशलक्षजपः त
थाच रविलक्षंजपेन्मंत्रंजुहुयात्तद्दशांशतः अमृतत्रयसिक्तेनपाय
सेनविधानवित् अथवारविसाहस्रंहुनेत्तावत्तर्पयेत् कामवीजंहृ
षीकेशायहुन्मंत्रोदशाक्षरः अस्यविधानंपूर्ववत् लक्ष्मीमायाकाम
वीजेंङेंतंकृष्णपदंतथा स्वाहेतिमंत्रराजोयंभजतांसुरपादपः अस्यपू
जाप्रयोगः प्रातःकृत्यादिवैष्णवोक्तपीठमन्वंतंविन्यस्य ऋष्यादिन्या
संकुर्यात् तद्यथा ॥ शिरसिनारदऋषयेनमः मुखेत्रिष्टुप्छंदसेनमः
हृदिश्रीकृष्णदेवतायैनमः ततःकरांगन्यासौ क्लींहृदयायेत्यादिना
ततोध्यानम् कलायकुसुमश्यामंवृंदावनगतंहरिम् इत्यादिनाध्या
त्वा मानसैःसंपूज्य शंखस्थापनंकुर्यात् ततोवैष्णवोक्तपीठमन्वंतंपी
ठंसंपूज्य पुनर्ध्यात्वाऽवाहनादिपंचपुष्पांजलिदानपर्यंतंविधायाऽ
वरणपूजांकुर्यात् तद्यथा केसरेषु अग्निनिर्ऋतिवायुईशानकोणेषु
मध्येदिक्षुच क्लींहृदयायइत्यादिनापूजयेत् तद्बहिरिंद्रादीन्वज्रादीं
श्चपूजयेत् ततोधूपादिविसर्जनांतंकर्मसमापयेत् अस्यपुरश्चरणं
चतुर्लक्षजपः तथाच ध्यात्वैवंपरमात्मानंचतुर्लक्षंमनुंजपेत् द
शांशंजुहुयान्मंत्रीकुसुमैर्व्रह्मवृक्षजैः श्रीशक्तिस्मरकृष्णायगोविं
दायशिरोमनुः अस्यपूजाप्रयोगः प्रातःकृत्यादिपीठमन्वंतंपीठन्या
संविधायरत्नाभिषेकवदृष्यादिन्यासंविधायकरांगन्यासौकुर्यात् तद्य
था श्रीअंगुष्ठाभ्यांनमः ह्रींतर्जनीभ्यां क्लींमध्यमा कृष्णायानामि
काभ्यां गोविंदायकनिष्ठ स्वाहाकरतल पृष्ठं हृदयादिषु ततोमूर्तिपं।

तं॰
सा॰
५८
58

जरन्यासं विधाय विंशत्यर्णोक्तं ध्यात्वा तद्विधानेन पूजयेत् विशेषस्तु स
ष्टिस्थितिक्रमेण योजयेत् तद्वर्णसंभवात् अस्य पुरश्चरणं जपहोमस्त
था तारंस्याद्भगवती रुक्मिणीवल्लभाय वह्नयम् अस्य पूजाप्रयोगः ॐ
प्रातःकृत्यादि वैष्णवोक्तपीठमन्वंतपीठन्यासं विधाय ऋष्यादिन्यासं
कुर्यात् शिरसि नारदऋषये नमः मुखेऽनुष्टुप्छन्दसे नमः हृदि रुक्
मिणीवल्लभाय देवतायै नमः ततः करांगन्यासौ ॐ अंगुष्ठाभ्यां नमः
नमः तर्जनीभ्यां स्वाहा भगवती मध्यमाभ्यां वषट् रुक्मिणीवल्लभा
यानामिकाभ्यां हुं स्वाहा कनिष्ठाभ्यां वौषट् एवं हृदयादिषु ॥ ततो
ध्यानम् ॥ ध्येतं शाश्वतिध्यानं

एवं मानसैः संपूज्य वैष्णवोक्तपीठम
न्वंतपीठपूजां विधाय पुनर्ध्यात्वाऽऽवाहनादिपंचपुष्पाञ्जलिदानपर्य
न्तं विधायावरणपूजामारभेत् अग्निनिर्ऋतिवाय्वीशानकोणेषु दि
क्षु च ॐ हृदयायेत्यादि पूर्ववत् ततोऽष्टदलेषु पूर्वादि नारदाय नमः
पर्वं जिष्णुं निशठं उद्धवं दारुकं शैनेयं विष्वक्सेनं च पूजयेत् अ
ग्रे विनतासुताय नमः तद्बहिरिंद्रादीन्वज्रादींश्च संपूज्य धूपदीपादि
विसर्जनांतकर्म समापयेत् अस्य पुरश्चरणं लक्षसंख्यो जपः तथा
च ध्यात्वैवं रुक्मिणीनाथं जपेल्लक्षमिमं मनुम् अयुतं जुहुयात्पद्मै
रुणैर्मधुराप्लुतैः श्रीशक्तिकामपूर्वोगं जन्मशक्तिरमांतकः दशाक्ष
रमयो वा स्याद्वाद्याशक्तिरमान्वितः अनयोऋष्यादिपंचांगानि दशाक्ष
रवत् विंशत्यर्णोक्तवत्पूजां कुर्यात् ध्यानं तु वरदाभयहस्ताभ्यां श्लि
ष्यन्तं स्वांगने प्रियम् पद्मोज्ज्वलकराभ्यां श्लिष्टचक्रदरोज्ज्वलम् अन
योः पुरश्चरणं तु दशलक्षं जपेदाज्यैस्तत्सहस्राणि होमयेत् प्रणवं
मनमायुक्तं कृष्णगोविन्दकौ तथा श्रीपूर्वौ ङेंतौ द्वाचार्यं हुं फट् स्वाहे
तिकीर्तयेत् अस्य नारदऋषिः अनुष्टुप्छन्दः परमात्मा हरिर्देवता
श्चावकाद्यै रंगकल्पना दशार्णवदस्य जपपूजाहोमादयः बीजशक्ती

चतन्त्रमे अथगोपालमंत्रः वह्नीवह्नसनान्वितः सर्गीकामकृष्णकाम
कृष्णायनमोंतः कामकृष्णायस्वाहा गोपालायस्वाहा कामवीजकृष्णा
य कामवालवपुषेकृष्णायठठयंवालवपुषकामवीजकृष्णायस्वाहा
कामवीजग्लौकामवीजश्यामलांगायनमः दधिभक्षणायठठयम् स्वप्र
सन्नात्मनेहृदयं कृष्णगोविंदकोङें. तौतौकामाद्योश्रीशक्तिकामकृष्णा
यमाराः पतेषांयंत्रम् अतमष्टदलंपद्मभूश्वद्वृत्तमध्यस्थं कामवीजं
नथाचगौतमीये ॥ पद्ममष्टपलाशंतचतुरश्रसलक्षणम् चतुर्द्वारं
समायुक्तंकामगर्भितकर्णिकम् अस्यपूजाप्रयोगः प्रातःकृष्णादिवे
ष्णवोक्तपीठमंत्रांतपीठन्यासंविधाय ऋष्यादिन्यासंकुर्यात् शिरसिनार
दऋषये मुखेगायत्रीछंदसे हृदिकृष्णायदेवतायै ततः करांगन्यासौ
क्लीं अंगुष्ठादिन्यासः पंचहृदयादिषु एवंवन्मुद्राप्रदर्श्य ॥ ध्यानंकुर्या
त् ॥ ॐ अव्याद्याकोशनीलांबुजरुचिररुणांभोजनेत्रांबुजस्थोबालो
जंघाकटूरुस्थलकलितरणत्किंकिणीकोमुकुंदः दोर्भ्यांहैयंगवी
नंदधदतिविमलंपायसंविश्ववंद्यागोगोपीगोपवीतोऽरुणनखवि
लसत्कंठभूषश्चिरंनः ॥ एवंध्यात्वामानसैः संपूज्यशंखस्थापनंकु
र्यात् ततोवैष्णवोक्तपीठमंत्रांतपीठपूजांविधायपुनर्ध्यात्वावाहनादि
पंचपुष्पांजलिदानपर्यंतंविधायावरणपूजामारभेत् अग्न्यादिकोणेच
तुष्टयेषुमध्येदिक्षुच क्लींहृदयायनमइत्यादिनाषडंगपूजा इंद्रादीन्वज्रा
दींश्चपूजयेत् ततोधूपादिविसर्जनांतंकर्मसमापयेत् एतेषांपुरश्चर
णंलक्षजपः तथाच ध्यात्वैवमेवमेतेषांलक्षंप्रजप्यामनूंततः सर्पिःसि
तोत्पलैःपद्मैःपायसैरयुतंजुहेत् कामयोरंतःकृष्णपदंमंत्रोऽयंमयःफ
लप्रदः अस्यपूजाप्रयोगः प्रातःकृत्यादिवैष्णवोक्तपीठमंत्रांतंविधाय
पूर्ववदृष्यादिन्यासकरांगन्यासौकृत्वाध्यायेत् यथा ॥ श्रीमत्कल्पद्रु
मूलोद्भूतकमललसत्कर्णिकासंस्थितोयस्तत्कालोत्तंसविपक्वोदरविस
रदसंख्यानंतरत्नाभिवक्त्रः हेमाभः स्वप्रभाभिस्त्रिभुवनमखिलंभासयं
वासुदेवःपायाद्वःपायसादोऽनवरतनवनीमृताशीवपीसः ॥ एवंध्या

त्वा मानसैः संपूज्य शंखस्थापनं कुर्यात् ततः वैष्णवोक्तपीठमन्त्रं तं पीठं
संपूज्य पुनर्ध्यात्वा आवाहनादिपंचपुष्पांजलिदानपर्यंतं विधाय आवरणपू
जामारभेत् पूर्ववदग्न्यादिकोणेषु मध्ये दिक्षु च क्लां हृदयाय नमः इत्या
दिना पूजयेत् पत्रेषु पूर्वादिषु ह्रनिधीन्संपूज्य इन्द्रादीन्वज्रादींश्च पूजयेत्
ततो धूपादि विसर्जनांतं कर्म समापयेत् अस्य पुरश्चरणं चतुर्लक्षजपः
तथा च ॥ ध्यात्वैवं प्रजपेल्लक्षचतुष्कं प्रजपेत्ततः त्रिमध्वाक्तैर्बिल्वफ
लैः चत्वारिंशत्सहस्रकम् अस्य मंत्रस्य कामबीजस्य ककारयोरंते रे
फश्चेत्तदा मंत्रचूडामणिः पूर्ववदृष्यादिन्यासं कृत्वा करांगन्यासौ कुर्यात्
तद्यथा क्लां अंगुष्ठाभ्यां नमः इत्यादि अस्य पूजादिकं सर्वं पूर्ववत् ॥
ध्याने तु विशेषः ॥ ॐ अरुणोद्यानकल्पद्रुमतलविलसत्स्वर्णदोला
धिरूढं गोपीभ्यां प्रेंखमाणं विकसितनवबंधूकसिंदूरभासम् बालं
लीलालकांतं कटितटविलसत्क्षुद्रघंटाघटाढ्यं वंदे शार्दूलकामां
कुशलसितगलाकल्पदीप्तं मुकुंदम् । ध्यात्वैवं पूर्ववरीत्यैनं जप्त्वा रक्तो
त्पलैर्नवैः मधुत्रययुतैर्हुत्वाभ्यर्चयेद्धरिम् प्रणवो हृद्भगवते वासुदे
वाय कीर्तितः प्रथमं वैष्णवे तंत्रे मंत्रोयं कल्पपादपः अस्य पूजा प्रातः
कृत्यादि पीठमन्त्रांतं विधाय पीठन्यासं कुर्यात् शिरसि प्रजापतये ऋ
षये नमः मुखे गायत्रीछंदसे नमः हृदि वासुदेवतायै नमः ततः
करांगन्यासौ ॐ अंगुष्ठाभ्यां नमः नमस्तर्जनीभ्यां स्वाहा भगवते म
ध्यमाभ्यां वषट् वासुदेवाय अनामिकाभ्यां हुं समस्तेन कनिष्ठाभ्यां
फट् एवं हृदयादिषु ततो मंत्रन्यासः मूर्ध्नि भाले दृशोरास्यगलदोर्हृद
यान्विते कुक्षौ नाभौ ध्वजे जानुद्वयपादद्वये तथा द्वादशार्णान्न्यसेत्
ततो मूर्तिपंजरं न्यसेत् किरीटमंत्रेण व्यापकं कृत्वा ध्यायेत् विष्णुं शा
रदचंद्रकोटिसदृशं शंखं रथांगं गदामंभोजं दधतं सिताब्जनिलयं कांत्या
जगन्मोहनम् आबद्धांगदहारकुंडलमहामौलिं स्फुरत्कंकणं श्रीव
त्सांकमुदारकौस्तुभधरं वंदे मुनींद्रैः स्तुतम् एवं ध्यात्वा मानसैः संपू
ज्य शंखस्थापनं कुर्यात् ततो वैष्णवोक्तपीठपूजां विधाय पुनर्ध्यात्वा

वाहनादिपंचपुष्पांजलिदानपर्यंतंविधायपश्चात्कालावाहनादिपंच
पुष्पांजलिदानपर्यंतंविधायाऽवरणपूजामारभेत् यथा अग्निनिर्ऋ
तिवायव्येशानकोणेषु दिक्षु च ॐ हृदयायेत्यादिनापंचांगेन पूजयेत् ततः प
त्रीदिग्दलेषु वासुदेवादीन् अग्न्यादिकोणेषु शान्त्यादीन् तद्बहिरिन्द्रादी
न्वज्रादींश्च संपूज्य धूपादिविसर्जनांतं कर्मसमापयेत् अस्य पुरश्चर
णं द्वादशलक्षजपः तथा च ॥ वर्णलक्षं जपेन्मंत्रं दीक्षितो विजितेन्द्रि
यः ततःसहस्रं प्रजुहुयात्तिलैराज्यपरिप्लुतैः मायाद्वयं रमाद्वयं लक्ष्मीवा
सुदेवाय नमः प्रणवादिरयं मंत्रः अस्य पूजादिकं वासुदेवमंत्रवत् करा
ङ्गन्यासस्तु ॥ ॐ ह्रीं ह्रीं अङ्गुष्ठाभ्यां नमः ॐ श्रीं श्रीं तर्जनीभ्यां ॐ लक्ष्मी
मध्यमाभ्यां ॐ वासुदेवायाऽनामिकाभ्यां ॐ नमः कनिष्ठाभ्यां एवं हृ
दयादिषु ध्यानं तु विद्युच्चन्द्रनिभं वपुः कमलजावैकुण्ठयोरेकतां प्राप्तं
स्नेहवशेन रत्नविलसद्भूषाभरालंकृतम् विद्यापंकजदर्पणान्मणिम
यं कुंभं सरोजं गदां शंखं चक्रमम् निबिभ्रतमिदं दिश्यात्प्रियं नस्सदा अ
स्य पुरश्चरणं चतुर्लक्षजपः तथा च ॥ वर्णलक्षं जपेन्मंत्रं तत्सहस्रं स
रोरुहैः होमं कुर्यात्त्रिकसितैर्मधुरत्रयसंयुतैः वर्णलक्षं वर्णमंत्रवर्णसं
ख्योत्तरलक्षम् अथ दधिवामनमंत्रः ॐ नमो विष्णवे सुरपतये महाब
लाय ठठ हृदयं तारादिहेर्विष्णवे ब्रूयात् ठेन्तः सुरपतिः भवेत् महाबलाय ठठ
यं मंत्र अष्टादशाक्षरः अस्य पूजा प्रातः कृत्यादि ॐ सोममंडलाय नमः
मंतं विन्यस्य अष्टाक्षरादिन्यासं कुर्यात् शिरसि इन्द्र ऋषये नमः मुखे विराट्
छंदसे हृदि दधिवामनाय देवतायै तथा च निबंधे ॥ चन्द्रातकलिते
पीठ प्रागुक्तेन समर्चयेत् ततः करांगन्यासः ॐ अंगुष्ठाभ्यां नमः नम
स्तर्जनीभ्यां विष्णवे मध्यमाभ्यां सुरपतये अनामिकाभ्यां महाबला
य कनिष्ठाभ्यां स्वाहा करतलपृष्ठाभ्यां एवं हृदयादिषु ततो मंत्रन्यासः
अथ हयग्रीवमंत्रः उद्गिरत्मदमाभाष्यप्रणवोद्गीथशब्दतः सर्ववागीश्वरी
स्मृतेप्रवरेदीश्वरोमतः सर्ववेदमयाचिंत्यपदांतेसर्वमुच्चरेत् बोधय
द्वितयांतोयंमंत्रस्ताराद्रीरितः । अस्य पूजाप्रयोगः प्रातःकृत्यादि पी

तं॰
सा॰ ष्ठमंत्रं तं विधाय अङ्गुष्ठादिन्यासं कुर्यात् शिरसि ब्रह्मणे ऋषये नमः मुखे
८॰ अनुष्टुप्छन्दसे हृदि हयग्रीवदेवतायै ततः करांगन्यासौ ॐ अंगुष्ठाभ्यां उ
द्गिरत्प्रणवोद्गीथ तर्जनीभ्यां सर्ववागीश्वर मध्यमाभ्यां सर्ववेदमयाचिं
त्य अनामिकाभ्यां सर्वबोधप्रबोधयक निष्ठाभ्यां फट् एवं हृदयादिषु
ततो ध्यानम् ॥ शरच्छशांकप्रभमश्ववक्त्रं मुक्तामयैराभरणैः प्रदीप्तम्
रथांगशंखोर्चितबाहुयुग्मं जानुद्वयन्यस्तकरं भजामः । एवं ध्यात्वा
मानसैः संपूज्य शंखस्थापनं कृत्वा वैष्णवोक्तपीठपूजां विधायमित्या
नन मूर्तिं संकल्प्य पुनर्ध्यात्वा आवाहनादिं पंचपुष्पांजलिदानपर्यंतं वि
धायावरणपूजामारभेत् तिंवधे बीजेन मूर्तिं संकल्प्य बीजमुद्ध्रियते
यथा विषभृगुस्थमर्घीशबिंदुसद्बीजमीरितम् यथाकसरेषु अग्न्या
दिकोणादिषु ॐ हृदयाय नमः इत्यादिं पंचांगानि पूजयेत् ततो दिग्द
लेषु चतुर्वेदान् ऋग्यजुस्सामाथर्वांश्च विदिग्दलेषु स्मृतिन्यायमीमां
सासर्वशास्त्राणि तथा चैके सरेषु चतुर्वेदांश्चतुर्दिक्षु समर्चयेत् वि
दिक्ष्वंगस्मृतिन्यायसर्वशास्त्राणि पूजयेत् अर्चयेत्पत्रमध्येषु विद्यानेत्रां
गदेवताः तद्बहिरिंद्रादीन्वज्रादींश्च पूजयेत् ततो धूपादिविसर्जनांतं
अस्य पुरश्चरणं त्रयस्त्रिंशतिलक्षजपः वर्णलक्षं जपेन्मंत्रं कुंदपुष्पैर्म
धुप्लुतैः दशांशं शैवेल्ववह्नौ जुहुयान्मंत्रसिद्धये अथ प्रकारान्तरः ह
कारसकारषष्ठस्वरबिंद्वात्मकः विषभृगुस्थमर्घीशबिंदुसद्बीज
मीरितम् एकाक्षरो महामंत्रः चतुर्वर्गफलप्रदः चतुर्दशस्वरयुक्तः
कल्पांतरे अस्य ब्रह्मा ऋषिः त्रिष्टुप्छन्दः हयग्रीवरूपविष्णुर्देवता हका
रो बीजं उकारः शक्तिः हस्रां हस्रीं हस्रूं हस्रैं हस्रौं हस्रः इति षडंगक
ल्पना । ध्यानम् । धवलनलिननिष्ठं क्षीरगौरं करांगैर्जपवलयसरो
जेपुस्तकाभीष्टदाने दधतममलवस्त्राकल्पजालाभिरामं तुरगवद
नविष्णुं नौमि विद्याग्रजिष्णुम् । अन्यच्च । शरच्छशांक इति पूर्ववत् ध्या
नम् एवं ध्यात्वा मानसैः संपूज्य शंखस्थापनं कृत्वा पीठपूजां कृत्वा पु
नर्ध्यात्वा आवाहनादिं पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभे

त तंत्रांगैः प्रथमावरणम् प्रज्ञा हयमेध हयस्मृति हयविद्या हयल
क्ष्मी हयवागीशी हयविद्या विशाल हयनाद विमर्द हयैरष्टभिः
द्वितीयं लक्ष्मीसरस्वती रति प्रीति कीर्ति कांति तुष्टि पुष्टिभिर्द्विती
यं कुमुदादिभिर्गजैश्चतुर्थम् इंद्रादिभिः पंचमम् ततो धूपादिविस
र्जनांतकर्म समापयेत् अस्य पुरश्चरणं चतुर्लक्षजपः तथाच वेदल
क्षजपेन्मंत्री दशांशं जुहुयात्ततः आज्येन तद्दशांशाद्धोमः हयग्री
वपंचकाराद्यं चतुर्थ्यंत हयशिरः शब्दोन्नमोंतः तथाच कल्पे हयशि
रःपदं देतं हृदयं च समुद्धरेत् स्ववीजादिर्महामंत्रश्चतुर्वर्गफलप्रदः
ब्रह्मा ऋषिः अनुष्टुप्छंदः हयग्रीवरूपी विष्णुर्देवता अन्यत्सर्वमेका
क्षरवत् उद्गिरत्प्रणवोद्गीथ इति स्वाहांतो मनुराख्यातो बीजप्रणवसं
पुटः मंत्रांतरम् विष्णोर्नारायणस्वरूपाय चिन्मयानंदरूपिणे तुभ्यं नमो
हयग्रीव विद्याराजाय विष्णवे स्वाहा अयं मंत्रो हंसादिः सोहमंतिकः
तथाच स्वाहांतो मनुराख्यातो हंसेन संपुटीकृतः एतयोः मंत्रयोर
वीनुष्टुप् हयग्रीवं मंत्रयत्सर्वं ज्ञातव्यं अथ नृसिंहमंत्रः उग्रं वीरं महा
विष्णुं ज्वलंतं सर्वतोमुखं नृसिंहं भीषणं भद्रं मृत्युमृत्युं वदेत्ततः न
माम्यहमिति प्रोक्तो मंत्रराजस्त्वनुत्तमः अयं मंत्रो मयपुटितोपि भवति
अस्य पूजा प्रातःकृत्यादिपीठमंत्रांतं पीठन्यासं विधाय ऋष्यादिन्यासं
कुर्यात् शिरसि ब्रह्मणे ऋषये नमः मुखे अनुष्टुप्छंदसे हृदि नृसिंह
देवतायै ततः करांगन्यासौ चतुर्भिर्हृदयं कर्णौ शिरस्त्वावड्भिरष्टैः
शिरोललाटनेत्रेषु मुखबाहुगामंध्रिषु सांगेषु कुक्षौ हृदये गलेपा
र्श्वहृद्येषु नः अपरांगे च ककुदि न्यासान्वर्णान्यथाक्रमम् ध्यानम् ॥
माणिक्याद्रिसमप्रभं निजरुचा ...... संत्रस्तरक्षोगणं जानुन्यस्तकराम्बुजं
त्रिनयनं रत्नोल्लसद्भूषणम् बाहुभ्यां धृतशंखचक्रमनिशं दंष्ट्रोग्रवक्त्रो
ल्लसज्ज्वालाजिह्वमुदग्रकेशनिचयं वंदे नृसिंहं विभुम् । एवं ध्यात्वा मा
नसैः संपूज्य शंखस्थापनं विधाय यथोक्तपीठन्यासं कृत्वा पुनर्ध्या
त्वावाहनादि पंचपुष्पांजलिदानपर्यंतं विधायावरणपूजामारभेत् तद्य

या केसरेष्वग्न्यादिकोणेषु मध्ये दिक्षु च अङ्गानि पूजयेत् ॐ उग्रं वीरं हृदया
य महाविष्णुं शिरसे ज्वलन्तं सर्वतोमुखं शिखायै नृसिंहं भीषणं कव
चाय हुं भद्रं मृत्युमृत्युं नेत्राभ्यां नमाम्यहं मस्त्राय फट् ततः पूर्वादिदले
गरुडं शंखं कं शोभबलाणं च पूजयेत् विदिग्दलेषु श्रियं ह्रियं धृतिं पुष्टिं
च प्रणवादिनमोन्तेन पूजयेत् तद्बहिरिन्द्रादीन्वज्रादींश्च पूजयेत् ततो ऽपू
पादिविसर्जनान्तं कर्म समापयेत् अस्य पुरश्चरणं द्वात्रिंशल्लक्षजपः
तथा च वर्णलक्षं जपेन्मंत्रं तत्सहस्रं चरुं ततः पायसान्नेश्च जुहुया
द्विधिवत्सृजितेनले पाशशक्तिश्च ह्रौं क्रौं वर्मफट् तथा च निबन्धे पाशः
शक्तिः नरहरि वर्मफट् मन्त्रः षडक्षरो नरहरेः सर्वकामफलप्रदः अस्य
पूजा प्रातः कृत्यादि वैष्णवोक्त पीठमन्त्रान्तं विन्यस्य ऋष्यादिन्यासं कु
र्यात् पूर्ववत् श्रां अंगुष्ठाभ्यां ह्रीं तर्जनीभ्यां ह्रौं मध्यमाभ्यां क्रौं
अनामिकाभ्यां हुं कनिष्ठाभ्यां फट् करतलपृष्ठाभ्यां फट् एवं हृ
दयादिषु ततो ध्यानम् ॐ कोपादालोलजिह्वं विवृतनिजमुखं सो
मसूर्याग्निनेत्रं पादादानाभिरक्तप्रभमुपरिसितं भिन्नदैत्येन्द्रगात्रम्
शंखं चक्रं सपाशांकुशकुलिशगदादारुणान्युद्वहन्तं भीमं तीक्ष्णाग्र
दंष्ट्रं मणिमयविविधाकल्पमीडे नृसिंहम् एवं ध्यात्वा मानसैः सम्पू
ज्य शंखस्थापनं कृत्वा वैष्णवोक्त पीठपूजां विधाय पुनर्ध्यात्वा ऽऽवा
हनादिपंचपुष्पाञ्जलिदानपर्यन्तं विधाय आवरणपूजामारभेत् त
तः केसरेष्वग्न्यादिकोणेदिक्षु च श्रां हृदयाय नमः इत्यादि षडङ्गानि पू
जयेत् ततः पत्रेषु पूर्वादि शंख चक्र पाशांकुश गदा खड्ग खेटकां
श्च पूजयेत् तथा च निबन्धे ॥ अंगावृते बहिश्चक्रं शंखं पाशांकु
शौ पुनः वज्रं कौमोदकीं खड्गं खेटकं चापि पूजयेत् ततः इन्द्रादीन्
वज्रादींश्च पूजयेत् ततो धूपादिविसर्जनान्तं कर्म समापयेत् अस्य
पुरश्चरणं षड्लक्षजपः ॥ तथा च ॥ अतः लक्षं जपेन्मं
त्रमयुतेन जुहुयात्ततः ॥

तन्मस्संस्मसिद्धिमोतोपयेष्ठस्तनाग्रहम् तकारोवह्निमारूढश्चतुर्द
शस्वरैर्युतः विंदुमानेकाक्षरोमंत्रः तथाच तकारोवह्निमारूढोमनु
स्वरविभूषितः विंदुमात्रलसन्नूर्ध्वीजंनरहरेर्मतम् एकाक्षरोमंत्र
प्रोक्तः सर्वकामफलप्रदः अस्यपूजादिसर्वंमंत्रराजवत् ऋषिरत्र
त्रिः गायत्रीछंदः तकारोबीजम् ॐकारःशक्तिः षड्दीर्घयुक्तमंत्रेण
णांगकल्पना जयहर्यश्रीनृसिंहः तथाच जयहयंसमुद्दार्थश्रीप
वीनृसिंहइत्यपि अष्टाक्षरोमंत्रप्रोक्तोभजतांकामदायकः ब्रह्मास्य
षिपूर्ववत् षड्दीर्घयुक्तेनश्रीबीजेनांगकल्पना ध्यानार्चनंमंत्रराज
वत् अस्यपुरश्चरणमष्टलक्षंजपः वस्तलक्षंजपेन्मंत्रमित्यादिवच
नात् अथहरिहरमंत्रः मंत्रदेवप्रकाशिन्याम् तारंमायाप्रसादंशाक
रनारायणायनमः प्रसादमायातारा: अस्यपूजा प्रातःकृत्यादिवेल
वोक्तांवापीठपूजांविधाय ऋष्यादिन्यासंकुर्यात् शिरसिनारायण
ऋषयेनमः मुखेअनुष्टुप्छंदसेनमः हृदिहरिहरायदेवतायैनमः
गुह्येह्रौंबीजायनमः पादयोःह्रींशक्तयेनमः ततःकरांगन्यासौ ह्रां
अंगुष्ठाभ्यामित्यादिना एवंहृदयादिषु ॥ ततोध्यानम् ॥ शूलंचक्रं

एवंध्यात्वामानसैः संपूज्यशंखस्थापनंकुर्यात् वैष्णवोक्तांशैवोक्तां
वापीठपूजांविधाय पुनर्ध्यात्वाऽऽवाहनादिपंचपुष्पांजलिदानपर्यंतं
विधायाऽऽवरणपूजामारभेत् केसरेष्वग्न्यादिकोणमध्येदिक्षुचहृद
यादयायेत्यादिपूजयेत् ततःपत्रेषुपूर्वादि ॐलक्ष्म्यैनमः नारायण्यै
पार्वत्यै अंबिकायै त्र्यंबिकायै गंगायै गंगाधरायै ततइंद्रादीन्वज्रा
दींश्चपूजयेत् ततोधूपादिविसर्जनांतंकर्मसमापयेत् अस्यपुरश्चर
णंलक्षंजपः घृतपायसेनायुतहोमः ॥ तथाच ॥ लक्षमेकंजपेन्मंत्री
तद्दशांशंघृतान्वितैः पायसैर्हवनंकुर्यात्स्मृतेहयवाहने अथवाह

मंत्रः तारं नमो भगवते वराहरूपाय भूर्भुवः स्वःपतये भूपतित्वं मे देहि ददा
पय स्वाहा अयं मंत्रस्त्रयस्त्रिंशदक्षरः अस्य पूजा प्रातःकृत्यादि वैष्णवो
क्तपीठमन्त्रांतं विन्यस्य ऋष्यादिन्यासं कुर्यात् शिरसि भार्गवाय ऋषये
नमः मुखे अनुष्टुप्छन्दसे नमः हृदयादिवराहाय देवतायै नमः ततः क
रांगन्यासौ एकदंष्ट्रायांगुष्ठाभ्यां नमः ओं महोल्काय तर्जनीभ्यां स्वाहा
तेजोधिपतये मध्यमाभ्यां वषट् विश्वरूपाय अनामिकाभ्यां हुं महा
दंष्ट्राय कनिष्ठाभ्यां वौषट् एवं करतलपृष्ठाभ्यां फट् एवं हृदयादिषु
ततो ध्यानम् आपादं जानुदेशादित्यादि ॥ एवं ध्यात्वा मानसैः संपूज्य
शंखस्थापनादिं पंचपुष्पांजलिदानं विधाय आवरणपूजामारभेत्
केसरेषु पूर्वादिदिक्षु एकदंष्ट्राय हृदयाय नमः ओं महोल्काय शिरसे
स्वाहा तेजोधिपतये शिखायै वषट् विश्वरूपाय कवचाय हुं अग्नि
निर्ऋतिवाय्वीशानकोणेषु महादंष्ट्राय अस्त्राय फट् तद्बहिः पत्रेषु
ओं चक्राय नमः ओं शंखाय नमः ओं खड्गाय नमः ओं खेटकाय नमः
ओं गदायै नमः ओं शक्त्यै नमः ओं वराय नमः ओं अभयाय नमः तद्ब
हिरिंद्रादीन् वज्रादींश्च पूजयेत् विशेषस्तु प्रपंचसारे धूपादि विसर्जनां
तं कर्म समापयेत् अस्य पुरश्चरणं लक्षजपः तथा च ॥ लक्षमेकं ज
पेन्मंत्रं मधुराक्तैः समिद्वरैः जुहुयात् दशांशेन पीठे विष्णोः प्रपूजये
त् विष्णुमंत्रं तु रात्रौ न जपेत् तथा च ॥ न जपेद्वैष्णवं रात्रौ शक्ति
मंत्रो न दुष्यति प्रपंचसारे अथ वक्ष्ये महेशस्य मंत्रान् सर्वसमृद्धिदा
न् यान् जप्त्वा मुनयः प्रापुः शिवसायुज्यमंजसा अथ शिवमंत्रः सां
भुवनं नीलमानन्तानंदप्रियम् एते मानवौघाः ततो गुरुं परमगुरुं पर
मेष्टिगुरुं केवलं स्वगुरुं वा एते कामराजविद्याउद्धादितायाश्च गुरवः
लोपायामलद्वदितायाश्च परमशिवकामेश्वर्यांबिकादिव्यौघं च मानवौ
घमहौघं च सर्वानंदप्रज्ञादेवीप्रकाश एते दिव्यौघः दिव्यचित्रकैवल्यं दि
व्यानामहोदयं एते सिद्धौघाः चिदिच्छाशक्तिरीश्वरकमलपरानंदमनो
हरानंदप्रतिभान् एते मानवौघाः ततः पूर्ववद्गुरुत्रयमेकं वा पूजये
त् अथ वामामाम्नगुरुपंक्तिं पूजयेत् यथा ऐं ह्रीं श्रीं गुरुभ्यो नमः प
वगुरुपादुकाभ्यो नमः परमगुरुभ्यः नमः परापरगुरुभ्यो नमः पर
मेष्टिगुरुभ्यो नमः परमाचार्यपादु सर्वज्ञादेवी त्रितारी द्वितारी वा प्रयोगः
ततस्त्रैलोक्यमोहनादिसृष्टिचक्रे ३ह्सौं सह्रीं कलह्रीं क्लीं पूर्वाम्नायऽन्म
मौदेवीपा॰पू॰ इत्यस्थितिचक्रे ऐं क्लिन्ने क्लीं मदद्रवे कुले ह्रैं मोहद्राविणम्ला
यमोगिनीदेवीश्रीपा॰पू॰ ततः सौभाग्यपादि संहारात्मकत्रिचक्रे ऐं ह्रीं

श्रीं ह्सखफ्रें ह्सौः भगवंत्यंब ह्सखफ्रे कुब्जिके ह्स्रां ह्स्री ह्स्रं अ
घोरघोर मुखि वं क्लां वं क्लीं वं क्लूं किलि किलि विलो मनः ह्स्रैं क्रा नि
बीजानि पश्चिमाम्नाये कुब्जिका श्रीपा· ष·

सर्वचक्रे ख्फ्रें हस्ख्फ्रें महाचंडयोगेश्वरि उत्तराम्नाये कालिका श्रीपा·
पू·त· ततो वैं दव शैवदर्शनाय नमः भूं विं ब्रह्मदर्शनाय नमः
शिवस्य वामतो वैष्णवदर्शनाय नमः ततोऽग्नीशासुरवायव्यमध्ये
दिक्षु च मूलविद्याषडङ्गानि पूजयेत् ततो देवीपश्चात्प्राचीप्रतीची
त्रिपुरायुः तद्दक्षिणे दक्षिणस्याद्रस्यावामस्तथोर्ध्वम् ऐं ह्रीं श्रीं अ
णिमादिसिद्धि श्रीपा·पू·त· ३ महिमादि वायुकोणे चतुष्टयेषु ३
वशित्व प्राकाम्य इच्छा भुक्ति अधः प्राप्ति ऊर्ध्वे सर्वकामसिद्धि मध्ये
चतुरस्रस्य पश्चिमादिद्वारचतुष्टयेषु ३ आं ब्रह्माणी श्रीपा·पू·
ईं माहेश्वरी ऊं कौमारी ऋं वैष्णवी वायुकोणचतुष्टयेषु लृं वारा
ही ऐं इन्द्राणी औं चामुण्डा अः महालक्ष्मी अभ्यन्तरचतुरस्रस्य प
श्चिमादिद्वारचतुष्टयेषु ३ द्रां सर्वसंक्षोभिणीमुद्रा श्रीपा·पू· ३
द्रीं सर्वविद्राविणी क्लीं सर्वाकर्षिणी ब्लूं सर्ववशंकरी वा
य्वादिकोणचतुष्टयेषु ३ सः सर्वोन्मादिनीमुद्रा क्रों महांकुशा
ह्स्ख्फ्रें खेचरी ह्सौः सर्वबीज अधः ऐं योनिमुद्रा श्रीपा·पू·
ऊर्ध्वे ऐं क्लीं सौः त्रिखण्डा सम्पूर्णचक्रे त्रैलोक्यमोहनचतुरस्रचा
क्राय नमः चक्राग्रे अं आं सौः त्रिपुरा श्रीपा·पू· एतस्य दक्षिणे ३
द्रां सर्वसंक्षोभिणीमुद्रा देव्या वामे ३ अणिमादिश्री चार्वाकदर्श
नाय नमः अत्र त्रैलोक्यमोहनचतुरस्रचक्रे त्रिपुराचक्रनायकाधि
ष्ठिते एताश्चाणिमाद्याः प्रकटयोगिन्यः समुद्राः ससिद्धयः सायुधाः
सवाहनाः सपरिवाराः सर्वोपचारैः पूजितास्तर्पिताः सन्तु इत्यर्घ
जलेन मूलदेवे समर्पयेत् ततो द्रामिति सर्वसंक्षोभिणीमुद्रां प्र
दर्शयेत् ऐं आत्मतत्त्वाय स्वाहा क्लीं विद्यातत्त्वाय स्वाहा सौः शिव
तत्त्वाय स्वाहा इति त्रिवारमर्घोदकेन तर्पयेत् अभीष्टसिद्धिमिमा
रि प्रथमावरणम् षोडशदलेषु पश्चिमदलादारभ्य वामावर्ते
न ३ अं कामाकर्षिणीनित्याकला श्रीपादु·पू· एवं सर्वत्र कला
पद प्रयोगः तथा च नवरत्नेश्वरे ॥ विलोमेन यजेद्देताः क्रमात्ति

तं० सा० १००

त्याकलापूर्वः ३ आं बुद्ध्याकर्षिणीनित्याकला ३ इं अहंकाराकर्षिणी
ईं शब्दाकर्षिणी उं स्पर्शाकर्षिणी ऊं रूपाकर्षिणी ऋं रसाकर्षिणी
ॠं गन्धाकर्षिणी ऌं चित्ताकर्षिणी ॡं धैर्याकर्षिणी एं स्मृत्याक-
र्षिणी ऐं नामाकर्षिणी ओं बीजाकर्षिणी औं आत्माकर्षिणी अं अ-
मृताकर्षिणी अः शरीराकर्षिणी सर्वत्र कलाप्रयोगः चक्राग्रे स-
र्वाशापरिपूरकषोडशदलाय नमः ३ ऐं क्लीं सौः त्रिपुरेश्वरीचक्र-
नायिका श्रीपा० पू० एतस्या दक्षिणे द्रां सर्वविद्राविणी श्रीपा० पू०
वामे लघिमासिद्धि श्रीपा० पू० बौद्धदर्शनाय नमः अत्र सर्वाशापरि-
पूरकचक्रे षोडशदले त्रिपुरेशीचक्रनायिकाधिष्ठिते गुप्ताः कामा-
कर्षिण्याद्यागमयोगिन्यः समुद्राः सायुधादि मूलदेव्यास्तर्पयेत् द्रामि-
ति सर्वविद्राविणी मुद्रां प्रदर्शय ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत् २
अष्टदलचक्रे पूर्वादि वर्तुलदलेषु वामावर्तेन ३ कं ५ अनंगकुसुमा
देवी श्रीपा० पू० ३ खं ५ अनंगमेखला ३ गं ५ अनंगमदना ३ घं ५ अनंग-
मदनातुरा आग्नेयादिकोणेषु ३ ङं ५ अनंगरेखा ३ चं ५ अनंगवेगि-
नी वं षां षं सहं ५ अनंगांकुशा ३ लहं ५ अनंगमालिनी चक्राग्रे सर्वसं-
क्षोभणाष्टदलचक्राय नमः ३ ह्रीं क्लीं सौः त्रिपुरसुन्दरीचक्रनायि-
का श्रीपा० पू० एतस्या दक्षिणे ३ क्लीं सर्वाकर्षिणीमुद्रा श्रीपा० पू०
वामे ३ महिमासिद्धि श्रीपा० पू० जैनेन्द्रदर्शनाय नमः तत्र सर्वसंक्षोभ-
णाष्टदलचक्रे श्रीत्रिपुरसुन्दरीचक्रनायिकाधिष्ठिते गुप्ततरा अनंगकुसु-
माद्यागमतन्त्रयोगिन्यः समुद्राः सायुधादि मूलदेव्या समर्पयेत् क्लीमिति
सर्वाकर्षिणीमुद्रां प्रदर्शयेत् ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत् ३ च-
तुर्दशारचक्रे वामसमारभ्य पश्चिमादि दक्षिणं यावत् ३ सर्वसंक्षोभ-
णी श्रीपा० पू० सर्वविद्राविणी सर्वाकर्षिणी सर्वाह्लादिनी सर्व-
सम्मोहनी सर्वस्तम्भनी सर्वजृम्भिणी सर्वसत्ववशंकरी सर्वरंजनी
सर्वोन्मादिनी सर्वार्थसाधनी सर्वसंपत्तिकारिणी सर्वमन्त्रमयी
सर्वद्वन्द्वक्षयंकरी इति सर्वत्र चक्राग्रे सर्वसौभाग्यदायकचतुर्दशार

चतुर्दशारचक्राय नमः ह्रैं ह्क्लीं ह्सौं त्रिपुरवासिनी चक्रनायिका श्रीपा
दु॰ एतस्याः दक्षिणे ॐ ह्लुं सर्ववशंकरीमुद्रा श्रीपादु॰ वामे ईं ईशित्वसि
द्धि श्रीपादु॰ सां ल्मीं मीं मां सकदर्शनेभ्यः अत्र सौभाग्यदायकचतुर्दशा
रचक्रे त्रिपुरवासिनीचक्रनायिकाधिष्ठिते एताः सर्वसंक्षोभिण्याद्याः शा
क्तयः संप्रदाययोगिन्यः मुद्रा इत्यादि मूलं देव्यै समर्पयेत् ह्सैं सर्वावेशा
करीमुद्रां प्रदर्श्य ॐ ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत्

बहिर्दशारचक्रं समारभ्य पश्चिमादिदक्षिणांतं १ सर्वसिद्धिप्रदा सर्व-
संपत्प्रदा सर्वप्रियंकरी सर्वमंगलकारिणी सर्वकामप्रदा सर्वदुःख
विमोचिनी सर्वमृत्युप्रशमनी सर्वविघ्नविघ्नविनाशिनी सर्वा-
गसुंदरी सर्वसौभाग्यदायिनी देवी श्रीपापू० सर्वत्रचक्राग्रे सर्वार्थ
साधकबहिर्दशारचक्राय नमः ह्सैं ह्स्कलरीं ह्सौं त्रिपुराचक्राना
यिका श्रीपापू० तस्माद्दक्षिणे २ सः सर्वोन्मादिनी श्रीपा०पू० गमे१
वशित्वसिद्धि ब्राह्म्यैन्द्रिक दर्शनाभ्यां नमः अत्र सर्वार्थसाधकब
हिर्दशारचक्रे त्रिपुराश्रीचक्रनायिकाधिष्ठिते एताः सर्वसिद्धिप्रदादे
व्याः कुलकौलिनीयोगिन्यः समुद्रारभ्यादि मूलदेव्यैसमर्पयेत्
सः सर्वोन्मादिनीमुद्रां प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत् अं-
तर्दशारचक्राद्वपश्चिमादिदक्षिणांतं ३ सर्वज्ञा सर्वशक्तिमयी स-
वैश्वर्यप्रदायिनी सर्वज्ञानमयी सर्वव्याधिविनाशिनी सर्वाधार
स्वरूपिणी सर्वपापहरा सर्वानंदमयी सर्वरक्षास्वरूपिणी सर्वेप्सि-
तप्रदा देवी श्रीपा०पू० सर्वत्रचक्राग्रे सर्वरक्षाकरांतर्दशारचक्राय
नमः ह्रीं क्लीं ब्लें त्रिपुरमालिनीचक्रनायिकाधिष्ठिते एताः सर्वांग
श्यायोगिन्योनिगर्भयोगिन्यः समुद्रारभ्यादिमूलदेव्यैसमर्पयेत्
क्रों महांकुशामुद्रां प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहेति पूर्ववत् ८ अष्टा-
रचक्राग्रात्समारभ्य पश्चिमादिदक्षिणांतं यावत् १ अं १६ वशि-
नी वाग्देवता श्रीपा०पू०

३ कं ५ जमरीं विमलाबा ३ खं ५ ह्सकलवंहूं जयिनीवा ३ यं ४ चमला
वंहूं सर्वेश्वरीवा ३ शं ५ लमरीं कौलिनीवा चक्राग्रे सर्वरोगहराया
ष्टारचक्राय नमः ह्रीं श्रीं सौः त्रिपुरासिद्धिदा नित्या श्रीपादु॰ पश्चा
त्पादक्षिणे हसखफ्रें खेचरीमुद्रा श्रीपादु॰ वामे ३ भुक्तिमुक्तिसिद्धि
श्रीपादु॰ ३ केवलवदर्शनाय नमः अत्र सर्वरोगहरेऽष्टारचक्रे त्रिपुरा
सिद्धिचक्रनायिकाधिष्ठिते पञ्च वशिन्याद्या योगिन्य समुद्रा ३ स्मादि
मूलदेव्यै समर्पयेत् हसखफ्रें खेचरीमुद्रां प्रदर्श्य पंचात्मतत्त्वाय स्वाहे
ति पूर्ववत् ७ त्रिकोणबाह्ये अग्रतो वामावर्तेन पश्चिमादि दक्षिणान्तं
यावत् द्रां द्रीं क्लीं ब्लूं सः यां रां लां वां शां कामेश्वरीजृम्भणबाणेभ्यो नमः द्रां ५
यां ५ धं थं सर्वसंमोहनाय कामेश्वरकामेश्वरीधनुर्भ्यां नमः ह्रां ५ यां ५
आं ह्रीं वशीकरणाय कामेश्वरकामेश्वरीपाशाय नमः ह्रां ५ यां ५ क्रों
सर्वस्तंभनाय कामेश्वरकामेश्वरी अंकुशाय नमः ततस्त्रिकोणाग्रे दा
क्षिणान्तरेषु मूलवाग्भवबीजमुच्चार्य अग्निचक्रे कामगिरिपीठे मि
त्रेशनाथात्मिके रुद्रात्मशक्ति कामेश्वरीश्रीपादु॰ कामराजमुच्चार्य
सूर्यचक्रे पूर्णगिरिपीठे षष्ठीशनाथात्मके विष्णुत्मशक्ति भगमालिनीदे
वी श्रीपादु॰ चक्राग्रे सर्वसिद्धिप्रदाय चक्राय नमः ह्सैं ह्सकलरीं ह्स
रौः त्रिपुराम्बा नित्या श्रीपादु॰ पश्चात्पादक्षिणे स्हौः बीजमुद्रा श्रीपा॰ मू॰
वामे ३ ज्ञानसिद्धि श्रीपादु॰ शाक्तदर्शनाय नमः अत्र सर्वसिद्धिप्रदायचक्रे
बाणचापविभूषितान्तराले त्रिपुराम्बाचक्रनायिकाधिष्ठिते पञ्चनाः का
मेश्वर्याद्या अतिरहस्ययोगिन्यः समुद्रा ३ स्मादि मूलदेव्यै समर्पयेत्
स्हौः बीजमुद्रां प्रदर्श्य पंचात्मतत्त्वाय स्वाहेति पूर्ववत् ८ ततो बिन्दुचे
चक्रे मूलमुच्चार्य श्रीमहात्रिपुरसुन्दरीनित्या श्रीपा॰ पू॰ इति त्रिः सं
श्य चक्राग्रे सर्वानन्दमयबिन्दुचक्राय नमः मूलमुच्चार्य श्रीमहात्रि
पुरसुन्दरी श्री चक्रनायिका पू॰ पश्चात्पादक्षिणे पं योनिमुद्रां श्रीपादु॰

103

ब्रोमप्राप्तिसिद्धिश्रीपादु॰ मोक्षसिद्धिश्रीपादु॰ शैवदर्शनायनमः
यद्यानवचक्रेश्वरे बौद्धंब्राह्मंतथासौरंशैवंवैष्णवमेवच शाक्तंषट्
त्वविज्ञेयंचक्रंषड्दर्शनात्मकम् रुद्रयामलेपि चतुरस्रंबौद्धभेदंब्रा
ह्मंवैष्णवंषोडशाक्षरम् वैंदवंशैवभेदंचमन्वश्रंसौरमुच्यते वैष्णवंविद्धि द
शारंतमध्यंशाक्तंसमीरितम् इत्युक्तस्थानेषुषड्दर्शनपूजा अत्र
सर्वानंदमयेचक्रेपरब्रह्मस्वरूपिणी परापरमयीशक्तिश्रीमहा
त्रिपुरसुंदरी समस्तनायिकासंपत्तिरूपसमस्तचक्रनायिकाधिष्ठि
तेत्रैलोक्यमोहनसर्वाशापरिपूरकसर्वसंक्षोभकसर्वसौभाग्यदा
यकसर्वार्थदायकसर्वरक्षाकरसर्वरोगहरसर्वसिद्धिप्रदश्रीचक्र
समुन्मीलितसमस्तप्रकटगुप्ततरसंप्रदायकुलकौलिनीनिगर्भा
तिरहस्यातिरहस्यसमस्तयोगिनीपरिवृत्तत्रिपुरात्रिपुरेशीत्रिपुर
सुंदरीत्रिपुरवासिनीत्रिपुराश्रीत्रिपुरमालिनीत्रिपुरासिद्धात्रिपुरां
बाचक्रनायिकावंदितचरणकमलश्रीमहात्रिपुरसुंदरीनित्या
देवीसर्वचक्रेश्वरीसर्वमंत्रेश्वरीसर्वपीठेश्वरीसर्वकामेश्वरीसर्वतं
त्रेश्वरीसर्ववीरेश्वरीत्रैलोक्यमोहिनीजगदुत्पत्तिकामातृकासर्व
चक्रमयीतच्चक्रनायिकासहितासमुद्रासासिद्धयसवाहनासपरि
वारासायुधासर्वोपचारैः श्रीमहात्रिपुरसुंदरीपरापरयासमर्पया
मिसंपूजितास्तर्पितास्संतु इतिविशेषार्घ्योदकात्तत्क्रमेणः प्रथा
नदेव्यावामहस्तेनसमर्पयेत

104

ततो नवमुद्राः प्रदर्श्य ऐं आत्मतत्त्वाय स्वाहेत्यादिना पूर्ववत्त्रिरञ्जलो
दकेन तर्पयेत् ९ ततो गंधपुष्पदूर्वाक्षतमाल्यादीन्दत्वा ऐं इति बी
हौं वाद्यमानमूलमुद्रार्घ्यधूपदीपादिनैवेद्यान्तं निवेदयेत् ततो निम
होमं कुर्यात् परिषिच्यमुमौ मूलं प्राणाय स्वाहेति पंचकं दद्यात्
ततः षडङ्गेनाहुतिषट्कं दद्यात् ततः स्ववामे त्रिकोणे मण्डलं तच्चा
तरं च ऐं व्यापकमण्डलाय नमः अर्घ्यान्नपूर्णं सलिलं स्थापा
येत्तत्र भाजनम् त्रिधापटन्कलावर्णमन्त्रं दद्याद्बलिं ततः ॐ ह्रीं स
र्वविघ्नकृद्भ्यः सर्वभूतेभ्यो हुं स्वाहा इति सामान्यार्घ्योदकेन दत्त्वा त
त्त्वमुद्रां प्रदर्शयेत् ततो वटुकादिभ्यो बलिं दद्यात् ईशानवह्निनि
र्ऋति वायुकोणेषु त्रिकोणवृत्तमण्डलानि कृत्वा तेषु वां वटुकना
थाय नमः यां योगिनीभ्यो नमः क्षां क्षेत्रपालाय नमः गां गणपत
ये नमः इति संपूज्य तेषु द्रव्यभरितपात्राणि निक्षिप्य बलिं दद्यात्
एह्येहि देवीपुत्र वटुकनाथेति मन्त्रेण वटुकनाथाय बलिं दद्यात्
वामांगुष्ठानामायोगेन मुद्रां प्रदर्शयेत् ऊर्ध्वं ब्रह्माण्डतो वा दिवि गा
ननतले भूतले निस्तले वा पाताले वानले वा सलिले पवने यत्र कु
त्रस्थिता वा क्षेत्रपीठोपपीठादिषु च कृतपदा धूपदीपादिना मांसैः प्री
ता देव्यास्सदा नः शुभबलिविधिना पान्तु वीरेन्द्रवन्द्याः यां योगिनीभ्यः
स्वाहा सर्वयोगिनी हूं फट् स्वाहा इत्यनेन बलिं दद्यात् वामहस्ताङ्गु
ष्ठतर्जनीमध्यमानामाभिः योन्याकारेण मुद्रां प्रदर्शयेत् क्षां क्षीं क्षूं
क्षैं क्षौं क्षः स्थानक्षेत्रपाल धूपादिसहितं बलिं गृह्ण गृह्ण स्वाहा इ
त्यनेन क्षेत्रपालबलिं हरेत् वामाङ्गुष्ठतर्जनीसरलां कृत्वा मुद्रां प्रदर्श
येत् भैरवीविद्यायां मन्त्रस्तु एक एककर्तव्यः सर्वेनिवास सर्वभूतबलिः
ततोऽपि प्रदत्त्वा वटुकादीनां यः स्वनयति विघ्नका पूजा च विफला तस्माद्दे
वीशाय प्रजायते ततो देव्या आचमनीयादिकं दत्त्वा स्ववामे तांबूलं द
द्यात् ततो रात्रिकं दद्यात् यथा स्वर्णकस्यादिरचितभाजने कुंकुमादि
ततः कर्पूरवर्त्याच्छतमपरितानष्टदलेष्वष्टौ दीपान्य
नाष्टदलं विलिख्य

तं॰ सा॰ १०५ 105

त्वा तस्य मध्येपि षट्कादिरचितं ततदीपं मस्तकोपरि स्थापयेत् श्रीं ह्रीं
लूं ल्लूं स्लूं स्लूं न्लूं ह्रूं श्रीं इति मंत्रेण च तस्मात्तमभ्यर्च्य तस्मात्तमामस्त
कांतमुद्धृत्य नववारान्नीराजयेत् तथा चोक्तं तन्त्रार्णवे आरात्रिकामतः
कुर्यात्सर्वकामार्थसिद्धये सौवर्णे राजते कांस्ये स्थाले केपरमेश्वरि
कुंकुमेन लिखित्वा सम्यग्वसुपत्रं मनोहरम् वंह्रूंपं वह्निं कृत्वा तन्मध्ये
मस्तकेपि च दीपमेकं विनिक्षिप्य वसुपत्रेषु दीपकम् यवगोधूम
चूर्णादिरचितानार्करायुताम् वरुकाहितयोगाभिः शोभितान्द्व
तपूरितान् अभिमंत्र्य महेशानि रत्नेश्वर्या मस्तकोपरम् श्रीबीजं च प
राबीजं समलिख्य वरवर्णिनि ग्मौ च मलनापश्चादिंदुस्थाः क्रमतः
प्रिये वामकर्णसमायुक्तानादबिंदुसमन्विता बीजं पंचकमेतत्तु
पंचरत्नानि सुंदरि एवं बीजं विलोमेन रत्नेशीयं नवाक्षरी ततोमू
लमुच्चार्य समस्तं च क्रकेशि घ्रुते देवि नवात्मके आरात्रिकमिमं
देवि चक्रमुद्राम्ब विस्थितेति ततो विसर्जनांते कर्म समापयेत् ॥
इति विद्यापद्धतिः ॥
ॐ श्रीगणेशाय नमः ॐ प्रचंडचंडिकां वंदे सर्वकामफलप्रदाम्
यस्याः प्रसादमात्रेण सर्वसिद्धीश्वरो भवेत् अपुत्रो लभते पुत्रं दरिद्रो
धनमाप्नुयात् कवित्वं च समाप्नोति लभते नात्र संशयः अथ प्रचंडचं
डिकामंत्रः तत्र विश्वसारे लक्ष्मी लज्जां ततो मायां मायां ह्रीं ह्रदर्शकाम
पि वज्रवैरोचनीये हं मायेफट्स्वाहायायुते मंत्रोयं वांछितप्रदः ततो
लज्जापदं कामराजपरम् तथा च ॥ अत्र लज्जापदे देविकामबीजं।
विभाव्यते महाकालमतं प्रोक्तं मंत्रोद्धारं शुभावहम् कामाद्या वाग्
भवाद्या च मायाद्या वा जपेन्नरः सुधीः लक्ष्म्याद्या वा जपेद्विद्यां चतुर्वर्गफ
लप्रदाम् पूर्वं मायापदे देवि कामबीजं प्रलक्ष्यते इति पाठे पूर्वमायाप
दे लक्ष्मीबीजमुच्यते अन्यथा नापि स्याद्विरोधः स्यात् अस्यैषामुनीको
वमते सर्वत्र लज्जाबीजं भुवनेशीपरम् तत्रैव वांतं वह्निसमायुक्तं र
तिबिंदुविभूषितम् लक्ष्मीबीजमिति प्रोक्तं सर्वकामार्थसिद्धिदम्

वामाक्षिवह्निसंयुक्तं बिंदुनादविभूषितम् शिवबीजमिदं देशानि लंका
बीजमुदाहृतम् ईशानमुद्धृत्य शक्रारिबीजं सबिंदुकं नादविभूषितं च
सवामकर्णं परितः प्रकल्प्य मया वदंतीह मणिं विपश्चिताम् द्वादशा
स्वरवर्णस्थान्नादबिंदुविभूषितम् वाग्भवबीजमित्युक्तं सर्ववाक्यवि
शुद्धये इति मंत्रवत्बीजं मायाख्यानात्सर्वमंत्रमायायापदं कूर्चपरम् अ
यं तपहामसमीचीनैः अस्याष्टजा प्रातः कृत्यादिकं कृत्वा मंत्राचमनं कु
र्यात् तद्यथा लक्ष्मीमायाकूर्चबीजैस्त्रिभिः पीत्वा स साधकः वाग्भ
वेनाष्टोत्तरमायाभ्यां च हृत्कमलेन कूर्चेन तालयेस्थाणिपीभ
मैत्रेश्च विन्यसेत् श्रीमायाकूर्चैर्वा

106

क्रामत्रिपुराभगवत्यैकैः कामकलाकृशार्णांत्वरत्नानामाप्तिश्रोत्र
यः नाभिहृन्मस्तकं वामेऽस्य स्तद्यशान्भुर्भवेत्तत्क्षणात् आवर्ष्यं वश्यकृत्सम
स्तावस्वरान्तापपश्यति ततः प्राणायामं तत्कर्मविधाय षोढान्या
सं कुर्यात् मंत्रषोढां ततः कुर्यात् त्रैलोक्यवशकारिणीम् श्रीबाला
त्रिपुरायोनिः श्रासाद्ब्रह्मणावस्ततथा कालीवधं कुशेः कामकलाकु
वीमकैः क्रमात् षोडशी मन्त्रवर्णैश्च इत्थगष्टादशाक्षरी पाभिर्म
त्रैर्मातृकार्णैन्यासप्रस्थानेषु विन्यसेत् पञ्चावस्थास्वरूपादिबीज
षोढाप्रकीर्तितम् अस्याश्च मात्रास्त्रवैवैवज्रदेहामवतिहि सर्वेषु
धेवताक्षेपि जीवन्मुक्तादेशायुतः ततः ऋष्यादिन्यासं कुर्यात् तद्य
था शिरसि भैरवऋषये नमः मुखे समष्टिच्छन्दसे नमः हृदि श्रीचक्रेश्व
र्यै कामेश्वर्यै देवतायै नमः गुह्ये ह्रीं बीजाय नमः पादयोः स्वाहा शक्तये
नमः ततः करांगन्यासो ऐं श्रीवेत्रायहृदयाय स्वाहा इति कनीय
सोः ईं महावेत्राय शिरसे स्वाहेति पवित्राङ्गुलयोः ऊं वज्रशिखायै
स्वाहा मध्यमयोः ऐं पाशाय कवचाय स्वाहा तर्जन्योः ऐं अंकुशाय
नेत्रत्रयाय स्वाहाङ्गुष्ठयोः अः महावेत्राय अस्त्राय फट् स्वाहा
करतलपृष्ठयोः एवं हृदयादिषु तद्भाभैरवतन्त्रे उच्चरेत्पूर्वमाका
रं बिन्दुलाञ्छितमस्तकम् वेत्राय हृदयायेति स्वाहायुक्तं कनीय
सि ईकारं च ततो देवि चन्द्रसमप्रभम् महावेत्राय ततो वाच्यं पवित्रा
गुलिसंयुतम् ऊकारं च ततो वाच्यं बिन्दुलाञ्छितमस्तकम् ग्रीवा
यततो युक्तं शिखायै च ततः परम् स्वाहान्तं मध्यमायां च विन्य
सेत्तदनन्तरम् मात्राष्टादशिकापाशं विन्यसेच्च ततः परम् स्वाहान्तं
विन्यसेन्मन्त्रं तर्जन्यां तदनन्तरम् ऐंकारं च ततो देवि वाक्प्रदं ततो
नम् नेत्रत्रयाय स्वाहान्तमङ्गुष्ठे काररयोर्द्वयोः अकारं च विसर्गान्ता
महास्त्रं संयुताम् अस्त्राय संयुक्तं मन्त्रायेति ततः परम् फट्
अस्त्रसमायुक्तं विन्यसेत्करयोर्द्वयोः हृदि मूर्ध्नि शिखायां कव
चे नेत्रमण्डलम् यावदस्त्रं च तद्दिक्षु विदिक्षु च यथाक्रमम् ततो मूले

तं॰ सा॰ ८

107

नमस्तकादिपादपर्यंतं पादादिमस्तकपर्यंतं त्रिवारं न्यसेत् ततो ध्या
नम् स्वनाभौ नीरजं ध्यायेदर्धविकसितं सितम् तत्पद्मकोशमध्ये तु
मंडलं चंडरोचिषः जपाकुसुमसंकाशं रक्तवर्णगुणसन्निभम् रजस्स
त्वतमोरेखायोनिमंडलमंडितम् मध्ये तु तां महादेवीं सूर्यकोटिस
मप्रभाम् छिन्नमस्तां करे वामे धारयंतीं स्वमस्तकम् प्रसारितमुखीं
भीमां लेलिहानाग्रजिह्विकाम् पिबंतीं रौधिरीं धारां निजकंठविनि
र्गताम् विकीर्णकेशपाशां च नानापुष्पसमन्विताम् दक्षिणे च क
रे कर्त्रीं मुंडमालाविभूषिताम् दिगंबरां महाघोरां प्रत्यालीढपदे स्थि
ताम् अस्थिमालाधरां देवीं नागयज्ञोपवीतिनीम् रतिकामोपविष्टा
वं सदा ध्यायंति मंत्रिणः सदा षोडशवार्षीयां पीनोन्नतपयोधराम्
विपरीतरतासक्तां ध्यायेदिति मनोभवौ वर्णिनी डाकिनी युक्ता या
मदक्षिणयोगतः देवीगलोच्छलद्रक्तधारापानं विकुर्वती वर्णिनी लो
हितां सौम्यां मुक्तकेशीं दिगंबराम् कपालकर्तृकाहस्ता वामदक्षिण
योगतः नागयज्ञोपवीताढ्या ज्वलंतीं तेजोमयीमिव प्रत्यालीढपदां
दिव्यां मुक्तकेशीं दिगंबराम् सदा द्वादशवार्षीयामस्थिमालाविभूषि
ताम् डाकिनीं वामपार्श्वे तु कल्पसूर्यानलोपमाम् विद्युज्जटां त्रिनय
नां दंतपंक्तिबलाकिनीम् दंष्ट्राकरालवदनां पीनोन्नतपयोधराम्
महादेवीं महाघोरां मुक्तकेशीं दिगंबराम् लेलिहानां महाजिह्वां मुं
डमालाविभूषिताम् करस्थितकपालेन भीषणेनातिभीषणाम् आ
शेषः तस्याश्च स्वमस्तकस्थालपरंरक्तधाराभिपूरितम् ललजिह्वं महा
भीमं दृष्टं तं वामभुजे तथा इति भैरवीतंत्रे एवं ध्यात्वा मानसैः संपूज्य
तारिणीतावत् यावत्स्थापनं कुर्यात् प्रस्थाप्य जायत्रम् त्रिकोणवि
समेदादोनन्तमध्ये मंडलत्रयम् तन्मध्ये विलिखेद्योनिं द्वारद्वयसम
न्वितम् बहिरष्टदलं पद्मं भूबिंबत्रितयं पुनः

कूर्चबीजं लिखेत्तन्मध्ये त्रिकोणे फट्समन्वितम् यद्वा तत्र यथानोक्तं यंत्रं वा
ततः पीठपूजा आधारशक्तये कूर्माय अनंताय पृथिव्यै रत्नद्वीपाय क
ल्पवृक्षाय तदधः स्वर्णसिंहासनाय आनंदकंदाय संविन्नालाय सर्वतत्त्वा
त्मकपद्माय सं सत्त्वाय रं रजसे नमः तं तमसे नमः आं आत्मने अं अंत
रात्मने पं परमात्मने ह्रीं ज्ञानात्मने पद्ममध्ये रतिकामाभ्यां रति
कामोपरि वज्रवैरोचनीये ह्रिं देहि देहि पाहि पाहि गृह्ण गृह्ण मम सिद्धिं
देहि देहि मम शत्रून् मारय मारय कपालिके हूं फट् स्वाहा इति पीठमंत्रः
सर्वत्र प्रणवादि नमोंतेन पूजयेत् ततः पूर्ववद्ध्यात्वाऽऽवाहयेत् यथा
सर्वसिद्धिवर्णिनीये सर्वसिद्धिडाकिनीये वज्रवैरोचनीये इहागच्छ
पुनस्तन्मंत्रमुच्चार्य इह तिष्ठ इह संनिधेहि इह संनिधत्स्व इत्यनेनावाह्य
आं ह्रीं क्रों हंसः इति मंत्रेण प्राणप्रतिष्ठां कृत्वा आं खड्गाय स्वाहा हृदया
य नमः इत्यादिना षडंगानि विन्यस्य यथाशक्ति पूजां कृत्वा बलिं दद्यात्
तद्यथा वज्रवैरोचनीये देहि देहि पाहि पाहि गृह्ण गृह्ण इमं बलिं मम सि
द्धिं देहि देहि कपालिके हूं फट् स्वाहा इति मंत्रेण देव्या दक्षिणे ॐ ह्रीं वर्णिन्यै नमः
वामे पं ॐ डाकिन्यै नमः ततो देव्यग्रे षडंगानि संपूज्य दक्षिणे ॐ पावनि
यायै नमः वामे ॐ पद्मनिधये नमः पूर्वादिदिक्षु लं क्षं लं लं मं यं वां णीं
व पूजयेत् विदिक्षु ब्रह्मविष्णुरुद्रेश्वरान् पूजयेत् मध्ये सदाशिवं सर्व
त्र प्रणवादि नमोंतेन पूजयेत् ततः पुष्पांजलिं दत्वाऽऽवरणपूजामारभे
त अग्नीशासुरवायुमध्ये दिक्षु च आं खड्गाय स्वाहा हृदयाय नमः
इति षडंगानि पूजयेत् अष्टपत्रेषु पूर्वादिक्रमेण ॐ शाकिन्यै स्वाहा
वर्णिन्यै स्वाहा एवं डाकिन्यै महाभैरव्यै भैरव्यै इंद्राण्यै पिंगलाक्ष्यै सं
हारिण्यै पद्ममध्ये हूं फट् नमः स्वाहा नमः देव्या दक्षिणे सप्ताट्टहासे
नमः उत्तरे खड्गवर्णिभ्यो नमः पुनर्दक्षिणे ॐ बीजशक्तिभ्यां नमः
पत्राग्रेषु पूर्वादिक्रमेण ॐ ब्राह्मी माहेश्वरी कौमारी वैष्णवी वाराही
इंद्राणी चामुंडा महालक्ष्मी प्रणवादि नमोंतेन पूजयेत् ततस्तत्
दिक्षु ॐ हूं करालाय नमः ॐ हूं विकरालाय नमः ॐ हूं अतिकराला

यनमः ॐ ह्रूं महाकरालाय नमः

ततो धूपादिविसर्जनांतं कर्म समापयेत् अस्याः पुरश्चरणं लक्षजपः
सिद्धविद्यात्वात् मंत्रांतरम् भुवनेशीकामबीजं कूर्चबीजं च वाग्भव
म् भुवनेशीकामबीजं वाग्भवं तदनंतरम् वज्रवैरोचनीये हूं फट् (?)
स्वाहा च ततः परम् अस्याः पूजाप्रकारः प्रातःकृत्यादिमासपूजादिकं
षोडुवर्णोयम् मंत्रांतरम् ह्लींवामाद्यं नकूर्चं वाग्भवं कूर्चमेव च अ
स्त्रांतं छिन्नमस्तायाः महाविद्या प्रकीर्तिता अस्यास्तु सदृशी विद्या ज
गत्स्वपि न दृश्यते चतुर्णामयं मनुस्साक्षान्मोक्षदो नात्र संशयः अस्या ध्या
नमहं वदेस्फुरद्बकमलानने ध्यानम् ॐ प्रत्यालीढपदां सदैव द
धंतीं छिन्नशिरः कर्त्रिकां दिग्वस्त्रां स्वकबंधशोणितसुधाधारां पिबं
तीं मुदा नागाबद्धशिरोमणिं त्रिनयनां हृद्युत्पलालंकृतां रत्यासक्त
मनोभवोपरि दृढां ध्यायेज्जपासन्निभाम् दक्षे चातिसितां विमुक्तचि
कुरां कर्त्रीं तथा खर्परम् हस्ताभ्यां दधतीं रजोगुणभवा नाम्नापि सा ॐ ह्रीं ह्रीं वज्रवैरो
वर्णिनी देव्याश्छिन्नकबंधतः पतदसृग्धारां पिबंतीं मुदा नागाबद्ध चनीये हूं फट् स्वाहा
शिरोमणिं मनुविदा ध्येया न दासासुरैः

109

वामेकृष्णतनुंतत्रध्यायेद्वदयतीत्वहुंतस्याःखर्परंप्रत्यालीढपदाकबंध।
निगलद्रक्तंपिबंतीमुदा सैषायाप्रलयेसमस्तभुवनंभोक्तुंक्षमाता।
मसीशक्तिस्त्वापिपराभगवतीनाम्नापराडाकिनी अस्याःकूर्जादिकं
सर्वंषोडशीवद्धोध्यमम् तारंलज्जाद्वयंवज्रवैरोचनीयेहुंफट्स्वाहा अ
स्याःदिकंसर्वंषोडशीवद्धोध्यमम् मंत्रांतरम् विपन्मूत्रयुतंविंदुनाद
युक्तंततःप्रिये एकाक्षरीमहाविद्यात्रैलोक्यक्षोभकारिणी सदीर्घेड।
कारःठद्वौतेषामहाविद्यात्रैलोक्यमोहकारिणी तारांद्यताभवेदेषा
चतुर्वर्गफलप्रदा वज्रवैरोचनीयेवकूर्चयुग्मंस्फट्ठठः तारायैषा
महाविद्यासर्वतेजोपहारिणी इत्यंनीषोडशीविद्याप्रशंसामाह त-
थासर्वप्रयत्नेनसर्वीयाप्याचषोडशी लक्ष्मीबीजादिकाचैषासर्वैश्व
र्यप्रदायिनी लज्जाद्यास्वर्गभूनागयोषिदाकर्षिणीपरा

ॐवज्रवैरोचनीय
हुंहुंफट्ठठः

110

श्रीं ह्रीं हूं यें वज्रवैरोचनीये श्रीं ह्रीं हूं यें फट् स्वाहा ।८। ओं श्रीं ह्रीं हूं यें वज्रवैरोचनीये श्रीं ह्रीं हूं यें फट् स्वाहा ।९

कूर्चाद्या सर्वजंतूनां महापातकनाशिनी वाग्भवाद्याद्यदा देवी वाग्मि
शत्वप्रदायिनी पञ्चाक्षषोडशी विद्या विद्या सप्तदशाक्षरी श्रीवी
जपुटिता सा च लक्ष्मीवृद्धिकरी सदा लज्जया पुटिता विद्या त्रैलोक्या
कर्षिणी परा कूर्चेन पुटिता सर्वपापिनां पापहारिणी वाग्बीज
पुटिता चैषा कवित्वादिप्रदायिनी चतुर्विद्येति विद्येषा प्रिये सप्तद
शाक्षरी ताराद्या षोडशी वाम्मा भवेत्सप्तदशाक्षरी पञ्चविद्याम
हाविद्या भुक्तिमुक्तिकरी सदा कमलाभुवनेशानी कूर्चबीजं स्मरस्म
नी वज्रवैरोचनीये च हूं बीजानि चोच्चरेत् फट्स्वाहांता महाविद्या
वसुवेदाक्षरी परा ताराद्ये कोनविंशार्णा ब्रह्मविद्यास्वरूपिणी एते
विद्ये तु मे देवि भुक्तिमुक्तिप्रदे शुभे लक्ष्म्यादि पुटिता पूर्वं यथैव द्वा।
दशी भवेत् चतुर्थी च महाविद्या चतुर्वर्गफलप्रदा प्रणवाद्याद्यदा।
विद्या भोगमोक्षकरी सदा विद्यांतरं प्रवक्ष्यामि सावधानावधारय
हृल्लेखा कूर्चं वाग्बीजं वज्रवैरोचनीये हूं फट् स्वाहा महाविद्या चतुर्द

ह्रीं हूं यें वज्रवैरोचनीये हूं फट् स्वाहा ।
१५

शाक्षरी मता सर्वैश्वर्यप्रदा चैषा सर्वमोहनकारिणी भुवनेशी त्रि
तयं च वाग्बीजं प्रणवं मतम् वज्रवैरोचनीये च हूं फट् स्वाहांतगा।
स्मृता चतुर्दशाक्षरी चैषा चतुर्वर्गफलप्रदा षष्ठा विद्या महाविद्या जन्म
मृत्युविनाशिनी तन्त्रांतरे रमाकामलज्जा वाग्बीजं वज्रवैपदम्
रोचनीये लज्जा हूं हूं मन्त्रं स्वाहा समन्विता इयं सा षोडशी प्रोक्ता सर्वका
मफलप्रदा कथिताः सकला विद्याः सारात्सारतरा शुभा अस्यामृषि
भैरवोहं नाम्नात्रको यम भूपतिः सम्राट्छंदो देवता चाछिन्नमस्ता प्र।
कीर्तिता षड्दीर्घभाक्स्वरेणैव प्रणवाद्येन सुंदरि विंदुते च वठांतानि
षडंगानि प्रकल्पयेत् नारदीयादिकं चासां ताः प्रसिद्धाश्च शास्त्रैः स
कलेषु च वर्णेषु सकलेष्वाश्रमेषु च अंतिमेषु च वर्णेषु भुक्तिमुक्तिप्र
दायिनी प्रणवाद्या च या विद्या शूद्राद्यानसमीरिताः अस्याश्चैव विशेषो
यं यो षिद्धेत्तु समापयेत् शाकिनी सा भवेत् सर्वशाकिनीभिः प्रजायते प
तिहीना पुत्रहीना यथा स्यात्सिद्धयोगिनी इति ते कथितं तंत्रं रहस्यम

श्रीं ह्रीं क्लीं ह्रीं यें वज्रवैरोचनीये ह्रीं ह्रीं फट् स्वाहा ।९

तं.

सा. स्थितं प्रिये श्रुतिस्मृतिरंगेन भक्त्यादाम्नोस्मि ते प्रिये एतां स्तोध्यानस्य

१११ ज्ञानादिकं षोडशादरी वत

इति छिन्नमस्ताप्रकरणम् ॥ ॐ नमो देव्यै भैरवीतन्त्रे ॐ अथ वक्ष्ये म
हाविद्याः कालिकायास्तु दुर्लभाः यासां विज्ञानमात्रेण जीवन्मुक्तो
भवेन्नरः नात्र चित्तविशुद्धिः स्यान्नारिमित्रादिदूषणम् न वा प्रयास
बाहुल्यं समयासमयादिकम् न वित्तव्ययबाहुल्यं कायक्लेशकरं न
च यः एतां चिंतयेन्मन्त्री सर्वकार्यसमृद्धिदम् तस्य हस्ते सदैवास्ति सर्व
सिद्धिर्न संशयः गद्यपद्यमयी वाणी सभायां तस्य जायते तस्य दर्शन
मात्रेण वादिनो निष्प्रभा मताः राजानोपि च दासत्वं लभंते किं परे ज
नाः वह्नेः शैत्यं जलं स्तंभं गतिस्तंभं विवस्वतः दिवारात्रिसमं यच्च वा
शीकं तत्क्षणो भवेत् अंते च भजते देव्या गणत्वं दुर्लभं नराः अथ का
लीमंत्रः महाकालीतंत्रे कामत्रयं वह्निसंस्थं रतिबिंदुसमन्वितम्
कूर्चयुग्मं तथा लज्जायुगलं तदनंतरम् दक्षिणे कालिके चेति पूर्व
बीजानि चोद्धरेत् अंते वह्निवधूं दद्याद्विद्याराज्ञी प्रकीर्तिता अस्याः
पूजा प्रातःकृत्यादिकं कृत्वा मंत्राचमनं कुर्यात् तत्राचमनं भैरवीतंत्रे
कालिकाभिस्त्रिभिः पीत्वा काल्यादिभिरुपस्पृशेत् द्वाभ्यामोष्ठौ हि
रुन्मृज्य चैकेन क्षालयेत्करम् मुखे घ्राणे तथा श्रोत्रे नाभ्युरस्कं भु
जास्पृशेत् आचम्यैवं भवेत्काली वत्सरात्तां प्रपश्यति तद्यथा क्रीं
क्रीं क्रीं इति त्रिराचमेत् ॐ महाकाल्यै नमः ॐ कापालिन्यै नमः इति
द्विरुन्मृज्येत् ॐ कुल्लायै नमः इति करं क्षालयेत् ॐ कुरुकुल्लायै नमो
मुखे ॐ विरोधिन्यै नमः दक्षिणनासायां ॐ विप्रचित्तायै नमो वामना
सायां ॐ उग्रायै नमः ॐ उग्रप्रभायै नमः इति नेत्रयोः ॐ दीप्तायै न
मः ॐ नीलायै नमः इति श्रोत्रयोः ॐ घनायै नमः नाभौ ॐ बलाका
यै नमो वक्षसि ॐ मात्रायै नमः शिरसि ॐ मुद्रायै नमः ॐ मितायै न
मः अंसयोः इति मंत्राचमनम् ततः प्रातःकृत्यादि मूलशुद्ध्यंतं कर्म वि
धाय मायाबीजेन यथाविधि प्राणायामांते कृत्वा ऋष्यादिन्यासं कु
र्यात् तद्यथा अस्य मंत्रस्य भैरव ऋषिः उष्णिक् छंदः दक्षिणकालि
का देवता क्रीं बीजं हूं शक्तिः क्रीं कीलकं पुरुषार्थसिद्ध्यर्थे विनियो

गः तथा च कालीक्रमे कीलकं शापवर्णस्याच्चतुर्वर्गफलप्रदम् तद्य
था शिरसि भैरवऋषये नमः मुखे उष्णिक्छन्दसे नमः हृदि दक्षिण
कालिकायै देवतायै नमः गुह्ये ह्रीं बीजाय नमः पादयोः हूं शक्तये न
मः सर्वाङ्गे कीलकाय नमः ततः कराङ्गन्यासौ तदुक्तं कालीतन्त्रे
अङ्गन्यासकरन्यासौ यथावदभिधीयते भैरवस्य ऋषिः प्रोक्तः उ
ष्णिक्छन्द उदाहृतम् देवता कालिका प्रोक्ता लिकाबीजन बीजकं
षड्दीर्घभाग्बीजेन प्रणवाद्येन कल्पयेत् तद्यथा ॐ क्रां अङ्गुष्ठाभ्यां
नमः ॐ क्रां हृदयाय नमः इत्यादि ततो वर्णन्यासः अं आं इं ईं उं ऊं ऋं
ॠं लृं ॡं नमः इति हृदये एं ऐं ओं औं अं अः कं खं गं घं नमो दक्षिणबा
हौ ङं चं छं जं झं ञं टं ठं डं ढं नमो वामबाहौ णं तं थं दं धं नं पं फं बं
भं नमो दक्षिणपादे मं यं रं लं वं शं षं सं हं क्षं नमो वामपादे विरूपा
क्षमतेऽस्मिन् बिन्दुरेष न्यासः यथा वीरतन्त्रे अं आं इत्यादि नमो हृदये विन्य
सेदादि कालीतन्त्रे पुनर्निर्दिष्टः अं आं इत्यादि हृदयादिस्पृशेत् अ
थ षोढान्यासः तदुक्तं वीरतन्त्रे केवलं मातृकां कृत्वा मातृकां तार
संपुटाम् मातृकापुटितां तारं न्यसेत्साधकसत्तमः श्रीबीजपुटितां
तां तु मातृकापुटितं ततः कामेन पुटितां देवीं कामं तत्पुटितं न्यसे
त् ततः शक्तिपुटां न्यस्त्वा शक्तिं च तत्पुटां न्यसेत् ह्रीं हं सं च पुनर्न्यस्त्वा
अक्षल्लल्लक्षवत्पूर्ववत् मूलेन पुटितां देवीं तत्पुटं मन्त्रमेव च अनुलो
मविलोमेन न्यस्त्वा मन्त्रं यथाविधि मूलेनाष्टशतं कुर्याद्व्यापकं तद
नन्तरम् यथा पूर्वं कामपुटितां तत्पुटितं कामं पूर्वं शक्तिपुटितां तां त
त्पुटितां तत्पुटितां शक्तिं च न्यसेत् ह्रीं हंसं यन्त्र अक्षल्लल्लक्ष पूर्ववदिति त
न्मन्त्रपुटितां मातृकां न्यस्त्वा मातृकापुटितं मन्त्रं पुनरनुलोमविलो
मेन केवलं मन्त्रं मातृकास्थाने विन्यस्य मूलेनाष्टोत्तरशतेन व्यापकं
कुर्यात् अयं न्यासस्तारायाश्चापि कार्यः ततस्तेनतुर्गायाः अङ्गषोढा
प्रकीर्तितम् तारयोः कालिकायाश्च तन्त्रेषु यो यामास्तथापरा एतस्मि
न्यासे सर्वाङ्गे च सर्वपापं प्रणश्यति ततस्तत्त्वन्यासः तद्यथा मूलत्रिविं

ङ्गंविधाय प्रथमंखण्डान्ते ॐ आत्मतत्त्वायस्वाहेतिपादादिनाभिपर्यंतं
द्वितीयखण्डान्ते विद्यातत्त्वायस्वाहेति नाभ्यादिहृदयांतं तृतीयखण्डान्ते
शिवतत्त्वायस्वाहेतिहृदयादिशिरःपर्यंतं तदुक्तं स्वतंत्रतंत्रे मूलविद्या
त्रिखण्डान्ते प्रणवाद्यैर्यथाविधि आत्मविद्याशिवैस्तत्त्वैस्तत्त्वन्यासं समाच
रेत् अथबीजन्यासः तदुक्तंकुमारीकल्पे ब्रह्मरंध्रेभ्रुवोर्मध्येललाटेना
भिदेशके गुह्येवक्त्रेचसर्वाङ्गेसप्तबीजानिक्रमान्न्यसेत् तद्यथा आद्य
बीजंब्रह्मरंध्रे द्वितीयंभ्रूमध्ये तृतीयंललाटे चतुर्थंनाभौ पंचमं
गुह्ये षष्ठंवक्त्रे सप्तमंबीजंसर्वाङ्गे एतत्त्रयंकाम्य करालवदनांघोरां
मुक्तकेशींचतुर्भुजाम् दक्षिणांकालिकांदिव्यांमुंडमालाविभूषिताम्
सद्यःछिन्नशिरःखड्गवामाधोर्ध्वकराम्बुजाम् अभयंवरदंचैवदक्षिणा
धोर्ध्वपाणिकाम् महामेघप्रभांश्यामांतथैवचदिगंबराम् कंठावस
क्तमुंडालीगलद्रुधिरचर्चिताम् कर्णावतंसतानीतशवयुग्मभया
नकाम् घोरदंष्ट्राकरालास्यांपीनोन्नतपयोधराम् शवानांकर
संघातैः कृतकाञ्चीहसन्मुखीम् सृक्किद्वयगलद्रक्तधाराविस्फुरिता
ननाम् शवानांकरसंघोररावांमहारौद्रींश्मशानालयवासिनीम्
बालार्कमंडलाकारलोचनत्रितयान्विताम् दन्तुरांदक्षिणव्यापिमुक्ता
लंबिकचोच्चयाम् इत्यादि शवरूपमहादेवहृदयोपरिसंस्थिताम्
शिवाभिर्घोररावाभिश्चतुर्दिक्षुसमन्विताम् महाकालेनसार्धंवि
परीतरतान्विताम् सुखप्रसन्नवदनांस्मेराननसरोरुहाम् एवंसं
चिंतयेत्कालींश्मशानालयवासिनीम् इतिध्यानम् शरयुग्मेति ॥
घोरबाणावतंसेतिप्रेतकर्णविभूषितेति संकेतपद्धतिमयुक्तबाणक
णाविभूषणामितिच विगलासृक्किशोराभ्यांयुतकर्णावतंसिनीतिदा
शीनात् डमरुमेवपाठः इतिध्यात्वामानसैः संपूज्य अर्घ्यस्थापनं कुर्या
त् स्ववामभूमौहूंगर्भत्रिकोणंविलिख्य अर्घ्यपात्रंसंस्थाप्यमूले
न पुष्पजलादिनार्घ्यंवाद्यपात्रमापूर्य गंधादिकंकृत्वा गंगेचेत्यादिना
तीर्थमावाह्य रंवह्निमंडलायदशकलात्मनेनमः आधारे श्रींसूर्यमंड

तं॰ सा॰ ११२ 113

लायद्वादशकलात्मनेनमः ॐ उं दं सोममंडलायषोडशकलात्मने
नमः इतिजलेसंपूज्य ॐ ह्रांहृदयायनमः ॐ ह्रींशिरसेस्वाहा ॐ ह्रूंशि
खायैवषट् ॐ ह्रैंकवचायहुं ईशाग्न्यसुरवायुषु अग्रे ॐ ह्रौंनेत्र
त्रयायवौषट् चतुर्दिक्षु ॐ ह्रः अस्त्रायफट् तदुपरिमंत्रदशधाजप्त्वाधे
नुमुद्रयामृतीकृत्य अस्त्रेणसंरक्ष्य भूतिनीयोनिमुद्रेप्रदर्श्य तज्जलबिं
दूंस्तालीयपात्रेनिक्षिप्य मूलेनतेनोदकेनात्मानंपूजोपकरणं
चाभ्युक्ष्यपीठपूजामारभेत् अस्यपूजायंत्रे आदौबिंदुस्वबीजंभुव
नेश्वरीचविलिख्य तत्रत्रिकोणं तद्बाह्ये त्रिकोणवत्तदूर्ध्वदलमष्टद
लंपुनर्वृत्तंचततःहीरात्मकंभूपुरंचलिखेत् कुमारीकल्पे पीठपूजां
ततःपश्चादाधारशक्तिपूर्वकम् प्रकृतिकमठंचैवशेषंपृथ्वीन्तथै
वच सुधांबुधिंमणिद्वीपंचिंतामणिगृहंतथा श्मशानंपारिजातं
चतन्मूलेरत्नवेदिकाम् तस्योपरिमणिःपीठंन्यसेत्साधकसत्तमः
चतुर्दिक्षुमुनीन्द्रांशिवाश्चामरमुंडकान् ततःपीठस्याग्नेयादिको
णेषुवक्रवचनेन धर्मज्ञानवैराग्यैश्वर्याः ततःपूर्वादिचतुर्दिक्षु
अधर्माज्ञानावैराग्यानैश्वर्याःमध्येधर्मोस्यपात्रचतुष्टये स्वदिक्कंदं
तथापद्मसूर्यसोममहेश्वरि वैश्वानरंतथासत्वरजस्तथैवतमस्तथा
आत्मानंचैवविद्यास्यशक्तिह्रत्कमलंन्यसेत् ततआधारशक्त्यादि
ह्रीं ज्ञानात्मनेनमः इत्यंतंसंपूज्य केसरेषुपूर्वादितः इच्छाज्ञानक्रि
याश्चैवकामिनीकामदायिनी रतीरतिप्रियानंदामध्येचैवमनोन्म
नी सर्वत्रप्रणवादिनमोन्तेनपूजयेत् तदुपरि ॐ परायैनमः ॐ अ
परायैनमः ॐ परापरायैनमः ह्सौंः सदाशिवमहाप्रेतपद्मासनाय
नमः ततःपुनर्ध्यात्वाशुद्धजलादानीयमूलमंत्रकल्पितमुद्रयावा
हयेत् ॐ देवेशिभक्तिसुलभे परिवारसमन्विते यावत्त्वांपूजयिष्या
मितावत्त्वंसुस्थिराभव ततोमूलमुच्चार्य अमुकदेवि इहावह इहाव
ह इहतिष्ठ इहतिष्ठ इहसन्निधेहि इहसन्निधेहि इहसन्निधत्स्व इह
सन्निधत्स्व ततोमुद्राभिस्सावगुंठ्य हंसागममंत्रेणसकलीकृत्य धेनुमुद्रयामृती

हूं सपरमीकरणमुद्रया परमीकृत्य भूतिनीं आकर्षिणीं योनिमुद्राः प्र
दर्श्य प्राणप्रतिष्ठां विधाय मूलेन पाद्यादिभिः पूजयेत् मूलमुच्चार्य प
न्नमाय अमुकदेव्यै नमः एवमिदमर्घं स्वाहा इदमाचमनीयमस्तु था प
श्चगंधो नमः एतानि पुष्पाणि वौषट् ततो मूलेन पंचपुष्पांजलिं विधा
य धूपदीपौ दद्यात् तद्यथा वनस्पतीति मंत्रं पठित्वा मूलमुच्चार्य एष धू
पो नमः दीपमंत्रस्तु स्वप्रकाश इत्यादि मूलमुच्चार्य एष दीपो नमः
ततो घंटां पूजयेत् ॐ जयध्वनिमंत्रमातः स्वाहा इति घंटां वादयन्
नैवेद्यं प्रदद्यात् दृष्टिपर्यंतं दीपं दद्यात् ततो मूलेन पुष्पांजलित्रयं दद्यात्
यथाशक्त्या नैवेद्यं दद्यात् ततः आवरणपूजां कुर्यात् श्रीमदमुकदेव्या आ
वरणान्ते पूजयामि इत्याज्ञां गृहीत्वा केसरेष्वग्निकोणे हृदयाय न
मः ईशाने शिरसे स्वाहा नैरृते शिखायै वषट् वायव्ये कवचा
य हुम् अग्रे नेत्रत्रयाय वौषट् दिक्षु ॐ अस्त्राय फट् ततो बहिः
षट्कोणे ॐ कालाय नमः ॐ कपालिने नमः ॐ कुल्लाय नमः ॐ कु
रुकुल्लाय नमः ॐ विरोधिने नमः ॐ विप्रचित्ताय नमः ॐ उग्राय नमः
ॐ उग्रप्रभाय नमः ॐ दीप्ताय नमः इत्यंत मध्ये ॐ नीलाय नमः ॐ
घनाय नमः ॐ बलाकाय नमः इति द्वितीयमध्ये ॐ मात्राय नमः ॐ
मुद्राय नमः ॐ मित्राय नमः इति तृतीयमध्ये सर्वाः श्यामाः सितक
पालमुंडमालाविभूषणाः तर्जनीवामहस्तेन धारयंत्यः शुचिस्मिताः
दिगंबरा हसन्मुख्यो मत्तमत्तमदान्विताः इति ध्यात्वा पूर्वादिनामो
नेन पूजयेत् ततो ष्टपत्रेषु पूर्वादिक्रमेण ॐ ब्राह्म्यै नमः ॐ नाराय
ण्यै नमः ॐ माहेश्वर्यै नमः ॐ चामुंडायै नमः ॐ कौमार्यै नमः ॐ
अपराजितायै नमः ॐ वाराह्यै नमः ॐ शिवदूत्यै नमः एवं गंधादि
भिः संपूज्य मूलेन पुष्पांजलित्रयं दद्यात् ततो पाद्यादिना महाकालं पू
जयेत् तथा च कुमारीतंत्रे देव्यास्तु दक्षिणे भागे महाकालं प्रपूजयेत्
हूं ह्रौं यां रां लां वां क्रौं महाकाल भैरव सर्वविघ्नान्नाशय नाशय
ह्रीं श्रीं फट् स्वाहा इत्यनेन पाद्यार्घादिभिराराध्य विसर्जयित्वा मूलेन

तं॰
सा॰
११४

114

देवींपंचोपचारैःसमभ्यर्चयेत् तथाचकालीतंत्रे महाकालंयजेद्धत्वा
पश्चाद्देवींप्रपूजयेत् ततःप्राणायामंकृत्वाकामकलांविभाव्यशि
रसिगुरुंहृदिदेवींध्याय यथाशक्तिजप्त्वापुनःप्राणायामंकृत्वा
गुह्यातिगुह्येत्यादिनाजपंदेव्यावामहस्तेनसमर्पयेत् ततश्चात्मस
मर्पणंकुर्यात् ततःस्तुत्वा प्रदक्षिणीकृत्याष्टांगप्रणामंकुर्यात् श्री
जगन्मंगलानामकवचंपठेत् ततश्चावरणदेवतादेव्यंगेविलाप्य
संहारमुद्रयाअमुकदेविक्षमस्वेति विसृज्यतेजःपुष्पेणसार्धंस्व
हृद्यारोपयेत् तन्नैवेद्यंकिंचित् ह्रीं उच्छिष्टचांडालिन्यैनमः इतीशा
न्यांदिशिदत्वाशेषंशिष्टेभ्योदत्वाकिंचित्स्वीकृत्यपादोदकंपीत्वानि
र्माल्यंविधृत्य यथेष्टंविहरेत् इतिमूलेनाष्टशताभिमंत्रितंपुष्पंचंद
नंधृत्वा त्रैलोक्यंवशमानयेत् सर्वसिद्धियुतोभूत्वाभैरवोवत्सरा
द्भवेत् अस्यपुरश्चरणंलक्षद्वयजपः तत्रश्रीक्रमः तथाचकालीतं
त्रे लक्षमेकंजपेद्धीमान्हविष्याशीदिवाशुचिः रात्रौतांबूलपूरास्यःश
य्यायांलक्षमानतः अवस्थामाहस्वतंत्रतंत्रे लक्षमेकंजपेन्मंत्रीह
विष्याशीदिवाशुचिः अशुचिस्थितोरात्रौलक्षमेकंतथैवच दशांश
होमयेन्मंत्रीतर्पयेदभिषेचयेत् इतिसंप्रदायकः वस्तुतस्तुक्रमा
रीकले लक्षमेकंजपेद्धीमान्हविष्याशीदिवाशुचिः रात्रौतांबूलपूरा
स्यःशय्यायांलक्षमानतः एवंलक्षद्वयंजप्त्वातद्दशांशेनमंत्रवित्
अयुतंहोमयेद्देविदिवारात्रिविभेदतः तेनदिवालक्षंजप्त्वातद्दशांशेन
होमंकुर्यात् रात्रौलक्षंजप्त्वादशांशांशहोमंकुर्यात् इतिरहस्यार्थः गते
तुप्रथमेयामेतृतीयेप्रहरावधि निशायांतुप्रजपेन्मंत्रीरात्रिशेषेजपे
त्तत् द्विजातीनांतुसर्वेषांदिवाविधिरिहोच्यते शूद्राणांतुतथाप्रोक्तं
रात्रौविप्रमहाफलम् इति अथमंत्रभेदः वर्णाद्यंवह्निसंयुक्तंरति
बिंदुसमन्वितम् एकाक्षरोमहामंत्रःसर्वकामफलप्रदः त्रिगुणा
त्वविशेषेणसर्वशास्त्रप्रबोधिका अस्यपूजा प्रातःकृत्यादिप्राणा
यामांतंविधायसर्वीक ऋषिछंदोदेवताःविन्यस्यवर्णन्यासंकृत्वाक

ंगन्यासौ कुर्यात् तद्यथा ॐ क्रां अंगुष्ठाभ्यां नमः ॐ क्रां हृदयाय न
मः इत्यादिन्यसेत् तथा वीरं तेन दीर्घषट्कयुताद्येन प्रणवाद्येन ।
कल्पयेत् षडंगानि मनोरस्य ज्ञातिगुह्येन देशतः

११५

115

अस्मात्सर्वं पूर्ववत् अनयोः पुरश्चरणं लक्षजपः तथा च निर्वाणे षष्ठ
तंत्रे एवं ध्यात्वा जपेन्मंत्रं लक्षमेकं विधानतः तद्दशांशं विधाने
न होमयेत्साधकोत्तमः मंत्रांतरं मायाद्वंद्वं कूर्चयुग्ममैंद्रांतमदन
द्वयम् मायाविद्दीशयुतं दक्षिणे कालिके पदम् संहारक्रमयोगे
न बीजसप्तकमुद्धरेत् एकविंशत्यक्षरो मंत्रस्तारादयः कालिकाम
नुः ईस्सममीप ईद्रोरेफ इत्यर्थः तथा च तंत्रे मायाकूर्चौ योगे त्रयः का
माः वह्निस्ता रतिसंयुताः विंदुयुक्ता महेशानि संवोध्य तत्पदद्वयम्
सप्तबीजानि संहारैः स्वाहांतः प्रणवादिकः तथा प्रणवं मायाद्वं
द्वं कूर्चद्वंद्वं निजबीजत्रयं दक्षिणे कालिके निजबीजत्रयं कूर्चद्वंद्वं
मायाद्वंद्वं एकविंशत्यक्षरः अस्य पूजादिकं दक्षिणावत् पुरश्चरणं
लक्षजपः होमस्तद्दशांशः स्वाहांतस्य त्रयोविंशत्यक्षरो मंत्रराजः
कः विना प्रणवं देवेशि द्वाविंशत्यक्षरो मनुः विंशत्यर्णो महावि
द्या स्वाहाप्रणववर्जितः ध्यानपूजादिकं सर्वं दक्षिणावदुपाचरे
त् प्रणवं पूर्वमुद्धृत्य लज्जाबीजमुद्धरेत रतिबीजं समुद्धृत्य सप
पंचममगान्वितम् द्वयेन समायुक्ता विद्याराज्ञी प्रकीर्तिता रति
बीजं निजबीजं तथा च चामुंडातंत्रे गुह्याकालिकाया द्वाविंशा
क्षररूपिणी इति कवचे प्रतिपादितम् तेन प्रणवो माया निजबीजं
एवं चममेकाक्षरायुक्तं वह्निवल्लभा अस्य पूजा प्रातःकृत्यादिप्राणा
यामांतं कर्म समाप्य अर्घ्यादिस्थापनं कुर्यात् अस्य मंत्रस्य भैरव ऋ
षिः विराट् छंदः सिद्धकाली ब्रह्मरूपा भुवनेश्वरी देवता निजबी
जं लज्जाबीजं शक्तिः वर्णन्यासकरांगन्यासो दक्षिणावत् ध्यानम्
ॐ खड्गोद्भिन्नेंदुबिंबस्रवदमृतरसाप्लावितां पीतितृप्तां नेत्रा सव्ये पाणौ
कपालं गलदसृजमथो मुक्तकेशी पिबंती दिग्वस्त्रा बद्धकांची मणि
मयमुकुटाद्यैर्युता दीप्तजिह्वा पायान्नीलोत्पलाभा रविशशिवि
लसत्कुंडलीलीढपादा एवं ध्यात्वा पूजादिकं दक्षिणावत्कार्यं
पुरश्चरणं त्वेकविंशतिसहस्रजपः तदुक्तं कालिकातंत्रे जपेद्धि

तं·
सा·
११९
116

शतिसाहस्रं स्वसहस्रैकेन संयुतम् होमयेत्तद्दशांशेन मद्दुग्धेष्णं म
त्रवित् प्रकारान्तरं विश्वसारे मूलबीजं ततो मायालज्जाबीजं ततः प
रम् महाविद्या महाकाल्या महाकालेन भाषिता वर्णाद्यं वह्निसंयु
क्तरतिविंदुसमन्वितम् एतत्त्रयं वह्निवल्लभा मूलत्रयं फट् वह्नि
वल्लभा निजबीजत्रयं मायायुग्मं तस्मादग्निवल्लभा वाग्बीजं नमो
मूलबीजं पुनस्तद्देवकालिकायै वह्निवल्लभा एताः सप्तमन्त्रायोमः
प्रातःकृत्यादिप्राणायामान्तं कृत्वा ऋष्यादिन्यासं कुर्यात् अस्य मं
त्रस्य दक्षिणामूर्तिः ऋषिः पंक्तिश्छन्दः श्रीकालिका देवता तद्यथा
शिरसि दक्षिणामूर्तिऋषये नमः मुखे पंक्तिश्छन्दसे नमः हृदि श्री
कालिकादेवतायै नमः ततो ध्यानम् ॐ चतुर्भुजां कृष्णवर्णां मु
ण्डमालाविभूषिताम् खड्गं च दक्षिणे पाणौ विभ्रतीन्दीवरद्वयम्
कर्त्रीं च खर्परं चैव क्रमाद्वामेन विभ्रती द्यां लिखन्तीं जटामेकां वि
भ्रतीं शिरसा स्वयम् मुण्डमालाधरां शीर्षग्रीवायामपि चापराम्
वक्षसा नागहारं च विभ्रतीं रक्तलोचनाम् कृष्णवस्त्रधरां कट्यां व्या
घ्राजिनसमन्विताम् वामपादं शवहृदि संस्थाप्य दक्षिणं पदम् वि
लाप्य सिंहपृष्ठे तु लेलिहानासवं स्वयम् साट्टहासां महाघोरारावयु
क्तां सुभीषणाम् अन्यत्सर्वं दक्षिणावत्कार्यम् अस्य पुरश्चरणे लक्ष
द्वयम् अमावास्यां वा लक्षं जपः तदुक्तं तत्रैव लक्षद्वयं जपेद्विद्यापुर
श्चरणकर्मणि अमावास्यां वा लक्षं तत्पद्धतिं पद्मयोनिना क्रीं क्रीं ह्रीं द
क्षिणे कालिके स्वाहा निजबीजं कूर्चं माया दक्षिणे कालिके वह्निव
ल्लभा क्रीं हूं ह्रीं दक्षिणे कालिके फट् मूलबीजद्वयम् कूर्चद्वयं लज्जा
द्वयं दक्षिणे कालिके पूर्ववद्बीजानि वह्निवल्लभा एषां पूजा प्रातः
कं·म कृत्यादि प्राणायामान्तं विधाय ऋष्यादिन्यासकर्म विधाय एषां दक्षि
णामूर्तिऋषिः पंक्तिश्छन्दः श्रीदक्षिणाकालिका देवता अन्यत्सर्वं ध्या
नादिकं दक्षिणावत्कार्यं निजबीजं वह्निवल्लभा अस्य भैरव ऋषिः
अमन्त्रं वैवदन् निजबीजं लज्जा दक्षिणे कालिके द्वयम् मूलबीजं

कूर्चंनिजंबीजंवह्निवल्लभा निजबीजद्वयंकूर्चबीजद्वयंलज्जाद्वयं।
वह्निवल्लभा मूलबीजंकूर्चंलज्जावह्निसुंदरी मूलत्रयंकूर्चयुग्मंल
ज्जायुग्मंवह्निवल्लभा

११६

117

मूलबीजं दक्षिणे कालिके वह्निवल्लभा निजबीजं कूर्चलज्जापुनस्ता
मेव द्वयम् मूलद्वयं कूर्चद्वयं मायाद्वयं पुनस्तान्येव वह्निवल्लभा मूल
द्वयं कूर्चद्वयं पुनस्तान्येव वह्निवल्लभा हृद्वयं वाग्भवं मूलद्वयं कालिका
येद्वयम् एतासामष्टादिकं सासंपूजादिकं च दक्षिणावत् पुरश्चरणं
लक्षजपः एतासां पूजायंत्रं कालीतंत्रे आदौ त्रिकोणं विन्यस्य त्रिकोणं
तद्बहिर्न्यसेत् ततो वै विलिखेन्मंत्री त्रिकोणत्रयमुत्तमम् ततो वृत्तं समा
लिख्य लिखेदष्टदलं ततः वृत्तं विलिख्य विधिवल्लिखेद्भूपुरमेककम्
कुमारीकल्पे मध्ये तु वै दद्याच्च कूर्चबीजं मायाविभूषितम् यंत्रं निर्माणपा
त्रं मुंडमालया ताम्रपात्रे कपाले वा श्मशानकाष्ठनिर्मिते शनिभौमदि
ने नापि शरीरे मृतसंभवे स्वर्णे रूप्ये च लोहे वा चक्रकार्यविधानतः प
ञ्चासां विद्यानां प्रमाणं विश्वसारे अथ पंचाक्षरी विद्या श्रृणुष्व कमलान
ने प्रजापतिमुद्धृत्य वह्न्यारूढं ततः प्रिये चतुर्थस्वरसंयुक्तं सर्वतंत्र
समन्वितम् बीजत्रयं क्रमेणैव तदंते वह्निसुंदरी पंचाक्षरी महाविद्या क
थिता पद्मयोनिना षडक्षरी महाकाली वक्ष्यामि श्रृणु पार्वति बीजत्र
यं समुद्धृत्य अंते मंत्रं समुच्चरेत् वह्निजायाविधिः प्रोक्ता विद्या त्रैलोक्यमो
हिनी अष्टाक्षरी महाविद्या कथ्यते श्रृणु पार्वति बीजत्रयं क्रमेणैव पुन
बीजत्रयं सुधीः स्वाहांता कथिता विद्या चतुर्वर्गफलप्रदा एकादशा
क्षरी विद्या कथ्यते श्रृणु पार्वति वाग्भवं हृदयं पश्चात् वह्न्यारूढं प्रजाप
तिम् चतुर्थस्वरसंयुक्तं नादबिंदुविभूषितम् द्विगुणं च ततः कुर्यादंते
च कालिकापदम् स्वाहांता कथिता विद्या प्रिये चैकादशाक्षरी ऋषिः
स्याद्दक्षिणामूर्तिः छंदः पंक्तिरुदाहृतम् परात्परतरा शक्तिः कालिका
देवतास्मृता एकादशाक्षरी विद्या कालिकाया सुदुर्लभा लक्षद्वयं जपा
द्विधा पुरश्चरणकर्मणि अन्यासां वर्णलक्षस्यात् कथितं पद्मयोनिना अ
न्यासामुक्तं पंचाक्षरीप्रभृतीनाम् अस्याध्यानम् चतुर्भुजां कृष्णवर्णां

तं·
मा·
११८
118

मूलंबीजंततोमायालज्जाबीजंततः परम् दक्षिणेकालिकेचेतितदं
तेवह्निसुंदरी एकादशाक्षराकालीचतुर्वर्गफलप्रदा कवचंमूलबी
जाद्यंतदंतेभुवनेश्वरीम् दक्षिणेकालिकेचेतिअस्त्रांतासमुदीरि
ता अथापरंप्रवक्ष्यामिविद्याविंशतिवर्णिकां यस्याःप्रसादमात्रेण·
भवेद्भूमिपुरंदरः मूलबीजद्वयंब्रूयात्ततः कूर्चद्वयंभवेत् लज्जायुग्मंसमु
द्धृत्यमंत्रंह्यंतेपदद्वयम् पूर्ववत्स्यात्तथाबीजान्यंतेचवह्निसुंदरी
ऋषिः स्याद्दक्षिणामूर्तिः पंक्तिश्छंदउदाहृतम् देवताकथितासद्भिः
कालीदक्षिणपूर्विका अथापरांप्रवक्ष्यामिविद्यांतांभुवनेश्वरीम्
निजबीजंसमुद्धृत्यतदंतेवह्निसुंदरी भैरवोस्यऋषिःप्रोक्तःसर्व
तंत्रसमन्वितः अष्टाक्षरीतथाप्रोक्तासर्वतंत्रेषुगोपिता निजबीज
द्वयंकूर्चयुगंलज्जायुगंततः स्वाहांताकथिताकालीसर्वकर्मफल·
प्रदा निजंकूर्चंतथालज्जातदंतेवह्निसुंदरी पंचाक्षरीमहाविद्याएं
वंवक्रऋषिःस्मृतः नवाक्षरींमहाविद्यांशृणुष्वकमलानने निजबी
जद्वयंकूर्चयुगंलज्जायुगंततः स्वाहांताकथिताविद्यासर्वशत्रुक्षयं
करी अथचाष्टाक्षरींविद्यांशृणुष्वकमलानने निजबीजंततः·
कूर्चंततोमायांसमुद्धरेत् पुनस्तान्येवचोच्चार्यस्वाहांतामोक्षदायि
नी अथापरांप्रवक्ष्यामिदशतत्त्वसमन्विताम् मूलद्वयंकूर्चयुगंतथा
लज्जाद्वयंततः पुनस्तान्येवबीजानितदंतेवह्निसुंदरी चतुर्दशाक्षरी
विद्याचतुर्वर्गफलप्रदा लज्जाद्वयंसमुद्धृत्यरतिवह्निसमन्वितम् ता
दविंदुसमायुक्तंलज्जाकूर्चद्वयंततः पुनःक्रमेणचोद्धृत्यवह्निजा·
यावधिर्मनुः षोडशीयंसमाख्याताविद्याकल्पद्रुमोपमा मायांतत्रे
ऽद्वयंवाग्भवंदेविनिजबीजयुगंततः कालिकायैततःप्रोक्तातदंतेव
ह्निसुंदरी तंत्रांतरे ॥ नमःपाशांकुशौठद्वयफट्स्वाहाकालिकालि
के दीर्घंततश्चद्वंदंकालीमनुःपंचादशाक्षर अस्याःपुरश्चरणंलक्ष
जपः एतासांसर्जनंचैवदक्षिणावत्कृतेश्वरि अथगुह्यकाली

तंत्रविश्वसारे अथ वक्ष्ये महेशानि विद्यां सर्वफलप्रदाम् चतुर्वर्गप्रदा
साक्षान्महापातकनाशिनी सर्वसिद्धिप्रदा नित्या भुक्तिमुक्तिप्रदायिनी
गुह्यकाली महाविद्या त्रैलोक्ये वातिदुर्लभा इंद्राग्निरूढं वर्गाद्यं रतिविं
दुसमन्वितम् त्रिगुणं च तथा कृत्वा ईशानं च समुद्धरेत् षष्ठस्वरसमा
युक्तं नादबिंदुविभूषितम् द्विगुणं च ततः कृत्वा ईशानद्वयमुद्धरेत् वामा
क्षिवह्निसंयुक्तं नादबिंदुविभूषितम् तद्गुह्यकालिका प्रोक्ता अथवा द
क्षिणे वदेत् सप्तबीजं पुनः पूर्वक्रमेण योजयेत् ततः वह्निजायावधिः
प्रोक्ता विद्या त्रैलोक्यमोहिनी अथवेति गुह्यका कालिके गुह्ये दक्षिणे
वामे त्र्यः कामबीजं ततः कूर्चं तदंते भुवनेश्वरी गुह्ये च कालिका वा
पि तथा बीजद्वयं भवेत् स्वाहांता कथिता विद्या सर्वतंत्रेषु गोपिता
पश्चात् षोडशी प्रोक्ता चतुर्वर्गफलप्रदा अस्यार्थः आदौ निजबीजं
कूर्चं ततो मायां ततस्संबोधनेपदद्वयम् ततो निजबीजद्वयं कूर्चद्वयं
मायाद्वयं वह्निवल्लभा कामबीजद्वयं हित्वा भवेद्विद्या चतुर्दशी अस्य
मंत्रस्येति शेषः सप्तबीजं पुरा प्रोक्तं गुह्ये च कालिके पुनः स्वाहांताक
थिता विद्या सर्वतंत्रेषु गोपिता पश्चापि चतुर्दशाक्षरी तथा चास्याना
मादियं स्यात्कादक्षिणेपदमाभाष्य भवेत्पंचदशाक्षरी तथा कामबी
जं परित्यज्य अथवा षोडशाक्षरी तेन षोडशाक्षरविद्यायाः कामबीजा
भावे पंचदशी भवति कामबीजं समुद्धृत्य संबुद्ध्यंतपदद्वयम् पुनः का
मं तदंते च दद्याद्द्वे स्त्रीं सुंदरीम् पश्चान्नवाक्षरी विद्या गुह्यकाल्यास्समवि
ता दक्षिणेपदमाभाष्य भवेद्विद्या दशाक्षरी एतासां पूजनं तु तंत्रेव
पूर्ववन्मासवर्गं तु पूर्ववत्सज्जयेद्विवाम् पूर्ववत्सजपेद्विद्यां सर्वं पूर्व
वदेव हि बलिदानं तथान्यं च पूर्ववत्परिकल्पयेत् बलिमंत्रस्तु क्लीं क्लीं
एह्येहि जगन्मातर्जगतां जननि गृह्ण गृह्ण नरु तरु स्फुर स्फुर क्षिं
दि क्षिं दि सिद्धिं देहि सिद्धिं देहि हूं फट् स्वाहा अयं वाऽसनमंत्रः ॐ
हूं सदाशिव महाप्रेताय गुह्यकाल्यासनाय गुह्यकाल्यै हूं हूं नमः
भद्रकाल्यादयो विद्याः कथ्यंते शृणु सुंदरि कामबीजादिकं सर्वं बी

नं॰
मा॰ जं ह्रं वीं पेरयजेत मङ्कालीं तथा ऐं. तां बीजमध्ये नियोजयेत स्वाहां
११९ ताकथिता विद्या विंशत्यर्णात्मिकां पराम् चतुर्वर्गप्रदा विद्या मङ्का
लीं शुभानने

119

सप्तबीजं समुद्दिष्टं श्मशानकालिकामते पुनर्बीजक्रमेणैव स्वाहान्ता
सर्वसिद्धिदा विंशत्येकाधिका विद्या श्मशानकालिकामते बीजानि वा
ग्नेरन्त्यं सर्वे महाकालिपदे ततः तदंते सप्तबीजानि स्वाहान्ता सर्वसिद्धिदा
विंशमर्णा महाविद्या महाकाल्याः प्रकीर्तिता एतासां जपपूजनं दक्षिणा
वत् विशेषस्तु भूपुरे रुद्रादीन्वज्रादींश्च पूजयेत् गृहस्य पूर्वादिद्वारे वि
ल्लशिवं सूर्यं गणेशं च पूजयेत् तथा च भूपुरे लोकपालाः सस्त्रा दक्षि
णा च तद्बहिः भूपुरे च चतुर्दिक्षु पूजयेत्क्रमतः सुधीः विल्लशिवं तथा
सूर्यं गणेशं पूजयेत्ततः यंत्रस्तु त्रिकोणं चैव षट्कोणं नवकोणं मनोहर
म् त्रिवृत्तं साष्टपत्रं च सकिंजल्कसमन्वितम् भूपुरत्रयमारुद्धयोनिमं
डलमण्डितम् त्रिपंचारमिदं चक्रं सर्वतन्त्रसमीरितम् त्रिकोणं त्रिको
णाकारमित्यर्थः ध्यानं तु महामेघप्रभां देवीं कृष्णवस्त्राप्पिधायिनीं
ललजिह्वां घोरदंष्ट्राकोटराक्षीं हसन्मुखीम् नागहारलतोपेतां चन्द्रार्ध
कृतशेखराम् आलिखन्तीं जटामेकां लेलिहानां शिवं स्वयम् नागय
ज्ञोपवीतांगीं नागशय्यानिषीदुषीम् पंचाशन्मुंडसंयुक्तवनमाला
महोदरीम् सहस्रफणसंयुक्तमनंतशिरसोपरि चतुर्दिक्षु नागफ
णावेष्टितां गुह्यकालिकाम् अष्टीविंशयरैर्नागैर्वामकंकणभूषितां
अनंतनागराजेन कृतदक्षिणकंकणाम् नागेन रसनाहारकल्पितां
रत्ननूपुराम् द्विभुजां चिन्तयेद्देवीं नागयज्ञोपवीतिनीम् नागदेहसमा
रब्धकुंडलपंक्तिमण्डिताम् प्रसन्नवदनां सौम्यां नवरत्नविभूषिताम्
नारदाद्यैर्मुनिगणैः सेवितां शिवगेहिनीम् अट्टहासां महाभीमां सा
धकाभीष्टदायिनीम् जटामेकां धारयन्तीमिति शेषः अनंतशिरसोप
रि दधतीमिति शेषः गुह्येत्युपलक्षणम् पूजादिकं तु दक्षिणाकालीव
त्सर्वं कार्यम् इति श्यामाविद्याप्रकरणम् अथ ताराप्रकरणम् ॥
अथ भेदान्प्रवक्ष्यामि तारिण्याः सर्वसिद्धिदान् येषां विज्ञानमात्रेण जी
वन्मुक्तस्तु साधकः

१२०

120

कवितां लभते शुद्धामनर्गलविजृम्भिताम् पांडित्यं सर्वशास्त्रेषु यत्ने
र्येन पतिर्भवेत् राजद्वारे सभायां च विवादे व्यवहारके सर्वत्र जयमा
प्नोति बृहस्पतिरिवापरः तथा च मत्स्यसूक्ते मायाबिंदीशसंयुक्तं द्वि ह्रीं त्रीं हूं फट् र
तीयबीजमुद्धृतम् कूर्चबीजं तृतीयं तु फट्कारं तदनन्तरम् सप्तार्णसि श्मिपंचकं ओं
द्धिमंत्रस्तु रश्मिपंचकसंयुतम् रश्मिपंचकं वर्णपंचकमित्यर्थः प्रण
वमिमं परे लीलया वाक्प्रदा चेति तेन नीलसरस्वती तारकत्वात्सदा
तारा सुखमोक्षप्रदायिनी उग्रापत्तारिणी यस्मादुग्रतारा प्रकीर्तिता
तारार्णे वसिष्ठाराधिता विद्या न त्वभीष्टफलाप्तताः अतस्तेनापि मु
निना शापो दत्तः सुदारुणः ततः प्रभृति विद्येयं फलदात्री न कस्यचि
त् चंद्रबीजं त्रपान्तस्थं बीजोपरि नियोजयेत् ततः प्रभृति विद्येयं व
धूरिव यशस्विनी फलिनी सर्वविद्यानां जयिनी जयकांक्षिणाम् वि
घ्नलयकरी विद्या अमृतत्वप्रदायिनी मंत्रस्य ज्ञानमात्रेण विजयी
भुवि जायते एकवीराकल्पेऽपि लज्जाबीजं वधूबीजं कूर्चबीजं ततः
स्त्वा विफट् एवं पंचाक्षरी विद्या प्रपंचभूतप्रकाशिनी वधूबीजं स्त्री
बीजं तथा सोऽहं शाब्जजनं वह्निवामाद्विसंयुतम् चंद्रबीजं समाख्या तकारः
तं वधूबीजमिदं स्मृतम् चंद्रः सकारः विश्वसारे सतारं च महेशा
नि वधूबीजमितीरितम् नीलतंत्रे तारायाः पंचवर्णीयं श्रीमन्नील
सरस्वती जीवनीमध्यमा पश्चादेकादीन तदनन्तरम् उग्रदर्पं ततोऽद
सर्वमायामयी शुद्धा सर्वाम्नायैर्नमस्कृता तारावर्णेऽपि अन्तरस
मुद्धृत्य मायोत्तरमतः परम् पंचमं समायुक्तं पंचरश्मि प्रकीर्ति-
तम् जीवनीमध्यमा पश्चादेकादीन तदनन्तरम् उग्रदर्पं ततोऽद्या
दशेदं देवि प्रकाशितम् एकाक्षरी सा एतेन सर्वत्र शापोद्धारः पंचा
क्षरीमधिकृत्य तंत्रे श्रीबीजाद्याप्यदा विद्या तदा श्रीसर्वतोमुखी प
चवर्णमहाविद्या मायाद्या समकलेश्वरा वाग्भवाद्याप्यदा विद्या वागी
शत्वप्रदायिनी चित्तौरेकजटा चैषा महासुक्तिकरी मता तारास्वर
हिता सार्णा महानीलसरस्वती कूलकेयं समाख्याता सर्वतंत्रेषु गो

पिता एषाक्रमगतास्वाम्नायमतभेदादनेकधा एषांपञ्चाक्षरीतदेवाह
पंचाक्षरीएकजटातारायाःश्रीमन्नीलसरस्वती अक्षरीउग्रताराचमहा
नीलसरस्वती कुलकाच अग्रमासांविद्यानांएकजटादेवताप्रकृतिवा
त् एतासांसाधनस्थानं नीलतंत्रे एकलिंगेश्मशानेवाशून्यागारेचत
ष्पथे तत्रस्थस्साधयेद्योगीविद्यांत्रिभुवनेश्वरीम् तत्रैव पंचक्रोशांतः
रेयत्रनलिंगांतरमीहते एकलिंगंसमाख्यातंतत्रसिद्धिरनुत्तमा अरण्ये
अपि भर्जेटपर्वतेवापिनिर्जनेवाचतुष्पथे देवागारेथशून्येचनिर्जने
कांतवेश्मनि वीरतंत्रे शून्यागारेश्मशानेयद्विजपतिजनस्त्रेकलिं
गेतडाके गंगागर्भगिरौवाप्युचिरमलयतिसर्वदाभक्तियुक्तः विद्या
श्रीनीलवाणीत्रिभुवनजनपतिःसर्वशास्त्रार्थवेत्तादेहांतेयोगिमुख्यः
परमसुखपदंब्रह्मनिर्वाणमेति अस्याःपूजाप्रातःकृत्यादिकंकृत्वात
त्राचमनंकुर्यात् ताराचमनंभैरवीतंत्रे ताराभेदेत्रिभिःपीत्वामायया
क्षालयेत्करम् स्त्रींहूंओंष्ठौस्वाहेतिशिखाबंधनंकुर्यात् ओंरक्षरक्षहूं
फट्स्वाहेतिजलमेकांभूमिंशोधयेत् ओंसर्वविघ्नानुत्सारयसारय
हूंफट्स्वाहेतिनाराचमुद्रयाऽस्त्रप्रक्षेपणात्त्रिविधविघ्नान्दिव्यां
तरिक्षभौमानुत्सारयेत् ओंपवित्रवज्रभूमेहूंफट्स्वाहेतिभूमिमभिमं
त्र्य तत्रकंबलकोमलविष्टराद्यासनानिपद्मासाधनान्यास्तीर्य ओंआः
सुरेखेवज्ररेखेहूंफट्स्वाहेतिगंधपुष्पादिनातमभ्यर्च्य स्वस्तिकादि
क्रमेणतत्रोपविशेत् तदुक्तंमत्स्यसूक्ते मृदुकोमलमासीनोदद्यात्सु
कंबलेऽथवा विष्टरेवासमासीनस्साधयेत्सिद्धिमुत्तमाम् कोमलल
क्षणमाहश्रीचक्रे पंचवर्षाभ्यंनंतरंयत्नात्तद्बालमतुरुकम् षण्मा
सांनंतरंयावत्कर्णमासास्रपूर्वकम् गर्भच्युतंमृतबालंगर्भोष्टमधु
रस्सरम् एतत्कोमलमित्याहुः विष्टरेष्वकुशोभवा तथावंतंत्रे नि
वृत्तचूडकोबालोहीनोपनयनःपुमान् योमृतःपंचमेवर्षेतमेवको
मलंविदुः पंचमेवर्षेपंचमवर्षेवृत्ते एकहस्तात्त्रिहस्तंवाचतुर्हस्तम
मतः विष्टरेवासनेकुर्यात्मस्कारंसृजनेत्रयः कृष्णसारव्याघ्रचा।

मांपिप्यासनम् तदुक्तम् कृत्तिशवारद्वीपिचर्मी चूरुमित्यादि विष्टरेषु
मादिकुशपत्रशतेन वटुकं निर्माय तत्र शिवप्राणप्रतिष्ठां कुर्यात् ॐ का
रेश्राः स्त्रेरे खिवज्रेरे खि ततः परम् हूं फट् स्वाहा ह्यवकं उलेचसमासने वी
रासनेनोपविश्य संस्तुत्यासनमेव च ॐ मणिधरि वज्रिणि महाप्रतिशि
वे रक्ष रक्ष हूं फट् स्वाहा इति वस्त्रान्तिके रक्षाग्रन्थिं बंधयेत् ॐ श्राः स्त्रे
रे खिवज्रेरे खि हूं फट् स्वाहा इति मापकतया कायवाक्चित्तशोधयेत्
ॐ पुष्पकेतुराजार्हते शान्ताय सम्बुद्धाय ॐ पुष्पे पुष्पे महापुष्पे सुपुष्पे
पुष्पसंभवे पुष्पवर्षावकीर्णे हूं फट् स्वाहा इति पुष्पमभिमंत्रयेत् ततः
स्वर्णादिपीठे गोरोचनकुंकुमादिलिप्ते श्राः स्त्रेरे खिवज्रेरे खि हूं फट् नमः
इति मंत्रेण यथाशुभ्र त्रिकोणगर्भाष्टदलपद्मचतुरस्रचतुर्द्वारात्मकं
यंत्रमुद्धरेत् पद्मस्य पूर्वादिदलेषु मंत्राक्षराणि लिखेत् तथा च ततः कुं
लकुशेन वपीठं निर्माय यत्नतः श्राः स्त्रेरे खिवज्रेरे खि हूं फट् स्वाहा स
मन्वितः मंत्रेणानेन संलिख्य वसुपत्रं मनोहरम् फेत्कारेय सर्यो
निं च दत्ने नाष्टपत्रं यंत्रपत्रं हृतं लिखेत् ततः महाशमंत्रसमासाद्य मायां
पूर्ववद्धालिखेत् मध्ये बीजं द्वितीयं च कुं मनोरपश्चिमे फट् मध्ये बीजं
लिखेत्तारं भूतशुद्धिमथाचरेत् द्वितीये दक्षिणे तारं हूंकारं तारं प्रण
वतात् भगाकृतिमिति भैरवीयवाक्यात् मध्ये षट्कोणांकितपद्ममि
ति केचित् तदुक्तं षट्कोणान्तर्गतं पद्मं भूबिंबं हितयं ततः चतुरस्र
चतुर्द्वारमेवं वा यंत्रमालिखेत् बीजलिङ्गं ततु पूर्ववत् नीलतंत्रे
पि सारस्वतार्थिना विशेषयंत्रमाह ओंमिं ह्रौरसनाभिकर्णिकमवां
दैः स्फुरन्तं केसरं वर्णमालाभिवसुच्छदं वसुमतीगेहेन संवेष्टितम्
ताराधीश्वरवारि वर्णविलसद्दिक्कोणसंशोभितं यंत्रं नीलतनोः प
रं निगदितं सर्वार्थसिद्धिप्रदम् एवं वा यंत्रं विलिख्य पीठमर्चयेत् तथा
च कुमारीकल्पे ततोऽर्घ्यपात्रं विन्यस्य हारपात्रं समर्चयेत् गं बीजाद्य
गणेशानं वामाद्यं वटुकं तथा क्षामाद्यं क्षेत्रपालं च यामाद्यां योगिनीं त
था पूर्वे वामे दक्षिणे च पश्चिमे च प्रपूजयेत् तंत्रे ते सर्वे पुर्वदीक्षायाः श

तं·
सा·
१२२
122

क्लिंबीजपुरःसरं पीठस्यपूर्वद्वारे ॐह्रींगांगणपतयेनमः पीठस्य
दक्षिणे ॐह्रींवटुकायनमः पीठस्यपश्चिमे ॐह्रींक्षांक्षेत्रपालायन
मः पीठस्योत्तरे ॐह्रींयांयोगिनीभ्योनमः ततोमध्येश्मशानायनमः
कल्पवृक्षायनमः तन्मध्येमणिपीठायनमः नानालंकारेभ्योनमः
मुनिभ्यःदेवेभ्यः बहुमांसास्थिमोदमानशिवाभ्योनमः चतुर्दिक्षु
शवमुण्डचितांगाराद्यस्थिभ्योनमः सर्वत्रप्रणवादिनमोन्तेनयजेत् अष्ट
दलेषु अग्न्यादि ॐलक्ष्म्यैनमः सरस्वत्यैनमः रत्यैनमः प्रीत्यैनमः
कीर्त्यैनमः कान्त्यैनमः पुष्ट्यैनमः तुष्ट्यैनमः प्रणवादिनमोन्तेनपूज
येत् तन्मध्ये ह्सौः सदाशिवमहाप्रेतासनायनमः तदुक्तंसिद्धसारस्वते
लक्ष्मीसरस्वतीचैवरतिःप्रीतिस्तथैवच कीर्तिःकान्तिश्चपुष्टिश्चतुष्टि
रित्यष्टशक्तयः देव्यानीलसरस्वत्याःपीठशक्तयईरिताः वीरतंत्रे त
न्मध्येपूजयेद्देव्यावाहनेशवमेवच ततोभूतशुद्धिंकुर्यात् तथाहि स्वा
गे उत्तानौकरौकृत्वा हंसइतिमन्त्रेणकुण्डलिनीजीवात्मानंवैलोम्य।
नचतुर्विंशतितत्त्वानिसुषुम्णावर्त्मनापरमतेजसिसंयोज्य कुम्भके
न क्लींकारंरक्तवर्णं नाभौध्यात्वातदुद्भूतेनाग्निनालिंगशरीरंसंदह्य
स्त्रीकारंपीतवर्णंहृदिविचिंत्यतदुद्भूतेनवायुनाभस्मप्रोत्सार्य देव
केन हूंकारंश्वेतवर्णंशिरसिविचिन्त्य तदुद्भूतेनामृतेनातदस्थिसावि
तंकृत्वाममत्वमपगतदुष्टाविष्टशरीरमाप्लावयेत् तथाचश्रुतिः
षट्त्रिंशत्तत्त्वानिशरीरमिति ततआत्मानमपगतमथनिर्मलंदे·
वतामभेदेनध्यायेत् तस्मिन्विश्वव्यापकेवारिणिआःकारादूर्ध्वंपंक
जं तदुपरिनीलसन्निभंहूंकारंध्यात्वा हूंबीजमूर्षितांकर्तृकांध्या
येत् तदुपरिदेवतां श्रींक्लींक्रींस्वाहेत्येकादशवारंजपेत् प्राण
प्रतिष्ठांपुनर्ध्यायेत् तदुक्तंफेत्कारिण्यां माथांतामोरक्तवर्णंध्यात्वा
तज्जातवह्निना शुष्कवर्णात्मकंदेहंदग्धंसंचिंतयेत्ततः स्त्रीकारंम
दिपीताभंतदुद्भूतेनवायुना भस्मप्रोत्सारणंकृत्वाललाटेचिंतयेत
तः कूंचंद्रसारवर्णाभंतदुद्भूतामृतेनच तदस्थिसाविंतकृत्वात·

दात्मानं विचिंतयेत् भूतशुद्धिं विधायेत्थं स्वात्मविशुद्धं विचिंतयेत्
निर्लेपं निर्गुणं शुद्धमात्मानं देवतामयम् अंतरिक्षे ततो ध्यायेदः
काराद्रक्तपंकजम् भूयस्तस्योपरि ध्यायेट्टकाराद्रक्तपंकजम् ता-
स्योपरि शून्यं ध्यायेत् हूंकारं नीलसन्निभम् ततो हूंकारं स्वकारं पश्ये-
त्कर्त्रीं कालीबीजभूषिताम् खर्वां लंबोदरीं भीमां व्याघ्रचर्मावृतां कटौ
नवयौवनसंपन्नां पंचमुद्राविभूषिताम् चतुर्भुजां ललज्जिह्वां महा-
भीमां वरप्रदाम् खड्गकर्तृसमायुक्तसव्येतरभुजद्वयम् कपा-
लोत्पलसंयुक्तसव्यपाणियुगान्विताम् पिंगोग्रैकजटां ध्यायेन्मौ-
लावक्षोभ्यविभूषिताम् बालार्कमंडलाकारां लोचनत्रयभूषिताम्
प्रज्वलत्पितृभूमध्यगतां दंष्ट्राकरालिनीम् सावेशस्मेरवदनां स्मा-
लंकारविभूषिताम् विश्वव्यापकतोयांतः श्वेतपद्मोपरिस्थितामि-
त्यादिना ध्यायेत् पंचमुद्राविभूषितामिति ललाटे श्वेतास्थिपटि-
काचतुष्टयान्वितकपालमंचतयान्वितामित्यर्थः श्रीशंकराचार्ये-
णाप्युक्तं विचित्रास्थिमालां ललाटे कपालपंचान्वितां धारयंतीं
मिति ततः प्राणायामः वामनासापुटेन मूलं चतुर्वारं जप्त्वा वायुं पू-
रयेत् तदनु नासापुटे धृत्वा षोडशवारेण कुंभयेत् तदनु दक्षि-
णनासापुटेनाष्टकावर्तनेन रेचयेत् पुनर्दक्षिणेनापूर्य वामेन रेच-
येत् पुनर्वामेनापूर्य दक्षिणेन रेचयेत् इति मूलप्राणायामत्रयं
भवति ततः ऋष्यादिन्यासः शिरसि अक्षोभ्यऋषये नमः मुखे बृ-
हतीछंदसे नमः हृदि श्रीमदेकजटादिदेवताभ्यो नमः मूलाधा-
रे हूं बीजाय नमः पादयोः फट् शक्तये नमः शेषाण्यक्षराण्युद्धार्य
सर्वांगे कीलकाय नमः तदुक्तं वीरतंत्रे अक्षोभ्यऋषिरेतस्याः बृह-
तीछंद ईरितः नीलासरस्वतीदेवी त्रिषु लोकेषु गोपिता हूं बीजम-
स्त्रशक्तिः स्याच्चतुर्वर्गफलप्रदा ततः कालीतंत्रोक्तमातृकान्यासः
तथाचोक्तं अथ कालीतथा नीलातत्क्रमां मातृकां न्यसेत् तद्यथा
अं आं इं ईं उं ऊं ऋं ॠं ऌं ॡं हृदि एं ऐं ओं औं अं अः कं खं गं घं नमो दत्तम्

तं॰ जे उं॰ वं बं जं फं जं टं ठं डं ढं नमो वामभुजे णं तं थं दं धं नं पं फं बं भं न
सा॰ मो दक्षिणजंघायां मं यं रं लं वं शं षं सं हं लं क्षं नमो वामजंघायां त
१२२ तः कराङ्गन्यासो ह्रां अखिलवाग्रूपिण्यै अङ्गुष्ठाभ्यां नमः ह्रीं अखे
123 रुवाग्रूपिण्यै तर्जनीभ्यां स्वाहा ह्रूं ब्रह्मवाग्रूपिण्यै मध्यमाभ्यां वष
ट् ह्रैं विष्णुवाग्रूपिण्यै अनामिकाभ्यां हुम् ह्रौं रुद्रवाग्रूपिण्यै क
निष्ठाभ्यां वौषट् ह्रः सर्ववाग्रूपिण्यै करतलपृष्ठाभ्यां फट् एवं
हृदयादिषु तथा च तारामधिकृत्य सिद्धसारस्वते अखिलवाग्रू
पिणी प्रोक्ता हृदयाय नमो भवेत् अखेरुवाग्रूपिणी चेति शिरसे वा।
ह्निवल्लभा ब्रह्मवाग्रूपिणी प्रोक्ता कवचाय क्रमाच्चरेत् रुद्रवाग्रू
पिणी नेत्रत्रयाय वौषडित्यपि सर्ववाग्रूपिणी मुक्ता अस्त्राय फडिति।
स्मरेत् षड्दीर्घमायया चैव बीजान्ते चाभियोजयेत् इत्यादिक्रया
न् षड्दीर्घमायया चैव बीजान्ते चाभियोजयेत् अङ्गुलिनियमस्तु
पूर्वैर्वा क्रमः अथ तन्नीलसरस्वतीपक्षे सर्वत्र ह्रां ह्रां एकजटायै अं
गुष्ठाभ्यां नमः ह्रीं तारिण्यै तर्जनीभ्यां स्वाहा ह्रूं वज्रोदके मध्यमा॰
भ्यां वषट् ह्रैं उग्रजटे अनामिकाभ्यां हुं ह्रौं महाप्रतिसरे कनिष्ठि
काभ्यां वौषट् ह्रः पिङ्गोग्रैकजटे करतलपृष्ठाभ्यां फट् एवं हृद॰
यादिषु न्यसेत् तथा च एकजटामधिकृत्य नीलतन्त्रे बीजान्ते एक
जटायै हृदयं परिकीर्तितम् तारिण्यै शिरसे तद्वज्रोदकशिखा ततः
उग्रजटे कवचं महाप्रतिसरे तथा पिङ्गोग्रैकजटे तद्वन्नेत्रास्त्रं परिकी
र्तितः षड्दीर्घया मायया च बीजान्ते नाम योजयेत् इत्यादि पूर्ववत्
षड्दीर्घया मायया च बीजान्ते नाम योजयेत् अत्र वर्णन्यास पीठन्या
सो क्रमादेवं केवलम् अत्रोक्तमाचरेन्न्यासषट्कं नामानि संचरेद्बुधः
फलार्थिनां तारायाः षोढान्यासः कर्तव्यः स तु कालीषोढावत् ततो
मूलमन्त्राद्यविशिरआदिपर्यन्तं हृदयादिषु सर्वं विन्यस्य व्यापकत्रयं न्यसे
त् ततो बहिर्ध्यानम् तद्यथा स्ववामे मूलाधारे त्रिकोणे वृत्तचतुर
स्रं मण्डलं कृत्वा तेन वज्रपुष्पेणाभ्यर्च्य तत्र माधारपात्रं निधाय मूलविद्या॰

याजलादिनाऽर्घ्यं मूलाधिष्ठानमात्रेण जलमधिष्ठाय रक्तचंदनवि
ल्वपत्राक्षतादीन्निक्षिप्य अर्घ्यस्य अग्नीशानैर्ऋतवायुमध्ये दिक्षु च
ह्रां आं विलवाग्नूपिण्यै हृदयाय नम इत्यादि ह्रीं एकजटायै नम इत्या
दिना षडंगानि विन्यस्याऽर्घ्यपात्रं मत्स्यमुद्रयाऽऽच्छाद्य मूलं दशधा ज
पेत् दश कृत्वो जपेदिति यां देवताभावसिद्धये तज्जलं तेजोमयं विभाव्य
तज्जलं किंचिन्मात्रं निक्षिप्य तेनोदकेनात्मानं पूजोपकर
णानि रक्षस्युजामारभेत् भूतशुद्धिं ततः फेत्कारीये भूतशुद्धिं
विधाय स्यमर्घ्यादि स्थापनं चरेत् प्राणायामं ततः कृत्वा न्यासादिक
समाचरेत् ततः पुष्पांजलिं विन्यस्यात्माभेदेन देवीं ध्यायेत् ततो ध्या
नम् ॐ प्रत्यालीढपदार्पितांघ्रिशववहृद्घोराट्टहासा परा खड्गेन्दी
वरकर्त्रिखर्परभुजा हुंकारबीजोद्भवा सर्वा नीलविशालपिंगल
जटाजूटैकनागैर्युता जाड्यं न्यस्य कपालके त्रिजगतां हन्त्युग्रतारा
स्वयम् एवं विभाव्य करकलितं पूर्वोक्तं रक्तचंदनमिलितदिनकर
किरणारुणकुसुमांजलिमात्मकायं तं ध्यात्वा हृदयान्मूलमंत्रेण ते
जोमयीं सुषुम्णावर्त्मना ज्ञानमयीं षट्चक्रभेदेन शिरःस्थितं सहस्रदलक
मलकर्णिकान्तर्गतपरमशिवं प्रापय्य क्रियासमभिहारेण तदमृ
तां तृप्तां विश्राम्य तदमृतलोलीभूतां चैतन्यानंदमयीं तां प्रवहन्त्या
सा सुषुम्णया निर्यातीं तां अंजलिस्थिताम् पुष्पे आरोप्य ततः पुष्पप्र
तिमादौ नियापयेत् देवेशि भक्त्या सकलं परिवारसमन्विते याव
त्त्वां पूजयिष्यामि तावत्त्वं सुस्थिरा भव ततः पूर्वोक्तक्रमेणावाहना
दिकं कृत्वा आं ह्रीं क्रों स्वाहेति प्राणप्रतिष्ठां कृत्वा श्रीमदेकजटे
वज्रपुष्पं प्रतीच्छ हूं फट् स्वाहा इममनेन षोडशोपचारेण पंचोपचारे
णवा पूजयेत् अस्याः प्रयोगः आदौ मूलमंत्रं ततः एतन्मंत्रं इदं द्रव्य
मम कर्त्तव्ये नमः तथा च फेत्कारिण्यां श्रीमदेकजटे पुष्पकाव वज्रपु
ष्पं प्रतीच्छ च तारादिवह्निजायान्तमुदीर्य यजनं चरेत् तारः कूर्चनमा
दिः हुं फडितिमंत्रः स्वाहान्तं वह्निजायान्तमेति ततो योनिमुद्रां प्रदर्श्य देव्या

तं॰
सा॰ नाथय भगवन्माः परिवारान्पूजयामीति प्रार्थ्यावरणं पूजयेत् यथा॰
१२४ केसरेषु आग्नीशासुरवायुमध्येदिक्षु षडंगानि पूजयेत् आग्नेय्यां
क्रां एकजटायै हृदयाय नमः ऐशान्यां ह्रीं तारिण्यै शिरसे स्वाहा नै
124 ऋत्यां हूं वज्रोदके शिखायै वषट् वायव्ये ह्रैं उग्रजटायै कवचाय॰
ॐ मध्ये ह्रौं महाप्रतिसरे नेत्रत्रयाय वौषट् चतुर्दिक्षु क्रः पिंगोग्रै
कजटे अस्त्राय फट् नीलसरस्वतीपद्धतेत् क्रां अखिलवाग्रूपिण्यै
हृदयाय नमः इति षडंगानि पूजयेत् देव्या मौलौ ॐ अक्षोभ्य वज्र
पुष्पं प्रतीच्छ ॐ फट् स्वाहेति संपूज्य पीठस्यान्तरे वायव्यादीशपर्यंतं
गुरुपंक्तिं पूजयेत् ऊर्ध्वकेशानंदनाथ वज्रपुष्पं प्रतीच्छ हूं फट् स्वा
हेति तथाचैफकारोय वज्रपुष्पं प्रतीच्छेति हूं फट् स्वाहेति मंत्रतः
एतन्मंत्रे नाममात्रभिन्ना ह्येव न संशयः अनेन मन्त्रेण सर्वान्परिवा
रान्समर्चयेत् सर्वत्रादौ प्रणवः एवं व्योमकेशानंदनाथ नीलकं
ठानंदनाथ वृषध्वजानंदनाथ एते दिव्यौघाः वसिष्ठानंदनाथ कू
र्मनाथानंदनाथ मीननाथानंदनाथ महेश्वरानंदनाथ हरिनाथा
नंदनाथान्पूजयेत् एते सिद्धौघाः एवं तारावत्येव भानुमत्येव जं॰
यांच विद्यांच महोदर्यैव सुखानंदनाथ परानंदनाथ पारिजाता
नंदनाथ कुलेश्वरानंदनाथ विरूपाक्षानंदनाथ फेरवंच इति पू
जयेत् एते मानवौघाः तथाच अथ तारागुरून्वक्ष्ये दृष्टादृष्टफलप्र
दान् ऊर्ध्वकेशो व्योमकेशो नीलकंठो वृषध्वजः दिव्यौघाः सिद्धिदा
वत्स सिद्धौघांश्च शृणु तत्त्वतः वसिष्ठः कूर्मनाथश्च मीननाथो महेश्व
रः हरिनाथो मानवौघानथ वक्ष्यामि तद्गुरून् तारावती भानुमती ज
यविद्या महोदरी सुखानंदः परानंदः पारिजातः कुलेश्वरः विरूपाक्षः
फेरवी च कथितं तारिणीकुलम् आनंदनाथशब्दांता गुरवः सर्वसि
द्धिदाः स्त्रियोपि गुरुरूपाः स्युरंबांताः परिकीर्तिताः अष्टाक्षरेद्दलो
भ्यमात्रं पूजयेत् ततः पूर्वादिदलमूले महाकालाख्य रुद्राणी उग्रा
भीमा तथैव च योगा च भ्रामरी चैव महारात्रिश्च सप्तमी अष्टमी भैरवी

प्रोक्तायोगिमण्डलाः प्रपूजयेत् ततः पूर्वादिचतुर्दले वामावर्तेन वैरोच
नशंखपाण्डुरपद्मनामिताभान्पूजयेत् आग्नेयादिकोणदलेषु मामकां
मामकपाण्डुरवतारान्पूजयेत् पूर्वादिद्वारचतुष्टयेषु वामावर्तेन पद्मा
न्तकयमान्तकविघ्नान्तकनरकान्तकवैत्रेणादि पूजयेत् तथाच सिद्धसा
रस्वते वैरोचनं तथा शंखपाण्डुरं पद्मनामकम् आस्थितांगं यजेन्मंत्रं दिक्षु
तद्वच्चतुर्दले नामकमामकं चैव पाण्डुरं तारकं तथा वह्न्यादिषु चतुः
कोणे मन्त्रैः स्वैः स्वैः क्रमाद्यजेत् द्वारपूर्वादितस्तद्वत्पद्मान्तकयमा
न्तकम् विघ्नान्तकं तथाभ्यर्च्य पूजयेन्नरकान्तकम् तथाच सिद्धसार
स्वते वामावर्तक्रमेणैव पूजयेदंगदेवताः ततः स्ववामे त्रिकोणे पूर्वव
त्रश्रमण्डलं कृत्वा पुष्पैस्तमभ्यर्च्य ततो विहितद्रव्यभरितं साधारपात्रं
निधाय तद्वामाङ्गुष्ठानामिकाभ्यां धृत्वा ह्रीं एकजटे महायक्षाधि
पतये नमः उपनीतं बलिं गृह्ण गृह्ण गृह्णापयेत् मम सर्वशान्तिं
कुरु कुरु परविद्यामाकृष्यमाकृष्य त्रुट त्रुट छिंधि छिंधि छिंधि ह्रीं स्वाहे
ति त्रिः पठित्वा बलिं दद्यात् तथाच सिद्धसारस्वते प्रणवं पूर्वमुद्धृत्य
हृल्लेखां च ततः परम् एकजटेपदं तत्र महाशब्दमुदीरयेत् यक्षादि
पदमाभाष्य पतये पदं ते नमः उपनीयपदं चोक्त्वा बलिं गृह्णेति नाद्वि
या गृह्णापय द्विधा प्रोक्तो मम सर्वपदं तथा शान्तिं कुरु पदं चैव परा
विद्यामनन्तरम् द्विधाकृष्येति च क्रमात् त्रुटिछिन्दीति च द्विधा मायास्वा
हेति मन्त्रोऽयं वस्वादो बृहद्विदः स्मृतः ततो रहस्यमालया निगदितोपां
शुनामानेनमनेन वाष्टोत्तरसहस्रशतं जपेत् तथाच अष्टोत्तरशतं
जाप्यं यावज्जीवितसंख्यया सहस्रं वा जपेद्देवि नित्यपूजाविधौ पुनः
अशक्तस्त्रिंशत्यान्यूनेन न जपेत् तथाच सहस्रं शतं विंशं वा जपेद्
रहस्यमालया अत्र जपरहस्यं यथा मूलाधारस्वाधिष्ठानमणिपूरके
षु यथासंख्यं बीजत्रयमाकिंतडित्कोटिकरालां परस्परानुस्मरतां वि
भाव्य सर्वं तेजोमयं फट्कारं विश्रान्तिरूपं ध्यात्वा चरेत् तथाच नील
तन्त्रे मन्त्रध्यानं प्रवक्ष्यामि जपेत्सर्वत्रदायकम् मन्त्रध्यानान्महेशानि

तं॰
सा॰ निगद्यते ब्रह्म हा ततः मूलचक्रे च हृल्लेखां सूर्यकोटिसमप्रभाम् स्वा
१२५ धिष्ठाने पीतवर्णां द्वितीयं तु विभावयेत् नाभौ जीमूतसंकाशं कूर्चबी
जं महाप्रभम् अस्त्रबीजं हृदि ध्यायेत् कालाग्निसदृशप्रभम् मूलादिब्रह्म
125 रन्ध्रान्तं सर्वां विद्यां विभावयेत् सूर्यकोटिप्रतीकाशां योगिभिर्दृष्ट
पूर्विकाम् एवं यथाशक्ति जप्त्वा जपसमर्पणादि विसर्जनान्तं कर्म समा
पयेत् अस्याः पुरश्चरणं लक्षसंख्यजपः तथा च एवं कृत्वा हृविद्या
श्रीजपेल्लक्षमनन्यधीः तथा रुद्राक्षमालामादाय लक्षमेकं सदा ज
पेत् रुद्राक्षमालया यथा अकस्माद्धि हितासिद्धिर्महाशंखाक्षमालया
महाशंखोद्भवे स्फाटिकीमालाक्षतथा तथा महाशंखेऽप्यशक्तश्चेत्
स्फाटिकीमालया जपेत् तारामन्त्रे कुल्लुकाया ज्ञानमस्यावश्यकत्व
म् तथा च मत्स्यसूक्ते कुल्लुकां च न जानाति महामन्त्रं जपेन्नरः पंच
त्वं जायते तस्य वाथवा वातुलो भवेत् मायातन्त्रे कुल्लुकं धारयेद्धी॰
धीमान् लिखित्वा भूर्जपत्रके राजद्वारे सभायां च विजयी भवति ध्रुवम्
एवमुक्ते न जप्त्वा तु तद्दशांशेन तु होमतः तद्दशांशं तर्पणं च तद्दशां
शेन ब्राह्मणभोजनम् ततो गुरुदक्षिणामाचरेत् तदुक्तं सिद्धसार
स्वते एवं जप्यं यथा कृत्वा दशांशमसितोत्पलैः आज्यपात्रैर्जुहुयात्कं
श्रीतद्दशांशेन तर्पयेत् कालागुरुद्रवोपेतैर्निर्मितैर्गन्धवारिभिः त
र्पयेच्च परां देवीं तत्सकारहोमतः जले चावाहविधिवत्स्नानाद्येक
दकात्मकैः संतर्प्य विधिवद्देवीं परिवारान्समन्ततः अभिषेको
यथा देवीं तु ध्यात्वा स्वमात्मानं सम्पूज्य साधको नमः तारिणीं सिंचयामी
ति जलं मूर्ध्नि विनिक्षिपेत् अथ मन्त्रभेदा एकवीराकल्पे लिखितस्य
तं च कूर्चं समायुक्तं रौद्रं तद्गुणमेव च विधिविष्णुमहेशानां स्वशक्त्याक्र
गणप्रणवं विधिशक्तिर्वीणाभवं विष्णुशक्तिः रमाबीजं महेशशक्ति
भुवनेश्वरीबीजं ध्यानार्चनप्रयोगश्च तारिण्याः पूर्ववद्भवेत् प्रणवं
भुवनेश्वरीं ह्रां कूर्चबीजं नमस्तारायै सकलदुःस्तरं ताराय तारय
ॐ ह्रीं हां हूं नमस्तारायै सकल दुःस्तरं ... तारय ॐ स्वाहा २२

प्रणवं युग्मं स्वाहा तथा च नीलतंत्रे प्रणवं पूर्वमुद्धृत्य पश्चाल्लेखो बीजं
समुद्धरेत् गगनं शेषसंयुक्तं बिंदुनादविभूषितम् कूर्चबीजं च हृदयं
तारायै च समुद्धरेत् सकलं तु ततः तारय तारयेति तथा पुनः तारयुग्मं
वह्निजायामंत्रोयं सर्वपापदः ध्यानपूजादिकं सर्वं पूर्ववत् समुपाचरेत्
ग्रस्ताग्रस्तरणं च तल्ले तज्जपः तदुक्तं तत्रैव वल्कले तज्जपेनास्यास्ति
द्वयोरेको भवतीति हि मायातंत्रे श्रीभगवानुवाच तारा चोग्रा महोग्रा च
वज्रा नीला सरस्वती कामेश्वरी भद्रकाली चेत्यष्टौ तारिण्यः स्मृताः
कृष्णवर्णगतो जीवो निगमस्वरसंयुतः बिंदुनादसमाक्रान्तस्तत्वराशि
समन्वितः कपिलो वामकर्णस्थो नादाढ्यो बिंदुशेखरम् पार्श्वान्तवत्
ध्यातं तत्शास्त्रेषु परिकीर्तितम् मध्यादिमायाकवचे द्वितीयं मंत्रं
समुद्धृतम् विपरीतं त्रिया ज्ञेयं कूर्चाद्यं च तृतीयकम् मायादिकवचा
न्तं च पंचमं परिकीर्तितम् मायामध्यगतं षष्ठं द्वितीयान्तं च सप्तमम्
अष्टमं कवचं मध्ये स्यादेवं भेदाष्टकं भवेत् कृष्णवर्णो रेफः जीवो
हकारः निगमस्वरः ईकारः तत्वराशिर्वधूबीजं कपिलो हकारः प्र
वामहृ फडन्ते तेन पंचाक्षरः फडन्तश्चेदेकाविद्या तेन पंचाक्षरः प्रकृ
तिः मध्यादीति तेन वधूः माया कूर्चबीजं फट् विपरीतमिति तेन कू
र्चं वधूः माया फट् कूर्चेति कूर्चं माया वधूः फट् मायादीति तेन माया
वधूः फट् कूर्चं मायेति तेन वधूः माया फट् कूर्चं द्वितीयेति तेन मा
या कूर्चं फट् वधूः अष्टमेति वधूः कूर्चं माया फट् ऋषिः स्यादष्टक
स्याद्रोसनुष्टुप्छन्दस्तथा शंभुपत्नी महेशानी देवता वै प्रयोजयेत्
कालतत्वं जपेन्मंत्रमेवमुक्तेन वर्त्मना ध्यानपूजादिकं सर्वं पूर्वव
त् अष्टाक्षरस्यैव भेदोयं फट्दोयं तेन तत्रैव जपेत् अष्टाक्षरेष्वयं मासे
सर्वं प्रतिष्ठितम् प्रणवं तारे तुत्तारे तुरे वह्निवल्लभा तदुक्तं गायत्र्ये
प्रणवं पूर्वमुद्धृत्य तारे तुत्तारे तथा तुरे स्वाहेति मंत्रोयं दशाक्षर उदा
हृतः अक्षोभ्यानेस्य तंत्रे तंत्रे श्यामवर्णां त्रिनयनां द्विभुजां वरयं क
जे दधानां वर्णाभिः कृपाभिराट्टनाम् शक्तिभिः संस्मरेद

ह्रीं स्त्रीं हूं फट् स्त्रीं ह्रीं हूं फट् हूं स्त्रीं ह्रीं फट् हूं ह्रीं स्त्रीं फट् ह्रीं स्त्रीं फट् हूं स्त्रीं ह्रीं फट् हूं
स्त्रीं हूं फट् स्त्रीं स्त्रीं हूं ह्रीं फट्

ॐ नमो रत्ने रत्नेश्व... ... फट् ... ह्रीं ॐ ऐं ह्रीं फट् स्वाहा ८

नौस्मेरमौक्तिकभीषणम् रत्नपादुकयोर्मध्ये स्वपादांबुजयुग्मं स्मरेत्
अस्याः पूजादिकं सर्वं पूर्ववत् पुरश्चरणं दशलक्षजपः तदुक्तं तत्रैव
वर्णलक्षं जपेद्धोमान्नियमेन यथाविधिः दशांशं जुहुयान्मंत्री च
तालकेरकपुष्पकैः वाग्भवं भुवनेश्वरी फट् स्वाहा तदुक्तं मातृकार्ण
वे वाग्भवं कुलदेवीं च तारकं वाग्भवं तथा हृल्लेखां वास्त्रमंत्रान्ते वा
ह्निजायावधिर्मनुः अष्टाक्षरो मनुः प्रोक्तो वेदमातरनुत्तमः पंचांगा
न्यस्य मंत्रस्य पंचबीजैः प्रकल्पयेत् अस्य पीठादौ सर्वस्य कृतकृत्यो भ
वेन्नरः ध्यानपूजादिकं सर्वं पूर्ववच्च समाचरेत् मत्स्यसूक्ते प्रणवं सर्वा
मुह्रस्य पस्यु रमं तथैव च महापद्मपदं ब्रूयात्स्वभावतिपदं ततः स्वा
येत्यसेति मंत्रोयं प्रोक्तः सप्तदशाक्षरः पूजापूर्ववदुद्दिष्टा पर्यायांत्र वत्
स्यैव जपमस्याचरेद्यस्तु सस्यादुत्तकविस्तथा हंसः प्रणवं मायावर्णं
हूंकं हंसः पंचाक्षरीच या विद्यां हंसाद्यंतां महोदया तदुक्तं स्वच्छंदसं
ग्रहे शिवबीजं महेशानि शक्तिबीजं ततः परम् बिंदुसर्गसमायुक्तौ
वेदाद्यंतद्वयः क्रमात् मायां ह्रीं वर्मबीजं मं हंसबीजमुदाहृतम् प
मानसोऽक्षरीविद्या कथिता भुवि दुर्लभा पंचाक्षरीचमाविद्या हंसा
द्यंतां महोदया केवलं त्वत्प्रसादेन नवस्वेहास्य कीर्तिता अनयोश्च
पूजादीन् पंचाक्षरीवदाचरेत् अथ रहस्यपुरश्चरणं यथा अथवा
न्यप्रकारेण पुरश्चरणमाचरेत् कुजे वा शनिवारे वा भवत्तं समा
हृतम् पंचगव्येन मिलितं चंदनाद्यैर्विशेषतः निक्षिप्य भूमौ रहस्था
र्थमानतः कानने वने तत्र तद्दिवसे रात्रौ सहस्रं यदि मानतः एकाकी
ध्याने शवमानीय तद्धारिते नैव परिरक्षमच तद्दिनात्तद्दिनं यावत्रा
वद्दृष्टा नरं शतम् संभवेत्सर्वसिद्धीशो नात्र कार्या विचारणा अ
थवान्यप्रकारेण पुरश्चरणमिष्यते अष्टम्यां च चतुर्दश्यां पक्षयो
रुभयोरपि सूर्योदयं समारभ्य यावत्सूर्योदयान्तरम् तावज्जप्त्वा
निशान्तं कस्सर्वसिद्धेश्वरो भवेत् अथवान्यप्रकारेण पुरश्चरणमि

ॐ पद्मपद्म
पद्मपद्मा
वतिमायै स्वाहा

हंसः ॐ ह्रीं
ह्रूं हंसः ५

ष्यते शरत्काले चतुर्थ्यादिनवम्यंतं विशेषतः भक्तितः पूजयित्वा तु रा
त्रौ तावत्सहस्रकम् जपेदेकाकी विजने केवलं तिमिरालये अष्टम्या
दिनवम्यंतमुपवासपरो भवेत् गुरुमालां तत्र कृष्णाष्टम्यां समारभ्य
यावत्कृष्णाष्टमी भवेत् सहस्रं संख्यानमेतत्पुरश्चरणमिष्यते कृष्णा
चतुर्दशीं प्राप्य नवम्यंतं महोत्सवे अष्टमीनवमीरात्रौ होमं कुर्याद्धि
शेषतः दशम्यां पारणं कुर्यात् मत्स्यमांसादिभिस्ततः षट्सहस्रं जपे
न्नित्यं भक्तिभावपरायणः चतुर्दशीं समारभ्य यावत्कृष्णपक्षगो भवेत्
विषमारे पूजास्थाने विनिक्षिप्य नरमुंडं तत्र हृदयके कोमलासनमा
स्थाय पूजयेत्परदेवताम् षट्सहस्रप्रमाणेन प्रत्यहं किं न सिद्ध्यति
अथ वीरसाधनम् तत्र कृष्णे वा तत्र अष्टम्यां च चतुर्दश्यां पक्षयोरुभ
योरपि कृष्णपक्षे विशेषेण साधयेद्वीरसाधनम् तत्रादौ प्रथमेया
मे गते वरसुंदरि शवं वापि चितां वापि नीत्वा गत्वा यथाक्रमम्
साधयेत्साधितं मंत्री मंत्रध्यानपरः शुचिः मंत्रेणैव च कर्तव्यं महास्त्रा
सं विवर्जयेत् चतुर्दिक्षु न वीक्षेत मंत्रमेव समभ्यसेत् अथ पूजाद्र
व्यम् सामिषान्नं गुडं छागं सुरापायसपिष्टकम् नानाफलं च नैवे
द्यं स्वस्वकल्पोक्तसाधितम् चितास्थाने समानीय स्वहृद्भिः शस्त्रपा
णिभिः समानगुणसंपन्नैः साधकः वीतभीः स्वयम् तथा च योगिनी
हृदये बल्यर्थं सामिषान्नं च गुडं छागं तथा मधुः पिष्टकं परमान्नं च
पयो मूलफलं तथा समर्पयेत्तु बलिं कृत्वा चतुष्पथे चतुर्दिशि पात्रं च।
यं समदासच्छंच्याप्य तमनुनामुना गुरुं वा भ्रातरं वापि ब्राह्मणान्वा।
पि सुव्रतान् असमानापि वा रात्रौ किंयदूरे निवेदयेत् चितालक्ष
णं यथा असंस्कृता चिता ग्राह्या न च संस्कारसंस्कृता चंडालादिषु सं
प्राप्ता केवलं शीघ्रसिद्धिदा अथ चाधिकारिलक्षणम् महाबलो महाबु
द्धिर्महासाहसिकः शुचिः महाधैर्यो दयावांश्च सर्वभूतहिते रतः त
तः सामान्यार्घं विधाय स्वस्तिवाचनं कृत्वा संकल्पं कुर्यात् अद्येत्यादि अ
मुकगोत्रः अमुकदेवशर्मा अमुकमंत्रसिद्धिकामः श्मशाने साधनम्।

हूंकरिणी इति संकल्प्य वस्त्रालंकारभूषाद्यैर्भूषितः पूर्वसंमुखः अस्त्रा
ते मूलमंत्रेण प्रोक्षणं यागभूमिषु मूलमंत्रेण फट्कारान्तेन ततः पुष्पा
ञ्जलिं क्षिपेत् गुरुपादरजो ध्यात्वा गणेशं बटुकं तथा योगिनीमातृ
कांश्चैव वामपार्श्वप्रसंस्मरम् अस्त्रमंत्रेण चात्मानं संरक्षयथा अस्त्रमं
त्रेणं मंत्रज्ञो रक्षामात्मनि कारयेत् तदुक्तं वीरतंत्रे ये चात्र संस्थिता दे
वा रात्रौ मांसभयानकाः पिशाचाः सिद्धयो यक्षा गंधर्वाप्सरसां गणाः
योगिन्यो मातरो भूता सर्वाश्च खेचरस्त्रियः सिद्धिदास्ता भवन्त्वत्र
था च मम रक्षकाः प्रणम्य मनुनानेन पुष्पाञ्जलित्रयं क्षिपेत् श्मशाना
धिपतिं पश्चाद्भैरवं कालभैरवम् महाकालं यजेद्यत्नात्सर्वीदिदिक्क॰
तुष्टये पाद्यादिभिस्त्वमंत्रैस्तो बलिं पश्चान्निवेदयेत् शक्तिबीजं ततः प
श्चात् श्मशानाधिपतत्परम् गृह्ण गृह्णापय हं हं विघ्ननिवारणं प
दम् कुरु सिद्धिं मम युतं प्रयच्छ स्वाहान्त्यान्वितम् प्रणवाद्येन मनुना प्र
थमो बलिरीरितः मांसान्तो भैरवास्यश्चाद्दुयानक ततः परम् श्मशाना
धिपइमं पूर्ववद्बलिमुच्चरेत् पूर्ववद्बलिमुद्दिश्य दक्षिणे बलिमाहरेत्
हूंमनेन च महाकालाय स्वस्मात्पूर्ववदुद्धरेत् पश्चिमे कालदेवाय प्रणवाद्यं
न कल्पयेत् शाक्तान्ते कालशक्तान्ते भैरवेति ततः परम् श्मशानाधिपइमं
वपूर्ववच्चान्तरे हरेत् तद्यथा श्मशानाधिपतिं पंचोपचारैः संपूज्य अनेन
मंत्रेण बलिं दद्यात् तद्यथा ॐ हूं श्मशानाधिप इमम् आमिषान्न बलिं गृ
ह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कुरु सिद्धिं मम प्रयच्छ॰
स्वाहा ततो भैरवं पूर्ववत्संपूज्य दक्षिणस्यां दिशि ॐ ह्रीं भैरव भयानक
इमं बलिमित्यादि पश्चिमे कालभैरवं पूर्ववत्संपूज्य ॐ हूं महाकाल
श्मशानाधिप इमं बलिमित्यादि उत्तरद्वारे ॐ हूं कालभैरव श्मशानाधि
प इमं बलिमित्यादि चितामध्ये ततो दद्याद्बलित्रयमनुत्तमम् कालरा
त्रि महाकालि कालिके घोरनिःस्वने गृह्णीमं बलिं मातर्देहि सिद्धि
मनुत्तमाम् कालिकायै बलिं दत्त्वा भूतनाथाय दापयेत् शाक्तान्ते भूत
नाथाने श्मशानाधिप इत्यपि प्रणवाद्येन मनुना दापयेद्बलिमुत्तमाम्

हूंफाहूंतेसर्वगणानार्थानिवाधिपायच श्मशानमस्तकेदत्वासर्वव।
चसमुद्धरेत् ताराद्येनबलिंदत्वापंचगव्येनसंस्कृद्य अद्भिस्संप्रोक्षणं
कृत्वापीतवस्त्रमासेत ततः भूर्जेवावटपत्रेवातत्रपीठमनुमासेत पीठ
मास्तीर्यतस्मिन्नेवदृढवीरासनंततः वीरार्दनेनदेवेशिरक्षादिकंप्रक
ल्पयेत् अस्यार्थः भूर्जपत्रादौततत्कल्पोक्तपीठमंत्रंलिखित्वातत्र
व्याघ्रचर्मादिपीठमास्तीर्य तत्रवीरासनक्रमेणोपविश्य वीरार्दना॰
मंत्रेणचतुर्दिक्षुरक्षांकुर्यात् वीरार्दनमंत्रस्तु हूंहूंह्रींह्रींकालिके
घोरदंष्ट्रेप्रचंडेचंडनायिकेदानवान्दारयहनहनशवशरीरेमहावि
घ्नंछेदयछेदयहूंफट्स्वाहा अनेनमंत्रितंलोष्टंदशदिक्षुविनिक्षिपे
त् तन्मध्येभैरवंदेवानविघ्नैःपरिभूयते तथाचनीलतंत्रे कूर्चयुग्म
ततोदेविमायायुग्मंततःपरम् कालिकेघोरदंष्ट्रेचप्रचंडेचंडनायिके
दानवान्दारयेत्युक्त्वाहनेतिद्वितयंततः छिंधातोवर्मचास्त्रांतोवीरार्द
नमनुर्मतः यदिप्रमादाद्देवेशिसाधकोभयविह्वलः ततस्तैलेनस्व
दृष्टैर्गैरक्षितेनाभिभूयते सितार्कसितवर्दालतैलेवर्तिकांनिर्मा
य तत्रदीपंसंस्थाप्य देव्यस्त्रेभ्योनमः इत्यस्त्रंसंपूज्य अथपश्चात्कु
लदीपकंनिवेदयेत् तथाच अर्कतूलसितवर्दालतैलेनिर्मितवर्तिकं
प्रदीपंतत्रसंस्थाप्यचास्त्रंतत्रप्रपूजयेत् हेतेनास्मिन्महादीपविघ्नै
स्सपरिभूयते तदयस्त्रास्त्रमंत्रेणनिवेद्येकुलदीपकम् ततस्तत्कल्पो
क्तभूतशुद्ध्यादिन्यासजालंविधायेष्टदेवतांसंपूज्यसंकल्पमात्रंजपे
त् संकल्पस्तु ॐअद्येत्यादिअमुकगोत्रःअमुकदेवशर्माअमुकमं
त्रसिद्धिकामःअमुकमंत्रस्यामुकसंख्याजपमहंकरिष्येइतिसंक
ल्प्य देवताध्यानपुरस्सरंमंत्रंजपेत् तथाच ततत्कल्पविधानेन॰
भूतशुद्ध्यादिकंचरेत् षोडावतारकंवापिविन्यसेत्प्रजयेततः मंत्र॰
ध्यानपरोभूत्वाजपेन्मंत्रमनन्यधीः जपनियमस्तु प्रकारांतरंयदिभ
वेदिकसहस्रंननोजपेत् प्रहरेष्टसहस्रंतुअपरेवायुतार्धकम
अतःपरंतुमंत्रज्ञोगजांतकसहस्रकम् निशायांवासमारभ्यचोद

तं॰
सा॰
१२८
128

यांतं समाचरेत् गजांतकमष्टोत्तरसहस्रकम् यदा सहृदयं कर्णे नेत्रे
वा स्नेणावहूयेत् ततोर्धरात्रपर्यंतं यदि किंचिन्न लभ्यते जयदुर्गाख्य
मनुना तेनैव सर्षपान्क्षिपेत् ॐ दुर्गे दुर्गे रक्षिणि स्वाहा ॐ तिलोसि
सोमदैवत्यो गोसवत्सृष्टिकारकः पितॄणां स्वर्गदाता त्वं मर्त्यानां मम
रक्षकः भूतप्रेतपिशाचानां विघ्नेषु शांतिकारकः इति पठित्वा ई
शानादि चतुर्दिक्षु तिलानाक्षिपेत् ततस्तमपदं गत्वा पुनस्तत्रैव वसे
द्विशेत् पुनर्देवतां समुद्दिश्य जपेत् ततो यदि वरं वरयेद्वदेत् तदा
सांमुख्यं कारयेत् तथा च वरं वरय इत्युक्ते साधकः स्थिरमानसः सत्यं च
कारयित्वा तु वरयेद्वांछितं मम जपादौ तु वलिं दत्वा पश्चादपि वलिं हु
रेत् जपांते जपमध्ये वा देहि देहीति भाषिते तदापि च वलिं दद्यान्मांसादि
कं वापि छागलम् वलिं च यद्यपि ष्टेन यदा वलिं प्रार्थयेत्तेन रं ॐ जर
मेव वा दिनांतरे शुद्धात्मा स्वामिस्वीकृतमस्त्र गृहं व्रजेत् अथ परेद्युस्ततो द
द्यात्पिष्टेन नरं ॐ जरान् पिष्टेनेति यवोद्भवया माउद्भवेन सत्यः तथा
वंतं ग्रांतरे यवद्रोणमयं वापि शालिद्रोणमयं च वा वंदहोमेन विधि
वत्तन्मंत्रेणाचातयेत् यागिनो हृदये जपांते च वलिं दद्याद्देवताया य
थाविधि मांसादिकं छागलं वापि गृहीत्वा वरमेव च गृहं गच्छेत्ततः सह
दामात्यं संहृष्टमानसः ततो दक्षिणां दद्यात् समाप्य साधनं देविद
क्षिणां विभवावधि गुरवे गुरुपुत्राय तत्स्त्रीभ्यो वा निवेदयेत् अथ शव
साधनम् स्थाननियममाह भावचूडामणौ शून्यागारे नदीतीरे पा
र्वते निर्जने पि वा बिल्वमूले श्मशाने वा तत्समीपे रणस्थले अष्ट
म्यां च चतुर्दश्यां पक्षयोरुभयोरपि भौमवारे तमिस्रायां साधये
त्सिद्धिमुत्तमाम् समांसमन्नं वल्यर्थं धूपदीपादिकं तथा तिलाः कु
शाः सर्षपाश्च स्थापनीयाः प्रयत्नतः गृहीत्वा तत्र गत्वा तत्र शवेनैव च
स्पर्शयेत् अथ पूर्वोक्तासनस्थाने गत्वा सामान्यार्घ्यं विधाय पूर्वं
सुवेमूलेनाफट्कारं दत्वा यागभूमिं संप्रोक्ष्य गुरुं गणेशं वटुकं यो
गिनीश्च पूर्वादिक्रमतः दिक्षु संपूज्य पूर्वोक्तवीरार्दनमंत्रं मूलमौ विलि

ख्य येचात्रेमादिपूर्वोक्तवीरार्दनमंत्रेणाभ्युक्ष्य पुष्पांजलित्रयं दत्वा प्रा
णास्य शमशानाधिपतिभ्यः पूर्वोक्तमंत्रेण पूर्ववद्बलिं दत्वा अघोरमंत्रे
ण शिखाबंधनं विधाय स्वदर्शनमंत्रेण आत्मानं रक्षयेदिति हृदिह
स्तदत्वात्मरक्षां कुर्यात् अघोरस्वदर्शनमंत्रोत्र ह्रीं स्फुर स्फुर प्रस्फु
र प्रस्फुर तनतनरूप चट चट प्रचट प्रचट कह कह वम वम बंध बंध घा
तय घातय हूं फट् स्वाहा ॐ सहस्रारहूं फट् ततः पूर्वोक्तमंत्रेणाभ्यु
क्ष्य हृदिमासजालं विसस्पजयदुर्गामंत्रेण दिक्षु सर्षपान्विकीर्य ति
लोसीतिमंत्रेण तिलांश्च विकीर्य विदितशिवसमीपं गच्छेत् विहि
तशिवो यथा तदुक्तं भावचूडामणौ यष्टिविद्धं शूलविद्धं खड्गविद्धं
पयोमृतम् वज्रविद्धं सर्पदंष्ट्रं चंडालेनापि मृतकम् तरुणं सुंदरं
शूरं बाणेन हतं समुज्वलम् पलायनविशून्यं च संमुखं रणवर्तिनं
भैरवतंत्रेपि यष्टिप्रहृतिविद्धं वा चापि मृतं जले मृतम् शवमा
नीयकर्तव्यं नाहरेत्स्वेच्छया मृतम् स्त्रीवश्यपापतितानस्पर्शनयवा
ओहितवरम् अव्यक्तलिंगं कुष्टं वा दुष्टं भिन्नं शिवं हरेत् तदुर्भिक्ष
मृतं वापि न पर्युषितमेव वा स्त्रीजनं वेटशं रूपं सर्वथा परिवर्ज
येत् कालेतंत्रेपि बलिणं चामयं त्यक्त्वा साधयेद्वीरसाधनम् म
हाशवाः प्रशस्तास्तु: प्रधाने वीरसाधने तद्रूः प्रयोगकर्तॄणां।
प्रशस्ताः सर्वसिद्धये एवमुक्तं शवं गृहीत्वा मूलमंत्रेण पूजास्था
नमानयेत् तत्समीपं गत्वा ॐ फडिति शवमभ्युक्ष्य ॐ हूं मृतका
यनमः फडिति पुष्पांजलित्रयं दत्वा शवं स्पृष्ट्वा प्रणमेत् तदुक्तं भा
वचूडामणौ प्रणवाद्यस्तं मंत्रेण शवस्य प्रोक्षणं चरेत् प्रणवं कू
र्चबीजं च मृतकाय नमः स्मरेत् फट् पुष्पांजलित्रयं दत्वा प्रणमेत्स्या
ष्टीपूर्वकम् प्रणाममंत्रस्तु वीरेशपरमानंदशिवानंदकुलेश्वर आ
नंदभैरवाकार देवीपर्यंकशंकर वीरोहं त्वां प्रपद्यामि चोत्तिष्ठ चंडि
कार्चने अनेन मंत्रेण प्रणम्य क्षालयेत् ॐ हूं मृतकाय नमः अने
न क्षालयित्वा सुगंधिजलेन स्नापयित्वा वाससा जलमुत्तोल्य र

तं॰
सा॰ पैर्धूपितं कृत्वा चंदनादिना शवं विलिप्य शवस्य कटिदेशे धृत्वा पू
१२९ जास्थानमानयेत् तदुक्तं कालीतंत्रे तारं शत्रे मृतकाय नमोऽन्तमं
उच्चरेत् शवस्नानमंत्रोयमित्यादि भावचूडामणौ धूपेन धूपितं
129 कृत्वा गंधादिना प्रलिप्य च रक्ताक्तो यदि देवेशि भक्त्येत कुलसाध
नम् ततः कुशशय्यां कृत्वा पूर्वशिरः कृत्वा शवं स्थापयेत् तदुक्तं
तत्रैव कुशशय्यापरिस्कृते तत्र संस्थापयेत्परम् एलालवंगकर्पू
रजातीखदिरसार्द्रकम् तांबूलं तन्मुखे दत्वा कुर्याच्छिवमधोमु
खम् स्थापयित्वा तत्पृष्ठे चंदनेन विलिप्यते तालमूलादिकं सत
चतुरस्रं विधाय च मध्ये पद्मं चतुर्द्वारं दलाष्टकसमन्वितम् पी
ठमंत्रं लिखेन्मध्ये तत्र कल्पविधानतः ॐ ह्रीं फडिति मंत्रेण तत्र
कल्पोक्तपीठमंत्रं लिखेत् तदुपरि कंबलाद्यासनं न्यसेत् तत्रां
तरे गत्वा शवस्य सान्निध्यं धारयेत्कटिदेशतः यद्युर्ध्ववक्त्रं संस्था
पयेत्तस्य मुखे दद्यान्निष्ठीवनं शिवे पुनः प्रक्षालनं कृत्वा जनस्थाने॰
समानयेत् ततो द्वादशांगुलयज्ञकाष्ठानि दशदिक्षु पूर्ववत्संस्था
प्य तत्र क्रमेणैव दशदिक्षु देवताः संपूज्य सामिषान्नबलिं दद्यात्
तदुक्तं तंत्रांतरे द्वादशांगुलमानानि यज्ञकाष्ठानि दिक्षु च संस्था
प्य पूजयेत्तत्र चैवाद्यादिदश देवताः तत्राद्यक्रमः ॐ लां इंद्राय सुराधि
पतये ऐरावतवाहनाय वज्रहस्ताय शक्तिपारिषदाय सपरिवारा
य सवाहनाय नमः इत्यादिभिः संपूज्य बलिं दद्यात् लामिंद्राय वसं
लिमिन्द्रसुराधिपतये नमः इमं बलिं गृह्ण युग्मं गृह्णापय युग्मं ततः
विघ्ननिवारणं कृत्वा सिद्धिं प्रयच्छ हृदयम् अनेन मनुना पूर्ववद्बलिं
दद्यात्समामिषम् स्वस्वनामादिकं कृत्वा पूर्ववद्बलिमाहरेत् सर्वे
षां लोकपालानां ततः साधकसत्तमः ॐ लां इंद्राय सुराधिपतये
इमं बलिं गृह्ण गृह्ण गृह्णापय गृह्णापय विघ्ननिवारणं कृत्वा
मम सिद्धिं प्रयच्छ स्वाहा पयमाषभक्तबलिः इंद्राय स्वाहा । ॐ रं
अग्नये तेजोधिपतये मेषवाहनाय शक्तिसहिताय साधुध्याय सप

रिवाराय सवाहनाय नमः इति पूर्ववत्संपूज्य बलिं दद्यात् अनेन
ॐ रं अग्नये तेजाधिपतये सायुधायेत्यादिना बलिं दद्यात् २ ॐ यं
यमाय प्रेताधिपतये दंडहस्ताय महिषवाहनाय सपरिवारायेत्या
दिना गंधादिना संपूज्य बलिं दद्यात् अनेन मंत्रेण ॐ यं यमाय प्रेता
धिपतये सायुधायेत्यादिना बलिं दद्यात् ३ ॐ ह्रां निर्ऋतये रक्षो
धिपतये खड्गहस्ताय श्ववाहनाय सपरिवारायेत्यादिना पूर्ववत्
ॐ ह्रां निर्ऋतये रक्षोधिपतये सायुधायेत्यादिना बलिं दद्यात् ४ ॐ
वं वरुणाय जलाधिपतये पाशहस्ताय मकरवाहनाय सपरिवा
रायेत्यादिना पूर्ववत्संपूज्य ॐ वं वरुणाय जलाधिपतये सायुधा
येत्यादिना पूर्ववद्बलिं दद्यात् ५ ॐ यं वायवे प्राणाधिपतये हरि
णवाहनायांकुशहस्ताय सपरिवारायेत्यादिना पूर्ववत्संपूज्य ॐ
यं वायवे प्राणाधिपतये सायुधायेत्यादिना पूर्ववद्बलिं दद्यात् ६
ॐ कुं कुबेराय यक्षाधिपतये गदाहस्ताय नरवाहनाय सपरिवारा
येत्यादिना पूर्ववत्संपूज्य ॐ कुं कुबेराय यक्षाधिपतये सायुधाये
त्यादिना बलिं दद्यात् ७ ॐ हां ईशानाय भूताधिपतये शूलहस्ता
य वृषवाहनाय सपरिवारायेत्यादिना पूर्ववत्संपूज्य ॐ हां ईशाना
य सायुधायेत्यादिना बलिं दद्यात् ८ इंद्रेशानयोर्मध्ये ॐ आं ब्र
ह्मणे लोकाधिपतये हंसवाहनाय पद्महस्ताय सपरिवारायेत्या
दिना पूर्ववत्संपूज्य ॐ आं ब्रह्मणे लोकाधिपतये सायुधायेत्यादिना
बलिं दद्यात् ९ निर्ऋतिवरुणयोर्मध्ये ॐ अं अनंताय नागाधिपतये च
क्रहस्ताय रथवाहनाय सपरिवारायेत्यादिना पूर्ववत्संपूज्य ॐ अं
अनंताय नागाधिपतये सपरिवारायेत्यादिना पूर्ववद्बलिं दद्यात् १०
ततः सर्वभूतबलिं दद्यात् सर्वत्र मासमिश्रान्नेन बलिं दद्यात् ततोधि
ष्ठानदेवेभ्यो बलिं मयपाचहरेत ततः षष्टियोगिनीभ्यां डाकिनी
भ्योपि संहरेत् अथ पूजासामग्रीसमीपे हरेचोत्तरे संस्थाप्य मूलां
ते ह्रीं फट् दिव्याय नमः इत्यादिनासनं संपूज्य ह्रीं फट् इति मूलमुच्च

तं॰

सा॰ रेन अघोरेण क्रमेण शवोपर्युपविश्य तस्य पादतले कुशान्दत्त्वा

१२॰ शवकेशान् प्रसार्य जूटिकां बद्ध्वा गुरुं गणपतिं देवीं च नमस्कृत्य

प्राणायामषडङ्गन्यासौ कृत्वा पूर्वादिक्रमेण दशदिक्षु लोष्टं नि

130 क्षिप्य संकल्पं कुर्यात् संकल्पो यथा अद्येत्यादिना अमुकगोत्रः

अमुकदेवशर्मा अमुकदेवतासन्दर्शनकामः अमुकमन्त्रस्यामु

कसंख्याजपमहं करिष्ये इति संकल्प्य ॐ ह्रीं आधारशक्तिक

मलासनाय नमः इत्यासनं संपूज्य तस्य वामतः शवसमीपे अर्घ्य

पात्रादिकं संस्थाप्य शवजूटिकायां पीठपूजादिकं कृत्वा षोडशो

पचारैः पंचोपचारैर्वा देवीं संपूज्य शवमुखे देवीं गायत्र्यादिना संतर्प

येत् ततः शवादुत्थाय सम्मुखे विगत्वा मंत्रं पठेत् यथा वशो मे भव दे

वेश मम वीरसिद्धिं देहि देहि मम भागकृताश्रयपरायण ततः

पटसूत्रस्य रज्वा शवचरणौ दृढं बंधयेत् मूलेन मद्वशी भव देवे

श वीरसिद्धिकृतास्पद भीमभीरुभयाभाव रम्यलोचन भावुका

ग्राहिं मां देवदेवेश शवानामधिपाधिप अनेन शवस्य पादतले

त्रिकोणं यंत्रमुल्लिखेत् ततः शवोपर्युपविश्य हस्तद्वयं पार्श्व

योः प्रसार्य तदुपरि कुशान्दत्त्वा तत्र स्वपादौ निधाय पुनः प्राणा

यामं शिरसि गुरुं हृदि भ्रूमध्ये देवीं ध्यात्वा ॐ इष्टां संपुटीकृत्वा वि

हितमालया मौनी भूत्वा विगतभीर्जपं कुर्यात् अत्र श्मशानसा

धनेन जपः कार्यः यद्यर्धरात्रपर्यन्ते किंचिन्न लक्ष्यते तदा पूर्ववत्

लेविकराणं सम्मुखपदगमनं कृत्वा जपं कुर्यात् भये जाते मसेवं वदेत्

शवादूर्ध्वं यनात्मिभये जाते मंत्रं वदेत् ततः यत्प्रार्थयसि बलिं ते दा

नेत्रं कुंभादिकम् दिनान्तरे प्रदास्यामि स्वनाम कथयस्व मे इत्थ

कासंस्कृतेनैव निर्भयस्य पुनर्जपेत् ततश्चेन्मधुरं वक्ति वक्तुकामं

मधुरं ततः ततः समंकाद्यित्वा वरं त्वं प्रार्थयेत् ततः यदि सत्यं न क

शेति वरं वा न प्रयच्छति तदा पुनर्जपेत् हीमानेकाग्रमानसं यथा

अयमर्थः यदि जपकाले [illegible] पुनः कुर्यात् वरं प्रार्थयेत् तं॰

रादिनांतरेयष्पणामिमस्यानेकथयेत्तस्मात्पुनर्जपेत् यदिस्वनाम
मधुरंकथयति तदात्वममुकइतिसत्यंकुरुकुसेसत्येवरंप्रार्थयेत्
यदिकदापिसत्यंनकरोतिवरंवानप्रयच्छति तदापुनर्जपेत् सत्यं
कृतेवरंलब्ध्वासंत्यजेच्चजपादिकम् फलजातमितिज्ञात्वाजूटि।
कांमोचयेत्ततः शवंप्रदात्वंसंस्थाप्यमोचयेत्पादबंधनम् पाद
वकंमोचयित्वापूजाद्रव्यंजलेक्षिपेत् शवंजलेतगर्तेवानिदि
प्यस्नानमाचरेत् ततस्तत्स्वगृहंगत्वाबलिंदद्यात् दिनांतरे मंत्रस्तु ग्र
ग्निसरात्रौयजमानोऽहंतेगृह्णामिइमंबलिम् मत्स्यैधाचितावस्था
नरकुंजरसूकरान् दत्वापिष्टमयंयत्नेनकर्तव्यमसत्पुरुषाणाम् परेद्यु
नित्यक्रियांकृत्वापंचगव्यंपिबेत्ततः पंचविंशतिसंख्याकान्ब्राह्म
णान्भोजयेत्ततः परेद्युर्नित्यमाचार्यंपंचगव्यंपिबेत्ततः सप्तपंच
विहीनात्वाकर्मणोवदशावधि तत्रस्नात्वावभुक्त्वाचनिवसेत्तुततम
स्थलम् यदिनस्याद्विप्रभोजनंतदानिर्धनंताव्रजेत् नेनचेन्निर्धनंव
स्यात्तदादेवीप्रकुप्यति त्रिरात्रंवाथषड्रात्रंनवरात्रंतगोपयेत् स्त्री
शय्यांयदिगच्छेत्तत ···मापिविनिर्दिशेत् गीतश्रुत्वात्तवधिरानि
स्वल्लन्नस्पर्शनात् यदिवक्त्रिदिनेर्वाक्यंतदास्यमूकताभवेत् पं
चदशादिनंयावद्देविदेवस्यसंस्थितिः नस्त्रीकुर्यात्देहंयपुष्पंयद्ददाति
यदायदा तदावस्त्रपरिसज्यगृह्णीयात्तस्नानांतरम् गोब्राह्मणावि
निंद्राचनकुर्याच्चकदाचन उर्जनंपतितंक्लीवंनस्पृशेच्चकदाचन
देवगोब्राह्मणादीश्चप्रणमेत्संस्पृशेच्छुचिः प्रातःकृत्यक्रियांतेच
बिल्वपत्रोदकंपिबेत् ततःस्नात्वातुगंगायांप्रातेयोऽशवासने स्ना
संतमंत्रशुद्धायितर्पणेनानमःपदम् पर्वशावत्रयाराध्यदेवाःसंतप
पञ्जलैः स्नानतर्पणप्रत्ययस्यतस्माद्देवस्यतर्पणम् इत्यनेनविधाने
नसिद्धिंप्राप्नोतिमानवः इदमुक्तावरान्भोगानंतेयातिहरेःपदम्
ततोदक्षिणांदत्वाछिद्रावरणंकुर्यात् इतिशवसाधनप्रकरणम्
सप्तविद्याभेदा तत्रकुब्जिकातंत्रे ॥ प्रणवंचततोमायांकूर्चंवीजस

मुद्धरेत् शिवाय फडितिप्रोक्तश्चंडोग्रोयं महामनुः चंडोग्रस्य शूलपा
णेरयं सर्वार्थसाधकः अस्य ब्रह्मर्षिर्गायत्रीछंदश्चैव प्रकीर्तितः
मायाबीजं कूर्चं शक्तिर्देवश्चंडोग्र ईरितः षड्दीर्घभाजा बीजेन प्रा
णवाद्येन कीर्तितम् ॐ ह्रीं हूं शिवाय फट् इति चंडोग्रमंत्रः ध्यानं
शुद्धस्फटिकसंकाशं चंद्रांककिरीटिनम् शूलं कपालं दधतं
वामे तु पाशमंकुशम् सुरापानरसाविष्टं साधकाभीष्टदायकम्
इत्यादि ध्यात्वा सम्पूज्य देवेशं पंचसहस्रं मनुं जपेत् दशांशं मधूकै
र्वह्नौ फलेन रक्तोत्पलेन च त्रिमध्वाक्तेन लभ्यते कवितायन भाग्यमेव
त् रक्तपद्मस्य होमेन महतीं श्रियमाप्नुयात् पायसस्य च होमेन
वाक्स्तंभं जायते ध्रुवम् शुक्लपद्मस्य होमेन मोहयेदखिलं जगत्
षट्कोणाष्टदलं पद्मं मध्ये मूलं प्रपूज्य जपेत् केवलं शुद्धभावेन हवि
ष्याशी दिवा जपेत् पुरश्चरणमात्रेण न च विघ्नैर्विलिप्यते अस्यैव
जपमात्रेण सर्वसिद्धिमुपालभेत् इति चंडोग्रशूलपाणिपरिच्छेदः
वामकेश्वरतंत्रे अथ वक्ष्ये महेशानि मातंगीं सर्वसिद्धिदः अस्या
पासनमात्रेण वाक्सिद्धिं लभते ध्रुवम् प्रणवं च ततो मायां काम
बीजं च कूर्चकम् मातंगि ङेयुताश्च वह्निजायावधिर्मनुः अस्य
दक्षिणामूर्तिऋषिर्विराट्छंदः प्रकीर्तितः मातंगी देवता देवी सर्व
सिद्धिप्रदायिनी अंगन्यासकरन्यासौ कुर्यान्मंत्री समाहितः षड्
दीर्घभाजा बीजेन प्रणवाद्येन कल्पयेत् षट्कोणाष्टदलं पद्मं लि
खेन्मंत्री मनोहरम् तत्र पूजा प्रकर्तव्या जपापुष्पाणि मंत्रवित् अ
ष्टशक्तीश्चैव दलेष्वर्चयेत्सुसमाहितः रतिप्रीतिर्मनोभवा क्रिया
शुद्धा च शक्तयः अनंगकुसुमानंगमदना मदनालसा इत्यष्टश॰
कौसुंभवस्त्रपुष्पोपचारसमन्विताः ततो देवीं परां ध्यात्वा साधकः स्थि
रमानसः श्यामांगीं शशिशेखरां त्रिनयनां

ॐ ह्रीं क्लीं हूं
मातंग्यै फट्
स्वाहा मातं
गीमंत्रः

एवं ध्यात्वा महादेवीं गन्धपुष्पैर्मनोरमैः नैवेद्यैस्तु महादेव्यै पायसं
शर्करान्वितम् पुरश्चरणकाले षट्सहस्रं जपेन्मनुम् तद्दशांश
हुनेदाज्यशर्करामधुभिस्सह ब्रह्मतरूद्भवैः काष्ठैः साधकः शक्ति
भिस्सह एवं पुरस्क्रियां कृत्वा प्रयोगविधिमाचरेत् वनमध्ये श्मशा
ने वा कलामध्ये वा मान्त्रिकः मत्स्यमांसं पायसं च दद्याद्धूपं च गुग्गुलं
रात्रियोगेन कर्तव्यं मासमात्रं प्रशिष्य साधकः एवं प्रयोगमात्रेण कवि
त्वं जायते ध्रुवम् अग्निस्तम्भं जलस्तम्भं वाक्स्तम्भं जायते ध्रुवम्
मन्त्री जयति शास्त्रेषु नानाभाषाकुलं यथा शास्त्रवादे कवित्वे च बृ
हस्पतिरिवापरः अनेनैव विधानेन मातङ्गी सिद्धिदायिनी नूनं त
हस्मागमकुशलैर्दीयते वश्यः विना मन्त्रैर्विना मांसैर्नैवेद्यैः सर
देवता नाम अथोच्छिष्टचण्डालीमन्त्रः उच्छिष्टचण्डालिनी ततः सुमुखी
देवी महापिशाचिनी लज्जाबीजं तथा च ठंठंठं ततस्तु फट्कारि
णीं उच्चार्योच्छिष्टशब्दं ततश्चाण्डालिनी ततः सुमुखीति त
तो देवी कीर्तयेत्तदनन्तरम् महापिशाचिनी पश्चाल्लज्जाबीजं त
तः परम् नादबिन्दुसमायुक्तं ठकारत्रितयं पुनः सविसर्गं महादे
वि सर्वसिद्धिप्रदायकम् मन्त्रान्तरं तथा यथा उच्छिष्टचण्डालिनि मातङ्गि
सर्ववशंकरि नमः स्वाहा तथा च तन्त्रान्तरे अथ वोच्छिष्टचण्डालिमा
तङ्गिपदमीरयेत् ततः सर्ववशं चान्ते करि द्वन्द्वं च वल्लभा एको
नविंशत्या वर्णैः सर्वाभीष्टकरो भवेत् मन्त्रदेवप्रकाशिकायाम्
वाग्भवं माया कामः सौः ऐं उच्छिष्टमातङ्गि नमामि उच्छिष्टचण्डालिनि
त्रैलोक्यवशंकरि स्वाहा इति मन्त्रः इमां विद्यां जपेच्छान्तिका परा कु
समाश्रिता इयं विद्या महाविद्या सर्वपापहारिणी सर्वदा मोह
दा चैव तथा सौभाग्यदायिका यां यां प्रार्थयते सिद्धिं दद्यात्तां तामवा
प्नुयात् विधानं च प्रवक्ष्यामि शृणु देवि वरानने भोजनान्तं देवि
नैवाचमने कृते बलिं दत्वा प्रथमतो मूलमन्त्रेण साधकः ततो मं
त्रं जपेद् ध्यात्वा देवीं नामिष्टसिद्धये बलिमुच्छिष्टेन तथा नसिथिने

तं.
सा. वनतंत्रनवंगान्यासमपवच्च नारिदोषो न वा विघ्नं न शौचं नियमो न च
१३२ यस्मात्तिष्ठति मंत्रोयं न च विघ्नैः स बाध्यते पीठोपरि समासीनां रक्तां·
132 बरपरिष्कृताम् रक्तालंकारसंयुक्तां गुंजाहारविभूषिताम् षोडशा
ब्दां च युवतीं पीनोन्नतपयोधराम् कपालकर्तृकाहस्तां परां ज्यो
तिःस्वरूपिणीम् वामदक्षिणयोगेन ध्यायेन्मंत्रवित्तमः उच्छिष्टे
न बलिं दत्वा ध्यायेत्तद्गतमानसः उच्छिष्टेन च कर्तव्यो जपो ऽस्याः सि·
द्धिमिच्छता उच्छिष्टजपमानस्य जायते सर्वसिद्धयः अथ परं च प्रवक्ष्या
मि शृणु देवि फलप्रदम् होमं च तर्पणं चैव सर्वकामार्थसिद्धये स्थ
ण्डिले मंडलं कृत्वा चतुरस्रं समंततः पूजयेन्मंडले देवि मूलमंत्रेण
साधकः ततो मूलमुच्चार्य मंडलाय नमः इति मंत्रेण ततो वह्निस्व
रूपां देवतां ध्यात्वा होमयेत् तथा च ततो देवीं समादाय वह्निरूप
व्यवस्थिताम् देवीं ध्यात्वा चरेद्धोमं दीर्घसिद्ध्यर्थं तंडुलैः सहस्रमा
त्रहोमेन राजा तद्वशगो भवेत् मार्जारस्य तु मांसेन देव्या होमं स·
माचरेत् स प्राप्नोति परां विद्यां सर्वशास्त्रवशीकृताम् ऊर्ध्वच्छाग
स्य मांसेन होमं मधुसमन्वितम् सहस्रैव विधानेन न भवंति फल
सिद्धयः विद्याकामश्चरेद्धोमं शर्करायुतपायसैः नूनं तस्य भवेत्स
वसंघो विद्याश्चतुर्दश विल्वपत्रैर्हुताद्देवि सौभाग्यं सुखदायकम्
रजस्वलाया वस्त्रेण मधुना पायसेन च होमं कृत्वा महादेवि त्रैलो
क्यं वशमानयेत् इत्येष कथिता देवी सर्वपापप्रणाशिनी मंत्रस्या
स्मरणाद्देवि सर्वपापप्रणाशिनी उच्छिष्टरूपिणं कृत्वा स पवित्रो भ
वेद्ध्रुवम् अत्र यद्यपि पुरश्चरणं नोक्तं तथाप्यष्टोत्तरसहस्रं जपः त
द्दशांशहोमादिकं बोद्धव्यम् तथा च येषां जपे च होमे च संख्या नोक्ता
मनीषिभिः तेषामष्टसहस्राणि संख्या स्याज्जपहोमयोः इत्यभिधा
नादष्टसहस्रमष्टोत्तरसहस्रम् अस्याः सिद्धविद्यात्वात् स्मरणं ना
मीलिति निबंधकारः इत्युच्छिष्टचांडालीपरिच्छेदः अथ धूमावती त
त्र फेत्कारिणीयं दानावह्नीषाविंदुतो बीजं धूमावती हृदः धूमावती

धूं धूं धूमावती
सिद्धः ६०

मन्त्रः श्रीक्रोधवैरिनिग्रहकारकः अस्याः पूजाप्रकारः प्रातः कृत्यादिकं
कृत्वा भूतशुद्धिप्राणायामौ विधाय ऋष्यादिन्यासं कुर्यात् तद्यथा
शिरसि पिप्पलादऋषये नमः मुखे निवृच्छन्दसे नमः हृदि धूमावत्यै दे-
वतायै नमः ततः कराङ्गन्यासौ धां अङ्गुष्ठाभ्यां नमः धीं तर्जनीभ्यां नमः
धूं मध्यमाभ्यां धैं अनामि धौं कनिष्ठा धः करतल ३ एवं हृदयादिषु
ततो ध्यानम् विवर्णा चञ्चला दुष्टा दीर्घा च मलिनाम्बरा विमुक्तकुं-
तला रूक्षा विधवा विरलध्वजा काकध्वजरथारूढा विलम्बितपयोध-
रा शूर्पहस्तातिरूक्षाक्षा धृतहस्ता वरान्विता प्रवृद्धघोणा तु भृशं कु-
टिला कुटिलेक्षणा क्षुत्पिपासार्दिता नित्यं भयदा कलहास्पदा विरलध-
जा विरलं दंतेमर्थः जपेल्लक्षमेवं तद्दशांशं पुरश्चरणसिद्धये उपवासर-
तो मंत्री शून्यागारे दिवानिशाम् श्मशाने विपिने वापि जपेल्लक्षं तु वाग्य-
तः सा लीला शमादक्षस्माक्षपुरश्चरणकर्मणि श्राक्षोपरि मंत्रमालिख्य
तस्मिन्संस्थाप्य शवं जपेत् अवष्टभ्य शवं शत्रुनाम्ना तु प्रजपेन्मनुं
सहस्रार्धमानतः शत्रुर्ज्वरेण परिगृह्यते पञ्चगव्येन शान्तिः स्याज्ज्वर-
स्य परस्यापि वा पूर्ववत्सर्वोपचारैः सहस्रं जपेत् कृत्वा मन्त्री रिपोराख्या-
मारोप्य यामिनीदले उच्चाटो जायते शत्रोर्मन्त्रपूतजापतः दग्ध्वा का-
कं श्मशानाग्नौ तद्भस्मादाय मन्त्रितम् विरोधिनामाह्वाशास्यसयउ-
च्चाटनं रिपोः मंत्रितमष्टोत्तरशतमिति अष्टाप्यामज्वदिषेदितिशेषः
श्मशाने भस्मना कृत्वा शवं तस्योपरि न्यसेत् विरोधिनामसंमरुद्धं कु-
लपद्मे समर्चयेत् मधुक्षीरैर्दीपैश्च यथाशत्रुविपत्करम् मद्दिक्तं
पण्णागम्यसमे शत्रुविनाशयेत् मंत्रेणानेन निर्विनेनद्धस्मरिपुमंदि-
रे शत्रुमुच्चाटयेन्नूनं नात्र कार्या विचारणा श्मशाने भस्मनालिंगं कृ-
त्वा पुष्पादिनार्चयेत् भगवन्निति सम्भाष्य मन्त्रसाकर्मचिन्तयेत् नि-
त्वकाकपक्षदावेकीकृत्य नरुद्धपरिवादोत्तरशतं तथा तेन दद्धोणास्मु-
केद्वेषयमूलमुच्चाटयं पदयात् तथा चिताकाष्ठानले क्षीरहोमः
शान्तिस्सदा भवेत् तथा राजा पुष्पप्रदानेन गुरुरूपेण कालिका मा

तं॰
सा॰
१३३ 133

रयमपरिमागमशांतिर्निर्माल्यधूपतः वराहकर्णरूपेण हन्यात्तत्कर
रूपिणी अथ धूपरूपेण शांतिर्भवति नान्यथा शांतिस्सर्वाभिचार
स्य पंचगव्येन जायते क्षीरेणवापि देवेशि मधुरत्रितयेन वा कीला
दीरनरोर्विदर्भविलिखेन्मंत्रेण नामाक्षरं जप्त्वा लिख्य दलहृदयेन नि
खनेदुच्चाटने विद्विषाम् तमारुह्य धूलिनीतहविधायारद्याद्विजेषो
बलितज्ज्ञाचिंतिभस्मकीलितप्ररोगरेतदुच्चाटनम् विदर्भितपदा
र्थस्तु विदर्भितं तत्तन्मंत्रं साध्यनामाक्षरमिति वचनात् मंत्रादी
नामक्षरद्वयोरंतरे साध्यनामाक्षरं योजयेत् इति सम्यगानंदरूपा
दिप्रयोगः अथ भद्रकालीमंत्रः प्रसादबीजमुद्धृत्य कालीतिपदमु
द्धरेत् महाकालीपदं चोक्त्वा कालियुग्ममतः परम् अस्त्रमग्निप्रिया
तोऽयं भद्रकालीमहामनुः आराध्य प्रजपेन्नित्यमष्टोत्तरशतं मनुम्
जपमालाविधानमत्राष्टोत्तरशतेन च ध्यात्वैवं महादेवीं भद्र
कालीं भयापहाम् आराध्येति भूतशुद्धिप्राणायामं कृत्वा पंचोप
चारादिभिः शिवलिंगे संपूज्य मंत्रः ध्यानमाह त्वं ताम्रकोटरादी
मघमलिनमुखीविमुक्तकेशीं वहंतीम् नाहं तस्मावदंतीं सकलरिपु
वंशमत्तयंतीं सदैव हस्ताभ्यां धारयंतीं ज्वलदनलशिखाभासन्नि
भं पाशमुग्रं दंते जंबूफलाभः परिहर तु भयं पातु मां भद्रकाली
प्रयोगमात्रकर्तेश्मश्वैरिनिग्रहकारकम् इयं देवी महादेवी शत्रुनिग्रह
कारिणी यथेष्टचिंतयाविंस्य धर्मकामार्थमुक्तिदा अत्र पुरश्चरण
रिंकटदक्षिणकालीतंत्रवदिति केचित् वस्तुतस्तु पुरश्चरणमष्टोत्त
रसहस्रं जपः अथोच्छिष्टगणेशमंत्रः हस्तिपिशाचिलिखे ठद्वयं ह
स्तिपदं समुच्चार्य पिशाचीतिपदं ततः देवराजेन सनेत्रेच कांतमी
शस्वरालिनम् वह्निजायावधिर्मंत्रस्ताराद्यास्सर्वकामदः प्रणवाद्या
नमिति केचित् तथा नतिथिनवचनलंत्रेनोपवासो विधीयते यथा
ष्टचेष्टया मंत्रस्सर्वकालेफलप्रदः अस्य पूजाप्रयोगः प्रातः कृत्वा
दिभूतशुद्धिप्राणायामांतं कर्म विधाय अर्घ्यादिस्थापनं कुर्यात् तद्य

डोंकालिमहाकालिकालि... फट्स्वाहा

ष्ठा शिरसि स्वधीरकबये नमः मुखे निवृत्तौ गायत्री छंदसे नमः हृ
दि उच्छिष्टगणपतये देवतायै नमः ततः प्रणवेन कराङ्गन्यासौ कृत्वा ध्या
येत् रक्तमूर्तिं गणेशानं सर्वाभरणभूषितम् रक्तवस्त्रं त्रिनेत्रं च रक्तप
द्मासनस्थितम् चतुर्भुजं महाकायं हिंदितं सस्मिताननम् इक्षुं च दक्षि
णे हस्ते दंतं च दयं तं करे पाशांकुशौ च हस्ताभ्यां जटामंडलवेष्टितम्
ललाटे चंद्ररेखां च सर्वालंकारभूषितम् एवं ध्यात्वा करस्थपुष्पेण
मूलेन शिरसि संपूज्य बहिः पूजामारभेत अष्टदलपद्मं लिखित्वा पूजयेत
प्रथमं मूलेनार्घ्यपात्रं संस्थाप्य दशधा प्रजप्य तेनोदकेनात्मानं पूजो
पकरणं चाभ्युक्ष्य पुनर्ध्यात्वा अष्टदलपद्ममध्ये प्रपूजयेत् ततः पंचो
पचारैः संपूज्य पात्रे पुष्पवीदि ॐ वक्रतुंडाय स्वाहा ॐ एकदंताय स्वा
हा ॐ लंबोदराय स्वाहा ॐ विकटाय स्वाहा ॐ विघ्नाय स्वाहा ॐ ग
जवक्त्राय स्वाहा ॐ विनायकाय स्वाहा ॐ गणपतये स्वाहा मध्ये ह
स्तिमुखाय स्वाहा एताः संपूजयेत् ततो देवं संपूज्य नैवेद्यमुपनीय
दत्वा ॐ उच्छिष्टगणेशाय महाकालाय एष बलिर्नमः इति बलिं दत्वा
चमनीयादिकं दद्यात् विशेषफलकांक्षिभिश्च नः ॐ ह्रां ह्रीं ह्रूं ह्रैं ह्रौं
ह्रः फट् स्वाहा इत्यनेन बलिं दद्यात् ततः पुष्पमेकं दक्षिणदिशि द
त्वा त्वमस्वेति विसर्जयेत् अस्य पुरश्चरणं लक्षजपः नास्ति सिद्धादि निमि
त्तविलक्षमेकं जपेद् बुधः तथा च कृष्णचतुर्दशीमारभ्य यावत्कृष्णच
तुर्दशीका सहस्रं दिने जपेन्नित्यं योषित्रियमपूर्वकम् स्नापयेन्मधुना
नित्यं नैवेद्यं तु पायसम् भुक्तोच्छिष्टो जपेन्नित्यं गणेशो हि सदा प्रियः
श्वेतार्कनाकृतिं कृत्वा पशुं चंदनकेन वा अंगुष्ठमात्रं प्रतिष्ठाप्य हि
जाग्निगृहसन्निधौ जप्त्वा घोरुपशाहस्रं सिद्धमंत्रो भवेद्ध्रुवम् योषिदु
पागमे नियमपुरस्सरमित्यर्थः न तस्यागनियमः अत्र प्रसंगाद् नोचिता
द नाचात इति मंत्रदर्शनात् यथात्र प्रयोगः राजद्वारे तथारण्ये सभा
यां गोत्रसंसदि विवादे व्यवहारे च संग्रामे शत्रुसंकटे नौकायां वि
पिने चैव युते च व्यसने तथा ग्रामदाहे चोरविद्रोहे सिंहव्याघ्रादिसंकटे

स्मरणादेवदेवस्य सर्वं वै विद्रुतं भवेत् तत्सर्वं नश्यति क्षिप्रं सूर्येणेव त
मो यथा तथा महोच्छिष्टगणेशानो यन्त्रराजेन धीमता आराधित
स्तोपहारैस्सम्यग्गेष्टफलप्रदः एवं कृत्वा त्ववश्यातनन्तहेनस्मरणोग
तः अपामार्गसमिद्धोमसौभाग्यं लभते ध्रुवम् अष्टोत्तरशतं मंत्रेणा
भिमंत्राभिमंत्रितम् वानराख्यिसमुद्भूतं कीलं सप्ताभिमंत्रितम् नि
खनेन्मंदिरे यस्य मरणं निश्चितं भवेत् उद्धृते शुभं भवेत्स्वास्थ्यमिति स
र्वस्सम्मतम् यस्य नाम्ना जपेन्मंत्रं सहस्रं स वशो भवेत् पंचसा
हस्रहोमेन तोष्टं देष्टुं वरस्त्रियम् सहस्रदशजापेन राजामत्यो वशो भ
वेत् लक्षजापेन राजेवद्दिलेरराजपक्षयः दशलक्षेण तन्त्राष्टं वश्यं
नस्य च सर्वदा अणिमादिमहासिद्धिः कोटिजाप्येन संशयः खेचरा
भवन्ति समसर्वे तत्वं तु जायते मंत्रं लिखित्वा शिरसि कंठे वा धारये
यदि सौभाग्यं सर्वरत्नाच भवेत्तत्र न निश्चितम् अथ धनदामंत्रः
ॐ तन्नर्थविद्रुसंयुक्तं तन्त्रा बीजं सबिंदुकम् लक्ष्मीबीजं ततो देवि
मंजुघ्रावरतिप्रिया वह्निजायावधिः प्रोक्तो मंत्रराजो मनोनमः ल
क्ष्मीप्रणवं श्रीबीजं कुबेराञ्जमनेयं मंत्रः अस्य पूजा प्रातः कृत्यादि प्रा
णायामांतं विधाय ऋष्यादिन्यासं कुर्यात् यथा शिरसि कुबेरऋष
येनमः मुखे पंक्तिश्छंदसे नमः हृदि धनदायै देवतायै नमः ततः
करांगन्यासौ ह्रां अंगुष्ठाभ्यां नमः इत्यादि एवं हृदयादिषु ततो ध्या
नम् कुंकुमारकगर्भाभां किंचिद्यौवनशालिनीम् मृणालकोमल
भुजां केयूरांगदभूषिताम् तुलाकोटिपरिधानपादपद्मद्वयान्वि
ताम् माणिक्यहारमुकुटकुंडलादिविभूषिताम् नीलोत्पलदर्श
किंकिणीयुक्तचविराजिताम् कराभ्यां धारयन्तकमलारक्तवह्नागर
गिनीम् हेमप्रकारमध्यस्थां रत्नसिंहासनोपरि ध्यायेत्कल्पतरो
मूले देवीं नाथ नदायिकाम् एवं ध्यात्वा मानसैस्संपूज्य अथ पूजार्थं
त्रम नवयोन्यात्मकं चक्रं विलिखित्कर्णिकोपरि दिग्दलं पद्ममालि
ख्य च तत्रांघ्रं ततो बहिः कोणेषु वज्रान्संलिख्य मध्ये बीजं समुद्धरेत्

ततोऽर्घस्थापनम् फडिति पात्रं प्रक्षाल्य नमः इति मंत्रेण पूजये ततश्रा
णोदनं गायत्र्याभिलिप्य तीर्थमंत्रेण तीर्थमावाह्य धेनुमुद्रां प्रदर्श्य त
उपरि मूलमंत्रं दशधा जपेत् ततस्तल्पं किंचित्प्रोक्षिणीपात्रे संस्थाप्य
तेनोदकेनात्मानं पूजोपकरणं च त्रिवारमभ्युक्षयेत् ततश्राधारश
क्त्यादि ह्रीं ह्रां नाम्नेन नमः इत्यंतं पीठपूजां विधाय पद्मायनमः इति
मध्ये संपूज्य पुनर्ध्यात्वा पीठे आवाह्य पंचोपचारादिना पूजयेत्
ततो दलेषु पूजयेत् ॐ लक्ष्म्यै नमः ॐ पद्मायनमः ॐ पद्मालयाय
नमः श्रीहरिप्रियायनमः ॐ कमलायनमः ॐ श्रन्नायनमः ॐ चं
चलायनमः ॐ लोलायनमः पुनर्मध्ये देवीं संपूजयेत् ततो यथा
शक्ति जप्त्वा गुह्यात्यादिना जपं समर्प्य क्षमस्वेति विसर्जयेत् अस्याः
पुरश्चरणं लक्षजपः तथा च प्रजपेल्लक्षं मंत्रेण रत्नादिकृतकेन च
लक्षजप्ते मंत्रसिद्धिः पुरश्चर्यां समाचरेत् विनियोगो यथा कुर्यात्सा
धकः स्वमनोरथान् रात्रौ चेज्जपते वाष्टसहस्रं समवाप्नुयात् एतेन
वश्यसिद्धिः स्यात्पुरश्चर्यापि कोविदैः किमिह बहुलं देवि साधये
यदि मानवम् भुक्त्वा वाप्यथवाभुक्त्वा पायसान्नं प्रदाय च दशकृत्वा
थवापि प्रोक्तं कृत्वा वाथ ऊवेलताम् यः स्मरेद्देवि विधिवत्तां दरिद्रो ऽभि
भूयते कामदेवं जपेत्सार्धं देव्याः प्रसादात् तेन देव्या महाप्रीति
र्वांछितार्थं ददाति च पूजां नैव समायाति रात्रौ देवी धनेश्वरी सर्वालं
कारसंयुक्ता दत्त्वा याति निजालयम् धनं च विपुलं दत्त्वा साधक
स्य मनोरथान् हरप्रियामदेशानि वनगा जायते शुभा यद्यामत्या
महादेवि चंदनेनानुलेपनम् दानं च सर्वदा तस्यै निःसदारिद्र्यस्पर्शा
नये नैवेद्यं न प्रदातव्यं निःसदारिद्र्यस्पर्शांतये यदि लोभस्तु वमा हेतियो
मोक्षरतिमानवः तस्य दारिद्र्यसन्नाशं सदा सीव कर वाण्येहम् सह
स्र समभिर्यावत्पुरश्चरणमुच्यते तथा चूर्णेनैव केनमधुनात दशांश
तः होममपि च प्रदानकाः तां दारिद्र्यस्पर्शांतये पूजा कार्या महादेव्या
श्चंदनेनानुलिप्यते ताम्रपात्रे तथा कार्यं मंडलं स्वमनोहरम् ततश

तं॰
सा॰ जाविदातथादेव्याप्रवमनीषिणा कृतोदरिद्रशंकाम्यात्सहिकोटी
१३५ श्वरोनरः अगम्यामकरमासेनांगचैवसर्पदेवता कुवेरसमतेनाम्ना:
135 पूजापिक्रियतेतथा इतियन्त्रपरिच्छेदः अथश्मशानकाली तदु
क्तंतंत्रे वाणीमायांततोलक्ष्मींकामबीजंततःपरम् कालिकेसंपु
टेनैवचतुष्कबीजमालिखेत् एकादशाक्षरीमहादेविचतुर्वर्गप्रदा
यिनी अस्याःपूजायंत्रं पद्ममष्टदलंवृत्तंतत्राद्यंपुरंतलम् च
तुर्द्वारसमायुक्तं मध्येमूलंसमालिखेत् दलषट्कंविलिखेत्कवर्गा
द्यष्टवर्गकम् धरण्याविलिखेद्यंचचतुष्कंवचतुष्कके पूर्वादिचतुरं
तचमध्येदेवींप्रपूजयेत् अस्याःपूजाक्रमः प्रातःकृत्यादिप्राणाया
मांतकर्मसमाप्य ऋष्यादिन्यासंकुर्यात् शिरसिभैरवऋषयेनमः
मुखेनिचृच्छंदसेनमः हृदिश्मशानकालिकायैनमः गुह्येवाग्वी
जायनमः पादयोर्मायाशक्तयेनमः ततःकरांगन्यासौ यें अंगुष्ठा
भ्यांतर्जनीभ्यां श्रींमध्यमाभ्यां क्लीं अनामिकाभ्यां कालिकेकनि
ष्ठिकाभ्यां क्लींश्रींह्रींयें करतलकरपृष्ठाभ्यां एवंहृदयादिषु ततो
ध्यानम् अंजनाद्रिनिभांदेवीं श्मशानालयवासिनीम् रक्तनेत्रांमु
क्तकेशीं शुष्कमांसातिभीषणाम् पिंगाक्षींवामहस्तेनमद्यपूर्णांस
मांसकम् सद्यःकृत्तशिरोदक्षहस्तेनदधतींशिवाम् स्मितवक्त्रां
सदादामांसचर्वणतत्पराम् नानालंकारभूषांगीं नग्नांमत्तांसदा
शवैः एवंध्यात्वायजेद्देवींश्मशानेतुविशेषतः गृहेवापिगृहस्थोपि
मत्स्यमांसैःसभोजनैः नग्नोभूत्वामहापूजांकुर्याद्धीरःसमाहितः
पूजांतु ध्यात्वामानसैस्संपूज्य अर्घ्यस्थापनंकृत्वांपचोपचारैः प
त्रेषुवस्त्रादिपूजयेत् ततोहिरण्मितांगादिपूजयेत् अस्यपुरश्चरणमे
कादशलक्षजपः वर्णलक्षंजपेन्मंत्रंतद्दशांशेनहोमयेत् मंत्रांतरंत
त्रैव कामबीजंसमालिख्यकालिकायैसमालिखेत् नमोंतेचैववेदे
वर्णमासमाक्षरीमंत्रकृन्मः षडंगकालिकादेवीत्यन्यत्सर्वंतत्पूर्ववत्
अथबगलामुखी तदुक्तंतंत्रांतरे वलांह्रसंसप्रवक्ष्यामिसद्यःप्रत्यय
ॐह्लींवगलामुखिवसर्वदुष्टानांवाचंमुखंस्तंभयजिह्वांकीलयकीलयबुद्धिंनाशयह्लींॐस्वाहा
ॐह्लींवगलामुखिसर्वदुष्टानांवाचंमुखंस्तंभयजिह्वांकीलयबुद्धिंविनाशयह्लींॐस्वाहा ॥

यें क्रीं श्रीं क्लीं कालिके क्लीं श्रीं ह्रीं यें ॥

क्लीं कालिकायै नमः

कारकम् साधकानां हितार्थाय स्तंभनाय वैरिणाम् यस्याः स्मरणमा
त्रेण पवनोपि स्थिरो भवेत् प्रणवं स्थिरमायां च ततश्च बगलामुखि तः
देश सर्वदुष्टानां ततो वाचं ततो मुखम् स्तंभयेति ततो जिह्वां केलयेति
पदद्वयम् बुद्धिं नाशय पश्चात्तु स्थिरमायां समालिखेत् लिखेच्च पुनरों
कारं स्वाहेति पदमंततः षट्त्रिंशदक्षरो विद्या सर्वसंपत्करी मता स्थि
रमायां ह्लीं तथा चैतंत्रांतरे वह्निहीनं तु मायां बगलामुखि सर्वदुष्
टानां वाचमित्यस्या मुखं स्तंभय कीर्तयेत् जिह्वां कीलय बुद्धिं तद्वि
नाशय पदं वदेत् पुनर्बीजं पुनस्तारं वह्निजायावधिर्भवेत् तारादिका
दिवा चतुस्त्रिंशदक्षरा बगलामुखी इति मंत्रांतरम् अस्य पूजामूलतत्र
स्थादि प्राणायामांतं कृत्वा ऋष्यादिन्यासं कुर्यात् शिरसि नारदऋष
ये नमः मुखे त्रिष्टुप्छंदसे नमः हृदि बगलामुखीदेवतायै नमः लिं
गे ह्लीं बीजाय नमः पादयोः स्वाहा शक्तये नमः ततः करांगन्यासौ ह्लीं
अंगुष्ठाभ्यां नमः बगलामुखि तर्जनीभ्यां सर्वदुष्टानां मध्यमाभ्यां
वाचं मुखं स्तंभय अनामिकाभ्यां जिह्वां कीलय कनिष्ठिकाभ्यां बु
द्धिं नाशय करतलकरपृष्ठाभ्यां एवं हृदयादिषु ततो मूलांते आत्म
तत्त्वव्यापिनी बगलामुखी श्रीपा पू तः इति मूलाधारे मूलांते विद्यात
त्त्व शिरसि मूलांते शिवतत्त्व सर्वांगे ततो ध्यानम् गंभीरस्याभिम
णिमंडपरत्नवेदीसिंहासनोपरिगतां परिपीतवर्णाम् पीतांबराभर
णमाल्यविभूषितांगीं देवीं नमामि धृतमुद्गरवैरिजिह्वाम् जिह्वाग्र
मादाय करेण देवीं वामेन शत्रून्परिपीडयंतीम् गदाभिघातेन च द
क्षिणेन पीतांबराढ्यां द्विभुजां नमामि एवं ध्यात्वा मानसैः संपूज्य ब
हिः पूजामारभेत् ततः प्रथममर्घ्यस्थापनम् तद्यथा अष्टदलं वृत्त
रस्रं विधाय ईशानादिकोणेषु पूर्वादिदिक्षु क्रमस्मात् ततश्चंदनैः ॐ
ह्रीं गणपतये नमः इत्यनेन गंधदानेन संपूज्य तेन मधुनावाग्निपा
त्रे मार्जयेत् ततो वारत्रयं विधाय सम्यग् अंगानि विमृशेत् ततो मू
लेन नुन्यानि मुद्राः प्रदर्श्य तेनामृतेनात्मानं संजोपकरणानि च प्रोक्षयेत्

तं॰ सा॰ १३८
136

अस्यायंत्रं अंम्रषट्कोणं वृत्तं चाष्टदलं भूपुरान्वितम् ततो मूलमुच्चार्य
आधारशक्तिकमलासनाय नमः ततः पूर्ववद्ध्यात्वा पीठे आवाह्य
षडंगानि पूजयेत् ततो मुद्राः प्रदर्श्य पुनः षडंगैर्मंडलं यजेत् ततो
मूलेन मंत्रयित्वा धेनुयोनी प्रदर्शयेत् ततस्त्रात्मविद्याशिवतत्त्वै
मुखे बिंदुत्रयं दत्त्वा तर्जन्यंगुष्ठयोगेन सांगां सावरणां बगलामु
खीं तर्पयेत् ततो यथासंभवमुपचारैः पूजयित्वाऽवरणपूजामार
भेत् षट्कोणेषु पूर्वे सुभगायै नमः आग्नेये भगसर्पिण्यै नमः ई
शाने भगावहायै नमः पश्चिमे भगविह्वलायै नमः नैरृते भगनिपा
तिन्यै नमः वायव्ये भगमालिन्यै नमः अष्टपत्रेषु ब्राह्म्याद्याः पूजये
त् पत्राग्रेषु ॐ जयायै नमः ॐ विजयायै नमः ॐ अजितायै नमः
ॐ अपराजितायै नमः ॐ जंभिन्यै नमः ॐ स्तंभिन्यै नमः ॐ मोहि
न्यै नमः ॐ आकर्षिण्यै नमः ततो द्वारेषु ॐ भैरवाय नमः तद्बहि
रिन्द्रादीन्वज्रादींश्च पूजयेत् ततो मूलेन धूपादिकं कृत्वा यथाशक्ति ज
पादिकं विधाय त्रिशूलमुद्रां प्रदर्श्य पुष्पांजलित्रयं विधाय देव्यै यो
निमुद्रां प्रदर्शयेत् ततो भैरवाय बलिं दत्त्वा विसर्जनांतं समापयेत्
अस्य पुरश्चरणं लक्षजपः पीतांबरधरो भूत्वा पूर्वाशाभिमुखे स्थितः
लक्षमेकं जपेन्मंत्री हरिद्राग्रंथिमालया ब्रह्मचर्यपरो नित्यं प्रयतो ध्या
नतत्परः प्रियंगुपायसेनापि पीतपुष्पैश्च होमयेत् अथ प्रयोगः कुरु
ते वाक्यतिस्तंभं दुष्टानां बुद्धिनाशनम् जपहोमप्रयोगे च मंत्रं चाप्यु
त जपेत् हरिद्राहरितालाभ्यां लवणं जुहुयान्निशि स्तंभयेत्परसैन्यानि
नात्र कार्या विचारणा अथवा पीतपुष्पैश्च त्रिमध्वाक्तैश्च होमयेत्
स्तंभनेषु च सर्वेषु प्रयोगः प्रत्ययावहः ॐकारयोस्समुखे योगुर्वीयः
शिरसो लिखेत् मध्यगं नाममध्ये स्यात्तद्बाह्ये चाष्टारद्वयम् बीजं द्वि
तीयवर्गस्य तृतीयं बिंदुभूषितम् चतुर्दशस्वरोपेतं संलिखेत्पृथिवी
गतम् ठकारेण समावेष्ट्य चतुष्केन पुटं बहिः तत्कोणरेखासंसक्तैः स्पृ
लवज्राष्टकं लिखेत् त्रिशूलमध्यरेखायाः पृथ्वीबीजानि पार्श्वयोः

अष्टस्वपि च कोणेषु तद्वहिर्वगलां लिखेत् पृथ्वीमंतरितं बाह्ये मातृ
कोपरि मंडलम् आवेष्ट्य बाह्यतो यापस्थान तद्वाह्ये स्थिरमायया निरुद्धां
कुशबीजेन नादसंलिखितां च्छिणा लिखेत्सर्वं वदावेष्ट्य पश्चाच्च बगल
लामुखीम् पटे पाषाणपट्टे वा हरिद्रोन्मत्ततालकैः द्विमसं लभेत्तव
संभेल लिखित्वा गाढमाक्रमात् विवादे मंत्रमालिख्य भूर्जे नैरेव वल्क
भिः कुंभकारस्य चक्रस्य भ्रमतो विपरीततः मृत्तिकामनुपादाय
घटं संकारयेत्ततः यंत्रेनं तु परिमध्यस्थतालकेन विलिख्य च तन्नाम
यां विनिक्षिप्य पीतरंजनिजे गृहे अर्चयेत् यावत्कालं निसंपीतोप
चारतः उष्ट्रस्य कं लभयमेवमुखे वाचस्पतेरपि इति बगलामुखी परि
च्छेदः कालीताराम्महाविद्याषोडशी भुवनेश्वरी भैरवी छिन्नम
स्ता च विद्या धूमावती तथा बगलामुखी सिद्धविद्या मद्दादेव्याः प्रकी
र्तिताः अथ कर्णपिशाचीमंत्रः कर्णपार्श्वादितियुक्तास्यं तनशिक
रोवचातीतानागतं प्राकृष्टकमुवनेशानी वह्निजायान्विता नार
यो मनुरेषलक्षजपतो ध्यानेन संसेवितः सार्वज्ञं लभते चिरेण नि
यतं पैशाचिकी भक्तितः अथ ध्यानम् कृष्णारक्तविलोचना त्रि
नयनां खर्वाचलंबोदरी वक्रकाकृणजिह्विकां वरकराभीतीकरा
मुन्मुखीम् धूम्राविजटिलां कपालविलसत्पाणिद्वयां चञ्चलां सर्व
ज्ञां शिवबद्धकुत्ता च यिवसतिं पैशाचिकीं तां नुमः अथ पूजा निशाया
मर्धरात्रे च प्रदिग्धस्य पिशाचिकीम् दग्धमीनवलिं दद्याद्रात्रौ समप
स्य संजपेत् ॐ कर्णपिशाचि दग्धमीनवलिं गृह्ण गृह्ण मम सिद्धिं
कुरु कुरु स्वाहा इत्यनेन दग्धमीनवलिं दद्यात् रक्तचंदनं वस्त्रकज
पपक्षादिकं च यजेत् अमृतं कुरु देवेशि स्वाहेति प्रातर्नयेज्जलैः मध्या
रूपकमकं निरामिषं कृत्वा यत्किंचिज्जपं रात्रावपि तत्संख्यं जपेत् अ
स्यात्किंचिन्मात्रं कृतं ताम्बूलादिकाद्वहिः जपस्य दशांशतर्पणम् ॐ क
णिपिशाचिनीं तर्पयामि ह्रीं स्वाहा इति मंत्रः पंचक्रमेणालक्षमेकं पु
रश्चरणं कृत्वा दशांशहोममथेत् तदभावे दशांशतर्पणं कृत्वा वरं

ॐ कर्णपिशाचि वद तातीतनागतं ह्रीं स्वाहा ।१८ ॐ ह्रीं कर्णपिशाचि मे कर्णे कथय हूं फट् स्वाहा ॐ क्लीं जयादेवि स्वाहा

तं॰ सा॰ १२९ 137

प्रार्थयेत् मूलं रक्तचंदनेन लिखित्वा यंत्रोपरि इष्टदेवतां पूजयेत् सिद्धिल
क्षणमुच्यते गगनमंडले कुंकुमादिस्रवणं दीपाग्निशिखा तद्रूपं दर्शनात्
सिद्धिं भविष्यंती ज्ञात्वा यथाविधिमाचरेत् प्रणवं माया कर्णपिशाचि मे
कर्णे कथय हूं फट् स्वाहा प्रदीपतैलपादयोर्दत्वा रात्रौ लक्षं जपेत्ततः
सर्वज्ञो भवति नास्य पूजाध्यानम् तथा तारं कामबीजं जयादेवि स्वाहा
अस्यापि मासादरभावः ॥ पूर्ववल्लक्षं जप्त्वा गृहगोधिकां निपात्य तदुप
रि जयादेवीं यथाशक्ति संपूज्य तावज्जपेद्यावत्सा जीवति ततस्सिद्ध्यति
सिद्धिस्तु मनसा दिक्प्रश्ने कृते समायाति ततस्तस्याः पृष्टे सर्वं भूतभविष्य
दिकं पश्यति इति कर्णपिशाचीपरिच्छेदः अथ मंजुघोषापरिच्छेदः
जातोऽसौ च तिमिरं यस्मात् संसारार्णवतारकम् श्रीमंजुघोषो जयतां साध
कानामस्तु वावहः तत्रागमोत्तरे मातृकादिसमुद्भूतं वह्निबीजं समुद्ध
रेत् मीनेशं च ततः ऊर्ध्वं वामनेत्रेंदुसंयुतं परमं ततः प्रोक्तो मंजुघोषस्य यो
भुवना इयं तद्दीपिनी प्रोक्ता नलं मंत्रस्तु कथ्यते अंकुशशक्तिबीजं परमा
बीजं ततः प्रिये बीजत्रयात्मको मंत्रो जातोऽसौ सर्वनाशकः शक्तिबीजं
रमाबीजं कामबीजं ततः प्रिये विद्याकृतिकरी प्रोक्ता पञ्चावर्णत्रया
त्मिका पकारो वह्निमारूढो वामनेत्रेंदुभूषितः प्रोक्ता सर्वज्ञैर्विद्येयमे
कवर्णात्मिका प्रिये सिद्धः साध्यः सुसिद्धो वा साधकस्य रिपुस्तदा तदा
मंत्रो भवेद्यस्य शुभदो बुद्धिदो भवेत् मध्याह्ने सलिले चैव भोजने भाज
नेतथा गोमये तिवह्निदेशे मेषु नेरमणीके च गोष्ठे निशि गोकुंडे य।
तं रुद्रमहनसन्निभम् विलिखेन्मंत्रवर्णांश्च त्रिशूलोर्ध्वं प्रयत्नतः लिखेद्वद
नलेखिन्या प्रयत्नात्साधकोत्तमः उच्चाटने लिखेद्यंत्रं गोचर्मणि विशेष
तः सलिले विजयीनिसंभोजने नवमहेश्वरः गोमये वा वश्यकः स्यात् क्रोधे
सर्वतन्तान्व्रजेत् ऊर्ध्वश्रुतिर्थं रनिसं गोमंत्रे च महाकविः गोमूत्रं बदरीमः
लं चंदनेन पांसुमेव च पकीकृत्य साष्टधा जमाति लकं धारयेत्सदा नमस्कृ
सर्वस्पृष्टं प्राशयेद्भक्तितत्परः वरं प्रार्थ्य च तस्मात् विहरेच्च यथासुखम्
नामदेवार्चनं स्नानं प्रणवोच्चारणं ततः वशीचलेन दंतानां शोधनं तत्

वर्णेन तु रात्रिवासोनमं चेतनशुद्धिः स्यात्कदाचन एवं कृते प्रयत्ने
न ज्ञात्वा गुरुमुखोन्नधीः मासैकेन कवीन्द्रः स्यात्त्रिमासेनैव वचेश्वरः
त्रिभिर्मासैर्भवेन्मर्त्यः सर्वशास्त्रविशारदः पुत्रार्थी लभते पुत्रं धनार्थी
लभते धनम् आयुरारोग्यकामस्तु सर्वान्कामानवाप्नुयात् अथ ध्यान
म् ओं शशिधरमिव शुभ्रं खड्गखेटाग्रपाणिं स्फुरुचिरमतिशान्तं पंचवक्त्र
उं कुमारम् इष्टुतरवरशुभ्रांधिपद्मपत्रायतांगं कुमतिदहनदक्षं मन्त्र
बोधं नमामि इति ध्यात्वा पीठपूजां ततः कुर्याद्दाधाराधारादिशक्तितः
मूर्तप्रेतादिभिः कुर्यात्सीठासनमनंतरम् ज्ञानदात्रे नमः पादशुद्धिद
त्रे तथाचमनम् नाशनाशायगंधः स्याद्दत्तं स्याच्चत्वायायैव सर्वसि
द्धिप्रदायेति पुष्पं दद्याद्विशेषतः कंदर्पपुष्पसमादाय भैरवाय जपे
ततः अस्तितांगो रुरुश्चंडः क्रोधश्चोन्मत्तसंज्ञकः कपाली भीषणश्चै
पातु ब्रह्मानन्तौ यथाक्रमम् वज्राद्यायुधाः पान्तु दशदिक्षु य
थाक्रमम् इति ते कवचं पुण्यं त्रैलोक्यरक्षणं परम् यद्धृत्वा पठ
नाद्देवाः सर्वैश्वर्यमवाप्नुयुः ब्रह्माविष्णुश्च रुद्रश्च पठनाद्धारणाद्य
तः सृजन्त्यवन्ति हन्त्येव कल्पे कल्पे पृथक्पृथक् पुष्पाञ्जल्यष्टकं
देव्यै मूलेनैव पठेत्ततः युगायुतकृतायास्तु पूजायाः फलमाप्नु
यात् वाणीवक्त्रे वसेत्तस्य सत्यं सत्यं न संशयः अष्टोत्तरशतं चास्य पु
रश्चर्याविधिः स्मृतः भूर्जे विलिख्य गुटिकां स्वर्णस्थां धारयेद्यदि
कण्ठे वा दक्षिणे बाहौ सोऽपि स्यात्तपोमयः ब्रह्मास्त्रादीनि शस्त्राणि
तद्गात्रे प्राप्य पावति माल्यानि कुसुमान्येव भवन्त्येव न संशयः ॥
इति श्रीभैरवीतन्त्रे अन्नपूर्णाकवचं समाप्तम् ॥ अथान्नपूर्णा
स्तोत्रम् नमः कल्याणदे देवि नमः शंकरवल्लभे नमो भक्तिप्रदे दे
वि अन्नपूर्णे नमोऽस्तु ते १ नमो मायागृहीताङ्गि नमः शंकरवल्ल
भे माहेश्वरि नमस्तुभ्यम् अन्नपूर्णे नमोऽस्तु ते २ उद्यद्भानुसहस्रा
भे नयनत्रयभूषिते चन्द्रचूडे महादेवि अन्नपूर्णे नमोऽस्तु ते ३
विचित्रवसने देवि अन्नपूर्णे रतेनचे शिवकृत्स्नकृतामोदे अन्न
पूर्णे नमोऽस्तु ते ४ साधकाभीष्टदे देवि भवदुःखविनाशिनि कु
वभारनते देवि अन्नपूर्णे नमोऽस्तु ते ५ षट्कोणपद्ममध्यस्थे षड
ङ्गयुवतीमये ब्रह्माण्यादिस्वरूपे अन्नपूर्णे नमोऽस्तु ते ६ देवि चन्द्र
कृतापीठे सर्वसाम्राज्यदायिनि सर्वानन्दकरे देवि अन्नपूर्णे नमो॰
ऽस्तु ते ७ इन्द्राद्यर्चितपादाब्जे रुद्रादिरूपधारिणि सर्वसम्पत्प्रदे देवि
अन्नपूर्णे नमोऽस्तु ते ८ इमां काले पठेद्यस्तु स्तोत्रमेतत्समाहितः
तस्य गेहे स्थिता लक्ष्मीर्जायते नात्र संशयः प्रातःकाले पठेद्यस्तु मं
त्रजापपुरःसरम् तस्यान्नसमृद्धिः स्याद्वर्धमाना दिने दिने यस्मै
कस्मै न दातव्यं न प्रकाश्यं कदाचन प्रकाशात्कार्यहानिः स्यात्तस्मा

यत्नेन गोपयेत् इत्यन्नपूर्णास्तोत्रम् ॥ अथ त्रिपुटाकवचम् श्री
देव्युवाच भगवन्सर्वधर्मज्ञ सर्वशास्त्रार्थपारग त्रिशक्तिरूपल
क्ष्म्याश्च कवचं यत्प्रकाशितम् सर्वार्थसाधनं नाम कथयस्व मयि
प्रभो श्रीभगवानुवाच शृणु देवि प्रवक्ष्यामि कवचं परमाद्भुतम्
सर्वार्थसाधनं नाम त्रैलोक्ये चातिदुर्लभम् सर्वसिद्धिमयं देवि स
र्वैश्वर्यप्रदायकम् पठनाच्छ्रवणान्मर्त्यस्त्रैलोक्यैश्वर्यभाग्भवेत्
सर्वार्थसाधनस्यास्य कवचस्य ऋषिः शिवः छन्दो विराट् त्रिश
क्तिरूपा जगद्धात्री देवता धर्मार्थकाममोक्षेषु विनियोगः प्र
कीर्तितः श्रीं बीजं मे शिरः पातु लक्ष्मीरूपः ललाटकम् ह्रीं पा
तु दक्षनेत्रं मे वामनेत्रं सुरेश्वरी क्लीं पातु दक्षकर्णं मे वामकामे
श्वरी तथा लक्ष्मीर्घ्राणं सदा पातु वदनं पातु केशवः गौरी तु र
सनां पातु कण्ठं पातु महेश्वरः स्कन्धदेशं रतिः पातु भुजौ तु मक
रध्वजः शङ्खनिधिः करौ पातु वक्षः पद्मनिधिः सदा ब्राह्मी
मध्यं सदा पातु नाभिं पातु महेश्वरी कौमारी पृष्ठदेशं मे गुह्यं
रक्षतु वैष्णवी वाराही सक्थिनी पातु चैन्द्री पातु पदद्वयम् भा
र्यां रक्षतु चामुण्डा लक्ष्मी रक्षतु पुत्रकान् इन्द्रः पूर्वे सदा पातु
आग्नेय्यामग्निदेवता याम्ये यमः सदा पातु नैरृत्यां निरृतिः स
दा पश्चिमे वरुणः पातु वायव्यां वायुदेवता सौम्यां सोमः सदा
पातु ऐशान्यामीश्वरोऽवतु ऊर्ध्वं प्रजापतिः पातु अधश्चानन्तदे
वता राजद्वारे श्मशाने च अरण्ये प्रान्तरे तथा जले स्थले चान्त
रिक्षे शत्रूणां निवहे तथा एताभिः सहिता देवी त्रिबीजात्मा महे
श्वरी त्रिशक्तिश्च महालक्ष्मीः सर्वत्र मां सदावतु इति ते कथितं
देवि सारात्सारं परात्परम् सर्वार्थसाधनं नाम कवचं परमाद्भुते
नस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः इन्द्राद्याः सकला देवा धा
रणात्पठनाद्यतः सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः पुष्पा
ञ्जल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् संवत्सरकृतायास्तु पूजायाः

फलमाप्नुयात् प्रीतिमेवाप्यतः कृत्वा कमलानिष्कलाष्टदे वाणी
वनिवेशहंके सम्मसंसन्नसंशयः यो धारयति पुण्यात्मा सर्वार्था
साधनाभिधम् कवचं परमं पुण्यं सोपि पुण्यवतां वरः सर्वैश्वर्य
युतो भूत्वा त्रैलोक्यविजयी भवेत् पुरुषो दक्षिणे बाहौ नारी वा
मभुजे तथा बहुपुत्रवती भूत्वा वंध्यापि लभते सुतम् ब्रह्मास्त्रा
दीनि शस्त्राणि नैव कृन्तन्ति तत्तनुम् एतत्कवचमज्ञात्वा यो जपे
त्परमेश्वरीम् दारिद्र्यं परमं प्राप्य सोचिरान्मृत्युमाप्नुयात् इति
श्रीरुद्रयामले तंत्रे त्रिपुरायाः सर्वार्थसाधनं नाम कवचम् ॥
अथ त्रिपुरास्तोत्रम् ऐं वराभीतिहस्तां हि वांकुप्रसन्नांशिवंसत्त्व
सन्नस्वशान्तोपविष्टम् प्रसन्नास्यबिम्बप्रकाशास्वरूपं शिरःप
द्ममध्ये गुरुं स्मरयामि १ स्वकं वह्निसंस्थं त्रिमूर्त्तीप्रजुष्टं शशांकं
कं नयुक्तं तवाद्यं च बीजम् सवर्णप्रभं ये जपन्ति त्रिशक्तिं श्रियं
सौभाग्यं च लभन्ते नराग्रे २ नभोवायुमिन्दुं ततो वामनेत्रं स्वधाधा
मबिन्दुं नियोज्यैकरूपम् द्वितीयं सुबीजं सुरेशाणि वाध्यात्वदी
यं विभाव्य श्रियं प्राप्नुवन्ति ३ विरिंचं द्वितीयं स्थितं ततो वामनेत्रं वि
दुनादयुक्तं दिनेशाभबीजम् विभाव्यैकसंस्थं हृदि त्रिलोकीज
याद्दीप्तरत्नं लभन्ते नरेशाः ४ त्रयं सन्नियोज्य स्मरारिप्रियाया त्रि
शास्त्रं जपन्ति त्वदंघ्रिं विभाव्य न तेषां रिपुर्वा कथं योगं करोति स्वरा
ज्ये गणानां गृहे श्रीस्तु तेषाम् ५ सुविभारतीगर्भपयश्च वक्रान
हिंसन्ति हिंस्रास्वराज्ञां च मंति तदं द्विहयं भूषणं मूर्ध्निरागां करे
सिंहूयदृग्हूं स्नातमंजेति ६ वने पारिजातद्रुमाणां हथिव्यांस्तव
लाप्रभायां सुनिर्हृगेहे स्मरेद्धृदि कायं लसद्रत्नसिंहासने पद्म
मध्यात्मकं सविचित्र ७ स्फुरत्कर्णिकायां परं योनियुग्मं नद्दं नगे
तीमत्र देहेमप्रभाभाम् लसत्कुंडलाभिं द्रुवक्त्रांत्रिनेत्रां स्फुरत्कंठ
कंठे स्तवहो जननाम् ८ महारत्नवत्रोलसत्खड्गहस्तैः सपद्म
यपाशांकुशांकां च सवर्णां कुशाग्रच्छवाणांन्दयानां स्वहस्त

मूर्धांस्थमर्धांसस्थकांचीम् ९ त्वल्लोकोटिरम्यस्फुरत्सादपद्माकिं-
रीटम्योलेकारश्रृंकां प्रसन्नाम् स्मितेचामरेदर्पणेनान्तकरैर्मुकुंदस्थ-
कर्पूरचूर्णैश्चताभिः १० त्रिलोकीविधात्रीं जगत्तापहर्त्रीं जगत्क्षोभ-
कर्त्रीं जगल्लोकपात्रीम् सदानंदहृत्पूर्णहकारार्थवर्णां त्रिविंदुस्वरूपा
त्रिशक्तिं भजामि ११ चिरं चिंतयित्वा तदेतत्स्वरूपं पुरोयं त्वमध्ये स-
मावाप्य भक्त्या स्वयंभू कुरूस्थाद्भिः सृजयित्वा च तत्त्वं गतिसिद्धिं ल-
भेत्यामरोपि १२ प्रियं श्रीपतिं पार्वती मां स्मरं च रतिं कामदेवं स्मरं-
गेन सार्धम् स्वयोनौ तथायं त्रपुष्कां भवानी क्रमात्संजयित्वा नरैः
ष्टो भवेत्सः १३ नियित्वेव पार्श्वद्वये संविभाव्य प्रपूज्यो महेशस्त्व-
तो लोकपालाः तदस्त्राणि तन्मंडलाग्रे भुप्रसमभव स्याष्टसिद्धिं लभे-
न्मानवोपि १४ क्षितिस्त्वं विधाता जगत्सृष्टिकर्त्री त्वमापोपि विश्व-
जगन्मालिका च त्वमग्निस्त्वरुद्रो जगत्क्षोभकर्त्री त्वमेवासि पुष्का
जगद्व्याप्तरूपा १५ त्वमाद्या शिवे शंभुकांते शरण्ये जगद्व्याप्तरूपे
सदा विश्वमीष्टि निराधारगम्या भवस्यैकपुण्या त्वमाकाशकल्पा
भवानि प्रसीद १६ भवांभोधिमध्ये निपातैश्च सर्वं प्रमूनीनां च गर्वं
स्वरूपं करोषि अतस्त्वां न जाने चिदानंदरूपे प्रकाशस्वरूपे भवा-
नि प्रसीद १७ जपित्वा भवत्सा जनो मंदचेता जपित्वेकलत्वं कवि-
त्वं करोति विचिंत्य स्वरूपं त्वदीयं त्रिलोक्यां लभेत्तु लेभ त्वं भवानि प्र-
सीद १८ त्वमाधारशक्तिस्त्वमाधेयरूपा जगद्व्यापिका त्वं जगद्व्या-
प्यरूपा प्रभावस्त्वमेका जगद्व्याप्यरूपा त्वमेवासि भावो भवानि
प्रसीद १९ अणुस्त्वं विभुस्त्वं त्वमेवासि विश्वं स्तुतिका जगत्संभव
स्या विभाति तथापि त्वदीयागुणानामादिशांतिस्तुतिं कर्तुमेवं भवा-
नि प्रसीद २० इदं स्तोत्रमाद्यं तत्गुह्यतमं पठंति त्रिसंध्यं कलौ ते जपि-
त्वा न तेषामसाध्यं त्रिलोकीजनानां लभंते स्वरूपं भवानीप्रसादात् २१
इति त्रिपुरास्तोत्रम् ॥ अथ दुर्गाकवचम् ईश्वर उवाच शृणु देवि
प्रवक्ष्यामि कवचं सर्वसिद्धिदम् पठित्वा धारयित्वा च नरो मुच्येत संक-

तं॰
स्ता॰ टात् अस्तान्याकवचं देवि दुर्गामंत्रं च यो जपेत् स नाप्नोति फलं त
१८॰ स्य परं च नरकं व्रजेत् इदं गुह्यतमं देवि कवचं तव कथ्यते गोप
170 नीयं प्रयत्नेन सावधानमनाः शृणु उमा देवी शिरः पातु ललाटं शू
लधारिणी चक्षुषी खेचरी पातु कर्णौ चत्वरवासिनी सुगंधा ना
सिकां पातु वदनं सर्वधारिणी जिह्वां च चंडिका देवी ग्रीवां सौभद्रि
का तथा अशोकवासिनी चेतो द्वौ बाहू वज्रधारिणी कंठं पातु महा
राज्ञी जगन्माता स्तनद्वयम् हृदयं ललिता देवी उदरं सिंहवाहि
नी कटिं भगवती देवी द्वावूरू विंध्यवासिनी महाबला च जंघे द्वे पा
दौ भूतलवासिनी एवं स्थितासि देवि त्वं त्रैलोक्यरक्षणात्मिके
रक्ष मां सर्वगात्रेषु दुर्गे देवि नमोस्तु ते इत्येतत्कवचं देवि महाविद्या
फलप्रदम् यः पठेत्प्रातरुत्थाय सर्वतीर्थफलं लभेत् यो मत्सेवक
वचं देहे न तस्य विघ्नं न कुत्रचित् रणे राजकुले वादे सर्वत्र विजयी भ
वेत् सर्वत्र नाभिभूतिर्देवी पत्रे विलिखितो इति श्रीकुब्जिकातंत्रे
दुर्गाकवचम् ॥ अथ दुर्गास्तोत्रम् ईश्वर उवाच शतनाम प्रवक्ष्या
मि शृणुष्व कमलानने यस्याः प्रसादमात्रेण दुर्गा प्रीता भवेत्स
ती सती साध्वी भवप्रीता भवानी भवमोचिनी आर्या दुर्गा जया
आद्या त्रिनेत्रा शूलधारिणी पिनाकधारिणी चित्रा चंडघंटा महा
तपा मनोबुद्धिरहंकारा चित्तरूपा चिता चितिः सर्वमंत्रमयी सत्या
सत्यानंदस्वरूपिणी अनंता भाविनी भाव्या भव्याभव्या सदागतिः
शांभवी देवमाता च चिंता रत्नप्रिया सदा सर्वविद्या दक्षकन्या द
क्षयज्ञविनाशिनी अपर्णानेकवर्णा च पाटला पाटलावती प
ट्टांबरपरीधाना कलमंजीररंजिनी अमेयविक्रमा क्रूरा सुंद
री सुरसुंदरी नवदुर्गा च मातंगी मतंगमुनिपूजिता ब्राह्मी माहे
श्वरी ऐंद्री कौमारी वैष्णवी तथा चामुंडा चैव वाराही लक्ष्मीश्च
पुरुषाकृतिः विमलोत्कर्षिणी ज्ञाना क्रिया नित्या च बुद्धिदा ब
हुला बहुलप्रेमा सर्ववाहनवाहना निशुंभशुंभहननी महिषासु

रमर्दिनी मधुकैटभहर्त्री चण्डमुण्डविनाशिनी सर्वासुरविना
शा च सर्वदानवघातिनी सर्वशास्त्रमयी सत्या सर्वास्त्रधारिणी त
था अनेकशस्त्रहस्ता च अनेकास्त्रस्य धारिणी कुमारी चैव कन्या
च कैशोरी युवती यतिः अप्रौढा चैव प्रौढा च वृद्धमाता बलप्रदा
य इदं प्रपठेन्नित्यं दुर्गानामशताष्टकम् नासाध्यं विद्यते देवि त्रि
षु लोकेषु पार्वति धनं धान्यं सुतां जायां हयं हस्तिनमेव च च
तुर्वर्गं तथा चान्ते लभेन्मुक्तिं च शाश्वतीम् नासाध्यं विद्यते देवि
कुमारीं पूजयित्वा तु ध्यात्वा देवीं सुरेश्वरीं पूजयेत्परया भक्त्या
पठेन्नामशताष्टकं तस्य सिद्धिर्भवेद्देवि सर्वैः सुरवरैरपि राजा
नो दासतां यान्ति राज्यश्रियमवाप्नुयात् गोरोचनालक्तककुङ्कु
मेन सिन्दूरकर्पूरमधुत्रयेण विलिख्य यन्त्रं विधिना विधिज्ञो भ
वेत्सदा धारयते पुरारिः भौमावस्यानिशाभागे चन्द्रे शतभि
षां गते विलिख्य प्रपठेत्स्तोत्रं स भवेत्संपदां पदम् इति श्रीविश्व
सारतन्त्रे दुर्गानामशताष्टकम् ॥ अथ महिषमर्दिनीकवचम्
ईश्वर उवाच शृणु वक्ष्ये महेशानि कवचं सर्वकामदम् यस्य प्र
सादमात्रेण भवेत्साक्षात्सदाशिवः ओंकारं पूर्वमुच्चार्य मन्त्रमे
तस्य सिद्धये प्रपठेत्कवचं नित्यं मन्त्रवर्णस्य सिद्धये महिषम
र्दिनीकवचस्य भगवान्महाकालऋषिः अनुष्टुप्छन्दः आद्या
शक्तिः भगवती महिषमर्दिनी देवता चतुर्वर्गफलाप्तये विनि
योगः ह्रीं पातु मस्तके देवी कामिनी कामदायिनी मकारः पा
तु मां देवी वक्त्रं पूर्णमहेश्वरी हिकारः पातु वदनं हिङ्गुला सुर
नायिका षिकारः पातु मां स्थाने जिह्वां नाम अपराजिता मकारः
पातु मां देवी कामिनी कामदायिनी र्दिकारः पातु मां देवी सावि
त्री कलिनाशिनी निकारः पातु मां नित्यं हृदये वामपार्श्वयोः
नाभौ लिङ्गे गुदे कण्ठे कर्णयोः पार्श्वयोस्तथा शिरोग्रीवां कवचेपा
देशं तं जङ्घायुगं तथा सर्वाङ्गे पातु मां स्वाहा सर्वशक्तिसमन्विता

तं॰
सा॰
८१
171

कामाक्षा पातु मां स्वाहा सर्वांगे मर्दिनी शिरः । दशाक्षरी महाविद्या ।
सर्वांगे पातु मर्दिनी मर्दिनी पातु सततं मर्दिनी रक्षयेत् सदा । प्रभा ।
पातु महेशानी कनका पातु सर्वदा । नंदिनी पातु सततं स्वप्रभा ।
सर्वदावतु विजया पातु सर्वत्र देवांगेन वशा क्रिया । शक्रियः पातु
सततं मुद्राः पातु सदा मम । जया पातु सदा सूक्ष्मा विष्णुदा पातु
सर्वदा । शाकिन्याः पातु सततं सिद्धा पातु सदा मम । सर्वत्र सर्वदा ।
पातु देवी महिषमर्दिनी । इति ते कथितं दिव्यं कवचं सर्वकामदं
यत्र तत्र न वक्तव्यं गोपितव्यं प्रयत्नतः । गोपितं सर्वतंत्रेषु विश्वमा
त्रे प्रकाशितम् । सर्वत्र सुलभा विद्या कवचं दुर्लभं महत् । शठाय
भक्तिहीनाय निंदकाय महेश्वरि । सूतांगे वातिरिक्तांगे कुचेमि
थ्याभिभाषिणि । न स्तवं दर्शयेद् दिव्यं कवचं सुदुर्लभम् । यत्र त ।
त्र न वक्तव्यं शंकरेणैव भाषितम् । दत्वा तेभ्यो महेशानि नश्यति
सिद्धयः क्रमात् । मंत्रः परांमुखो याति शापं दत्वा सुदारुणम् । पुस्त
कं च भवेत्तस्य तस्माद्यत्नेन गोपयेत् । गोरोचनाकुंकुमेन भूर्जपत्रे
महेश्वरि । लिखित्वा शुभयोगेन ब्रह्मलिंगे वेष्टितेन तथा । आयुष्मान्
सिद्धियोगो वा वैवा कोलेवपि वा वणिजे श्रवणायां वैरे वस्यां ।
.... उत्तरात्रययोगेषु नक्षत्रे पूर्वात्रयेषु च । अश्वि
न्यां वा वरारोहे न्यां लनीया नवमी तिथौ । अष्टम्यां वा चतुर्दश्यां पाब
ष्ठ्यां वा पंचमी तिथौ । कुहूवां पूर्णिमायां वा निशायां प्रातरेथवा
एकलिंगे श्मशाने वा शून्यागारे शिवालये । गुरूणां वैस्मवे वापि
संगमे कुलमेस्तथा । पुष्करे वा रक्तकुसुमैश्चंदनैः रक्तसंयुतैः
पूजां वा गोरोचनावैश्य लिखित्वा धारयेन्नरः । तस्य सर्वार्थसिद्धिः
स्यात् शंकरेणैव भाषितम् । कुमारीपूजनं कृत्वा तु देवीसूक्तं नि
वेद्य च पठित्वा भोजयेद्विप्रान् धनवान् वेदपारगान् । श्राविटकउ
पाख्यानं कुमार्यै च दिनत्रयम् । न दाधयेन्महारात्री कवचं सर्वका
मदम् । नाधयोमायय मलम्पडः खेशा कम संकवित् वादीमूको

भवेद्दृष्ट्वा राजा च सेवकायते मासमेकं पठेद्यस्तु प्रत्यहं नियतः
शुचिः दिवा भवेद्ध विद्याश्री रात्रौ शक्तिपरायणः षट्सहस्रप्र
माणेन प्रत्यहं प्रजपेत्सदा षण्मासैर्वा त्रिभिः मासैः वैवशोभ
वति ध्रुवम् अपुत्रो लभते पुत्रमधनो धनवान्भवेत् अरोगी व
लवांश्चैव राजा वदासमतामियात् रजस्वलाभगे नित्यं जपेद्विद्या
विधानतः पर्वयः कुरुधीमान्स एव श्रीसदाशिवः इति श्री
विश्वसारतंत्रे महिषमर्दिनीकवचम् ॥ अथ महिषमर्दिनी
स्तोत्रम् मञ्जीरैर्वरं चडिचूर्णितनुरागावारप्रचंडारवैर्वैरदारय।
भूरितुर्यरदरद्वैहार्मिममर्मापदः ते नायं निरूपतुं तो निरूपम।
श्रीपादपद्माटवी प्रान्तेन दूरस्माणेवममम नो हंसस्थिरं नंदन
हित्वा चंडि हिरण्यदारणपटुप्रोद्दामहस्ताग्रलिस्फायत्क
मेरुमोटरणटाटोपं न स्मिं हंसराः मातस्त्वमपुपापशोषणपटु
श्रीपादं समस्तविनीसंघ्नेकरवैरिणं किं मरभि भीतिर्भवेत्सेवि
नः २ चंडित्वद्धिषयान रत्नरपटं प्रोद्भ्रान्तरं चेद्रनंततत्वं पुरुष
प्रकृतमनुगातं ब्रह्मादिभिर्गीयते तस्माद्देविसमस्तदैवनस्ता
यामारैकयाम मस्करं श्रीमत्पादपयोजद्वंभन परं मामयं भावय
सविदाय यदि वास्तत्वतकुलपद्मावाराद्दुरं मास्तुपीकीर्तिः केश
वकौशिकाचेनवरीनौहास्तमन्मास्थिपिशांतर्वलहरिस्मरा
रिकृतभुगटेस्मारिसेवास्पदं श्रीमत्पादपयोजचिंतनविधौवि
नेसदैवास्तु नः ४ निर्दिष्टोस्मि यदि त्वदीयपदयुक्कर्पूरापराभा
वनाभिविष्टस्य नतामममापिविमलं किं वात्रसिद्धादिना तस्मा
देविरुध्याम भवाचिततनं श्रीपादपद्मद्वयी मञ्जीरैस्तनस्तपंद्रसर
नप्राणेऽप्यरितस्पृताम् ५ आत्मानं परिरम्भमूतपतिरप्युन्मा
दमामादितः स्मारं जीवनरत्नेणसवकुलीनेवास्मिविश्वकत्रभुः
देवाद्रिसुतं चेद्रचंदनवनप्राशाम्लरावासजन्माधीप्सर्णमवस्य
देककमलामोदेनमाश्वादितः ६ आक्रमीन रत्नादिमोहजल।

तं॰
स्तो॰ धिमाहारत्रलाविलब्रह्मानंदरसातिरेकविवशंभ्रांतेत्सादृशि
१८२ श्रस्मांकस्मरहेदनिर्भरमनस्तापाभिभूतत्तमश्रीमज्झकिरसा॰
172 तिदुर्दिनपरेवाहः सदामवेत् ॥ ७ त्वमादस्फुरदंशुजालज॰॰॰
वांवर्डाशुकोटिस्फुरत्स्वांतध्वांतविमारिसातिमिलचिदानंदद्र
पंदैवतम् सर्गंविसृजतेस्थितिंवितनुतेसृष्टिंपुनर्लुंपतेप्रोद्भि
न्नांजननीलनीरदमहश्चितेमदेवास्तुनः ८ यांश्रुत्वामहिष
ठलमिलमहर्जेनिविधाव॰॰॰ त्सलद्भ्रमांतःप्रसरतमस्तनश्रि
वोदेमसमालंभते सादुर्गाभवदुर्गतिंडरालंभातकत्रासनीदे
व्यदैवतवैरदारुणपटेजीयाज्जयाक्रांदिनी ९ नृत्यट्टहटकचा
मरांचलवलस्वक्रा॰॰॰ थर्वीश्वरस्फुरन्नेत्रत्वप्रशिलामुखोद्धुलद
लकाल्पादितामायुयो संस्कारामरिसर्पिवर्तितनपांवसा॰
दोपदुष्टादिवनरसंचडविंविडिनाखिललसत्केताहृपाशांकुव
ले १० कांधाकपविरामकालकलितप्रोद्दामसंपादकोमा
यत्मादिक्षतिधगानतनशिरःश्रेगांतरालस्थले वसंतेवसहपत्र
मध्यकलितैरत्नस्फुनैमात्रभिः सेवाकुरणंगानेरणमुदायु
धीयमानांनास्मरेत ११ दुर्बोधःक्रमसत्त्ववामकरयोस्तंकवांक
रेकांविंटवाणपत्रस्फुलमयपल्लनुद्दादयानंपशिवां श्यपा॰
मानीलचनोस्पंकृतलवलत्सोठठकुटसवलट्टीसफ्कालललस
त्कालवदनांह्योदद्दामाड्रवाम् १२ गांवधतवेदविमूर्तिमनंत्रो
पमांधनिरुर्क्तादिभिः शक्रोपरपिप्रजिनाद्भिमवरंस्तोभादिकंक्र
वेते यांमंसंतजयः सदर्थीविधिनाकाख्यामतकधाणत्सोभोद्धा
टनमारणादिकृतिनीतेभ्यांस्वयंजायते १३ स्तोत्रेनेवरणारविं
दयुगलध्यानावधानान्मयामंत्रोद्धारफलोपचाररचितांपूजा॰
पवारंयदि येपठंतिप्रतिदंतिदंविनरमाश्रीमात्कामादपसंधा
दसनगनाभवंतिजगतांमातर्नमस्तेजय १४ इतिश्रीमहिषम
र्दिनीस्तोत्रंसमाप्तम् ॥ ॐ ह्रीं ह्रीं ह्रींपकवीजेपापिशाहचिकम

लाकस्य विश्वस्य शोभे भव भव भवान्तकुले कुमतिवनदेवि विश्वं वशा
ह्रीपद्मे पद्मपद्मासनविष्टप्रणतजनमनोमोदसंपादयित्रि प्रोत्सर्पज्ज्ञा
नकूटे हरिनिजदयिते देवि संसारसारे १ ऐं ऐं ऐं इष्टमन्त्रे कमला
भवमुखाम्भोजभूतिस्वरूपे रूपारूपप्रकाशे सकलगुणमये निर्गुणे
निर्विकारे न स्थूले नातिसूक्ष्मेप्यविदितविषये नापि विज्ञाततत्त्वे वि
श्वे विश्वान्तराले सुरवरनमिते निष्कले नित्यशुद्धे २ ह्रीं ह्रीं ह्रीं जा
प्यतुष्टे हिमरुचिमुकुटे वल्लकीव्यग्रहस्ते मातर्मातर्नमस्ते दह दह
जडतां देहि बुद्धिं प्रशस्ताम् विद्ये वेदान्तगीते श्रुतिपरिपठिते मोक्ष
दे मुक्तिमार्गे मार्गातीतस्वभावे भव मम वरदा शारदे शुभ्रहारे ३ धीं
धीं धीं धारणाख्ये धृतिमतिनुतिभिर्नामभिः कीर्तनीये नित्येनित्ये
निमित्ते मुनिगणनमिते नूतने वै पुराणे पुण्ये पुण्यप्रवाहे हरिहरन
मिते नित्यशुद्धे सुवर्णे मातर्मात्रार्धतत्त्वे मतिमति मतिदे माधवप्री
तिनादे ४ ह्रीं ह्रीं ह्रीं स्वस्वरूपे दह दह दुरितं पुस्तकव्यग्रहस्ते संतु
ष्टाकारचित्ते स्मितमुखि सुभगे जृम्भिणि स्तम्भविद्ये मोहे मुग्धप्रवाहे
कुरु मम विमतिध्वान्तविध्वंसमीडे गीर्गौर्वाग्भारती त्वं कविवरर
सनासिद्धिदे सिद्धिसाध्ये ५ स्तौमि त्वां त्वां च वन्दे भज मम रसनां मा
कदाचित्त्यजेथाः मा मे बुद्धिर्विरुद्धा भवतु न च मनो देवि मे यातु पापम्
मा मे दुःखं कदाचित्क्वचिदपि विषयेप्यस्तु मे नाकुलत्वं शास्त्रे वादे क
वित्वे प्रसरतु मम धीर्मास्तु कुण्ठा कदाचित् ६ इत्येतैः श्लोकमुख्यैः
प्रतिदिनमुषसि स्तौति यो भक्तिनम्रो वाणीं वाचस्पतेरप्यभिमत
विभवो वाक्पटुर्मृष्टकण्ठः स स्यादिष्टार्थलाभैः सुतमिव सततं पा
ति तं सा च देवी सौभाग्यं तस्य लोके प्रभवति कविता विघ्नमस्तं प्र
याति ७ ब्रह्मचारी व्रती मौनी त्रयोदश्यां निरामिषः सारस्वतो नरः
पाठात् स स्यादिष्टफलाभवान् ८ पक्षद्वयेपि यो भक्त्या त्रयोदश्ये
कविंशति अविच्छिन्नः पठेद्धीमान् ध्यात्वा देवीं सरस्वतीम् ९ शुक्लां
वरयं देवीं शुक्लाभरणभूषिताम् वाञ्छितं फलमाप्नोति स लोके

ने· स्तो १७३ 173

नात्र संशयः ९ इति श्रीसारस्वतीस्तोत्रं समाप्तम् ॥ अथ गणेश-
स्तोत्रम् ॐकारमाद्यं प्रवदन्ति सन्तो वाचः श्रुतीनामपि यं गृणन्ति
गजाननं देवगणानताङ्घ्रिं भजेऽहमर्धेन्दुकृतावतंसम् १ पादारविं-
दार्चनतत्पराणां संसारदावानलभङ्गदक्षम् निरन्तरं निर्गतदान-
तोयैस्तं नौमि विघ्नेश्वरमम्बुदाभम् २ कृताङ्गरागं नवकुङ्कुमेन म-
त्तालिमालां मदपङ्कलग्नाम् निवारयन्तं निजकर्णतालैः को वि-
स्मरेत्पुत्रमनङ्गशत्रोः ३ शम्भोर्जटाजूटनिवासिगङ्गाजलं समानी-
य कराम्बुजेन लीलाभिराराच्छिवमर्चयन्तं गजाननं भक्तियुता भजन्-
ति ४ कुमारमुक्तौ पुनरात्महेतोः पयोधरौ पर्वतराजपुत्र्याः प्रक्षा-
लयन्तं करशीकरेण मुग्धाननं नागमुखं भजामि ५ त्वया समुद्धृ-
त्य गजास्यहस्ताद्ये शीकराः पुष्कररन्ध्रमुक्ताः व्योमाङ्गने ते विचरन्ति
ताराः कलात्मना मौक्तिकतुल्यभासः ६ क्रीडारते वारिनिधौ गजा-
स्ये वेलामतिक्रामति वारिपूरे कल्पावसानं परिचिन्त्य देवाः कैला-
सनाथं श्रुतिभिः स्तुवन्ति ७ नागाननेनागकृतोत्तरीयं क्रीडारते-
न देवकुमारसङ्घैः त्वयि क्षणं कालगतिं विहाय तौ प्रापतुः कन्दुक-
तामिनेन्दू ८ मदोल्लसत्पञ्चमुखैरजस्रमध्यापयन्तं सकलागमा-
र्थान् देवान् ऋषीन् भक्तजनैकमित्रं हेरम्बमर्कारुणमाश्रयामि ९
पादाम्बुजाभ्यामतिवामनाभ्यां कृतार्थयन्तं कृपया धरित्रीम् अका-
रणं कारणमाप्तवाचां तन्नागवक्त्रं न जहाति चेतः १० येनार्पितं सत्य-
वतीसुताय पुराणमालिख्य विषाणकोट्या तं चन्द्रमौलेस्तनयं त-
पोभिरवाप्यमानन्दघनं भजामि ११ पदं श्रुतीनामपदं स्तुतीनां
लीलावतारं परमात्ममूर्तेः नागात्मको वा पुरुषात्मको वेत्यभेद्यमा-
द्यं भज विघ्नराजम् १२ पाशाङ्कुशौ भग्नरदं त्वभीष्टं करैर्दधानं कररं-
ध्रमुक्तैः मुक्ताफलाभैः पृथुशीकरौघैः सिञ्चन्तमङ्गं शिवयोर्भजा-
मि १३ अनेकमेकं गजमेकदन्तं चैतन्यरूपं जगदादिबीजम् ब्रह्मे-
ति यं वेदविदो वदन्ति तं शम्भुसूनुं शरणं भजामि १४ स्नाकस्यता

यानिजवल्लभायामुखांबुजालोकनलोललोचनम् स्मेराननाब्जंम।
दैवमवेनमहंभजेनिविघ्नविमोहनेतम् १५ येपूर्वमाराध्यगजाननं
त्वांसर्वशास्त्राणिपठंतितेषाम् त्वत्तोनचान्यत्प्रतिपाद्यमेतत्तस्मि
न्नस्तमस्तमकल्मषम् १६ हिरण्यगर्भंजगदीशितारंकविंपुराणंर
विमेउलक्ष्यम् गजाननंयंप्रवदंतिसंतस्तंकालयोगैस्तमहंप्रप
द्ये १७ वेदांतगीतंपुरुषंभजेहमात्मानमानंदघनंहृदिस्थम्
गजाननंयन्महसाजनानांविघ्नांधकारंविलयंप्रयाति १८ शं
भोःसमालोक्यजटाकलापेशशांकखंडंनिजपुष्करेण स्वभग्न
दंतंप्रविचिंत्यमौग्ध्यादाक्रष्टुकामःशिवमाननोतु १९ विघ्ना
गलानांविनिपातनार्थंयन्नारिकेलैःकदलीफलाद्यैः प्रवार
यंतेमदवारणास्यःप्रभुंनरोभीष्टमहंभजेतम् यैस्तैरनेकैर्बहु
भिस्तपोभिराराध्यमाद्यंगजराजवक्त्रम् स्तुत्यानयायेविधिना
स्तुवंतितेसर्वलक्ष्मीनिधयोभवंति २१ इतिगणेशस्तवःसमाप्तः
अथगणेशकवचम् ईश्वरउवाच शृणुवक्ष्यामिकवचंसर्वसिद्धिक
रंप्रिये पठित्वाधारयित्वाचमुच्यतेसर्वसंकटात् अज्ञात्वाकवचं
देविगणेशस्यमनुंजपेत् सिद्धिर्नजायतेतस्यकल्पकोटिशतैर
पि ॐ आमोदश्चशिरःपातुप्रमोदश्चशिखोपरि संमोदोभ्रूयुगेपा
तुभ्रूमध्येचगणाधिपः गणक्रीडश्चक्षुर्युग्मंनासायांगणनायकः
गणक्रीडान्वितःपातुवदनेसर्वसिद्धये जिह्वायांसुमुखःपातु
ग्रीवायांदुर्मुखस्तथा विघ्नेशोहृदयेपातुविघ्ननाशश्चवक्षसि
गणानांनायकःपातुबाहुयुग्मंसदामम विघ्नकर्ताचह्युदरेवि
घ्नहर्ताचलिंगके गजवक्त्रःकटिदेशेएकदंतोनितंबके लंबोद
रःसदापातुगुह्यदेशेममारुणः व्यालयज्ञोपवीतीमांपातुपाद
युगेसदा जापकःसर्वदापातुजानुजंघेगणाधिपः हारिद्रःस
र्वदापातुसर्वांगेगणनायकः यइदंप्रपठेन्नित्यंगणेशस्यमहे
श्वरि कवचंसर्वसिद्ध्यर्थंसर्वविघ्नविनाशकम् सर्वसिद्धिकरंस्मृ

तं.
स्तो. दोत्सर्वपापविमोचनम् सर्वसंपत्प्रदं स्नानात्सर्वशत्रुक्षयंकरम्
ग्रहपीडाज्वरो रोगा ये चान्ये शूलकादयः पठनाच्छ्रवणाद्दस्य नाशं
१७४ मायान्ति तत्क्षणात् यमथामकरं देवि कवचं सुरपूजितम् समो ना
174 स्ति महेशानि त्रैलोक्ये कवचस्य च हारिद्रस्य महेशानि कवचस्य
वसुतले किमन्यैर्महालापैर्यदायुः स्वयं नाशियात् इति हारिद्र
गणेशकवचम् ॥ अथ सूर्यकवचम् श्रीसूर्य उवाच सांबसां
बमहाबाहो शृणु मे कवचं शुभम् त्रैलोक्यमंगलं नाम कवचं
परमाद्भुतम् यज्ज्ञात्वा मंत्रवित्सम्यक् फलमाप्नोति निश्चितम् यद्धृ
त्वा च महादेवो गणानामधिपो भवेत् पठनाद्धारणाद्विष्णुः सर्वेषां
पालकस्तथा एवमिन्द्रादयः सर्वे सर्वैश्वर्यमवाप्नुयुः कवचस्य ऋ
षिर्ब्रह्मा छंदोनुष्टुबुदाहृतम् श्रीसूर्यो देवता चात्र सर्वदेवनमस्
कृतः आरोग्ये च यशो मोक्षे विनियोगः प्रकीर्तितः प्रणवो मे शिरः
पातु घृणिर्मे पातु भालकम् सूर्योऽव्यान्नयनद्वन्द्वमादित्यः कर्णयु
ग्मकम् अष्टाक्षरी महाविद्या सर्वाभीष्टप्रदायिका ह्रीं बीजं मे मु
खं पातु हृदयं भुवनेश्वरी चंद्रबीजं विसर्गाढ्यं पातु मे गुह्यदेश
कम् अक्षरोऽसौ महामंत्रः सर्वतंत्रेषु गोपितः शिवो वह्निसमा
युक्तो वामाक्षिबिंदुभूषितः एकाक्षरो महामंत्रः श्रीसूर्यस्य प्र
कीर्तितः गुह्याद्गुह्यतरो मंत्रो वाञ्छाचिंतामणिः स्मृतः शीर्षादि
पादपर्यंतं सदा पातु मनूत्तमः इति ते कथितं दिव्यं त्रिषु लोके
षु दुर्लभम् श्रीप्रदं कांतिदं नित्यं धनारोग्यविवर्धनम् कुष्ठादि
रोगशमनं महाव्याधिविनाशनम् त्रिसंध्यं यः पठेन्नित्यमरो
गी बलवान्भवेत् बहुना किमिहोक्तेन यद्यन्मनसि वर्तते तत्त
त्सर्वं भवत्येव कवचस्य च धारणात् भूतप्रेतपिशाचाश्च यक्षगं
धर्वराक्षसाः ब्रह्मराक्षसवेतालाः नैव द्रष्टुमपि क्षमाः दूरादेव प
लायंते तस्य संकीर्तनादपि भूर्जपत्रे समालिख्य रोचनागुरुकुं
कुमैः रविवारे च संक्रांत्यां सप्तम्यां च विशेषतः धारयेत्साधक

श्रेष्ठः स त्रैलोक्यविजयी भवेत् त्रिलोहमध्यगं कृत्वा वा धारयेद्दक्षिणे भु
जे शिखायामथवा कंठे सोपि सूर्यो न संशयः इति ते कथितं सांब।
त्रैलोक्यमंगलाभिधम् कवचं दुर्लभं लोके न देयं ह्यात्मकाधिनम्
अज्ञात्वा कवचं देवि जपेन्मंत्रमनुत्तमम् सिद्धिर्न जायते सम्यक् क
ल्पकोटिशतैरपि इति श्रीब्रह्मयामले त्रैलोक्यमंगलं नाम सूर्यक
वचं समाप्तम् ॥ अथ श्रीरामकवचम् सनत्कुमार उवाच ध्यात्वा नी
लोत्पलश्यामराजीवलोचनम् जानकीलक्ष्मणोपेतं जटामुकुटमं
डितम् सासितूणधनुर्बाणपाणिं नक्तंचरान्तकम् स्वलीलया जगत्त्रा
णमाविर्भूतमजं विभुम् रामरक्षां पठेत्प्राज्ञः पापघ्नीं सर्वकामदाम्
अस्य श्रीरामकवचस्य बुधकौशिकऋषिः अनुष्टुप् छंदः श्रीराम
चन्द्रो देवता श्रीरामप्रीत्यर्थं मंत्रपाठे विनियोगः शिरो मे राघवः पा
तु भालं दशरथात्मजः कौसल्येयो दृशौ पातु विश्वामित्रप्रियः श्रुती
घ्राणं पातु मखत्राता मुखं सौमित्रिवत्सलः जिह्वां विद्यानिधिः पातु
कंठं भरतवंदितः स्कंधौ दिव्यायुधः पातु भुजौ भग्नेशकार्मुकः क
रौ सीतापतिः पातु हृदयं जामदग्न्यजित् वक्षः पातु कबंधारिः स्त
नौ गीर्वाणवंदितः पार्श्वौ रघुपतिः पातु कुक्षिमिक्ष्वाकुनंदनः मध्यं
पातु खरध्वंसी नाभिं जांबवदाश्रयः गुह्यं जितेंद्रियः पातु पृष्ठं पातु
रघूद्वहः सुग्रीवेशः कटिं पातु सक्थिनी हनुमत्प्रभुः ऊरू रघूत्तमः पा
तु रक्षःकुलविनाशकृत् जानुनी सेतुकृत्पातु जंघे दशमुखान्तकः
पादौ विभीषणश्रीदः पातु रामोऽखिलं वपुः एतां रामबलोपेतां र
क्षां यः सुकृती पठेत् स चिरायुः सुखी पुत्री विजयी विनयी भवेत्
पातालभूतलव्योमचारिणः छद्मचारिणः न द्रष्टुमपि शक्तास्ते
रक्षितं रामनामभिः रामेति रामभद्रेति रामचंद्रेति वा स्मरन् नरो न
लिप्यते पापैः भुक्तिं मुक्तिं च विंदति जगज्जैत्रैकमंत्रेण रामनाम्नाभि
रक्षितम् यः कंठे धारयेत्तस्य करस्थाः सर्वसिद्धयः भूर्जपत्रे त्विमां वि
द्यां गंधचंदनचर्चिताम् कृत्वा वै धारयेद्यस्तु सोपीष्टफलमाप्नुयात्

नं·
स्ता·
१७५
175

आरामस्तातः सर्वत्रलभंतेजयमंगलम् आदिष्टवान्यथास्वप्नेरामर·
क्षामिमांहरिः तथालिखितवान्प्रातःप्रबुद्धोबुधकौशिकः रामो
दाशरथिःशूरोलक्ष्मणानुचरोबली काकुत्स्थःपुरुषःपूर्णःकौ·
सल्येयोरघूत्तमः धन्विनौबद्धनिस्त्रिंशौकाकपक्षधरौशुभौ वीरौ
मांपथिरक्षेतांतावुभौरामलक्ष्मणौ पुत्रौदशरथस्यैतौभ्रातरौरा
मलक्ष्मणौ शरण्यौसर्वसत्वानांश्रेष्ठौसर्वधनुष्मताम् तरुणौरूप
संपन्नौसुकुमारौमहाबलौ पुंडरीकविशालाक्षौपीतकृष्णाजिनां
बरौ फलमूलाशिनौदांतौतापसौब्रह्मचारिणौ सन्नद्धःकवची
खड्गीचापबाणधरोयुवा गच्छन्मनोरथान्नश्चरामःपातुसलक्ष्मणः
रक्षःकुलनिहंतारौत्रायेतांनोरघूत्तमौ आत्तसज्जधनुषाविषुस्पृशा
वक्षयाशुगनिषंगसंगिनौ रक्षणायममरामलक्ष्मणावग्रतःपा
थिसदैवगच्छताम् अग्रतस्त्वंशिरोमेपृष्ठेनागरुडध्वजः पार्श्व
योस्तुधनुष्मंतौसशरौरामलक्ष्मणौ आपादमपहर्तारंदातारंस
र्वसंपदाम् गुणाभिरामंश्रीराममभूयोभूयोनमाम्यहम् दक्षिणेल
क्ष्मणोयस्यवामतोजानकीशुभा पुरतोमारुतिर्यस्यतंनमामिर
घूत्तमम् वेदान्तवेद्योयज्ञेशःपुराणःपुरुषोत्तमः जानकीवल्लभः
श्रीमानप्रमेयपराक्रमः एतानिममनामानिसंकीर्त्ययःसदापठे
त् अश्वमेधायुतंपुण्यंसंप्राप्नोतिनसंशयः इतिश्रीरामकवचंस
मातम् ॥ अथश्रीरामनामशताष्टकम् श्रीवेदव्यासउवाच ए·
कांतेभवनरम्येरामस्याद्भुतकर्मणः नामाष्टकशतंपुण्यंत्रिषु
लोकेषुविश्रुतम् नातःपरतरंगुह्यंत्रिषुलोकेषुविद्यते कैलास
शिखरेरम्येनानाद्रुमविचित्रिते एकाग्रमनसोभूत्वाविश्वमाराध्य
भक्तितः उपविष्टस्ततोभोक्तुंपार्वतीशंकरोब्रवीत् पार्वतिसहिमया
सार्वभौमोकस्मुवनवंदिते तमाहपार्वतीदेवीजन्मानामसहस्रकम्
तत्रैवक्षाम्यहंदेवमुख्यतोभवताप्रभो ततस्तांपार्वतीप्राह ब्रह्मन्
रमेश्वरः यस्मात्सिकृतपुण्यासिविज्ञमकाशिपार्वति दुर्लभावेस्म

वीभक्तिर्भोगाय येयं विनिश्चरि रकारादीनि नामानि शृणवतो मम पार्वति
मनः प्रसन्नतामेति रामनामाभिशंकया रमंते योगिनोऽनंते सदान
न्दे चिदात्मनि इति रामपदेनासौ परब्रह्माभिधीयते रामरामेति राम
ति रमे रामे मनोरमे सहस्रनामभिस्तुल्यं रामनाम वरानने रामेत्
स्कामहादेवि भुक्तामार्थ मयापुना ततो रामेति नामोक्तं सहस्रं जी
न पार्वती ततो भुक्ता महादेवी पतिनाम सहस्रं स्थिता पप्रच्छ श्रीम
हादेवं प्रीतिप्रवनमानसा सहस्रनामभिस्तुल्यं रामनाम त्वयोदितं
तस्मात्सर्वाणि नामानि स्मर्तिचेद्रावणाहि षः कथ्यतां मम देवेश तत्र
मे प्रीतिरुत्तमा श्रीशंकर उवाच लौकिका वैदिकाः सर्वाये केचित्सं
ति पार्वति नामानि रामभद्रस्य सहस्रं तेषु चाधिकम् तेषु चात्मत
पुण्यं हि नाम्नामष्टोत्तरं शतम् विलोरेकैकनामानि सर्ववेदाधिकं
कं फलम् तान्येकनाम सहस्रेण राम राम प्रतिमतम् जपतः सर्ववे
दाश्च सर्वे मंत्राश्च पार्वति तस्मात्कोटिगुणं पुण्यं रामनाम्नैव लभ्यते
अस्य श्रीरामचंद्रस्याष्टोत्तरशतनाम्ना ईश्वर ऋषिः अनुष्टुप्छंदः
श्रीरामचंद्रो देवता श्रीरामप्रीत्यर्थं जपे विनियोगः श्रीरामराम
भद्रस्य रामचंद्रश्च शाश्वतः राजीवलोचनः श्रीमान्राजेंद्रो रघुपुंग
वः जानकीवल्लभो जैत्रो जितामित्रो जनार्दनः विश्वामित्रप्रियो दां
तः शरणत्राणतत्परः वालिप्रमथनो वाग्मी सत्यवाक्सत्यविक्रमः
सत्यव्रतो व्रतफलः सदा हनुमदाश्रयः कौसलेयः खरध्वंसी विरा
धवधपंडितः विभीषणपरित्राता दशग्रीवशिरोहरः सप्ततालप्र
भेत्ता च हरकोदंडखंडनः जामदग्न्यमहादर्पदमनस्ताटकांतकः
वेदांतसारो वेदात्मा भवरोगस्य भेषजः दूषणत्रिशिरोविश्वत्रिमू
र्तिस्त्रिगुणस्त्रयी त्रिविक्रमस्त्रिलोकात्मा पुण्यचारित्रकीर्तनः त्रि
लोकरक्षको धन्वी दंडकारण्यपुण्यकृत अहल्यापावनश्चैव पितृ
भक्तो वरप्रदः जितेंद्रियो जितक्रोधो जितलोभो जगद्गुरुः ऋक्ष
वानरसंघाती चित्रकूटसमाश्रयः जयंतत्राणवरदः सुमित्राप

तं. स्तो. १८
176

त्रेसेवितः सर्वदेवाधिदेवश्च मृतवानरजीवनः मायामारीचहंता च
महाभोगो महाभुजः सर्वदेवस्तुतः सौम्यो ब्रह्मण्यो मुनिसत्तमः म
हायोगी च उदारः सुग्रीवस्थितदायकः सर्वपुण्याधिकफलः स्मृ
तसर्वाघनाशनः आदिपुरुषो महापुरुषः परमः पुरुषः पुण्योदयो
दयासारः पुराणः पुरुषोत्तमः स्मितवक्त्रो मितभाषी पूर्वभाषी च रा
घवः अनंतगुणगंभीरो धीरोदात्तगुणोत्तमः मायामानुषचारित्रो
महादेवाभिपूजितः सेतुकृज्जितवारीशः सर्वतीर्थमयो हरिः श्या
मांगः सुंदरः शूरः पीतवासाः धनुर्धरः सर्वयज्ञाधिपो यज्ञो जरामरण
वर्जितः परमात्मा परंब्रह्म सच्चिदानंदविग्रहः परंज्योतिः परंधाम प
राकाशः परात्परः परेशः पारगः पारः सर्ववेदात्मकः शिवः इति
श्रीमद्रामभद्रस्य नाम्नामष्टोत्तरं शतम् गुह्याद्गुह्यतरं देवि तव
प्रीत्या प्रकीर्तितम् यः पठेच्छृणुयाद्वापि भक्तियुक्तेन चेतसा सर्वैः
मुच्यते पापैः कल्पकोटिशतैरपि जलानि स्थलतां यांति शत्रवो या
ति मित्रताम् राजानो वश्यतां यांति वह्नितो यांति शीततां आनुकू
लं च भूतानि स्थैर्यं यांति चलाश्रियः अनुग्रहं ग्रहा यांति शांतिमा
यान्त्युपद्रवाः पठतो भक्तिभावेन जनस्य गिरिसंभवे यः पठेत्सर
याभक्त्या तस्य वश्यं जगत्त्रयम् यद्यत्कामयते चित्ते तत्तदाप्नोति
कीर्तनात् यः पठेद्रामचंद्रस्य नाम्नामष्टोत्तरं शतम् पुण्यकाले
षु सर्वेषु पठन्नानं समाप्नुयात् तेनेनापि च कुर्वाणो न स पापेन
लिप्यते सर्ववेदेषु तीर्थेषु दानेषु च तपस्सु च न फलं कोटिगुणि
तं ल्लवेनानेन लभ्यते अल्पकालेषु सर्वेषु पठेन्नामशताष्टकम्
कल्पकोटिसहस्राणि कल्पकोटिशतानि च वैकुंठवासमाप्नोति
दशपूर्वैर्दशापरैः रामरक्तोत्पलश्यामं पद्माक्षं पीतवाससम् स्तु
वंति नामभिर्दिव्यैर्न ते संसारिणो नराः रामाय रामभद्राय रामचं
द्राय वेधसे रघुनाथाय नाथाय सीतायाः पतये नमः इमं मंत्रम
हादेवि जपन्नेवं दिवानिशम् सर्वपापविनिर्मुक्तो विष्णुसायुज्य

मामुयात् इत्येतन्नामसहस्रमाहात्म्यं वेदसंमितम् कथितं तव गां
गेयं यतस्त्वं वैष्णवोत्तमः वंदामहे महेशानं हरकोदंडखंडनम् जान
कीहृदयानंदचंदनं रघुनंदनम् इति श्रीपद्मपुराणे देवीश्वरसंवा
दे श्रीरामचंद्रस्तोत्रं समाप्तम् ॥ अथ विष्णुस्तोत्रम् ॐ आरादयं वेदाः
सकलाः समुद्रान्निहत्य सरिशमसूदयम् दत्ता पुराये न पितामहाय।
विष्णुं तमाद्यं भज मत्स्यरूपम् १ हिमाम्रतार्थं मथिते महाब्धौ देवा।
सुरैर्वासुकिमंदराद्यैः भूमेर्महाब्धोविचूर्णितायाः स्तं कूर्ममाधार
गतं नमामि २ सामुद्रकांचीसरित्तनरीया वसुंधरा मेरुकिरीटभार
दंताग्रतो येन समुद्धृता भूः स्तमादिकोलं शरणं प्रपद्ये ३ भक्तार्तिभं
गं स्तम यो विधाय स्तंभांतरालादुदितो नृसिंहः रिपुं सुराणां निशि
तैर्नखाग्रैर्विदारयंस्तं न च विस्मरामि ४ बलेः समुद्दामरणाय दित्री
न्यासाय नालं चरणः स्यतस्य यकस्पनामस्पयदं सुराणां त्रिविक्र
मं सर्वगतं नमामि ५ त्रिसप्तवारं नृपतीन्निहत्य यस्तर्पणं रक्तम
यं पितृभ्यः चकार दोर्दंडबलेन सम्यक् तमादिशूरं प्रणमामि विष्णुं ९
कुले रघूणां समवाप्य जन्म विधाय सेतुं जलधेर्जलांतः लंकेश्वरं
यः शमयांचकार सीतापतिं तं प्रणमामि भक्त्या ७ हलेन सर्वान्।
सुरान्निकृष्य चकार चूर्णं मुसलप्रहारैः यः कृष्णमासाद्य बलं ब।
लीयान् भक्त्या भजे तं बलराममद्य ८ पुरा सुराणामसुरान्विजे
तुं संभावयन् चीवरचिह्नवेषम् चकार यः शास्त्रममोघकल्पं तम
मूलभूतं प्रणतोस्मि बुद्धम् ९ कल्पावसाने निखिलैः खुरैः स्वैः संघार
यामास निमेषमात्रात् यस्तेजसा निर्दहतानि भीमो विष्णात्मकं
तं तुरगं भजामः १० शंखं स्वचक्रं स्वगदां सरोजं दोर्भिर्दधानं गरु।
डाधिरूढम् श्रीवत्सचिह्नं जगदादिमूलं तमालनीलं हृदि विष्णु
मीडे ११ क्षीरांबुधौ शेषविशेषतल्पे शयानमंतः स्मितशोभिव
क्त्रम् उत्फुल्लनेत्रांबुजमंबुदाभमाद्यं श्रुतीनां सततं स्मरामि १२
प्रीणाति दनयास्त्वपाजगन्नाथं जगन्मयम् धर्मार्थकाममोक्षदा।

तं॰ स्तो॰ ८० 177

णामामयेपुरुषोत्तमम् इति श्रीविष्णुस्तोत्रं समाप्तम् ॥ अथ श्री॰
कृष्णस्तोत्रम् प्रसीद भगवन्मह्यमज्ञानात्कुण्ठितात्मने तवाङ्घ्रिपङ्क
जरजोरागिणीं भक्तिमुत्तमाम् अज प्रसीद भगवन्नमितद्युतिपं॰
जरः अप्रमेय प्रसीदास्मद्दुःखहन्पुरुषोत्तमम स्वसंवेद्य प्रसीदास्मा
नानन्दात्मन्ननामय अचिन्त्यसार विश्वात्मन्प्रसीद परमेश्वर प्रसी
द तुङ्गतुङ्गानां प्रसीद शिव शोभन प्रसीद गुणगम्भीर गम्भीराणां
महाद्युते प्रसीदाव्यक्त विस्तीर्ण विस्तीर्णानामगोचर प्रसीदास्म
द्विनातीनामनन्तस्त्वमनाथानामिनाम गुरुर्गरीयः सर्वेशः प्रसीदानां
नतेहिनाम् जय माधव मायात्मन् जय शाश्वत सङ्गमन जय प्राव्य
रश्रीमन् जय नन्दकनन्दन जय चक्रगदापाणे जय देव जनार्दन ज
य रत्नवराबद्धकिरीटाक्रान्तमस्तक जय पक्षिपतिच्छायानिरुद्धा
र्ककराहरण नमस्ते नरकाराते नमस्ते मधुसूदन नमस्ते ललि
तापाङ्ग नमस्ते नरकान्तक नमः पापहरेशान नमः सर्वभयापह
नमः संभूतसर्वात्मन्नमः संभृतकौस्तुभ नमस्ते नयनातीत नमः
स्ते भयहारक नमो विभिन्नदेहाय नमः स्मृतिपथातिग नमस्त्रिमू
र्तिभेदेन सर्गस्थित्यन्तहेतवे विष्णवे त्रिदशारातिजिष्णवे परमात्म
ने चक्रभिन्नारिचक्राय चक्रिणे चक्ररूपिणे विश्वाय विश्ववन्द्याय
विश्वभूतात्ममूर्तये नमोस्तु योगिध्येयात्मन्नमस्ते ध्यानरूपिणे
मुक्तिप्रदाय भक्तानां नमस्ते मुक्तिदायिने पूजनं हवनं चेष्टा ध्यानप
श्रान्नमस्क्रिया देवेशाकर्म सर्वं मम देवाराधनं तव इतिह्वनज
पार्काभेरतो विष्णुर्ज्ञानियतनूदयकर्मा यत्नमन्त्रीचिराय सव
लमकलकामान्प्राप्य कृष्णानरात्माजननमस्ततिविमुक्तामुत्तमामु
क्तिमेति गोगोपगोपिकावीतं गोपालं गोष्ठगोप्रदम् गोगीवीडाको
सदैवैनौमि गोकुलनायकम् प्रीणयेदनघात्मस्त्वा जगन्नाथं ज
गन्मयम् धर्मार्थकाममोक्षाणामामयेपुरुषोत्तमम् इति श्रीकृ
ष्णस्तोत्रं समाप्तम् ॥ अथ श्रीगोपालस्तोत्रम् नारद उवाच नवी

ननीरदश्यामंनीलेंदीवरलोचनम् वल्लवीनंदनंवंदेकृष्णंगो।
पालरूपिणम् स्फुरद्बर्हदलोद्बद्धनीलकुंचितमूर्धजम् कदंब।
कुसुमाबद्धवनमालाविभूषितम् गंडमंडलसंसर्गिचलत्कांच
नकुंडलम् स्थूलमुक्ताफलोदारहारद्योतितवक्षसम् हेमांगद
तुलाकोटिकिरीटोज्वलविग्रहम् मंदमारुतसंक्षोभवल्गितांब
रसंचयम् रुचिरोष्ठपुटन्यस्तवंशीमधुरनिःस्वनैः लसद्गोपालि
काचेतोमोहयंतंमुहुर्मुहुः वल्लवीवदनांभोजमधुपानमधुव्र।
तम् क्षोभयंतंमनस्तासांसस्मेरापांगवीक्षणैः यौवनोद्भिन्नदेहाभि
संसक्ताभिःपरस्परम् विचित्रांबरभूषाभिर्गोपनारीभिरावृतम्
प्रभिन्नांजनकालिंदीजलकेलिकलोत्सुकम् योधयंतंक्वचि।
द्गोपान्व्याहरंतंगवांगणम् कालिंदीजलसंसर्गिशीतलानिल
कंपिते कदंबपादपच्छायेस्थितंवृंदावनेक्वचित् रत्नभूधरसंल
ग्नरत्नासनपरिग्रहम् कल्पपादपमध्यस्थहेममंडपिकागतं
वसंतकुसुमामोदसुरभीकृतदिङ्मुखे गोवर्धनगिरौरम्येस्थि
तंरासरसोत्सुकम् सव्यहस्ततलन्यस्तगिरिवर्यातपत्रकम् ख
ण्डिताखण्डलोन्मुक्तमुक्तासारघनाघनम् वेणुवाद्यमहोल्लासकृ
तहुंकारनिःस्वनैः सवत्सैरुन्मुखैःशश्वद्गोकुलैरभिवीक्षितम् कृ
ष्णमेवानुगायद्भिस्तच्चेष्टावशवर्तिभिः दंडपाशोद्यतकरैर्गोपा
लरूपशोभितम् नारदाद्यैर्मुनिश्रेष्ठैर्वेदवेदांगपारगैः प्रीतिसु
स्निग्धयावाचास्तूयमानंपरात्परम् यएवंचिंतयेद्देवंभक्त्यासंस्तौ
तिमानवः त्रिसंध्यंतस्यतुष्टोसौददातिवरमीप्सितम् राजवल्लभ
तामेतिभवेत्सर्वजनप्रियः अचलांश्रियमाप्नोतिसवाग्मीजाय
तेध्रुवम् इतिश्रीगौतमीयतंत्रेनारदसंवादेश्रीगोपालस्तोत्रंसमाप्तम्
अथश्रीकृष्णकवचम् भगवन्सर्वधर्मज्ञकवचंयत्प्रकाशितम्
त्रैलोक्यमंगलंनामकृपयाकथयप्रभो सनत्कुमारउवाच शृ
णुवक्ष्यामिविप्रेंद्रकवचंपरमाद्भुतम् नारायणेनकथितंकृप

तं॰
सा॰
१७८
178

याब्रह्मणोक्ता ब्रह्मणाकथितंमह्यंमहास्नेहाद्वदामिते अतिगुह्य
तरंतत्त्वंब्रह्ममन्त्रौघविग्रहम् यद्धृत्वापठनाद्ब्रह्मासृष्टिंवितनुतेध्रुवं
यद्धृत्वापठनात्पातिमहालक्ष्मीर्जगत्त्रयम् पठनाद्धारणाच्छंभुःसंह
र्तासर्वतत्त्ववित् त्रैलोक्यजननीदुर्गामहिषादिमहासुरान् वरतृ
प्तान्जघानैवपठनाद्धारणाद्यतः एवमिन्द्रादयःसर्वेसर्वैश्वर्यमवा
प्नुयुः इदंकवचमत्यन्तगुप्तंकुत्रापिनोवदेत् शिष्यायभक्तियुक्ता
यसाधकायनिवेदयेत् शठायपरशिष्यायदत्त्वामृत्युमवाप्नुया
त् त्रैलोक्यमङ्गलस्यास्यकवचस्यप्रजापतिः ऋषिश्छन्दश्चगायत्री
देवोनारायणःस्वयम् धर्मार्थकाममोक्षेषुविनियोगःप्रकीर्तितः
ॐप्रणवोमेशिरःपातुनमोनारायणायच भालंपायान्नेत्रयुग्मम
ष्टार्णोभुक्तिमुक्तिदः क्लींपायाच्छ्रोत्रयुग्मंमेचैकार्णःसर्वमोहनः
क्लींकृष्णायसदाघ्राणंगोविंदायेतिजिह्विकाम् गोपीजनपदव
ल्लभायस्वाहाननंमम अष्टादशाक्षरोमन्त्रःकण्ठंपातुदशाक्षरः
गोपीजनपदवल्लभायस्वाहाभुजद्वयम् क्लींग्लौंक्लींश्यामलाङ्गाय
नमःस्कन्धौदशाक्षरः क्लींकृष्णक्लींकरौपायात्क्लींकृष्णायाङ्गतोव
तु हृदयंभुवनेशानःक्लींकृष्णायक्लींस्तनौमम गोपालायाग्नि
जायान्तःकुक्षियुग्मंसदावतु क्लींकृष्णायसदापातुपार्श्वयुग्मम
नुत्तमः कृष्णगोविंदकौपातांस्मराद्यौङेयुतौमनुः अष्टाक्षरःपातु
नाभिंकृष्णेतिद्व्यक्षरोवतु पृष्ठंक्लींकृष्णकंकालंक्लींकृष्णायद्वि
ठान्तकः सक्थिनीसततंपातुश्रींह्रींक्लींकृष्णठद्वयम् ऊरूसप्ताक्ष
रःपायात्त्रयोदशाक्षरोवतु श्रींह्रींक्लींपदतोगोपीजनवल्लभपदं
ततः भायस्वाहेतिपायुंमेक्लींह्रींश्रींचदशार्णकः जानुनीचस
दापातुह्रींश्रींक्लींचदशाक्षरः त्रयोदशाक्षरःपातुजंघेचक्रगदा
धृथः अष्टादशाक्षरोह्रींश्रींपूर्वकोविंशदर्णकः सर्वाङ्गंमेसदा
पातुद्वारकानायकोबली नमोभगवतेपश्चाद्वासुदेवायतत्परं
ताराद्योद्वादशार्णोयंप्राच्यांमांसर्वदावतु ताराद्योनमोभगवतेरु

किल्गोवल्लभायच स्वाहेतिषोडशार्णोयं नैर्ऋत्यांदिशिरक्षतु क्लीं
हृषीकेशायनमः पदंमांवरुणोवतु अष्टादशार्णःकामान्तोवायव्ये
मांसदावतु श्रीमायाकामकृष्णायगोविंदायद्विठोमनुः द्वादशा
र्णात्मकोविश्वकृत्तरेमांसदावतु वाग्भवंकामकृष्णायह्रींगोविं
दायततःपरम् श्रीगोपीजनवल्लभायस्वाहाचैवसोस्ततः द्वाविं
शत्यक्षरोमंत्रोमाममैशान्येसदावतु कालियस्यफणामध्येदिव्यंनृ
त्यंकरोतितम् नमामिदेवकीपुत्रंनृत्यराजानमच्युतम् द्वात्रिंशा
क्षरोमंत्रोप्यधोमांसर्वदावतु कामदेवायविद्महेपुष्पबाणायधी
महि तन्नोनंगः प्रचोदयात् इतिमांपातुचोर्ध्वतः इतितेकथितंब्रह्म
न्सर्वमंत्रौघविग्रहम् त्रैलोक्यमंगलंनामकवचंब्रह्मरूपिणम् ब्र
ह्मणाप्रमुखाथीशा नारायणमुखाच्छ्रुतम् तवस्नेहान्मयाख्यातंप्र
वक्तव्यंनकस्यचित् गुरुंप्रणम्यविधिवत्कवचंप्रपठेत्ततः त्रिसं
कृत्वायथाज्ञानंसोपिसर्वतपोमयः मंत्रेषुसकलेष्वेवदेशिको
नात्रसंशयः शतमष्टोत्तरंचास्यपुरश्चर्याविधिःस्मृतः हवनादी
न्दशांशेनकृत्वातत्साधयेद्ध्रुवम् यदिस्या``` वोत्सिद्धिःकवचोवि
ष्णुरेवभवेत्स्वयम् मंत्रसिद्धिर्भवेत्तस्यपुरश्चर्याविधानतः स्पर्धामु
द्धूयभवनेलक्ष्मीर्वाणीवसेन्मुखे पुष्पांजल्यष्टकंदत्वामूलेनैवप
ठेत्सकृत् दशवर्षसहस्राणिपूजायाःफलमाप्नुयात् भूर्जेविलिख्य
गुटिकांस्वर्णस्थांधारयेद्यदि कंठेवादक्षिणेबाहौसोपिविष्णुर्नसं
शयः अश्वमेधसहस्राणिवाजपेयशतानिच महादानानियानिमे
वसकुक्षुभ्रमणायतः कवचस्यप्रसादेनजीवन्मुक्तोभवेन्नरः त्रै
लोक्यंक्षोभयत्येवत्रैलोक्यविजयीभवेत् प्राददन्तांपाम वक्षेवकला
नार्हतिषोडशीम् इदंकवचमज्ञात्वायभजेत्पुरुषोत्तमम् शतल
क्षप्रजप्तोपिनमंत्रःसिद्धिदायकः इतिश्रीसनत्कुमारतंत्रे त्रैलो
क्यमंगलंनामकवचम्संपूर्णम् ॥ अथशिवस्तोत्रम् यशापो
त्रिसकृद्धाममविशेषकेमूर्तये सर्वभूतात्मनाश्यायशंकरायन

तं॰
स्तो॰ मो नमः श्रुतंस्मृतकृतवामाय श्रुतये श्रुतजन्मने अतींद्रियाय मा
१८९ हसे शाश्वताय नमो नमः स्थूलसूक्ष्मविभागाभ्यामनिर्देश्याय संभ
वे भवाय भवभूताय दुःखदग्धे नमोस्तु ते नर्कमार्गातिभूताय त
१८९ पस्याफलदायिने चतुर्वर्गवदान्याय सर्वज्ञाय नमो नमः आदिम
ध्यांतशून्याय निरस्ताशेषभीतये योगिध्येयाय महते निर्गुणाय
नमो नमः विश्वात्मने विचित्राय विलसच्चन्द्रमौलये कंदर्पदर्प
नाशाय कालहंत्रे नमो नमः विषाशनाय विहरद्वृषस्कंधसुपेशु
षे सरिद्दाममस्तावद्धकपर्दाय नमो नमः शुद्धाय शुद्धभावाय शु
द्धानामन्तरात्मने पुरांतकाय पूर्णाय पुण्यनाम्ने नमो नमः तुष्टाय
निजभक्तानां भुक्तिमुक्तिप्रदायिने निर्वासितनिराशाय विश्वशा
स्त्रे नमो नमः त्रिमूर्तिमूलभूताय त्रिनेत्राय दिसंभवे त्रियाम्ना
यामसूताय जन्मघ्नाय नमो नमः देवासुरशिरोरत्नकिरणारु
णितांघ्रये कांताय निजकांतायेदत्तार्धाय नमो नमः स्तोत्रेणा
नेन पूजायां प्रीणयेज्जगतः पतिम् भुक्तिमुक्तिप्रदं भक्त्या सर्वज्ञंप
रमेश्वरम् इति शिवस्तोत्रम् ॥ अथ शिवकवचम् भगवन्देवदेवे
श सर्वाम्नायप्रपूजित सर्वमेकथितं देव कवचं न प्रकाशितम् प्र
सादाख्यस्य मंत्रस्य कवचं मे प्रकाशय सर्वरक्षाकरं देव यदि स्ने
होस्ति मां प्रति श्रीभगवानुवाच प्रासादमंत्रकवचस्य वामदे
व ऋषिः पंक्तिश्छंदः सदाशिवो देवता साधकाभीष्टसिद्धौ विनि
योगः शिरो मे सर्वदा पातु प्रासादाख्यः सदाशिवः षडक्षरस्वरूपो
मे वदनं तु महेश्वरः पंचाक्षरात्मा भगवान्भुजौ मे परिरक्षतु मृत्यु
ंजयस्त्रिबीजात्मा आयू रक्षतु मे सदा वटमूलसमासीनो दक्षिणा
मूर्तिरव्ययः सदा मां सर्वदा पातु षट्त्रिंशत्तत्त्वरूपधृक् द्वावि
शार्णात्मको मंत्रः ऊर्ध्वं मे परिरक्षतु त्रिवर्णात्मा नीलकंठः कंठं
रक्षतु सर्वदा चिंतामणिर्बीजरूपोऽर्धनारीश्वरो हरः सदा रक्ष
तु मे गुह्यं सर्वसंपत्प्रदायकः एकाक्षरस्वरूपात्मा कूटरूपी महे

श्वरः मार्तंडभैरवो नित्यं पातो मे परिरक्षतु नैर्ऋत्यां मे महावीजस्व
रूपः त्रिपुरान्तकः सदा मां वारणे भूमौ चैव रक्षतु विद्याधिपः ऊर्ध्वमूर्धा
नमीशानो मम रक्षतु सर्वदा दक्षिणस्यां तत्पुरुषो मां मायाद्गिरिनाथ
कः अघोराख्यो महादेवः पूर्वस्यां परिरक्षतु उत्तरस्यां सदा पातु सद्यो।
जातस्वरूपधृक पश्चिमायां सदा पातु वामदेवो महेश्वरः इत्येतद्रक्षा
करं देवि कवचं देवदुर्लभम् प्रातःकाले पठेद्यस्तु सोऽभीष्टफलमाप्नु
यात् पूजाकाले पठेद्यस्तु कवचं साधकोत्तमः कीर्तिश्रीकांतिमे
धाद्यैः सहितो भवति ध्रुवं कंठे यो धारयेदेतत्कवचं मत्स्वरूपकम् यु
द्धे च जयमाप्नोति द्यूते वादे च साधकः कवचं धारयेद्यस्तु साधको।
दक्षिणे भुजे देवा मानवा गंधर्वा वश्यास्तस्य न संशयः। कवचं शि
रसा यस्तु धारयेद्यतमानसः करस्थास्तस्य देवेशि अणिमाद्यष्टसि
द्ध .... विद्याशुक्लपटेनवेष्टितम् रजतोदरसंवि
ष्टां कृत्वा च धारयेत्सुधीः संप्राप्य महतीं लक्ष्मीमन्ते मद्देहरूप ....
.... न दातव्यं न प्रकाश्यं कथंचन शिष्याय भक्तियुक्ताय सा
धकाय प्रकाशयेत् अन्यथा सिद्धिहानिः स्यात्सत्यमेतन्मनोरमम्
तवस्नेहान्महादेवि कथितं कवचं शुभम् न देयं कस्यचिद्देवि यदीच्छे
दात्मनो हितम् योऽर्चयेद्रूपपञ्चाद्यैः कवचं मन्त्रबोधितम् तेनार्चिता
महादेवि सर्वदेवा न संशयः इति श्रीभैरवतंत्रे सदाशिवकवचम् ॥
अथ वटुकस्तोत्रम् कैलासशिखरासीनं देवदेवं जगद्गुरुम् शंकरं।
परिपप्रच्छ पार्वती परमेश्वरम् पार्वत्युवाच भगवन्सर्वधर्मज्ञ सर्व
शास्त्रागमादिषु आपदुद्धारणं मंत्रं सर्वसिद्धिप्रदं नृणाम् सर्वेषां चै
व भूतानां हितार्थं वाञ्छितं मया विशेषतस्तु राज्ञां वै शांतिपुष्टिप्रसा
धनम् अंगन्यासकरन्याससबीजन्याससमन्वितम् वक्तुमर्हसि दे
वेशान मम हर्षविवर्धनम् श्रीभगवानुवाच शृणु देवि महामंत्रमा
पदुद्धारहेतुकम् सर्वदुःखप्रशमनं सर्वशत्रुनिवर्हणम् अपस्मारा
दिरोगाणां ज्वरादीनां विशेषतः नाशनं मंत्रराजमिमं प्रिये ग्रहराज

भयानां च नाशनं सुखवर्धनम् स्नेहाद्वक्ष्यामि ते तंत्रं राज्यभोगप्रदं नृणां
प्रणवं पूर्वमुद्धृत्य देवीप्रणवमुद्धरेत् वटुकायेति वै पश्चादापदुद्धार-
णाय च कुरुद्वंद्वं ततः पश्चाद्वटुकाय पुनः क्षिपेत् देवीप्रणवमुद्धृत्य
मन्त्रोद्धारमिमं प्रिये मन्त्रोद्धारमिमं देवि त्रैलोक्यस्यापि दुर्लभम् अप्र-
काश्यमिमं मंत्रं सर्वशक्तिसमन्वितम् स्मरणादेव मंत्रस्य भूतप्रेतपि-
शाचकाः विद्रवन्ति भयार्त्ता वै कालरुद्रादिव प्रजाः पठित्वा पाठयित्वा
च पूजयेद्वापि पुस्तकम् नाग्निचौरभयं वापि ग्रहराजभयं तथा न च
मारीभयं तस्य सर्वत्र सुखवान्भवेत् आयुरारोग्यमैश्वर्यं पुत्रपौ-
त्रादिसंभवाः भवन्ति सततं तस्य पुस्तकस्यापि पूजनात् श्रीपार्वत्युवाच
य एष भैरवो नाम आपदुद्धारको मतः त्वया च कथितो देव भैरवः क-
ल्प उत्तमः तस्य नामसहस्राणि अयुतान्यर्बुदानि च सारमुद्धृत्य तेषां
वै नामाष्टशतकं वद श्रीभगवानुवाच यस्तु संकीर्तयेदेतत्सर्वश-
त्रुनिबर्हणम् सर्वान्कामानवाप्नोति साधकः सिद्धिमेव च शृणु
देवि प्रवक्ष्यामि भैरवस्य महात्मनः आपदुद्धारकस्येह नामाष्टश-
तमुत्तमम् सर्वपापहरं पुण्यं सर्वापद्विनिवारणम् सर्वकामार्थदं दे-
वि साधकानां सुखावहम् देहाङ्गन्यासकं चैव पूर्वं कुर्यात्समाहितः
भैरवं मूर्ध्नि विन्यस्य ललाटे भीमदर्शनम् अक्ष्णोर्भूताश्रयं न्यस्य वद-
ने तीक्ष्णदर्शनम् क्षेत्रपं कर्णयोर्मध्ये क्षेत्रपालं हृदि न्यसेत् क्षेत्राख्यं
नाभिदेशे तु कंसा सर्वाघनाशनम् त्रिनेत्रमूर्वोर्विन्यस्य जंघयोः श्री-
कपालकम् पादयोर्देवदेवेशं सर्वाङ्गं वटुकं न्यसेत् एवं न्यासविधिं
कृत्वा तदनन्तरमुत्तमम् नामाष्टशतकस्यापि छन्दोऽनुष्टुबुदाहृतं
बृहदारण्यको नाम ऋषिश्च परिकीर्तितः देवता कथिता चेह सद्भि-
र्वटुकभैरवः भैरवो भूतनाथश्च भूतात्मा भूतभावनः क्षेत्रदः क्षे-
त्रपालश्च क्षेत्रज्ञः क्षत्रियो विराट् श्मशानवासी मांसाशी खर्परा-
शी स्मरान्तकृत् रक्तपः पानपः सिद्धः सिद्धिदः सिद्धसेवितः क-
ङ्कालः कालशमनः कलाकाष्ठातनुः कविः त्रिनेत्रो बहुनेत्रश्च

थापिंगललोचनः शूलपाणिः खड्गपाणिः कंकाली धूम्रलोचनः
अभीरुर्भैरवोभीरुर्भूतपो योगिनीपतिः धनदो धनहारी च धनवा
प्रतिभानवान् नागहारो नागकेशो व्योमकेशः कपालभृत् का
लः कपालमाली च कमनीयः कलानिधिः त्रिलोचनो ज्वलन्नेत्रस्त्रि
शिखी च त्रिलोकपात् त्रिवृत्तनयनो डिंभः शान्तः शान्तजनप्रियः
वटुको वटुकेशश्च खट्वांगवरधारकः भूताध्यक्षः पशुपतिर्भि
क्षुकः परिचारकः धूर्तो दिगंबरः शौरिर्हरिणः पाण्डुलोचनः प्र
शान्तः शान्तिदः शुद्धः शंकरप्रियबान्धवः अष्टमूर्तिर्निधीशश्च
ज्ञानचक्षुस्तपोमयः अष्टाधारः षडाधारः सर्पयुक्तः शिखीसखः भू
धरो भूधराधीशो भूपतिर्भूधरात्मजः कंकालधारी मुण्डी च
नागयज्ञोपवीतवान् जृंभणो मोहनः स्तंभी मारणः क्षोभण
स्तथा शुद्धनीलाञ्जनप्रख्यो दैत्यघ्नो मुण्डविभूषितः बलिभुग्बलि
भूतात्मा कामी कामपराक्रमः सर्वापत्तारको दुर्गो दुष्टभूतनि
षेवितः कालीकलानिधिः कान्तः कामिनीवशकृद्वशी सं
र्वसिद्धिप्रदो देवप्रभविष्णुः प्रभाववान् अष्टोत्तरशतं नाम भै
रवस्य महात्मनः मयाते कथितं देवि रहस्यं सर्वकामिकम्
य इदं पठते स्तोत्रं नामाष्टशतमुत्तमम् न तस्य दुरितं किञ्चि
न्न रोगेभ्यो भयं तथा न शत्रुभ्यो भयं किंचित् प्राप्नोति मानवः क्व
चित् पातकानां भयं नैव पठेत्स्तोत्रमनन्यधीः मारीभयराज
भये तथा चौराग्निजे भये औत्पातिके महाघोरे तथा दुःस्व ......
...... बन्धने च तथा घोरे पठेत्स्तोत्रं समाहितः सर्वे प्रशममा
यांति भयाद्भैरवकीर्तनात् एकादशसहस्रं तु पुरश्चरणमु
च्यते ...... द्विसंवत्सरमेतं दिनः सः सिद्धिमाप्नुया
दिष्टां दुर्लभाम मनिमानुषैः षण्मासाद्भूमिकामस्तु सुजपात्ला
भते ...... गिनाशाय जपेन्मासाष्टकं पुनः रात्रौ
वारत्रयं चैव नाशाय सर्वशत्रुवान जपेन्मासत्रयं पतौ राजानं

तं॰ सा॰ १८१

व........ .... वसन्तार्थी च दारार्थी यश्च मानवः पठेद्वारत्रयं यः
द्वावारमेकं तथा निशि धनं पुत्रांल्लभेद्दारान्प्राप्नुयान्नात्र संशयः
भीतो भयात्प्रमुच्येत देवि सत्यं न संशयः यान्यान्कामीहते कामांस्तां
स्तान्प्राप्नोति निश्चितम् अप्रकाश्यमिदं गुह्यं न देयं यस्य कस्यचित्
सत्कुलीनाय शान्ताय ऋजवे दम्भवर्जिते दद्यात्स्तोत्रमिमं पुण्यं स
र्वकामफलप्रदम् ध्यानं वक्ष्यामि देवस्य यथा ध्यात्वा पठेन्नरः
शुद्धस्फटिकसंकाशं सहस्रादित्यवर्चसम् अष्टबाहुं त्रिनयनं च
तुर्बाहुं द्विबाहुकम् भुजंगमेखलं देवमग्निवर्णशिरोरुहम् दिगंब
रं कुमारेशं वटुकाख्यं महाबलम् खट्वाङ्गमसिपाशं च शूलं चैव त
था पुनः डमरुं च कपालं च वरदं भुजगं तथा नीलजीमूतसंका
शं नीलाञ्जनचयप्रभम् दंष्ट्राकरालवदनं नूपुराङ्गदसंकुलम्
आत्मवर्णसमोपेतं सारमेयसमन्वितम् ध्यात्वा जपेत्सुसंतुष्टः
सर्वान्कामानवाप्नुयात् एतच्छ्रुत्वा ततो देवी नामाष्टशतमुत्तमम्
भैरवाय प्रहृष्टाभूत्स्वयं चैव महेश्वरी इति श्रीविश्वसारतन्त्रे आपदु
द्धारकल्पे वटुकभैरवराजः समाप्तः ॥ अथ भैरवीस्तोत्रम् स्तुमानया
त्वां त्रिपुरे स्तोष्ये ऽभीष्टफलाप्तये यथा व्रजन्ति तां लक्ष्मीं मनुजाः
सुरपूजिताम् ब्रह्मादयस्स्तुतिशतैरपि सूक्ष्मरूपां जानन्ति नैव ज
गदादिमनादिमूर्तिम् तस्माद्वयं कुचनतां नवकुङ्कुमाभां स्थूलां
स्तुमः सकलवाङ्मयमातृभूताम् १ सद्यस्समुद्यतसहस्रदिवा
कराभां विद्याक्षसूत्रवरदाभयचिह्नहस्ताम् नेत्रोत्पलैस्त्रिभिरलं
कृतवक्त्रपद्मां त्वां तारहाररुचिरां त्रिपुरे भजन्ति २ सिन्दूरपूररुचि
रां कुचभारनम्रां जन्मान्तरेषु कृतपुण्यफलैकगम्याम् अन्योन्यभे
दकलहाकुलमानसास्ते जानन्ति किं जडधियस्तव रूपमम्ब ३
स्थूलां वदन्ति मुनयः श्रुतयो गृणन्ति सूक्ष्मां वदन्ति वचसामधिवा
समन्ये त्वां मूलमाहुरपरे जगतां भवानि मन्यामहे वयमपार
कृपाम्बुराशिम् ४ चन्द्रावतंसकलितां शरदिन्दुशुभ्रां पञ्चाशदक्ष

रमंयींहृदिभावयामि त्वांपुस्तकंजपवटीममृताढ्यकुंभंव्याख्यां
चहस्तकमलेदधतींत्रिनेत्राम् ५ प्रांशुस्त्वमद्रितनयाकलितार्धमा
गोविस्फुरत्त्वदंबकमलापरिबद्धदेहम् पद्मोद्भवस्त्वमसिवागधि
वासभूमिस्तेषांक्रियाश्चजगतित्रिपुरेत्वमेव ६ आदित्यवाग्भव
भवांश्चतुरःपदादीनभावान्यदेषुविहितान्समुदीरयंति कंठा
दिभिश्चकरणैःपरदेवतांत्वांसंविन्मयींहृदिकदापिनविस्मरा
मि ७ आकुंच्यवायुमवजित्यचवैरिषट्कमालोक्यनिश्चलधि
यानिजनासिकाग्रम् ध्यायंतिमूर्ध्निकलितेंदुकलावतंसंत्वद्रूप
मंबकृतिनस्तरुणार्कमित्रम् ८ त्वांप्राप्यमन्मथरिपोर्वपुरर्धं
भागंसृष्टिंकरोमिजगतामितिवेदवादः सत्यंतदद्रितनयेजग
देकमातर्नोचेदशेषजगतांस्थितिरेवनस्यात् ९ पूजांविधाय
कुसुमैःसुरपादपानांपीठेतवावकनकाचलगह्वरेषु गायंति
सिद्धवनिताःसहकिन्नरीभिरास्वादितासवरसारुणनेत्रपद्माः १०
विद्युद्विलासवपुषांश्रियमुद्वहंतींयांतीस्ववासभवनाच्छिवरा
जधानीम् सौषुम्णवर्त्मकमलानिविलासयंतींदेवींभजेहृदि
परामृतसिक्तगात्रीम् ११ आनन्दजन्मभवनंभवनंश्रुतीनांचै
तन्यमात्रतनुमंबतवाश्रयामि ब्रह्मेशविष्णुभिरुपासितपादप
द्मंसौभाग्यजन्मवसतींत्रिपुरेयथावत् १२ सर्वार्थभाविभुवनं
सृजतींदुरूपायातद्बिभर्तिपुनरर्कतनुःस्वशक्त्या ब्रह्मात्मिका
हरतितत्सकलंयुगांतेतांशारदांमनसिजातुनविस्मरामि १३
नारायणीतिनरकार्णवतारिणीतिगौरीतिखेदशमनीतिसरस्व
तीति ज्ञानप्रदेतिनयनत्रयभूषितेतित्वामद्रिराजतनयेविबुधा
भजंति १४ येस्तुवंतिजगन्मातःश्लोकैर्द्वादशभिःक्रमात् त्वा
मेवप्राप्यवाक्सिद्धिंप्राप्नुवंतिपरांगतिम् इतिश्रीभैरवीस्त
वराजःसमाप्तः ॥ अथभैरवीकवचम् श्रीदेव्युवाच भैरवाः
सकलाविद्याःश्रुताश्चाधिगतामया सांप्रतंश्रोतुमिच्छामि

तं

स्ता

१८२

182

कवचं यत्समीरितं त्रैलोक्यविजयं नाम सर्वशस्त्रास्त्रविनिवारणम् त्व
त्तः परतरो नाथ कः कृपां कुरु त्वमर्हसि श्रीईश्वर उवाच शृणु पार्वति
वक्ष्यामि सुन्दरि प्राणवल्लभे त्रैलोक्यविजयं नाम कवचं मन्त्रवि
ग्रहम् पठित्वा धारयित्वेदं त्रैलोक्यविजयी भवेत् जघान सकला
न्दैत्यान्मधुकैटभमर्दनः ब्रह्मा सृष्टिं वितनुते यद्धृत्वाभीष्टदायकः
धनाधिपः कुवेरोऽपि वासवस्त्रिदशेश्वरः यस्य प्रसादादीशोऽहं त्रै
लोक्यविजयी विभुः न देयं परशिष्येभ्योऽसाधकेभ्यः कदाचन
पुत्रेभ्यः किमुतान्येभ्यो दत्त्वा मृत्युमवाप्नुयात् भैरव्याः कवचस्या
पि दक्षिणामूर्तिरेव च विराट्छन्दो जगद्धात्री देवता बालभैरवी
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः अधरो बिन्दुमान्नाद्यः
कामः शक्रोऽशचीयुतः भृगुर्मनुः स्वरयुतः सर्गी बीजत्रयात्मिका
बालैषा मे शिरः पातु बिन्दुनादयुतापि सा भालं पातु कुमार्येषा
सर्गहीना कुमारिका दृशौ मे पातु वाग्बीजं कर्णयुग्मं सदावतु
कामबीजं सदा पातु घ्राणयुग्मं सदावतु सरस्वतीप्रदा बाला
जिह्वां पातु शुचिप्रभा हसैं कहसकलरीं स्कन्धौ पातु हसौः भुजौ
पञ्चमी भैरवी पातु करौ हसैं सदावतु हृदयं हसकलरीं वक्षः
पातु हसौः स्तनौ पातु मां भैरवी देवी चैतन्यरूपिणी मम हसैं
पातु सदा पार्श्वयुग्मं हसकलरीं सदा कुक्षिं पातु हसौ मध्ये भै
रवी भुवि दुर्लभा ऐं ईं औं मम मध्यदेशं बीजविद्या सदावतु ह्लें
पृष्ठं सदा पातु नाभिं हसकलह्रीं सदा पातु ह्लौः कटीं पातु ब
टुकूटा भैरवी मम ह्लें हसैरं सक्थिनी पातु हसकलरीं सदावतु
गुह्यदेशं ह्लौं पातु जानुनी भैरवी मम संपत्प्रदा सदा पातु हैं जं
घे हसकलीपदम् पातु ह्लौः सर्वदेहं भैरवी सर्वदावतु हसैं
मामवतु प्राच्यां हसकलीं पावके वतु ह्लौः मे दक्षिणे पातु भै
रवीचक्रसंस्थिता ह्रीं क्लीं ब्लें मां सदा पातु नैर्ऋत्यां चक्रभैरवी
ह्लीं कल ह्रीं हसौः पश्चिमे पातु भैरवी ह्रीं क्लीं क्रीं पातु वायव्ये

हूं हूं पातु सदा तारे क्रीं क्रीं पातु सदेशाने दक्षिणे कालिके वतु ऊ
र्ध्वं प्रागुक्तबीजानि रक्षन्तु मामधः स्थले दिग्विदिक्षु सदा पातु
कालिका खड्गधारिणी ॐ क्रीं स्त्रीं हूं फट् स्वाहा तारा सर्वत्र मां सदाव
तु संग्रामे कानने दुर्गे तोये तरंगदुस्तरे खड्गकर्त्रीधरा सोग्रा सदा
मां परिरक्षतु इति ते कथितं देवि सारात्सारतरं महत् त्रैलोक्य
विजयं नाम कवचं परमाद्भुतम् यः पठेत्प्रयतो भूत्वा पूजायाः
फलमाप्नुयात् स्पर्धामुद्धूय भवने लक्ष्मीर्वाणी वसेत्ततः यः श
त्रुभीतो रणकातरो वा भीतो वने वा सलिलालये वा वादे सभा
याम्प्रतिवादिनो वा रक्षःप्रकोपाद्ग्रहसंकुलाद्वा प्रचंडदंडाक्रमना
द्भीतो गुरोः प्रकोपादपि कृच्छ्रसाध्यात् अभ्यर्च्य देवीं प्रपठेत्त्रि
संध्यं स स्यान्महेशप्रतिमो जयी च त्रैलोक्यविजयं नाम कवचं
मन्मुखोदितम् विलिख्य भूर्जगुटिकां स्वर्णस्थां धारयेद्यदि
कंठे वा दक्षिणे बाहौ त्रैलोक्यविजयी भवेत् तद्गात्रं प्राप्य शस्त्रा
णि भवंति कुसुमानि च लक्ष्मीः सरस्वती तस्य निवसेद्भवने मुखे
एतत्कवचमज्ञात्वा यो भजेद्भैरवीं पराम् बालां वा प्रजपेद्विद्वान्द
रिद्रो मृत्युमाप्नुयात् इति श्रीरुद्रयामले तंत्रे त्रैलोक्यविजयं नाम
भैरवीकवचं समाप्तम् ॥ अथ श्रीविद्यास्तोत्रम् कल्याणवृष्टि
भिरिवामृतपूरिताभिर्लक्ष्मीस्वयंवरणमंगलदीपिकाभिः से
वाभिरंब तव पादसरोजमूले नाकारि किं मनसि भाग्यवतां ज
नानाम् १ एतावदेव जननि स्पृहणीयमास्ते त्वद्वंदनेषु सलिलस्
थगिते च नेत्रे सान्निध्यमुद्यदरुणायुतसोदरस्य त्वद्विग्रहस्य सुध
या परयाप्लुतस्य २ ईशत्वनामकलुषाः कति नाम संति ब्रह्माद
यः प्रतिदिनं प्रलयाभिभूताः एक स एव जननि स्थिरसिद्धिरास्ते
यः पादयोस्तव सकृत्प्रणतिं करोति ३ लब्ध्वा सकृत्त्रिपुरसुंदरि
तावकीनं कारुण्यकंदलितकांतिभरं कटाक्षम् कंदर्पभावसु
भगास्त्वयि भक्तिभाजः सम्मोहयंति तरुणीर्भुवनत्रयेपि ४ ह्रीं

नं·
स्ता· कारमेव तव नाम गृणन्ति वेदाः मातस्त्रिकोणनिलये त्रिपुरे त्रिनेत्रे
१८३ त्वत्संस्मृतौ यमभटाभिभवं विहाय दीव्यन्ति नन्दनवने सह लोक-
पालैः ५ हन्तुः पुरामधिगलं परिघूर्णमानः क्रूरः कथं न भवि-
183 ता गरलस्य वेगः आश्वासनाय यदि मातरिदं तवार्धं देहस्य शश्व-
दमृतप्लुतशीतलस्य ६ सर्वज्ञतां सदसि वाक्पटुतां प्रसूते देवि
त्वदंघ्रिसरसीरुहयोः प्रणामः किंचित्स्फुरन्मुकुटमुज्ज्वलमात-
पत्रं द्वे चामरे च महतीं वसुधां ददाति ७ कल्पद्रुमैरभिमतप्रति-
पादनेषु कारुण्यवारिधिभिरम्ब भवत्कटाक्षैः आलोकय त्रिपु-
रसुन्दरि मामनाथं त्वय्येव भक्तिभरितं त्वयि बद्धतृष्णम् ८ हन्तेतरे-
ष्वपि निधाय मनांसि चान्ये भक्तिं वहन्ति किल पामरदैवतेषु त्वा-
मेव देवि मनसा समनुस्मरामि त्वामेव नौमि शरणं जननि त्वमेव
९ लक्ष्येषु सत्स्वपि तवाक्षिविलोकनानाम् आलोकय त्रिपुरसुन्दरि मां
कथंचित् नूनं मया तु सदृशः करुणैकपात्रं जातो जनिष्यति जनो
न च जायते वा १० ह्रीं ह्रीमिति प्रतिदिनं जपतां तवाख्यां किं नाम
दुर्लभमिह त्रिपुराधिवासे मालाकिरीटमदवारणमाननीया-
न्सेवते मधुमतीः स्वयमेव लक्ष्मीः संपत्कराणि सकलेन्द्रियनन्दना-
नि साम्राज्यदानकुशलानि सरोरुहाक्षि त्वद्वन्दनानि दुरितापनयो-
द्यतानि मामेव मातरनिशं कलयन्तु नान्यम् १२ कल्पोपसंहरण-
कल्पिततांडवस्य देवस्य खण्डपरशोः परभैरवस्य पाशांकुशैक्षव-
शरासनपुष्पबाणा सा साक्षिणी विजयते तव मूर्तिरेका १३ लग्नं
सदा भवतु मातरिदं त्वदीयं तेजः परं बहुलकुंकुमपंकशोणम्
भास्वत्किरीटममृतांशुकलावतंसं मध्ये त्रिकोणमुदितं परमामृता-
र्द्रम् १४ ह्रींकारत्रयसंपुटेन महता मन्त्रेण संदीपितं स्तोत्रं यः प्रति-
वासरं तव पुरो मातर्जपेन्मन्त्रवित् तस्य क्षोणिभुजो भवन्ति वशगा
लक्ष्मीश्चिरस्थायिनी वाणी निर्मलसूक्तिभारभरिता जागर्ति दीर्घं
वयः १५ इति श्रीत्रिपुरसुन्दरीकल्याणस्तोत्रम् समाप्तम् ॥

अथ किंकिणीस्तोत्रम् अथातः संप्रवक्ष्यामि त्रिपुरार्णवसंमितम्
किंकिणुःस्वदनुजदलिनिहीयते नमस्तस्याः काकाकीर्तिः कलक
मलिनिप्राप्यते नार्चितायाम् किंकिणीस्वरस्वरनुतेप्राप्यते नः
स्ततायांकं कं योगं त्वयितु चित्तेविनमालेवितायाम् । सर्गास
सर्गसंरंभस्फारिताशेषविभ्रमे विश्वंदमंडलानस्थेन मस्तेस्तुख
लभे जगदाक्रांदनोद्योतभोगविन्यासयोगिनि स्थितिभागस्थि
ते देवि नमः स्थाणुप्रियेंबिके भावाभावस्वरूपाभावस्वभावोदयक
रिणि चैतन्यपंचके देवि नमस्तेभ्यं हरांगने स्वनामभवभयध्वंसिष्ठ
जितासि शुभंकरी कृतानां वांछितं देवि ददासि करुणाकरे पर
मानंदबोधाद्विरूपे तेजःस्वरूपिणि देवैर्हृदशिरोरत्ननिर्घृष्टवर
णांबुजे चिद्दृष्टांतिमहामन्त्रामात्रेमात्रे नमोऽस्तु ते सृष्टिस्थितिसमुप
संहारहेतुभूते सनातनि गुणत्रयात्मिकसिन्तं जगतः कारणे त्व
या अनुग्रहाय भक्तानां गृहीतदिव्यविग्रहे भक्तस्य मे निमग्नत्वा
युक्तस्य परमेश्वरि प्रदिका कुक्षिकीसिद्धिं देहि त्रिदशवंदिते नाप
त्रयपरिस्लानभाजने त्राहि मां शिवे नात्मं वदामि न शृणोमि न चिं
तयामि नामंस्मरामि न भजामि न चाश्रयामि भक्त्या त्वदीयचरण
बुजप्रसादेन मां त्राहि देवि कृपया मयि देहि सिद्धिम् अज्ञानाद्वा प्र
माणाद्वा वैकल्यात् साधकस्य च यन्न्यूनमतिरिक्तं वा तत्सर्वं तत्क्ष
मस्व हीनं क्रियाहीनं श्रद्धामंत्रविवर्जितम् तत्सर्वं कृपया देवि
क्षमस्व त्वं दयानिधे यन्मया क्रियते कर्म तन्मया हस्तस्य मे वचा तत्स
र्वं च जगद्धात्रीशेतत्सममयमंजलिः इति श्रीकिंकिणीस्तोत्रं समाप्तं
अथ त्रिपुरसुंदरीकवचम् श्रीदेव्युवाच देवदेव महादेव भक्तानां
प्रीतिवर्धनम् सूचितं यन्महादेव्याः कवचं कथयस्व मे श्रीमहा
देव उवाच शृणु देवि प्रवक्ष्यामि कवचं देवदुर्लभम् अप्रकाश्यं पर
गुह्यं साधकाभीष्टदायकम् कवचस्यास्य ऋषिर्देवि दक्षिणामूर्तिः
रम्ययः छंदः पंक्तिः समुद्दिष्टं देवी त्रिपुरसुंदरी धर्मार्थकाममो

त्राणां विनियोगस्तु साधने वाग्भवः कामराजश्च शक्तिबीजं महेश्व
रि ऐं वाग्भवः पातु शीर्षे मां क्लीं कामराजस्तथा हृदि सौः शक्ति॰
बीजं सदा पातु नाभौ गुह्ये च पादयोः ऐं क्लीं सौः वदने पातु बालां मां
सर्वसिद्धये ह्सैं हसकलरीं ह्सौः पातु भैरवी कण्ठदेशतः सुंदरी ना
भिदेशे मां शीर्षे कामकला सदा भ्रूनासयोरंतराले महात्रिपुर
सुंदरी ललाटे सुभगा पातु भगा मां भगदेशतः भगोदया तु हृद
ये उदरे भगसर्पिणी भगमाला नाभिदेशे लिंगे पातु मनोभवा गु
ह्ये पातु महादेवी राजराजेश्वरी शिवा चैतन्यरूपिणी पातु पाद॰
यो जगदंबिका नारायणी सर्वगात्रे सर्वकार्ये शुभंकरी ब्रह्माणी
पातु मां पूर्वे दक्षिणे वैष्णवी तथा पश्चिमे पातु वाराही उत्तरे तु मा॰
हेश्वरी आग्नेय्यां पातु कौमारी महालक्ष्मीश्च नैरृते वायव्यां
पातु चामुण्डा इन्द्राणी पातु ईशाने जले पातु महामाया पृथिव्यां स
र्वमंगला आकाशे पातु वरदा सर्वत्र भुवनेश्वरी इदं तु कवचं देवा
देवानामपि दुर्लभम् यः पठेत्प्रातरुत्थाय शुचिः प्रयतमानसः
नाधयो व्याधयस्तस्य न भयं च क्वचिद्भवेत् न च मारीभयं तस्य पात
कानां भयं तथा न दारिद्र्यं वशं गच्छेत्तिष्ठेन्मृत्युवशे न च गच्छेच्छिव
पुरं देवि सत्यं सत्यं सदा प्रिये इदं कवचमज्ञात्वा श्रीविद्यां यो ज
पेत्प्रिये स नाप्नोति फलं तस्य प्राप्नुयाच्छस्त्रघातनम् इति श्रीसि
द्धयामले त्रिपुरसुंदरीकवचं समाप्तम् ॥ अथ महात्रिपुरसुंद
रीकवचम् श्रीदेव्युवाच भगवन्देवदेवेश लोकानुग्रहकारक
त्वत्प्रसादान्महादेव श्रुता मंत्रास्त्वनेकधा साधनं विविधं देव की
लकोद्धरणं तथा शापादिदूषणोद्धारः श्रुतास्तेनो मया प्रभो राज
राजेश्वरीदेव्याः कवचं सूच्यतामपि श्रोतुमिच्छामि त्वत्तः कथ
यस्व मयि प्रभो लक्षवारसहस्राणि वारितासि पुनः पुनः स्त्री
स्वभावात्तथा देवि पृच्छामि त्वं मयि प्रिये प्रसन्नगुह्यं कवचं सर्व॰
कामफलप्रदम् प्रीतये न वं देवेशि कथयामि शृणुष्व तत्

अस्यराजराजेश्वरीश्रीमन्महादेवत्रिपुरसुंदरीषोडशीविद्याकव
चस्य श्रीमहादेवऋषिः प्रस्तारपंक्तिश्छंदः राजराजेश्वरीश्रीम·
हात्रिपुरसुंदरीदेवता सर्वार्थसाधनेविनियोगः पूर्वेमांभैरवीपा
तुबालामांपातुदक्षिणे मालिनीपश्चिमेपातुवासिनीउत्तरेवतु
ऊर्ध्वंपातुमहादेवीमहात्रिपुरसुंदरी अधस्तात्पातुदेवेशीपाता
लतलवासिनी आधारेवाग्भवःपातुकामराजस्तथाहृदि डाम
रःपातुमांनित्यंमस्तकेसर्वकामदः ब्रह्मरंध्रेसर्वगात्रेछिद्रस्था
नेचसर्वदा महाविद्याभगवतीपातुमांपरमेश्वरी ऐंक्लींलला
टेमांपायात्ह्रींश्रींह्रूंसक्षनेत्रयोः नासायांकर्णयोश्चैवंद्रींद्रेंद्रांद्रीं
चिबुकेतथा सौःपातुगलेहृदयेसः ह्रींमेनाभिदेशके कलह्रीं
स्त्रींक्लींगुह्यदेशेसःह्रींपातुमेपादयोः सःह्रींमांपातुसर्वतःसक्लीं
पातुचसंधिषु जलेस्थलेतथाकाष्ठादिष्वराजगृहेतथा ह्रूंह्रेंमां
त्वरितंपातुसह्रींमक्लींमनोभवा ह्रूंसः पायान्महादेवीपरंनि·
ष्कलदेवता विजयामंगलादूतीकल्याणीभगमालिनी ज्वाला
चमालिनीनित्यासर्वदापातुमांशिवा इत्येवंकवचंदेविदेवाना·
मपिदुर्लभम् तवप्रीत्यामयाख्यातंगोपनीयंप्रयत्नतः इदर
हस्यंपरमंगुह्याद्गुह्यतरंप्रिये धनधान्यसमायुष्यभोगमोक्षप्र
दंशुभम दुःखनाशनंपुत्रसंताननरनारीवशीकरम आकर्षणकरंदे
विस्तंभोच्चाटकरंशिवे इदंकवचमज्ञात्वाराजराजेश्वरींशिवाम्
यांचेयेयोगिनीवृंदैः समसोनात्रसंशयः नतस्यमंत्रसिद्धिः॥
स्यात्कदाचिदपिप्राणकारि इहलोकेचदारिद्र्यरोगदुःखमयानि
च परत्रनरकंगत्वापशुयोनिमवाप्नुयात् तस्मादेतत्सदाभ्य
सेदधिकारीभवेत्ततः सद्गुरुनिर्गतमिदंकवचंसंपूर्णंप्रज्ञा
विधेयश्चपुरतोविधिनापठेद्यः सौभाग्यभोगललितानिष्प्रभा·
निर्मुक्तादेव्याःपदंव्रजतितत्क्षणनरंतकाली इतिकुलानंदसंहि
तायांश्रीमहात्रिपुरसुंदरीषोडशीकवचंसंपूर्णम् ॥

तं.
सा. अथ प्रचण्डचण्डिकास्तोत्रम् नाभौ शुद्धसरोजवक्त्रविलसद्बन्धू
१८५ कपुष्पारुणं भास्वद्भास्करमण्डलं तदुदरे यद्योनिचक्रं महत् तन्म
185 ध्ये विपरीतमैथुनरतप्रद्युम्नतत्कामिनी पृष्ठस्थां तरुणार्कको
टिविलसत्तेजःस्वरूपां शिवे १ वामे छिन्नशिरोधरां तदितरे पाणौ
महत्कर्त्रिकां प्रत्यालीढपदां दिगन्तवसनामुन्मुक्तकेशव्रजाम्
छिन्नात्मीयशिरःसमुच्छलदसृग्धारां पिबन्तीं परां बालादित्यसम
प्रकाशविलसन्नेत्रत्रयोल्लासिनीम् २ वामादन्यत्र नालं बहु बह
लगलद्रक्तधाराभिरुच्चैः पायन्तीमस्थिभूषां करकमललसत्क
र्त्रिकामुग्ररूपाम् रक्तामारक्तकेशीमपगतवसनां वर्णिनीमात्म
शक्तिं प्रत्यालीढोरुपादामरुणिततनयां योगिनीं योगनिद्राम् ३
दिग्वस्त्रां मुक्तकेशीं प्रलयघनघटाघोररूपां प्रचण्डां दंष्ट्रादुष्प्रेक्ष्य
वक्त्रोदरविवरलसल्लोलजिह्वाग्रभासाम् विद्युल्लोलाक्षियुग्मां हृद
यतटलसद्भोगिभीमां सुमूर्तिं सद्यश्छिन्नात्मकण्ठप्रगलितरुधिरै
र्डाकिनीं वर्धयन्तीम् ४ ब्रह्मेशानाच्युताद्यैः शिरसि विनिहितां म
न्दपादारविन्दैरात्मज्ञैर्योगिमुख्यैः प्रतिपदमनिशं चिन्तितां चिन्त्यरू
पाम् संसारे सारभूतां त्रिभुवनजननीं छिन्नमस्तां प्रशस्तामिष्टां
तामिष्टदात्रीं कलिकलुषहरां चेतसा चिन्तयामि ५ उत्पत्तिस्थि
तिसंहृतीर्घटयितुं धत्ते त्रिरूपां तनुं त्रैगुण्याज्जगतो यदीयविकृ
तिर्ब्रह्माच्युतः शूलभृत् तामाद्यां प्रकृतिं स्मरामि मनसा सर्वार्थ
संसिद्धये यस्याः स्मेरपदारविन्दयुगले लाभं भजन्ते नराः ६ अभिलि
प्सितपुरन्ध्रीभोगपूजापरोहं बहुविधकुलमार्गारम्भसम्भावितो
हं पशुजनविमुखोहं भैरवीमाश्रितोहं गुरुचरणरतोहं भैरवोहं
शिवोहम् इदं स्तोत्रं मया प्रोक्तं वल्लभाया भाषितं परा सर्वसिद्धिप्र
दं महापातकनाशनम् यः पठेत्प्रातरुत्थाय देव्याः सन्निहि
तो परा तस्य सिद्धिर्भवेद्देवि वाञ्छितार्थप्रदायिनी धनं धान्यं सुतं
जायां हयं हस्तिनमेव च वसुन्धरां महाविद्यामष्टौ सिद्धीर्लभेद्ध्रुवम्

वम् वैयाघ्राजिनरंजिताङ्गजघनेरम्ये प्रलंबोदरे खर्वानिर्वचनीयप
र्वेन्दुभगाङ्गमुण्डावलीमण्डिते कर्त्रीं कं दधतीं विविचित्ररचितां ह्यानेदयाने
पदे मातर्भक्तजनानुकंपिनि महामायेस्तु ॥ ॐ नमः अथ कवच
म् श्रीदेव्युवाच कथिताश्छिन्नमस्ताया या या विद्याः सुगोपिताः
त्वया नाथेन जीवेश श्रुतास्ताधिगतामया इदानीं श्रोतुमिच्छामि
कवचं पूर्वसूचितम् त्रैलोक्यविजयंनाम कृपयाकथ्यय प्रभो
श्रीभैरव उवाच शृणु वक्ष्यामि देवेशि सर्वदेवनमस्कृते त्रैलोक्य
विजयं नाम कवचं सर्वमोहनम् सर्वविद्यामयं साक्षात्सुरात्सुर
जयप्रदम् धारणात्पठनादीशस्त्रैलोक्यविजयीविभुः ब्रह्मा नारा
यणो रुद्रो धारणात्पठनाद्यतः कर्ता पाता च संहर्ता भुवनानां सु
रेश्वरि न देयं परशिष्येभ्यो भक्तेभ्योपि विशेषतः देयं शिष्याय भ
क्ताय प्राणेभ्योप्यधिकाय च देव्याश्छिन्नमस्तायाः कवचस्य च
भैरवः ऋषिर्विराट्छन्दस्तु देवताश्छिन्नमस्तिका त्रैलोक्यविजये
मुक्तौ विनियोगः प्रकीर्तितः हुंकारो मे शिरः पातु छिन्नमस्ता ब
लप्रभा ह्रीं हूं ऐं त्र्यक्षरी भालं पातु रक्षादिगंबरी श्रीं ह्रीं हूं ऐं दृशौ
पातु मुण्डकर्त्रीधरापि सा सा विद्या प्रणवाद्यन्ता श्रुतियुग्मं सदाव
तु वज्रवैरोचनीये हूं फट् स्वाहा च ध्रुवादिका घ्राणं पातु छिन्नम
स्ता मुण्डकर्त्रिविधारिणी श्रीमायाकूर्चवाग्बीजैर्वज्रवैरोचनी
ये हूं फट् स्वाहा महाविद्या षोडशी ब्रह्मरूपिणी स्वपार्श्वं गालि
काभ्यां त्रस्तरयाशांपाययंती मुदा वदनं सर्वतः पातु छिन्नमस्ता
वशक्तिका मुण्डकर्तृधरा रक्ता साधकाभीष्टदायिनी वर्णिनी डा
किनी युक्ता सापि मामभितोवतु रमाद्या पातु जिह्वां च लज्जाद्या
पातु कंठकम् कूर्चाद्या हृदयं पातु वाग्याद्या स्तनयुग्मकम् रम
या पुटिता विद्या पार्श्वौ पातु सुरेश्वरी मायया पुटिता पातु नाभि
देशं दिगंबरी कूर्चेन पुटिता देवी पृष्ठदेशं सदावतु वाग्बीज
पुटिता चैव मध्यं पातु सुशक्तिका ह्रीं हूं वर्णिनी जानुं श्रीं ह्रीं

तं॰
सा॰ हूं वज्रडाकिनी पदम् सर्वविद्याष्ठिता नित्या सर्वांगं मे सदावतु प्राच्यां
१८९ पायादेकलिंगा योगिनी पावकेऽवतु डाकिनी दक्षिणे पातु श्रीमहाभै
186 रवी च माम् नैरृत्यां सततं पातु भैरवी पश्चिमेऽवतु इन्द्राक्षी पातु वा
यव्येऽसितांगी पातु चोत्तरे संहारिणी सदा पातु शिवकोणे सकर्तृका
श्मशानस्था रूपः पातु दिग्विदिक्षु सकर्तृका क्रीं क्रीं क्रीं सा पातु पूर्वे हूं
हूं मां पातु पावके ह्रीं ह्रीं मां दक्षिणे पातु दक्षिणे कालिकेऽवतु
क्रीं क्रीं क्रीं चैव नैरृत्यां सा हूं हूं मां पश्चिमेऽवतु ह्रीं ह्रीं पातु मरुत्को
णे स्वाहा पातु सदोत्तरे महाकाली खड्गहस्ता रक्षःकोणे सदावतु
तारो माया वधूः कूर्चं फट्कारोऽयं महामनुः खड्गकर्तृधरा तारा चो
र्ध्वदेशं सदावतु ह्रीं स्त्रीं हूं फट् पातालं पातु नीलसरस्वती इति ते
कथितं देव्याः कवचं मन्त्रविग्रहम् यद्धृत्वा पठनाद्भीमः क्रोधाख्यो
भैरवप्रभुः सुरासुरमुनीन्द्राणां कर्ता हर्ता भवेत्स्वयम् यस्याज्ञया
मधुमती याति सा साधकान्तिकम् भूतिमायाश्च यक्षिण्यो डाकिन्या
द्याश्च भैरवाः आज्ञां गृह्णन्ति तास्तस्य कवचस्य प्रसादतः एतद्देवप
रं ब्रह्मकवचं मन्मुखोदितम् देवीमभ्यर्च्य गन्धाद्यैः मूलेनैव पठेत्स
कृत् संवत्सरकृतायास्तु पूजायाः फलमाप्नुयात् भूर्जे विलिखि
तं चैतद्गुटिकां काञ्चनस्थिताम् धारयेद्दक्षिणे बाहौ कण्ठे वा यदि वा
गपतः सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यं वशमानयेत् तस्य गेहे वसेल्ल
क्ष्मीर्वाणी च वदनाम्बुजे ब्रह्मास्त्रादीनि शस्त्राणि तद्गात्रे यान्ति सौम्य
ताम् इदं कवचमज्ञात्वा यो भजेच्छिन्नमस्तिकाम् सोऽपि शस्त्रप्रहारे
ण मृत्युमाप्नोति सत्वरम् इति श्रीभैरवीतन्त्रे त्रैलोक्यविजयं नाम
च्छिन्नमस्ताकवचं समाप्तम् ॥ अथ श्यामास्तोत्रम् कर्पूरं मध्यमा
न्त्यस्वरपररहितं सेन्दुवामाक्षियुक्तं बीजं ते मातरेतत्त्रिपुरहरवधु त्रिः
कृतं ये पठन्ति तेषां गद्यानि पद्यानि च मुखकुहरादुल्लसन्त्येव वाचः
स्वच्छन्दं ध्वान्तधाराधररुचिरुचिरे सर्वसिद्धिं गतानाम् । ईशानः
सेन्दुवामश्रवणपरिगतं बीजमन्यन्महेशि द्वन्द्वं ते मन्दचेता यदि

जपतिजनोवारमेकंकदाचित् जित्वावाचामधीशंधनदमपिचि २
रंमोहयन्नंबुजाक्षीवृंदंचंद्रार्धचूडेप्रभवतिसमहाघोरशावावतंसे
ईशोवैश्वानरस्थःशशधरविलसद्वामनेत्रेणयुक्तोबीजंतेद्वंद्वम
न्यद्विगलितचिकुरेकालिकेयेजपंति द्वेष्टारंघ्नंतितेवत्रिभुवनम
पितेवश्यभावंनयंतिसृक्किद्वंद्वास्रधाराद्वयधरवदनेदक्षिणे
कालिकेति ३ ऊर्ध्वंवामेकृपाणंकरकमलतलेछिन्नमुंडंतथाध
सव्येभीतिंवरंचत्रिजगदघहरेदक्षिणेकालिकेच जप्त्वैतन्नाम
येवानवविमलतनुंभावयंत्येतदंबतेषामष्टौकरस्थाःप्रकटित
वदनेसिद्धयस्त्र्यंबकस्य ४ वर्गाद्यंवह्निसंस्थंविधुरतिवलितंत
त्त्रयंकूर्चयुग्मंलज्जायुग्मंचपश्चात्स्मितमुखितदधःठद्वयंयोज
यित्वा मातर्येयेस्मरंतिस्मरहरमहिलेभावयंतःस्वरूपंतेलक्ष्मी
लास्यलीलाकमलदलदृशःकामरूपाभवंति ५ प्रत्येकंवाद्वय
वात्रयमपिचपरंबीजमत्यंतगुह्यं त्वन्नाम्नायोजयित्वासकल
मपिसदाभावयंतोजपंति तेषांनेत्रारविंदेविहरतिकमलावक्त्र
शुभ्रांशुबिंबे वाग्देवीदेविमुंडस्रगतिशयलसत्कंठिपीनस्तनाढ्ये ६
गतासूनांबाहुप्रकरकृतकांचीपरिलसन्नितंबांदिग्वस्त्रांत्रिभुव
नविधात्रींत्रिनयनाम् श्मशानस्थेतल्पेशवहृदिमहाकालसु
रतप्रयुक्तांत्वांध्यायन्जननिजडचेताअपिकविः ७ शिवाभिर्घो
राभिःशवनिवहमुंडास्थिनिकरैःपरंसंकीर्णायांप्रकटितचिता
यांहरवधूम् प्रविष्टांसंतुष्टामुपरिसुरतेनातियुवतींसदात्वांध्या
यंतिक्वचिदपिनतेषांपरिभवः ८ वदामस्तेकिंवाजननिवयमु
च्चैर्जडधियोनधातानापीशोहरिरपिनतेवेत्तिपरमम् तथापित्वद्भ
क्तिर्मुखरयतिचास्माकममितेतदेतत्क्षंतव्यंनखलुपशुरोषःसमु
चितः ९ समंतादापीनस्तनजघनधृग्यौवनवतीरतासक्तोनक्तंयदि
जपतिभक्तस्तवमनुम् विवासास्त्वांध्यायन्गलितचिकुरस्तस्य
वशगाःसमस्ताःसिद्धौघाःभुविचिरतरंजीवतिकविः १० समास्व

तं॰ स्तो॰ १८८ स्थीभूतानां जपति विपरीतां यदि मुद्राविचिंत्य सम्यग्ध्यायन्नतिशायम॰
हाकाल स्मरताम् नदान्तस्य द्रोणितलविहरमाणस्य विरुद्धः क॰
रांभोजिनवस्याः स्मरहरवधूसिद्धिनिवहाः ११ प्रसूते संसारं जननि
जगतीं पालयति वा समस्तं क्षित्यादि प्रलयसमये संहरति वा अत
स्त्वां धातापि त्रिभुवनपतिः श्रीपतिरपि महेशोपि प्रायः सकलम
पि किं स्तोमि भवतीम् १२ अनेके सेवंते भवदधिकगीर्वाणनिव॰
हान्विमूढास्ते मातः किमपि नहि जानंति परमम् समाराध्यामा
द्यां हरिहरविरिंच्यादिभिरपि प्रपन्नोस्मि स्वैरं रतिरसमहानंदनिर
ताम् १३ धरित्री कीलालं शुचिरपि समीरोपि गगनं त्वमेका कल्या
णी गिरिशरमणी कालि सकलम् स्तुतिः का ते मातस्तव करुण
यामामगतिकं प्रसन्ना त्वं भूया भवमनु न भूयान्मम जनुः १४ श्म॰
शानस्थः स्वस्थो गलितचिकुरो दिक्पटधरः सहस्रं त्वर्काणां निज
गलितवीर्येण कुसुमम् जपंस्त्वत्प्रत्येकं मनुमपि तव ध्याननिर॰
तो महाकालि स्वैरं स भवति धरित्रीपरिवृढः १५ गृहे सम्मार्जन्या
परिगलितबीजं हि चिकुरं समूलं मध्याह्ने वितरति चितायां कुजदिने
समुच्चार्य प्रेम्णा मनुमपि सकृत्कालि सततं गजारूढो याति क्षिति
परिवृढः सत्कविवरः १६ सपुष्पैराकीर्णं कुसुमधनुषो मंदिरम
हो पुरो ध्यायं ध्यायं जपति यदि भक्तस्तव मनुम् सगंधर्वश्रेणी
पतिरिव कवित्वामृतनदीनदीनः पर्यंते परमपदलीनः प्रभ॰
वति १७ त्रिपंचारे पीठे शवशिवहृदि स्मेरवदनां महाकालेनोच्चै
र्मदनरसलावण्यनिरताम् समासक्तो नक्तं स्वयमपि रतानंद॰
निरतो जनो यो ध्यायेत्त्वामपि जननि स स्यात्स्मरहरः १८ सलोमा
स्थि स्वैरं पललमपि मार्जारमसितं परं चौष्ट्रं मैषं नरमहिषयोः
छागमपि वा बलिं ते पूजायामपि वितरतां मर्त्यवसतां न किंसि
द्धिः सर्वा प्रतिपदमपूर्वा प्रभवति १९ वशी लक्षं मंत्रं प्रजपति ह॰
विष्याशनरतो दिवा मातर्युष्मच्चरणकमलध्याननिपुणः परं

नक्तं नग्नो निधुवनविनोदेन च मन्त्रं जपेल्लक्षं सम्यक् स्मरहरसमा-
नः क्षितितले २० इदं स्तोत्रं मातस्तव मनुसमुद्धारणजनुः स्वरूपा-
ख्यं पादाम्बुजयुगलपूजाविधियुतम् निशार्धे वा पूजासमयमथ
वा यस्तु पठति प्रलापस्तस्यापि प्रसरति कवित्वामृतरसः २१ कुरंगा-
क्षीवृन्दं तमनुसरति प्रेमतरलं वशस्तस्य क्षोणीपतिरपि कुबेरप्रति-
निधिः रिपुः कारागारं कलयति च तं केलिकलया चिरं जीवन्मुक्तः स
भवति च भक्तः प्रतिजनः २२ इति श्यामास्तोत्रं समाप्तम् ।
अथ श्यामाकवचम् श्रीभैरव उवाच कालीपूजा श्रुता नाथ तारायाश्च
विविधाः प्रभो इदानीं श्रोतुमिच्छामि कवचं पूर्वसूचितम् त्वमेव
शरणं नाथ पाहि मां दुःखसागरात् श्रीभैरव उवाच रहस्यं शृणु व-
क्ष्यामि भैरवि प्राणवल्लभे श्रीजगन्मंगलं नाम कवचं मन्त्रविग्रहम्
पठित्वा धारयित्वा च त्रैलोक्यं मोहयेत्क्षणात् नारायणोपि यद्धृत्वा
नारी भूत्वा महेश्वरम् योगिनं क्षोभमनयद्यद्धृत्वा च रघूद्वहः वर-
दृप्तान् जघानैव रावणादिनिशाचरान् यस्य प्रसादादीशोपि त्रैलो-
क्यविजयी विभुः धनाधिपः कुबेरोपि सुरेशोभूच्छचीपतिः एवं हि
सकला देवाः सर्वसिद्धीश्वराः प्रिये श्रीजगन्मंगलस्यास्य कवचस्य
ऋषिः शिवः छन्दोनुष्टुप् देवता च कालिका दक्षिणेरिता जगतां मोह-
ने दुष्टविजये भुक्तिमुक्तिषु योषिदाकर्षणे चैव विनियोगः प्र-
कीर्तितः शिरो मे कालिका पातु क्रींकारैकाक्षरी शिवा क्रीं क्रीं
क्रीं मे ललाटे च कालिका खड्गधारिणी हूं हूं पातु युगं मे ह्रीं ह्रीं पा- नेत्र
तु श्रुती मम दक्षिणे कालिके पातु घ्राणयुग्मं महेश्वरी क्रीं क्रीं
क्रीं रसनां पातु हूं हूं पातु कपोलकम् वदनं सकलं पातु ह्रीं ह्रीं
पातु स्वरूपिणी द्वाविंशत्यक्षरी स्कन्धौ महाविद्या सुखप्रदा खड्गमु-
ण्डधरा काली सर्वांगमभितोवतु क्रीं हूं ह्रीं त्र्यक्षरी पातु चामुण्डा हृ-
दयं मम ऐं हूं ओं ऐं स्तनद्वन्द्वं ह्रीं फट् स्वाहा ककुत्स्थलम् अष्टाक्षरी
महाविद्या भुजौ पातु सकर्तृका क्रीं क्रीं हूं हूं ह्रीं ह्रीं करौ पातु षडक्षरी

तं॰
सा॰ ह्रीं मम ह्रीं नाभिं मम ध्येदेशं वदक्षिणे कालिके वतु ह्रीं स्वाहा पातु पृ
१९८ ष्ठं च कालिका सा दशाक्षरी हूं ह्रीं दक्षिणे कालिके हूं ह्रीं पातु कटि
188 द्वयम् काली दशाक्षरी विद्या स्वाहा मम ऊरुयुग्मकम् ॐ ह्रीं ह्रीं मे
स्वाहा पातु कालिका जानुनी सदा कालीहृन्नामविद्येयं चतुर्वर्ग
फलप्रदा क्रीं हूं ह्रीं ह्रीं पातु गुल्फं दक्षिणे कालिके वतु क्रीं हूं ह्रीं
च स्वाहा पातु चतुर्दशाक्षरी मम खड्गमुण्डधरा काली वरदाभयधा
रिणी विद्याभिः सकलाभिः सा सर्वाङ्गमभितोवतु काली कपा
लिनी कुल्ला कुरुकुल्ला विरोधिनी विप्रचित्ता तथोग्रोग्रप्रभा दी
प्ता घनत्विषः नीला घना बलाका च मात्रा मुद्रा मिता च माम् एताः
सर्वाः खड्गधरा मुण्डमालाविभूषणाः रक्षन्तु स्वायुधैर्दिक्षु मां विदिक्षु
यथा तथा इति ते कथितं दिव्यं कवचं परमाद्भुतम् श्रीजगन्मङ्गलं
नाम महाविद्यौघविग्रहम् त्रैलोक्याकर्षणं ब्रह्मन् कवचं मन्मुखोदि
तम् गुरुपूजां विधायाथ विधिवत्प्रपठेत्ततः कवचं त्रिः सकृद्वापि
यावज्जीवं च वा पुनः एतच्छतार्धमावर्त्य त्रैलोक्यविजयी भवेत्
त्रैलोक्यं क्षोभयत्येव कवचस्य प्रसादतः महाकविर्भवेन्मासात्सर्व
सिद्धीश्वरो भवेत् पुष्पाञ्जलिं कालिकायै मूलेनैव पठेत्सकृत्
शतवर्षसहस्राणां पूजायाः फलमाप्नुयात् भूर्जे विलिखितं चैत
त्स्वर्णस्थं धारयेद्यदि शिखायां दक्षिणे बाहौ कण्ठे वा धारयेद्यदि
त्रैलोक्यं मोहयेत्क्रोधात्त्रैलोक्यं चूर्णयेत्क्षणात् पुत्रवान्धनवा
श्रीमान्नानाविद्यानिधिर्भवेत् बह्वपत्या जीववत्सा भवत्येव न सं
शयः न देयं परशिष्येभ्यो ह्यभक्तेभ्यो विशेषतः शिष्येभ्यो भक्तियु
क्तेभ्यश्चान्यथा मृत्युमाप्नुयात् स्पर्धामुद्धूय कमला वाग्देवी मं
दिरे मुखे पौत्रान्तं स्थैर्यमास्थाय निवसत्येव निश्चितम् इदं कवच
मज्ञात्वा यो जपेत्कालिदक्षिणाम् शतलक्षं प्रजप्त्वापि तस्य विद्या
न सिद्ध्यति स शस्त्रघातमाप्नोति सोऽचिरान्मृत्युमाप्नुयात् इति श्री
भैरवीतन्त्रे श्रीश्यामाकवचं सम्पूर्णम् ॥ ॐ अथ तारास्तोत्रम्

ॐ मातर्नीलसरस्वति प्रणमतां सौभाग्यसंपत्प्रदे प्रत्यालीढपद
स्थिते शवहृदि स्मेराननांभोरुहे फुल्लेंदीवरलोचनत्रययुते क
र्त्रीकपालोत्पले खड्गं चादधती त्वमेव शरणं त्वामीश्वरीमाश्रये
वाचामीश्वरि भक्तकल्पलतिके सर्वार्थसिद्धीश्वरि गद्यप्राकृत
पद्यजातरचनासर्वज्ञसिद्धिप्रदे नीलेंदीवरलोचनत्रययुते का
रुण्यवारांनिधे सौभाग्यामृतवर्षणेन कृपया सिंच त्वमस्मा
दृशाम् २ खर्वे गर्वसमूहपूरिततनो सर्पादिवेशोज्वले व्याघ्र
त्वक्परिवीतसुंदरकटिव्याधूतघंटांकिते सद्यःकृत्तगलद्र
जःपरिमिलन्मुंडद्वयीमूर्धजग्रंथिश्रेणिनृमुंडदामललिते भी
मे भयं नाशय ३ मायानंगविकाररूपललनाबिंद्वर्धचंद्रात्मि
के हूंफट्कारमयी त्वमेव शरणं मंत्रात्मिके मादृशः मूर्ति
स्ते जननि त्रिधामघटिता स्थूलातिसूक्ष्मा परा वेदानां नहि गो
चरा कथमपि प्राप्तां नु तामाश्रये ४ त्वत्पादांबुजसेवया सुकृ
तिनो गच्छंति सायुज्यतां तस्य श्रीपरमेश्वरि त्रिनयनब्रह्मादि
साम्यात्मनः संसारांबुधिमज्जने पटुतनून्देवेंद्रमुख्यान्सुरान्मा
तस्त्वत्पदसेवने हि विमुखान् किं मंदधीः सेवते ५ मातस्त्वत्पदपं
कजद्वयरजोमुद्रांककोटीरिणस्ते देवा जयसंगरे विजयिनो
निःशंकमंके गताः देवोहं भुवने न मे सम इति स्पर्धां वहंतः परे
स्तत्तुल्यां नियतं यथा शशिरवी नाशं व्रजंति स्वयम् ६ त्वन्नाम
स्मरणात्पलायनपरान्द्रष्टुं च शक्ता न ते भूतप्रेतपिशाचराक्षस
गणा यक्षाश्च नागाधिपाः दैत्या दानवपुंगवाश्च खचरा व्याघ्रा
दिका जंतवो डाकिन्यः कुपितांतकश्च मनुजं मातः क्षणं भूतले
लक्ष्मीः सिद्धिगणाश्च पादुकमुखाः सिद्धास्तथा वारिणां स्तंभ
श्चापि रणांगने गजघटास्तंभस्तथा मोहनम् मातस्त्वत्पदसेव
या खलु नृणां सिद्ध्यंति ते ते गुणाः कांतिः कांततमो भवेच्च मह
ति त्वज्जडोपि वाचस्पतिः ८ ताराष्टकमिदं पुण्यं भक्तिमान्यः पठे

नं॰

स्तो॰ नरः प्रातर्मध्याह्नकाले च सायाह्ने नियतः शुचिः लभते कवि-
१८९ तां दिव्यां सर्वशास्त्रार्थविद्भवेत् लक्ष्मीमनुचरां प्राप्य भुक्त्वा भोगा-
न्यथेप्सितान् कीर्तिं कान्तिं च नैरुज्यं सर्वेषां प्रियतां भजेत् वि-
189 ख्यातिं चापि लोकेस्मिन् प्रान्ते मोक्षमवाप्नुयात् इति श्रीनील-
तन्त्रे तारास्तोत्रं संपूर्णम् ॥ अथ ताराकवचम् ईश्वर उवाच
कोटितीर्थेषु गोप्याति विद्यातिभयमोचिनी दिव्यं हि कवचं
तस्याः शृणुष्व सर्वकामदम् ताराकवचस्याक्षोभ ऋषिः त्रि-
ष्टुप्छन्दः तारा भगवती देवता सर्वमन्त्रसमृद्धये विनियोगः प्र-
णवो मे शिरः पातु ब्रह्मरूपा महेश्वरी ह्रींकारः पातु ललाटे बी-
जरूपा महेश्वरी स्त्रींकारः पातु वदने लज्जारूपा महेश्वरी हूं-
कारः पातु हृदये भवानीशक्तिरूपधृक् फट्कारः पातु वदने
सर्वसिद्धिफलप्रदा खर्वा मां पातु देवेशी गण्डयुग्मे भयापहा
निम्नोदरी सदा स्कन्धयुग्मे पातु महेश्वरी व्याघ्रचर्मावृतकटी
पातु देवी शिवप्रिया पीनोन्नतस्तनी पातु पार्श्वयुग्मे महेश्वरी
रक्तवर्तुलनेत्रा च कटिदेशे सदावतु ललज्जिह्वा सदा पातु ना-
भौ मां भुवनेश्वरी करालास्या सदा पातु लिंगे देवी हरप्रिया पिं-
गोग्रैकजटा पातु जंघायां विघ्ननाशिनी प्रेतखर्परधरा देवी जा-
नुचक्रे महेश्वरी नीलवर्णा सदा पातु जानुनी सर्वदा मम नाग-
कुण्डलधरा देवी पातु पादयुगे तथा नागहारधरा देवी सर्वांगे
पातु सर्वदा नागकंकणधरा देवी पातु प्रान्तरदेशतः चतुर्भुजा
सदा पातु गमने शत्रुनाशिनी खड्गहस्ता महादेवी पातु मां विज-
यप्रदा नीलाम्बरधरा देवी पातु प्रान्तरदेशतः चतुर्भुजा सदा पातु
गमने शत्रुनाशिनी खड्गहस्ता महादेवी पातु मां विजयप्रदा
नीलाम्बरधरा देवी पातु मां विघ्ननाशिनी कर्त्रीहस्ता सदा पातु
विवादे शत्रुमध्यतः ब्रह्मरूपधरा देवी संग्रामे पातु सर्वदा ना-
गन्धवधरा देवी भोजने पातु सर्वदा शववर्णा महादेवी शयाने

पातुसर्वदा वीणासनधरादेवीनिद्रायांपातुसर्वदा यन्त्रुर्ध्वाणधरादे
वीपातुमांविघ्नसंकुले नागांचितकटीपातुदेवीमांसर्वकर्मसु
छिन्नमुण्डधरादेवीकाननेपातुमांसदा चितामध्यस्थितादेवीमार
णेपातुमांसदा ह्रींपञ्चमेधरादेवीपञ्चदारघनादिषु अलंकारान्वि
तादेवीपातुमांहरवल्लभा रक्तरक्तनदीकूले हूंहूंफट्समन्विता वी
नरूपामहादेवीपर्वतेपातुमांसदा मणिधारिवज्रिणिदेविमहा
प्रेतशिवेतथा रक्तरक्तेसदाहूंहूंओंह्रींस्वाहामहेश्वरी पुष्पकेतु
रजोत्पाताकाननेपातुमांसदा ओंह्रींवज्रपुष्पेहूंफट्प्रान्तरेसर्व
कामदा ओंपुष्पेपुष्पेमहापुष्पेपातुपुत्रान्महेश्वरी हूंस्वाहाशक्ति
संयुक्तादारान्रक्षतुसर्वदा ओंआंहूंफट्स्वाहामहेशानीपातुश्वेते
हरप्रिया ओंह्रींसर्वविघ्नानुत्सारिणीदेवीविघ्नान्मांसर्वदावतु ओंप
वित्रवज्रमुखेहूंफट्स्वाहासमन्विता वारितापायमांदेवीसर्ववि
घ्नविनाशिनी ओंश्रांःस्रोरोवेवज्ररेखेहूंफट्स्वाहासमन्विता
पातालेपातुमांदेवीलाकिनीनामसंज्ञिता ह्रींकारीपातुमां
सर्वशक्तिरूपामहेश्वरी स्त्रींकारीपातुदेवेशीवधूरूपामहेश्वरी
हूंस्वरूपामहादेवीपातुमांक्रोधरूपिणी फट्स्वरूपामहामाया
उत्तरेपातुसर्वदा पश्चिमेपातुमांदेवीटस्वरूपाहरप्रिया मध्ये
मांपातुदेवेशीहूंस्वरूपानगात्मजा नीलवर्णासदापातुसर्व
त्रवाग्भवंसदा भवानीपातुभवनेसर्वैश्वर्यप्रदायिनी विद्यादा
नरतादेवीपातुवक्त्रेसरस्वती शास्त्रेवादेचसंग्रामेजलेचविषमे
गिरौ भीमरूपासदापातुश्मशानेभयनाशिनी भूतप्रेताल
येघोरेदुर्गामांभीषणावतु पातुनित्यंमहेशानीसर्वत्रशिवदू
तिका कवचस्यास्यमाहात्म्यंनाहंवर्षशतैरपि शक्नोमिकथि
तुंदेविभवेत्तस्यफलंचयत् पुत्रदारेषुबन्धूनांसर्वदेशेचसर्वदा
नविद्यतेभयंतस्यनृपपूज्योभवेच्चसः शुचिर्भूत्वाशुचिर्वापिक
वचंसर्वकामदम् प्रपठन्नाप्नुयान्मर्त्योदुःखशोकविवर्जितः

नें.
सा. सर्वशास्त्रमहेशानि कविराड् भवति ध्रुवम् सर्ववागीश्वरो मर्त्यो
१९. लोकवंद्योथ नेश्वरः रणे द्यूते विवादे च जयस्तस्य भवेद्ध्रुवम् पुत्र
पौत्रान्वितो मर्त्यो विलासी सर्वयोषिताम् शत्रवो दासतां यान्ति सा
१९८ र्वभौवल्लभः सदा गर्वी विवेकी भवत्येव वादी स्खलति दर्शनात् स
त्वम्ब वशतां यान्ति दासास्तस्यावनीभुजः प्रसंगात्कथितं सर्वक
वचं सर्वकामदम् प्रपठन्वा स्मरन्मर्त्यः शापानुग्रहणक्षमः आन
दं ददंसि पूनामधिपः कविराड् भवेत् सर्ववागीश्वरो मर्त्यो लो
कवंद्यः सदाशिवी गुरोः प्रसादमासाद्य विद्यां प्राप्य सुगोपिताम् त
थापि कवचं देवि दुर्लभं भुवनत्रये गुरुर्देवो हरः साक्षात्पत्नी तस्य
हरप्रिया अभेदेन जयेद्यस्तु तस्य सिद्धिरदूरतः मंत्रोक्षारा महेशा
नि महिलासंगं भवेत् पंचाचाररतो मर्त्यः सिद्धो भवति नान्यथा
वसनाविल्लस्रुहृद्ध्ये देवाः सुरसत्तमाः तं दृष्ट्वा साधकं देवि ल
ज्जायुक्ता भवंति ते स्वर्गे मर्त्ये च पाताले ये देवाः सिद्धिदायकाः
प्रशंसंति सदा देवि तं दृष्ट्वा साधकोत्तमम् विघ्नात्मकाश्च ये देवा स्वर्गे
मर्त्ये रसातले प्रशंसंति सदा सर्वे तं दृष्ट्वा साधकोत्तमम् इति ते कथि
तं देवि मायायास्सम्यक् प्रकीर्तितम् भुक्तिमुक्तिकरं साक्षात्कल्पवृक्ष
स्वरूपकम् आसाद्याद्यगुरुं प्रसाद्य य इमं कल्पद्रुमालंबनं मोहे
नापि मदेन वापि रहितो जाड्येन वा मुह्यते सिद्धोसौ भुवि सर्वदुःख
विपदां पारं प्रयातं तेकोमित्रं तस्य न पापं च देवि विपदां न श्यंति त
स्यासुभाः लिखित्वा धारयेद्यस्तु कंठे वा मस्तके भुजे तस्य सर्वार्थ
सिद्धिः स्याद्यद्यन्मनसि वर्तते गोरोचनाकुंकुमेन रक्तचंदनकेन वा
यावकैर्वा महेशानि लिखेन्मंत्रं समाहितः अष्टम्यां मंगलदिने चतु
र्दश्यामथापि वा संध्यायां देवदेवेशि लिखेन्मंत्रं समाहितः मघायां
श्रवणायां वा रेवत्यां वा विशेषतः सिंहराशौ गते चंद्रे कर्कटस्थे दि
वाकरे मीनराशौ गुरौ जाते वृश्चिकस्थे शनैश्चरे लिखित्वा धारये
द्यस्तु उत्तराभिमुखो भवान् श्मशाने प्रांतरे वापि शून्यागारे विशेषतः

निशायां तु लिखेन्मंत्रं तस्य सिद्धिरचंचला भूर्जपत्रे लिखेन्मंत्रं गुरुणा
च महेश्वरि ध्यानधारणयोगेन धारयेद्यस्तु भक्तितः अचिरात्तस्य सि
द्धिः स्यान्नात्र कार्या विचारणा इति श्रीरुद्रयामले तंत्रे उग्रताराकवचं
संपूर्णम् ॥ अथ ताराकवचम् देव्युवाच ताराख्याः श्रुता नानाविद्या
श्च सकलास्तथा सांप्रतं श्रोतुमिच्छामि कवचं मंत्रविग्रहम् त्रैलो
क्यमोहनं नाम सर्वापद्विनिवारकम् पुरैव सूचितं नाथ कृपया मे
प्रकाशय श्रीभैरव उवाच देवदानवविद्याधरपूजिते प्राणवल्लभे
त्रैलोक्यमोहनं नामकवचं शृणु तत्परम् सर्वविद्यामयं देवि सर्व
मंत्रमयं ध्रुवम् सर्वरक्षाकरं सर्वसिद्धिविद्याप्रदायकम् वेदव्यासोपि
यद्धृत्वा सर्वज्ञः पठनाद्यतः यद्धृत्वा पठनादीशस्त्रैलोक्यविजयी विभुः
धनाधिपः कुबेरोपि देवाधिपः शचीपतिः पठनाद्धारणात्तस्य
नः सर्वे दिगीश्वराः सर्वैश्वर्ययुताः संतः सर्वसिद्धिमवाप्नुयुः यस्य प्र
सादादीशोहं भैरवाणां महेश्वरि क्रोधाधिपो महाभीमो देवेषु
पूजितः प्रभुः नरस्यात्मरक्षिष्यत्याद्याद्विशेष्यप्यवच अभक्तो
ऽपि पुत्रेभ्यो दत्वा मरणमवाप्नुयात् त्रैलोक्यमोहनस्यास्य कव
चस्य ऋषिः शिवः छंदो विराट् देवता च सोग्रतारा प्रकीर्तिता चतु
र्वर्गेषु विद्यायां विनियोगः प्रकीर्तितः ॐ ह्रीं स्त्रीं हूं च फट् पायाच्छ्रीता
रा मे स्तनद्वयम् ह्रीं ह्रीं स्त्रीं हूं च फट् पायात्तारा तु हृदयं मम हूं ह्रीं
स्त्रीं हूं च फट् बीजं तारा ह्येषु सदावतु ह्रीं ह्रीं स्त्रीं मे शिरः पातु हूं
पातु ललाटकम् सार्धं पंचाक्षरी तारा पायान्नेत्रयुगं मम ॐ ह्रीं
स्त्रीं हूं श्रुती पातु नमम संपातु नासिकाम् तारा षडक्षरी पायाद्धवे
हुं मे उभूषणा ह्रीं स्त्रीं हूं फट् च वदने जिह्वां पायान्महेश्वरी ह्रीं स्त्रीं
हूं च गलं पातु साधिनील सरस्वती ह्रीं कंधौ पातु नियतं तारैका
त्वररूपिणी हूं ह्यातु सदा पातु वीजैकाक्षररूपिणी ऐं ह्रीं स्त्रीं हूं व
फट् पायाद्धाक तारा मे भुजद्वयम् श्रीं ह्रीं स्त्रीं हूं च फट् पायात्सार्धं
कामस्वरूपिणी ॐ ह्रीं श्रीं हूं नमः पायात्कुक्षिमहामायाक्षरी ऐं सौः

तं॰
सा
॥१९१
१९१

ॐ ऐं क्लीं फट् स्वाहा कटिदेशं सदावतु अष्टादशीमहाविद्यासाक्षा
डलस्वरूपिणी ऐं ह्रूं ह्रीं ॐ ऐं श्रीं ह्रीं स्वाहा गुह्यदेशं सदावतु सप्तादशी
चोग्रतारामहत्तारास्वरूपिणी ॐ ह्रीं हां हूं नमस्तारायै सकलपदं
ततः उक्तं तारयपदं तारयप्रणवद्वयम् स्वाहेति च महाविद्या जा
नुनी सर्वदावतु ऐं सौः ॐ ऐं क्लीं फट् स्वाहा जंघे पातु परात्मिका
ॐ ह्रीं स्त्रीं हूं फट् तारा हं सां घंतानवाक्षरी महोग्रतारा पादौ मे पा
तु नित्यं महेश्वरी ऐं क्लीं श्रीं क्लीं सौः ह्सौः वद वद वाग्वादिनीति च काम
बीजत्रयं नीलसरस्वतीस्वरूपकम् ऐं ऐं ऐं कादि कादि कलरीं
स्वाहेति च ततः स्त्रीं महालिपिमयी पातु तारा विलंबगः इन्द्रो वामा
क्षितुक्तपृथ्वी सरस्वमनलप्रिया कूर्चं यतः पातु चोर्ध्वमूलविद्या
दशाक्षरी तारं माया कूर्च काली काम कला ततः उग्रतारे भगं॰
कामः परा लक्ष्मीः शिवांकुशो सा महाघोररूपिणी प्रोक्ता तारादेव्या
मयाधुना विधिवत्कुरुणादस्यान्त्वमस्मपथ्यं नयेत् एषा विद्या
मया गुप्ता तारादियामले भैरवे च सांप्रतं कथितं तत्सम्यक्कवचांगत
था प्रिये इति ते कथितं देवि गुह्याद्गुह्यतरं परम् त्रैलोक्यमोहनं॰
नाम कवचं मन्त्रविग्रहम् ब्रह्मविद्यामयं भद्रे केवलं ब्रह्मरूपकं
मन्त्रविद्यामयं चैतत्कवचं मन्मुखोदितम् गुरुमभ्यर्च्य विधिवत्क
वचं प्रपठेद्यदि त्रिःसकृद्वा यथाज्ञानं भैरवस्तत्क्षणाद्भवेत् सर्वपा
पविनिर्मुक्तः कुलकोटिं समुद्धरेत गुरुस्स्यात्सर्वविद्यास्वधिका
रीजपादिषु शतमष्टोत्तरं चास्य पुरश्चर्याविधिः स्मृतः शतमष्टोत्त
रं जप्त्वा भवेद्भूमिपुरंदरः त्रैलोक्यं विचरेद्वीरो गणनाथो गुरुः प्र
भुः गद्यपद्यमयी वाणी भवेद्गंगाप्रवाहवत् भूर्जे विलिख्य गुलि।
कां स्वर्णस्थां धारयेद्यदि पुरुषो दक्षिणे बाहौ योषिद्वामभुजे न त॰
था सर्वसिद्धियुतो भूत्वा विचरेद्भैरवो यथा नद्यां त्र प्राप्य शस्त्राणि
ब्रह्मास्त्रादीनि भैरवि मात्स्यानि कृत्स्नमामेव सर्ववेदानि भवन्ति हि
न स्पृशेद्देहि चिरं लक्ष्मीर्वाणी वक्त्रे वसेद्ध्रुवम् इदं कवचमज्ञात्वा ता

गं यो भजेतेनरः अल्पायुर्निर्धनो मूर्खो भवत्येव न संशयः इति श्री
भैरवीतंत्रे त्रैलोक्यमोहनं नाम कवचं समाप्तम् ॥ अथ गुह्यषोढा
श्रृणु देवि प्रवक्ष्यामि गुह्यषोढां हृदयप्रिये न प्रकाश्यमिदं क्वापि ना
गाधाः कायरक्षणे नारं तु मातृकावर्णगुटितं मातृकास्थले तेनैव
पुटितं वर्णैः स्पृशेद्देवि पार्वति शक्तिबीजं तथा देवि विन्यसेत्तं प्रथ
मतः वाग्बीजं ततो देवि विन्यसेत्तं च समाहितः कामबीजं महेशा
नि न्यसनीयं ततः परम् अस्त्रबीजं तथा न्यस्य सकलं तदनंतरम्
अस्त्रबीजं तथा न्यस्य सकलं तदनंतरम् गुह्यषोढा हृदये देवि न प्र
काश्यं कदाचन इयं च सिद्धिदा लोके तथा देवासुरैरपि अवश्यप्र
म्यहं कार्यं न पूजा न जपस्तथा इति ते कथितं न किंचिद्गूढं स्मरस्त्व
टे न प्रकाश्यं तथा केन देवेषु च यथात्वपि इति श्रीरुद्रयामले
गुह्यषोढान्यासः ॥ अथ बगलामुखीस्तोत्रम् चलत्कनक
कुंडलोल्लसितचारुगंडस्थलीं लसत्कनकचंपकद्युतिमदिंदु
बिंबाननाम् गदाहतविपक्षकां कलितलोलजिह्वांचलां स्मरा
मि बगलामुखीं विमुखवाङ्मनस्स्तंभिनीम् १ पीयूषोदधिमध्यचारुवि
लसद्रक्तोत्पले मंडपे सिंहासनमौलिपातितरिपुं प्रेतासनाध्या
सिनीम् स्वर्णाभां करपीडितारिरसनां भ्राम्यद्गदां विभ्रमामित्थं ध्या
यति यांति तस्य सहसा सद्योऽथ सर्वापदः २ देवि त्वच्चरणांबुजार्च
नकृते यः पीतपुष्पांजलिं भक्त्या वामकरे विधाय च मनुं मंत्री मनो
ज्ञाक्षरम् पीठध्यानरतोऽथ कुंभकवशाद्बीजं स्मरेत्पार्थिवं तस्यामित्र
मुखस्य वाचि हृदये जाड्यं भवेत्तत्क्षणात् ३ वादी मूकति रंकति क्षि
तिपतिर्वैश्वानरः शीतति क्रोधी शाम्यति दुर्जनः सुजनति क्षिप्रानु
गः खंजति गर्वी खर्वति सर्वविच्च जडति त्वन्मंत्रिणा यंत्रितः श्रीनित्ये
बगलामुखि प्रतिदिनं कल्याणि तुभ्यं नमः ४ मंत्रस्तावदलं विप
क्षदलने स्तोत्रं पवित्रं च ते यंत्रं वादिनियंत्रणं त्रिजगतां जैत्रं च चित्रं
च ते मातः श्रीबगलेति नाम ललितं यस्यास्ति जंतोर्मुखे त्वन्नामग्र

तं
मा
१९२ 192

देणानसंमदिमुविस्तमोभवेद्वादिनाम् ५ दुष्टस्तंभनमुग्रविघ्नशम
नंदारिद्र्यविद्रावणं भूभृत्संगमनं वलन्मृगदृशां चेतःसमाकर्षण
म् सौभाग्यैकनिकेतनं मम दृशः कारुण्यपूर्णेक्षणात् मृत्योर्मारण
माविरस्तु पुरतो मातस्त्वदीयं वपुः ६ मातर्भञ्जय मद्विपक्षवदनं जि
ह्वां च संकीलय ब्राह्मीं मुद्रय दैत्यदेवधिषणामुग्रां गतिं स्तंभय
शत्रूंश्चूर्णय देवि तीक्ष्णगदया गौरांगि पीतांबरे विघ्नौघं बगले हर प्र
णमतां कारुण्यपूर्णेक्षणे ७ मातर्भैरवि भद्रकालि विजये वारा
हि विश्वाश्रये श्रीविद्ये समये महेशि बगले कामेशि वामे रमे मा
तंगि त्रिपुरे परात्परतरे स्वर्गापवर्गप्रदे दासोऽहं शरणागतः करुण
या विश्वेश्वरि त्राहि माम् ८ संरंभे चौरसंघे प्रहरणसमये बंधने व्या
धिमध्ये विद्यावादे ...... प्रजपतिन्रपतौ दिव्यकाले निशाया
म् वश्ये वा स्तंभने वा रिपुवधसमये निर्जने वा वने वा गच्छंस्तिष्ठं
स्त्रिकालं यदि पठति शिवं प्राप्नुयादाशु धीरः ९ त्वं विद्या परमा त्रि
लोकजननी विघ्नौघसंहारिणी योषाकर्षणकारिणी जनमनः
संमोहसंदायिनी स्तंभोत्सारणकारिणी पशुमनःसंदोहसंदायि
नी जिह्वाकीलनभैरवी विजयते ब्रह्मादिमंत्रो यथा १० विद्या ल
क्ष्मीः सर्वसौभाग्यमायुः पुत्रैः पौत्रैः सर्वसाम्राज्यसिद्धिम् मानं भो
गं वश्यमारोग्यसौख्यं प्राप्तं तत्तद्भूतलेऽस्मिन्नरेण ११ त्वत्कृतं ज
पसमाहं गदितं परमेश्वरि दुष्टानां निग्रहार्थाय तत्गृहाण नमो
स्तु ते १२ इति श्रीरुद्रयामले तंत्रे बगलामुखीस्तोत्रं संपूर्णम् ॥
अथ प्रसंगागतः षष्ठ्यादयो निरूप्यन्ते अथ चतुःषष्ट्युपचाराः सर्वो
पचारं मंत्रास्त्रितारीपूर्वाः कल्पयामि नमः इत्यन्ताः कार्याः ऐं ह्रीं श्री
पाद्यं कल्पयामि नमः एवमर्घ्यं कल्पयामि नमः इति क्रमेण आस
नारोपणं सुगंधितैलाभ्यंगं मज्जनशालाप्रवेशनं मज्जनमंडपम
णिपीठोपवेशनं दिव्यस्नानीयं उद्वर्तनं उष्णोदकस्नानं कनककल
लशस्थितसकलतीर्थाभिषेकं धौतवस्त्रपरिमार्जनं अरुणदुकू

लपरिधानं अरुणदुकूलोत्तरीयं आलेपनं रत्नप्रवणानं चंदनागुरु।
कुंकुममृगमदकर्पूरकस्तूरीगोरोचनादिदिव्यगंधसर्वांगविलेपनम्
केशभारस्य कालागुरुधूपमल्लिकामालतीजातीचंपकाशोकश
तपत्रदृगक्कुहरीपुन्नागकल्हारयुग्मं सर्वर्त्तुकुसुममालाभूषणम्
रूपप्रवेशनं भूषणमणिपीठोपवेशनं नवमणिमुकुटं चंद्रशकलं
सीमंतसिंदूरं तिलकरत्नं कालांजनं पालीयुगलं नासाभरणं
अधरयावको ग्रथनभूषणं कनकचित्रपदकं महापदकं मुक्ताव
लिं एकावलिं देवच्छंदकं केयूरयुगलचतुष्टयं वलयावली ऊ
र्मिकावली कांचीदामकटिसूत्रं शोभाख्याभरणं पादकटकं रत्न
नूपुरं पादांगुलीयकं एककरे पाशं अन्यकरे अंकुशं इतरकरे
पांडुकरपाशं अपरे पुष्पबाणान् श्रीमाणिक्यपादौ समावेशः।
स्वसमानदेवताभिः सह महासिंहासनाधिरोहणं कामेश्वरप
र्यंकोपवेशनं अमृतासवचषकं आचमनीयं कर्पूरवाटिका
सानंदोल्लासविलासहासं मंगलारात्रिकं श्वेतछत्रं चामरयुगलं
दर्पणं तालवृंतं गंधं पुष्पं धूपं दीपं तांबूलं नैवेद्यं कल्पयेत् एते
षामुपचाराणामभावे एते मंत्राः जप्याः तथा च नवरत्नेश्वरे चतुः
षष्ट्युपचाराणामभावे तन्मंत्रं जपेत् तत्तद्देवफलं विद्यात्साधकः
स्थिरमानसः अथाष्टादशोपचाराः आसनं स्वागतं पाद्यमर्घ्यमा
चमनीयकम् स्नानं वासोपवीतं च भूषणानि च सर्वशः गंधं पु
ष्पं तथा धूपं दीपमन्नं च तर्पणम् माल्यानुलेपनं चैव नमस्कारवि
सर्जनम् अष्टादशोपचारैस्तु मंत्री पूजां समाचरेत् अथ षोडशो
पचाराः पाद्यार्घ्याचमनीयं च स्नानं वसनभूषणे गंधपुष्पधूपदीप
नैवेद्याचमनं तथा तांबूलमर्चनास्तोत्रं तर्पणं च नमस्क्रिया प्रयोज
येत्समर्चायामुपचारांस्तु षोडश अथ दशोपचाराः पाद्यमर्घ्यं तथा।
चामं मधुपर्काचमनं तथा गंधादयो नैवेद्यांता उपचारा दश क्रमात्
अथ पंचोपचारमंत्राः यथा ॐ यं चंदनं कुंकुमारुणपयोधराभिरा।

नं॰ सा॰ १९२ 193

ल्लाविर्तां नानानर्घ्यमणिप्रवालघटितां दत्तं गृहाणाम्बिके आमृष्टाम्
रसुन्दरीभिरभितो हस्ताम्बुजैर्भक्तितो मातः सुन्दरि भक्तकल्पलतिके
श्रीपादुकामाचरेत १ देवेन्द्रादिभिरर्चितं सुरगणैरादाय सिंहासनं
चंचत्कांचनसंचयाभिरचितं चारुप्रभाभास्वरम् एतच्चम्पकके
तकीपरिमिलतैलं महानिर्मलं गंधोद्वर्तनमादरेण तरुणीदत्तं गृ
हाणाम्बिके २ पश्चाद्देवि गृहाण शम्भुगृहिणि श्रीसुन्दरि प्रायशो गं
धस्नानसमुद्भवनिर्भरमंब धात्रीफलं निर्मलम् त्वत्केशान्परिशुद्ध
कंकतिकया मन्दाकिनीस्रोतसि स्नात्वा प्रोज्ज्वलगंधिकं भवतु ते श्री
सुन्दरि त्वन्मुदे ३ सुराधिपतिकामिनीकरसरोजनालीधृतां सचं
दनसकुंकुमागुरुभवेन विभ्राजिताम् महापरिमलोज्ज्वलां सर
सशुद्धकर्पूरिकां गृहाण वरदायिनि त्रिपुरसुन्दरि श्रीपदे ४ गं
धर्वामरकिन्नरप्रियतमासंतानहस्ताम्बुजप्रस्तारैर्ध्रियमाणमु
त्तरीयं काश्मीरजापिञ्जरम् मातर्भास्करभानुमण्डलगलत्कांति
प्रदानोज्ज्वलं चैलं निर्मलमातनोतु वसनं श्रीसुन्दरि त्वन्मुदे ५ सु
र्णकल्पितकुण्डलं श्रुतियुगे हस्ताम्बुजे मुद्रिका मध्ये सारसना नि
तम्बफलके मंजीरमंघ्रिद्वये हारो वक्षसि कंकणौ क्वणरणत्का
रौ करद्वन्द्वके विन्यस्तं मुकुटं शिरस्यनुदिनं दत्तोन्मदस्तूयताम् ६
ग्रीवायां धृतकान्तिकान्तपटलं ग्रैवेयकं सुन्दरं सिन्दूरं विलसल्ल
लाटफलके सौन्दर्यमुद्राधरम् राजत्कज्जलमुज्ज्वलोत्पल ......
श्रीमोचने लोचने तद्दिव्यौषधिनिर्मितं रचयतु श्रीशाम्भवि श्रीपदे
अमंदतरमंदरोन्मथितदुग्धसिंधूद्भवं निशाकरकरोपमं त्रिपुर
सुन्दरि श्रीपदे गृहाण मुखमीक्षितुं मकुरबिम्बमाविद्रुमैर्विनिर्मि
तमघच्छिदे रतिकराम्बुजस्थायिनम् ७ कस्तूरीद्रवचन्दनागुरुसु
धाधाराभिराप्लावितं चंचच्चम्पकपाटलादिसुरभिर्द्रव्यैः सुगंधी
कृतम् देवस्त्रीगणमस्तकास्थितमहारत्नादिकुम्भव्रजैरंभः शां
भवि संभ्रमेण विमलं दत्तं गृहाणाम्बिके ८ कल्हारोत्पलनागके

सरसरोजाद्यावलीमालतीमल्लीकैरवकेतकादिकुसुमैरम्लानैरमा
रादिभिः गुम्फितैर्माल्यभवैर्नवैः सुरभिनानानारसास्वादनसातांश्रीमो
जनिवासिनीभगवतीश्रीसुन्दरीं पूजये ९ मांसीगुग्गुलचन्दनागु
रुजः कर्पूरशैलेयजैर्माध्वीकैः सहकुंकुमैः सुरभितैः सर्पिर्भिरा
मिश्रितैः सौरभ्यस्थितिमन्दिरे मणिमये पात्रे भवप्रीतये धूपांब
सुरकामिनीविरचितश्रीसुन्दरि त्वन्मुदे ११ घृतद्रवपरिस्फुरद्रु
चिररत्नयष्ट्यान्वितो महातिमिरनाशनः सुरनितम्बिनीनिर्मितः
सुवर्णचषकस्थितः सघनसारवर्त्यान्वितस्तव त्रिपुरसुन्दरि स्फु
रतु दीपो मुदे १२ लवंगकलिकोज्ज्वलं बहुलनागवल्लीद
लैस्सजातिफलकोमलैस्सघनसारपूगीफलम् सुधामधुरिमा
कुलं रुचिररत्नपात्रस्थितं गृहाण मुखपंकजे स्फुरितमंब ताम्बू
लकम् १४ शरत्प्रभवचन्द्रमःस्फुरितचन्द्रिकासुन्दरं दलत्सुरत
रंगिणीललितमौक्तिकाडम्बरम् गृहाण नवकाञ्चनप्रभवदण्डखं
डोज्ज्वलं महात्रिपुरसुन्दरि प्रकटमातपत्रं महत् १५ मातस्त्वन्मुद
मातनोतु सुभगस्त्रीभिः समान्दोलितं शुभ्रं चामरमिन्दुकुन्दसह
शं प्रस्वेददुःखापहम् सद्योगस्त्यवसिष्ठनारदशुकव्यासादिवा
ल्मीकिभिः स्वचित्ते क्रियमाणमेव कुरुतां प्रामाण्यवेदध्वनिः १६
स्वर्गंगाने मंगलं वीणापणवभेरीनिनादैरुपगीयमाना कोलाह
लैराकलितानतवास्तु विधायधरीनिस्सकलाम्सकाय ९ देवि भक्ति
रसभावितवृत्ते प्रीयतां यदि केनापि लभ्यते १८ एतैः षोडशभिः
पद्यैरुपचारोपकल्पितैः यः परां देवतां स्तौति स तेषां फलमाप्नु
यात् अथ द्रव्याणां निर्माल्यकालनिर्णयः ॥ तत्र योगिनीतन्त्रे मणि
मुक्तासुवर्णानि देवदत्तानि यानि च न निर्माल्यं हि द्वादशाहात्ताम्रपात्र
तथैव च पट्टीशाटीचषण्मासेन नैवेद्यं दत्तमात्रतः सोदकं कुसुमं चै
व यामार्धेन महेश्वरि पट्टसूत्रं त्रिमासाश्च यज्ञसूत्रं त्वहः स्मृतम् याव
दुःखं भवेद्गन्धं परमान्नं तथैव च मल्लकं कृषिरं चैव स्नेहो रात्रेण पार्व

नं॰ मा॰ १९४

194

ति शुष्कं तद्धिदुग्धं च आज्यं याम्येन हि द्वारि करवीरमहेशानं विल्व
पत्रं तथैव च जपाकुसुममाल्यं च निर्माल्यं सार्धयामके मालत्यैवक
रवीरस्य पद्मस्य विल्वकस्य च यामार्धेन महेशानि तांबूलदलमात्र
तः न निर्माल्यं दाडिमं च तथा विल्वफलं प्रिये सौगंधिकं च कदली
प्रथमे न निवेदयेत् कदलीबीजपूरं च दुग्धं पक्वं निवेदयेत् इति द्र॰
व्याणां निर्माल्यकालनिर्णयः ॥ अथ रुद्राक्षमाहात्म्यम् शिवा
यां हस्तयोः कंठे कर्णयोश्चापि यो नरः रुद्राक्षं धारयेद्भक्त्या स शैव
लोकमाप्नुयात् नववक्त्रं तु रुद्राक्षं धारयेद्वामबाहुना चतुर्दशमुखं
चैव शिखायां धारयेद्बुधः एकवक्त्रः शिवः साक्षाद्ब्रह्महत्यामपोह
ति अवश्यं तु प्रतिष्ठातो वह्निस्तंभं करोति च द्विवक्त्रो हरगौरी स्या
द्गोवधाद्यघनाशनम् त्रिवक्त्रोऽग्निस्त्रिजन्मोत्थपापराशिं प्रणाश
येत् चतुर्वक्त्रः स्वयं ब्रह्मा नरहत्यामपोहति पंचवक्त्रस्तु काला
ग्निरगम्यागमनपापनुत् षड्वक्त्रस्तु गुहः साक्षाद्भ्रूणहत्यामपोहति
सप्तवक्त्रस्त्वनंतः स्यात्स्वर्णस्तेयादिपातकहा विनायकोऽष्टवक्त्रः
स्यात्सर्वानृतविनाशकृत् भैरवो नववक्त्रस्तु शिवसायुज्यकार
कः दशवक्त्रस्तु विष्णुर्भूतप्रेतपिशाचहा एकादशमुखो रुद्रः
नानायज्ञफलप्रदः द्वादशास्यो भवेदर्कः सर्वक्रतुफलप्रदः त्र॰
योदशमुखः कामः सर्वकामफलप्रदः चतुर्दशास्यः श्रीकंठो वं॰
शोद्धारकरः परः निष्छिद्राश्च सुपक्वाश्च रुद्राक्षा धारणे स्मृताः
पंचामृतं पंचगव्यं स्नानकाले प्रयोजयेत् रुद्राक्षस्य प्रतिष्ठायां मं
त्रं पंचाक्षरं तथा ओं त्र्यंबकादिमंत्रस्तु ओं त्र्यंबकं यजामहे सुगंधिं
पुष्टिवर्धनम् उर्वारुकमिव बंधनान्मृत्योर्मुक्षीय मामृतात् य
था ओं ह्रौं अघोरे ह्रौं घोरे घोरतरे घोरे विनामंत्रेण यो धत्ते रुद्राक्षं
भुवि मानवः स याति नरकं घोरं यावदिंद्राश्चतुर्दश ओं ह्रौं ह्रीं स
र्वतः सर्वांगे नमस्ते रुद्ररूपके अनेनापि च मंत्रेण रुद्राक्षस्य प्रति॰
ष्ठा नमः प्रतिष्ठाविधिवत्कृत्वा ततोऽधिकं फलं लभेत् ततो यथा

स्वं मंत्रेण धारयेद्भक्तिसंयुतः ततोक्रमेण मंत्राः ॐ ॐ मर्शा नमः ॐ
ह्रैं नमः ॐ ॐ नमः ॐ ह्रीं नमः ॐ ह्रूं नमः ॐ ॐ ह्रूं नमः ॐ ॐ ह्रूं ह्र
नमः ॐ सः ह्रूं नमः ॐ ह्रं नमः ॐ ह्रीं नमः ॐ श्रीं नमः ॐ ह्रूं ह्रीं न
मः ॐ हां हौं नमः ॐ नमो नमः रुद्राक्षदेहसंस्थेन ॐ ह्रूं टोत्रिय।
ते यदि सोपि रुद्रपदं याति किं पुनर्मानवा गुरुः सप्तविंशतिरुद्राक्ष
मालया देहसंस्थया यः करोति नरः पुण्यं सर्वं कोटिगुणं भवेत्
यो ददाति द्विजातिभ्यो रुद्राक्षं भुवि भक्तिभावा तस्य प्रीतो भवेद्रुद्रः
स्वपदं च प्रयच्छति इति पद्मपुराणे रुद्राक्षमाहात्म्यं संपूर्णम् ॥
स्कंदपुराणे कार्तिकेय उवाच एकद्वित्रिवक्त्रः पंचषट्सप्तवक्त्र
वा नव दशैकादशद्वादशत्रयोदशचतुर्दश एते भेदास्तु मुखानाम्
देवता कोत्र शंकर। गुणं च कीदृशं तेषां कथयस्व यथार्थतः श्री
शंकर उवाच शृणु षण्मुख वक्ष्ये नवके वक्त्रे यथाक्रमम् एकव
क्त्रः शिवः साक्षाद्ब्रह्महत्यां व्यपोहति द्विवक्त्रो देवदेवो च गोव
धं नाशयेद्ध्रुवम् त्रिवक्त्रो दहनः साक्षाद्भ्रूणहत्यां व्यपोहति चतु
र्वक्त्रः स्वयं ब्रह्मा नरहत्यां व्यपोहति पंचवक्त्रः स्वयं रुद्रः कालाग्निर्ना
मनामतः षड्वक्त्रः कार्तिकेयस्तु धारयेद्दक्षिणे भुजे ब्रह्महत्या
दिभिः पापैर्मुच्यते नात्र संशयः सप्तवक्त्रो महासेन अनंतो नाम
नागराट् गुरुतल्पादिभिः पापैर्मुच्यते नात्र संशयः अष्टवक्त्रो महा
सेनः साक्षाद्देवो विनायकः इष्टोदरकेणापि संस्पर्शो ह्यगुरुस्त्रि
यम् एवमादीनि पापानि अन्यानि पापानि सर्वशः विघ्नास्तस्य च ना
श्यंति मुक्तो याति परां गतिम् गुणाह्येते सर्वेषु अष्टवक्त्रस्य धार
णात् नववक्त्रो भैरवः स्याद्धारयेद्वाम धारणात् दशवक्त्रो महासे
न साक्षाद्देवो जनार्दनः ग्रहाश्चैव पिशाचाद्याः वेतालाः ब्रह्मराक्ष
साः पन्नगाश्च विनश्यंति दशवक्त्रस्य धारणात् वक्त्रैकादश रुद्रा
स्तो रुद्रा एकादश स्मृताः शिखायां धारयेन्नित्यं तस्य पुण्यफलं शृ
णु अश्वमेधसहस्रस्य वाजपेयशतानि च हेमशृंगाश्च लक्षस्य

सायदनस्ययसफलम् तत्फलंसमवाप्नोति रुद्रैकादशधारणात् रु
द्राणां द्वादशैर्वक्त्रैः कैवर्देशोचधारणात् आदित्यस्तुष्यतेनित्यं द्वा
दशास्यो व्यवस्थितः त्रयोदशमुखः कामः सर्वकामफलप्रदः चतु
र्दशमुखः श्रीकण्ठो वंशोद्धारकरः परः तत्रक्रमेणमन्त्राः ॐ पं ॐ श्री
ॐ श्री श्री पं त्री रुः ॐ ह्रीं ॐ ह्रीं ॐ ह्रां ॐ उं वं ॐ ह्रां ॐ ह्रीं ॐ श्री ॐ ह्रू
ॐ ह्रां ॐ त्रां ॐ स्त्रां ॐ रुं मा इतिरुद्राक्षसंस्कारः ॥ अथनैमित्तिका
दिकर्मभङ्गप्रायश्चित्तमाह गौतमीये यद्यत्कर्मणि वैगुण्यंनि
त्यनैमित्तिकेतथा सहस्रंप्रजपेन्मन्त्रं मूलंवाप्युतमेववा नित्यस
हस्रं प्रजपेन्नैमित्तिके तथायुतम् इतिविस्तृतिविषयम् अन्यत्र
तन्त्रराजे नित्यातिक्रमदोषाणांशान्त्यैविद्याशतंजपेत् नैमि
त्तिकातिक्रमाणांसहस्रंप्रजपेन्मनुम् पापसंकरेतत्सर्वेषामे
वपापानांसंकरेसमुपस्थिते प्रायश्चित्तन्तुतत्रोक्तमयुतंमन्त्र
जापतः अथविसर्जनमन्त्राः तत्रगौतमीये यस्यदर्शन
मिच्छन्ति देवाब्रह्मादयः कृपयादेवदेवेशमदग्रेसन्निधीभव
तस्यतेपरमेशानस्वागतंस्वागतंप्रभो कृतार्थोऽस्म्यनुगृहीतो
ऽस्मिसफलंजीवितंतमे यदागतोसिदेवेशचिदानन्दमयाच्यु
त अज्ञानाद्वाप्रमादाद्वावैकल्यात्साधनस्यच यदपूर्णंभवेत्कृ
त्यंतथाप्यभिमुखोभव इत्यावाहनमन्त्रः मद्भक्तिलेशसंपर्कात्प
रमानन्दसम्भवः तस्मैतेपरमेशानपाद्यंशुद्धायकल्पये इतिपा
द्यम् देवानामपिदेवायदेवानांदेवतायच आचामंकल्पयामी
श सुधायाश्रुतिहेतवे इत्याचमनीयम् तापत्रयहरंदिव्यंपरमा
नन्दलक्षणम् तापत्रयविमोक्षायतवार्घ्यंकल्पयाम्यहम् इत्य
र्घ्यम् सर्वकालुष्यहीनायपरिपूर्णसुखात्मकम् मधुपर्कमि
दंदेवकल्पयामिप्रसीदमे इतिमधुपर्कम् उच्छिष्टोप्यशुचिर्वा
पियस्यस्मरणमात्रतः शुद्धिमाप्नोतितस्मैतेपुनराचमनंत्विद
म इतिपुनराचमनीयम् परमानन्दबोधाब्धिनिमग्ननिजमूर्तये

सांगोपांगमिदं स्नानं कल्पयाम्यहमीश ते इति स्नानम् मायाचि
त्रपटच्छन्ननिजगुह्योरुतेजसे निरावरणविज्ञानवाससे ते कल्प
याम्यहम् इति वासः यमाश्रित्य महामाया जगत्संमोहिनी सदा त
स्मै ते परमेशाय कल्पयाम्युत्तरीयकम् इत्युत्तरीयम् यस्य शक्ति
त्रयेणेदं संप्रोतमखिलं जगत् यज्ञसूत्राय तस्मै ते यज्ञसूत्रं प्रकल्पये
इति यज्ञसूत्रम् स्वभावसुन्दराङ्गाय सर्वसत्त्वाश्रयाय ते भूषणा
नि विचित्राणि कल्पयामि सुरार्चित इति भूषणम् नमस्ते देवदे
वेश सर्वतृप्तिकरं परम् अखण्डानन्दसम्पूर्ण गृहाण जलमुत्तमम्
इति जलम् परमानन्दसौरभ्यपरिपूर्णदिगन्तरम् गृहाण परमं गं
धं कृपया परमेश्वर इति गन्धः तुरीयगुणसम्पन्नं नानागुणम
नोहरम् आनन्दसौरभं पुष्पं गृह्यतामिदमुत्तमम् इति पुष्पम् व
नस्पतिरसोद्भूतो गन्धाढ्यो गन्ध उत्तमः आघ्रेयः सर्वदेवानां धूपो
ऽयं प्रतिगृह्यताम् इति धूपः स्वप्रकाशो महातेजाः सर्वतस्तिमिरा
पहः सबाह्याभ्यन्तरं ज्योतिर्दीपोऽयं प्रतिगृह्यताम् इति दीपः त
था च गौतमीये इज्या तत्पञ्चधा प्रोक्ता नामभेदाञ्छृणुष्व मे अभि
गमनमुपादानं योगः स्वाध्याय एव च इज्या पञ्चप्रकारार्चा क्रमेण
कथयामि ते तत्राभिगमनं नाम देवतास्थानमार्जनम् उपलेपनं
निर्माल्यदूरीकरणमेव च उपादानं नाम गन्धपुष्पादिचयनं त
था योगो नाम स्वदेहस्य स्वात्मत्वेनैव भावना स्वाध्यायो नाम मं
त्रार्थं संध्यानपूर्वको जपः सूक्तस्तोत्रादिपाठश्च हरेः संकीर्तनं त
था तत्त्वादिशास्त्राभ्यासश्च स्वाध्यायः परिकीर्तितः इज्या नाम स्वे
ष्टदेवपूजनं च यथार्थतः इति पञ्चप्रकारार्चा कथिता तव सुव्रत
सार्ष्टिसामीप्यसायुज्यसालोक्यसायुज्यरूपदाः क्रमात् अथ
द्वादश शुद्धिश्च वैष्णवानामिहोच्यते हरेः सर्पणं चैव गत्यानु
गमनं हरेः भक्त्या प्रदक्षिणं चैव पादयोः शोधनं तथा पूजार्थं प
त्रपुष्पाणां भक्त्या चोत्तोलनं हरेः करयोः सर्वशुद्धीनामियं शुद्धिर्वि

नें
सा
१९८
196

शिष्यते तन्नामकीर्तनाच्चैव गुणानामपि कीर्तनम् भक्त्या श्रीकृ
ष्णदेवस्य वचसः शुद्धिरिष्यते तत्कथाश्रवणाच्चैव तस्योत्सवनिरी
क्षणम् श्रोत्रयोर्नेत्रयोश्चैव शुद्धिः सम्यग्विधीयते पादोदकस्य
निर्माल्यमालानामपि धारणम् उच्यते शिरसः शुद्धिः प्रणतस्य
हरेः पुनः आघ्राणं गन्धपुष्पादिनिर्माल्यस्य तथोच्यते विशुद्धिः
स्यादनेन तस्य घ्राणस्यापि विधीयते पत्रपुष्पादिकं यच्च कृष्णपा
दयुगार्चितम् तदेकपावनं लोके तद्धि सर्वं विशोधयेत् लला
टे च गदा कार्या मूर्ध्नि चापं शरं तथा नन्दकं चैव हृन्मध्ये शंखचक्रे
भुजद्वये शंखचक्राङ्कितो विप्रः श्मशाने म्रियते यदि प्रयागे या
गतिः प्रोक्ता सा गतिस्तस्य गीतम् तत्रान्तरे यानैर्वा पादुकाभिर्वा
यानं भगवतो गृहे देवोत्सवेष्वप्रणामश्च अप्रमाणं तदग्रतः उच्छि
ष्टे चैव शौचे भगवद्वन्दनादिकम् एकहस्तप्रणामश्च तत्पुरस्तात्प्र
दक्षिणम् पादप्रसारणं चाग्रे तथा पर्यङ्कबन्धनम् शयनं भक्षणं
वापि मिथ्याभाषणमेव च उच्चैर्भाषा मिथोजल्पो रोदनानि च विग्र
हः निग्रहानुग्रहौ चैव अधोवायुविमोचनम् शक्तौ गौणोपचारश्च
अनिवेदितभोजनम् तत्तत्कालोद्भवानां च फलादीनामनर्पणम्
विनियुक्तावशिष्टस्य प्रदानं व्यञ्जनस्य च पृष्ठीकृत्यासनं चैव
परनिन्दा परस्तुतिः गुरौ मौनं निजस्तोत्रं देवतानिन्दनं तथा अप
राधास्तथा विष्णोर्द्वात्रिंशत्परिकीर्तिताः वासिष्ठे केशवाग्रे नृत्
गीतं करोति हरेर्दिने वह्निना किं न दग्धोसौ गतेन किं नरस्यानलम्
नारदीये स्मरणं कीर्तनं विष्णोः कलौ मन्त्रजपादिकम् दानं तु श्री
नं येन तस्य नामान्यानि विशिष्यन्ते गीतमीये सालिग्रामशिलातोय
मपीत्वा यस्तु मस्तके प्रक्षेपणं प्रकुर्वीत ब्रह्महा स निगद्यते वि
ष्णोः पादोदकं पीतं कोटिजन्माघनाशनम् तदेवाष्टगुणं पापं भू
मौ बिन्दुनिपातनात् आगमेषु दमोदरनिवेदितोपि तुलसीस्तेय
चनेधूपदीपनैवेद्यकुंकुमलेपनवलितं गर्वांगनासंगमम् आसा

दीनमतिष्ठितिर्हरिजनैस्तत्संगजं किल्बिषं सालिग्रामशिलानृसिं
हमहिमाकोप्यवलोकोत्तरः स्वप्नप्रबोधकालोथमन्त्राणामभिधी
यते मन्त्रविद्याविभागेन द्विविधा मन्त्रजातयः मन्त्राः पुंदेवताः प्रोक्ताः
विद्याः स्त्रीदेवताः स्मृताः पुंमन्त्राः हुंफडन्ताः स्युर्द्विठान्ताः स्युः स्त्रियः
मताः नपुंसका नमोन्ताः स्युरित्युक्ता मनवस्त्रिधा एवमन्यामवेद्वि
द्यामहाशब्देन गीयते एवं मन्त्रेपि अग्नीषोमात्मका मन्त्रा विज्ञेयाः
क्रूरसौम्ययोः कर्मणो वह्नितारान्त्यविषस्वायः समीरिताः आग्ने
यामानवाः सौम्या भूयिष्ठं उमृताक्षराः आग्नेयाः संप्रबुद्ध्यन्ते प्राणेव
रतिदक्षिणे भागेम्यस्मिन्स्थिते प्राणे सौम्या बोधं प्रयान्ति ते प्रयच्छन्ति
फलं सर्वं प्रबुद्धा मन्त्रिणां सदा यद्वा प्राणापानसमायोगाद्विवश
तेषामेलनम् प्रबोधकालो विज्ञेयः स्वापकालस्ततः परम् न
ष्या वामबाहोर्यदा वायुः रुक्मानोर्योजनं तदा दक्षिणस्याथ यदा वा
युस्तदा दीर्घाणि योजिताः उभयस्थो यदा वायुस्तदा स्यादुभया
त्मकः संपुटीकृतमन्त्रेण आदिलान्तान्सबिन्दुकान् पुनस्तु सविसर्गा
न्तात्मकारं केवलं जपेत् एवं जपो यदि स्यात्स्वशुद्धः शीघ्रसिद्धिदः
इति स्वप्नप्रबोधकालः ॥ अथ योगासनानि पद्मासनं स्वस्ति
कांख्यं भद्रं वज्रासनं तथा वीरासनमिति प्रोक्तं क्रमादासनपञ्चकं
ऊर्वोरुपरि विन्यस्य सम्यक्पादतले उभे अङ्गुष्ठौ च निबध्नीयाद्धस्ता
भ्यां व्युत्क्रमात्ततः पद्मासनमिति प्रोक्तं योगिनां हृदयङ्गमम् जान्
र्वोरन्तरे सम्यक्कृत्वा पादतले उभे ऋजुकायो विशेद्योगी स्वस्ति
कं तत्प्रचक्षते सीवन्याः पार्श्वयोर्न्यस्य गुल्फयुग्मं सुनिश्चितम् वृष
णाधः पार्श्वपादौ पाणिभ्यां परिबन्धयेत् भद्रासनं समुद्दिष्टं योगि
भिः परिकीर्तितम् ऊर्वोः पादौ क्रमान्न्यस्य जान्वोः प्रत्यङ्मुखाङ्गुली
करौ न्यसेदाख्यातं वज्रासनमनुत्तमम् एकं पादमथः कृत्वा वि
न्यस्योरौ तथोत्तरम् ऋजुकायो विशेद्योगी वीरासनसमीरितम्
अथ मुद्राप्रकरणम् अथ मुद्राः प्रवक्ष्यामि सर्वतन्त्रेषु गोपिताः या

तं·
सा·
९०
197

भिर्विरचिताभिरस्तमोदंतेसर्वदेवताः अर्चनेजपकालेचध्यानेकाम्य
वकर्मणि स्नानेचावाहनेशंखेप्रतिष्ठायांचरक्षणे नैवेद्यचतथाम
न्यतत्कल्पप्रकाशिते स्थलेमुद्राःप्रदृष्टव्याः स्वस्वलक्षणलक्षिताः
आवाहनादिकामुद्रानवसाधारणामताः तथाचैकंगमुद्राश्चसर्व
तेत्रैवयोजिताः एकोनविंशतिमुद्राविष्णोरुक्तामनीषिभिः शं
खचक्रगदापद्मवेणुश्रीवत्सकौस्तुभः वनमालातथाज्ञानमु
द्राविल्वाह्वयातथा गरुडाख्यातथामुद्राविष्णोःसंतोषवर्धिनी
नारसिंहीचवाराहीहयग्रीवधनुस्तथा बाणमुद्राचपरशुर्जगन्मो
हनिकातथा काममुद्रापराख्याताशिवस्यदशमुद्रिका लिंगयो
निस्त्रिशूलाक्षमालेष्टाभीमृगाह्विका खट्वांगाचकपालाख्याडु
मरुःशिवतोषदाः सूर्यस्यैकैवपद्माख्यासप्तमुद्रागणेशितुः दं
तपाशांकुशाविघ्नपरशुर्लड्डुसंज्ञकाः बीजपूराह्वयामुद्राविज्ञेया
वह्निपूजने पाशांकुशावराभीतिखड्गचर्मधनुःशराः मौसलीमु
द्रिकादौर्गीमुद्राःशक्तिप्रियंकराः लक्ष्मीमुद्रार्चनेलक्ष्म्याःवागवादि
मास्तपूजने अक्षमालातथावीणाव्याख्यापुस्तकमुद्रिकाः सप्त
जिह्वाह्वयामुद्राविज्ञेयावह्निपूजने मत्स्यमुद्राचकूर्माख्यालेलि
हांमुद्रसंज्ञकाः महायोनिरितिख्यातासर्वसिद्धिसमृद्धिदा शक्त्य
र्चनेमहायोनिः श्यामादौमुंडमुद्रिकाः मत्स्यकूर्माखिलेलीहास
र्वसाधारणीमता दशमामुद्रिकाज्ञेयात्रिपुरायाःप्रपूजने संक्षो
भद्राववाणाकर्षवश्योन्मादमहांकुशाः खेचरीबीजयोन्याख्यात्रि
खंडापरिकीर्तिताः कुंभमुद्राभिषेकस्यात्पद्ममुद्रासनेतथा का
लकालीप्रयोक्तव्याविघ्नप्रशमकर्मणि गालिनीचप्रयोक्तव्याजल
शोधनकर्मणि श्रीगोपालार्चनेवेणुः नरहरौनारसिंहिका वराह
स्यवदंष्ट्राधावाराहाख्याप्रदर्शयेत् रामार्चनेधनुर्बाणमुद्रेचपर
शुस्तथा परशुरामस्यविज्ञेयाजगन्मोहननेसंज्ञिका वासुदेवाह्व
याख्यानंकुंभमुद्रारक्षणे सर्वत्रप्रार्थनेचैवप्रार्थनाख्याप्रयोज

येत् मुद्रालक्षणमाह यामले मोदनात्सर्वदेवानां द्रावणात्पापसं
ततेः तस्मान्मुद्रेयमाख्याता सर्वकामार्थसाधने उद्देशानुक्रमादा
सामुच्यते लक्षणानि च हस्ताभ्यामञ्जलिं बद्ध्वा नामिकामूलपर्वणोः
अङ्गुष्ठौ निक्षिपेत्सेयं मुद्रा त्वावाहनी स्मृता अधोमुखी त्वियं चेत्स्या
त्स्थापिनी मुद्रिका स्मृता २ उच्छ्रिताङ्गुष्ठमुष्ट्योस्तु संयोगात्सन्निधा
पनी ३ अन्तःप्रवेशिताङ्गुष्ठा सैव संरोधनी मता ४ उत्तानमुष्टियुग
लासंमुखीकरणी मता ५ देवताङ्गषडङ्गानां न्यासः स्यात्सकली
कृतिः ६ सव्यहस्तकृता मुष्टिर्दीर्घाधोमुखतर्जनी अवगुण्ठनमु
द्रेयमभितो भ्रामिता मता ७ अन्योन्याभिमुखौ श्लिष्टौ कनिष्ठाना
मिका पुनः तथैव तर्जनीमध्ये धेनुमुद्रा समीरिता अमृतीक
रणं कुर्यात्तया साधकसत्तमः अन्योन्यग्रथिताङ्गुष्ठप्रसारितप
राङ्गुली महामुद्रेयमाख्याता परमीकरणे बुधैः प्रयोजयेदिमां
मुद्रां देवताह्वानकर्मणि अगम्यास्ताः स्वमुद्रायाः तासां लक्षणमु
च्यते क्रमम् वैष्णवीनां तु मुद्राणां कथ्यते लक्षणं स्फुटम् वामाङ्गुष्ठं
तु संगृह्य दक्षिणेन तु मुष्टिना कृत्वोत्तानं ततो मुष्टिमङ्गुष्ठं तु प्रसा
रयेत् वामाङ्गुल्यस्तथा श्लिष्टाः संयुक्ताः सुप्रसारिताः दक्षिणा
ङ्गुष्ठसंस्पृष्टाः मुद्रैषा शङ्खमुद्रिका १ हस्तौ तु संमुखौ कृत्वा संभ
ग्नौ सुप्रसारितौ कनिष्ठाङ्गुष्ठकौ लग्नौ मुद्रैषा चक्रमुद्रिका २
अन्योन्याभिमुखौ हस्तौ कृत्वा तु ग्रथिताङ्गुलीः अङ्गुल्यौ मध्यमे
भूयः संलग्ने सुप्रसारिते गदामुद्रेयमुदिता विष्णोः सन्तोषका
रिणी ३ हस्तौ तु संमुखौ कृत्वा सन्नताः प्रोन्नताङ्गुलीः अङ्गुल्यौ
मध्यमे भूयः तल्लग्नमिलिताङ्गुष्ठौ कुर्यादेषा पद्ममुद्रिका ४ वा
मकराङ्गुष्ठो लग्नः स्यात्कनिष्ठिका दक्षिणाङ्गुष्ठसंयोगात्कनिष्ठा
सुप्रसारिता तर्जनीमध्यमानामाः किंचित्संकोच्य वालिताः वेणु
मुद्रा भवेदेषा सुगुप्ता प्रेयसी हरेः ५ अन्योन्यपृष्ठकरयोः मध्यमा
नामिकाङ्गुली अङ्गुष्ठेन तु बध्नीयात्कनिष्ठामूलसंस्थिते तर्जन्यौ

कार्येदेषामुद्राश्रीवत्ससंज्ञका ९ अनामाङ्गुष्ठसंलग्नां दक्षिणस्य
कनिष्ठिकाम् कनिष्ठयामयावद्धातर्जन्याद्दलयातथा वामानामा
चवध्रीयाद्दक्षिणांगुष्ठमूलके अंगुष्ठमध्यमावामेसंयोज्यसरलाः
पराः चतस्रोप्यन्यसंलग्नामुद्राकौस्तुभसंज्ञका ७ स्पृशेत्कंठादि
पादांतंतर्जन्यंगुष्ठयातथा करद्वयेनमालावन्मुद्रेयंवनमालिका
तर्जन्यंगुष्ठकौसक्ताव्यग्रतोहृदिविन्यसेत् वामहस्तांबुजंवामजानु
मूर्ध्निविन्यसेत् ज्ञानमुद्राभवेदेषारामचंद्रस्यप्रेयसी ९ अंगुष्ठं
वाममुष्टिमितरकरांगुष्ठकेनाथवद्धा तस्याग्रंपीडयित्वांगुलिभि
रपिचतावामहस्तांगुलीभिः बद्धागाढंहृदिस्थापयतुविमलः
धीर्हरन्मारवीजंविल्वाख्यामुद्रिकैषास्फुटमिहकथितात्रगो
पनीयाविधिज्ञैः ९ हस्तौतुविमुखौकृत्वाग्रथयित्वाकनिष्ठि
के मिथस्तर्जनिकाश्लिष्टेश्लिष्टावंगुष्ठकौतथा मध्यमेनामिके
हैतेद्वेपक्षाविवचालयेत् पक्षागरुडमुद्राख्याविष्णोःसंतोषव
र्धिनी ११ जानुमध्येकरौकृत्वाचिवुकोष्ठौसमाहितौ हस्तौवाम
मिसंलग्नौकंपमानःपुनःपुनः मुखंविवृतकंकुर्याल्लेलिहान
स्वजिह्विकाम् नारसिंहीभवेदेषामुद्रातत्प्रीतिवर्धिनी अंगुष्ठा
भ्यांचकरयोरथाक्रम्यकनिष्ठिके अधोमुखीभिःसर्वाभिःमुद्रे
यंनृहरेर्मता २ दत्तोपरिकरंवामंकृत्वाज्ञानमधःस्थयोः नाम
यदितिसंप्रोक्तामुद्रावाराहसंज्ञिका ३ दक्षहस्तंचार्धमुखंवामह
स्तमधोमुखम् अंगुल्यग्रंतर्जन्यंगुष्ठंमुद्रावाराहसंज्ञिका ४ वामह
स्ततलेदक्षांगुलीस्तास्तयोमुखीः सरोष्ममध्यमानास्याविस
स्फाटोविकुंचयेत् हयग्रीवप्रियामुद्रातन्मूर्तिरनुकारिणी ५
वामस्यमध्यमाग्रेतुतर्जन्यग्रेणयोजयेत् अनामिकांकनिष्ठांच
तस्यांगुष्ठेनपीडयेत् दर्शयेद्वामकेस्कंधेधनुर्मुद्रेयमीरिता ६ द
क्षमुष्टिस्थतर्जन्यादीर्घावाणमुद्रिका ७ यद्वाज्ञानार्णवे य
थाहस्तयोरंतचापंतथाहस्तकरूपिये चापमुद्रेयमाख्यातावाम

हस्तेष्ववस्थिता कल्पद्रुमेयं तु मुद्रा यशःकीर्त्तिः विवर्धिनी यथा
हस्तगता बाणा तथा हस्ते कृते प्रिये बाणमुद्रेयमाख्याता रिपुवर्ग
निकृन्तनी तलेन तलं तु करयोः श्लिष्टकं संयोज्य चाङ्गुलीः संहताः प्रस
ताः कुर्यान्मुद्रा परशुसंज्ञिका ८ ऊर्ध्वस्थाङ्गुष्ठमुष्टिभ्यां मुद्रा त्रैलो
क्यमोहिनी हस्तौ तु संपुटौ कृत्वा प्रसृताङ्गुलिकौ तथा तर्जन्यौ
मध्यमापृष्ठे अङ्गुष्ठौ मध्यमाश्रितौ काममुद्रेयमुदिता सर्वदेव
प्रियंकरी महादेवि प्रियाणां च कथ्यते लक्षणमथ उच्छितं दक्षि
णाङ्गुष्ठं वामाङ्गुष्ठेन बद्धयेत् वामाङ्गुलीर्दक्षिणाभिरङ्गुलीभिश्च
बद्धयेत् लिङ्गमुद्रेयमाख्याता शिवसांनिध्यकारिणी । मिथः क
निष्ठिकं बद्ध्वा तर्जनीभ्यामनामिके अनामिकोर्ध्वसंश्लिष्टदीर्घम
ध्यमयोरधः अङ्गुष्ठाग्रद्वयं न्यसेद्योनिमुद्रा समीरिता २ अङ्गुष्ठेन
कनिष्ठां तु बद्ध्वा श्लिष्टाङ्गुलित्रयम् प्रसारयेत्त्रिशूलाख्या मुद्रेषा
परिकीर्त्तिता २ अङ्गुष्ठतर्जन्यग्रे तु ग्रथयित्वाङ्गुलित्रयम् प्रसा
रयेदक्षमालामुद्रेयं परिकीर्त्तिता ४ अधःस्थितोर्द्ध्वहस्तः प्रसृ
तो वरमुद्रिका ५ ऊर्ध्वीकृतो वामहस्तः प्रसृतो ऽभयमुद्रिका ६ मि
लितानामिकाङ्गुष्ठमध्यमाग्रे नियोजयेत् श्लिष्टाङ्गुल्यग्रतः कुर्या
न्मृगमुद्रेयमीरिता ७ पञ्चाङ्गुल्यो दक्षिणस्य मिलिताग्रा ऊर्ध्वमुन्नताः
खट्वाङ्गमुद्रा आख्याता शिवस्यातिप्रिया मता ८ पात्रवद्वामहस्तं
तु कृत्वाङ्के वामके तथा निधायोच्छितवत्कुर्यान्मुद्रा कापालिकी
मता ९ मुष्टिं च शिथिलां बद्ध्वाङ्गुष्ठमुच्छितमध्यमाम् दक्षिणामूर्ध्व
मुन्नस्य कर्णदेशे प्रचालयेत् यथा डमरुविख्याता सर्वविघ्नविना
शिनी १० ततो गणेशमुद्राणां कथ्यते लक्षणमथ उत्तानोर्ध्वमुष्टि
मध्यमा सरला बद्धमुष्टिका दन्तमुद्रा समाख्याता सर्वागमविशारदैः १
वाममुष्टिस्तु तर्जन्या दक्षमुष्टिस्तु तर्जनीम् संयोज्याङ्गुष्ठकाग्रे तु
तर्जन्यग्रे तु निक्षिपेत् यथा पाशाङ्कुशा मुद्रा विद्वद्भिः परिकीर्त्तिता २
सरलीत मध्यमां कृत्वा तर्जनीमध्यपर्वणि संयोज्याङ्कुचयेत्किंचि

मुद्रेयमंकुशाख्यिका ३ तर्जनीमध्यमानामाकनिष्ठांगुष्ठमुष्टिका
अधोमुखी दीर्घरूपा मध्यमा विघ्नमुद्रिका ४ पाशमुद्रा निगदिता प्र-
सिद्धा लड्डुमुद्रिका बीजपूरस्य मुद्रा प्रसिद्धत्वादुपेक्षिता ५ गणे-
शांगानां च मुद्राणां कथ्यते लक्षणं स्फुटम् पाशांकुशवराभीतिपुस्तवी-
णाक्षमीरिताः कनिष्ठानामिके बद्ध्वा स्वांगुष्ठेनैव दक्षतः श्लिष्टांगु-
लीतप्रसृते मेसह पाशमुद्रिका १ वामहस्तं तथा तिर्यक्कृत्वा चै-
व प्रसार्य च आकुंचितांगुलिं कुर्यादंकुशमुद्रेयमीरिता २ मुष्टिं कृत्वा
तु हस्ताभ्यां वामस्योपरि दक्षिणम् कुर्यान्मुसलमुद्रेयं सर्वविघ्न-
विनाशिनी ३ मुष्टिं कृत्वा कराभ्यां तु वामस्योपरि दक्षिणम् कृत्वा
शिरसि संयोगान्मुद्गरामुद्रेयमीरिता ४ चक्रमुद्रां तथा बद्ध्वा मध्यमे
द्वे प्रसार्य च कनिष्ठिके तथा नीयतन्तेंगुष्ठकौ क्षिपेत लसमुद्रा
परा ह्येषा सर्वसंपत्प्रदायिनी ५ वीणावादनवद्धस्तौ कृत्वा संचा-
लयेच्छिरः वीणामुद्रेयमाख्याता सरस्वत्याः प्रियंकरी १ वाममु-
ष्टिं स्वाभिमुखीकृत्वा पुस्तकमुद्रिका २ दक्षिणांगुष्ठतर्जन्याग्रे संलग्ना
परांगुलीः प्रसार्य संहता ज्ञानापराख्यान मुद्रिका श्रीरामसरस्व-
त्योश्च संततप्रियंकरी १ कनिष्ठांगुष्ठकौ सक्तौ करयोरितरेतरम्
तर्जनीमध्यमेनामाः संहता भुग्नवर्जिता मुद्रैषा गालिनी नाम शं-
खस्योपरि चालिता १ दक्षांगुष्ठं परांगुष्ठे क्षिप्त्वा हस्तद्वयेन तु सा-
वकाशात्मकां मुष्टिं कुर्यात्सा कुंभमुद्रिका २ मुष्ट्यूर्ध्वकृतांगुष्ठो
तर्जन्यग्रे तु विन्यसेत सर्वरत्नाकरी ह्येषा कुंभमुद्रेयमीरिता ३ प्र-
सृतांगुलिकौ हस्तौ मिथः श्लिष्टौ तु सम्पुटौ कुर्यात्स्वहृदये सेयं
मुद्रा प्रार्थनसंज्ञिका ४ अंजल्यंजलिमुद्रा स्याद्धासा देवाभिधावसा
अंगुष्ठौ तु नतौ कृत्वा मुष्टिमंडलयोर्द्वयोः तावेवाभिमुखौ कुर्यान्मु-
द्रा सा कालकर्णिका ६ दक्षिणा निविडा मुष्टिर्नासिकार्पिततर्जनी
मुद्रा विस्मयसंज्ञा स्याद्विस्मयावेशकारिणी ७ मुष्टिरूर्ध्वीकृतांगुष्ठा
दक्षिणा नाटमुद्रिका ८ तर्जन्यंगुष्ठसंयोगादग्रतो बिंदुमुद्रिका ९ प्र

धोमुखी वामहस्तेनोर्ध्वास्यं वामहस्तकम् तिर्यगङ्गुलीरङ्गुलीभिः सं
ग्रथ्य परिवर्तयेत् पश्चात्संहारमुद्रास्याद्विसर्जनविधौ स्मृता १ द
क्षपाणिपृष्ठदेशे वामपाणितलं स्पृशेत् अङ्गुष्ठौ चालयेत्तस्याः कर्मुद्रे
यं मत्स्यरूपिणी ॥ वामहस्तस्य तर्जन्या दक्षिणस्य कनिष्ठिकाम् त
था दक्षिणतर्जन्या वामाङ्गुष्ठं नियोजयेत् उन्नतं दक्षिणाङ्गुष्ठं वामस्य
दक्षिणादिकाः अङ्गुलीर्योजयेत्पृष्ठे दक्षिणस्य करस्य च वामस्यापि
तृतीयेन मध्यमेनानामिके तथा अधोमुखे च वै कुर्यात् दक्षिणस्य कर
स्य च कूर्मपृष्ठसमं कुर्यादुद्धपाणिं च सर्वतः कूर्ममुद्रेयमाख्याता
ता देवता ध्यानकर्मणि हृष्टकोटौ अन्तराङ्गुलिमुष्टिं तु कृत्वा वाम
करस्य च मध्यमाग्रं तु दक्षस्य तथालग्नं प्रयत्नतः मध्यमेनाथ
तर्जन्याङ्गुष्ठाग्रे तु योजयेत् दक्षिणं योजयेत्पाणिं वामपृष्ठेन तु
साधकः दर्शयेद्दक्षिणे भागे मेरुमुद्रेयमुच्यते तर्जनीमध्यमानामा
सा समं कुर्यादधोमुखम् अनामायां क्षिपेद्वृद्धामस्तीकृत्वा कनिष्ठि
काम् लेलिहाना समुद्रेयं जीवन्यासे प्रकीर्तिता तर्जन्यनामिकाम
ध्ये कनिष्ठा क्रमयोगतः करयोर्योजयेत्सम्यक् कनिष्ठामूलदेशतः
कनिष्ठाग्रेण निक्षिप्य महायोनिः प्रकीर्तिता वामकेश्वरमन्त्रोक्ताः
प्रकाश्यन्ते नवमुद्रिकाः एता देवि प्रवक्ष्यामि मुद्राः सर्वार्थसिद्धिदाः
याभिर्विरचिताभिस्तु सान्निध्यं त्रिपुरं भवेत् परिवृत्य करौ स्पृष्टावं
गुष्ठौ कारयेत्समौ अनामान्तर्गतौ कृत्वा तर्जन्यौ कुटिलाकृती क
निष्ठिके नियुञ्जीत निजस्थाने महेश्वरि त्रिखण्डेयं समाख्याता त्रि
पुरा ध्यानकर्मणि १ मध्यमामध्यमे कृत्वा कनिष्ठाङ्गुष्ठरोधिते
तर्जन्यौ दण्डवत्कृत्वा मध्यमोपर्यनामिके एषा तु प्रथमा मुद्रा सर्व
संक्षोभकारिणी २ एतस्या एव मुद्राया मध्यमे सरले यदा क्रियेते
परमेशानि सर्वविद्राविणी तदा ३ मध्यमा तर्जनीभ्यां च कनिष्ठा
नामिके समे अङ्कुशाकाररूपाभ्यां मध्यमे परमेश्वरि अङ्गुष्ठौ तु
नियुञ्जीत कनिष्ठानामिकोपरि ४ यमाकर्षिणी मुद्रा त्रैलोक्याकर्षि

तं॰
मा॰
२॰॰
200

णीपरा ४ पुटाकारौ करौ कृत्वा तर्जन्यावंकुशाकृती परिवर्त्य क्रमेणैव
मध्यमे तदधोगते क्रमेण देवि तेनैव कनिष्ठानामिकादयः संयोज्य
निविडाः सर्वा अङ्गुष्ठावग्रदेशतः मुद्रेयं परमेशानि सर्ववश्यकरी मता ४
संमुखौ तु करौ कृत्वा मध्यमामध्यमे सजेत् अनामिके तु सरले तद्ब
हिस्तर्जनी द्वयम् दण्डाकारौ ततोङ्गुष्ठौ मध्यमानखदेशगौ मुद्रैषोन्
मादिनी नाम क्लेदिनी सर्वयोषिताम् ६ अस्यास्त्वनामिकायुग्ममधः
कृत्वाङ्कुशाकृती तर्जन्यावपि तेनैव क्रमेण विनियोजयेत् इयम
ह्याङ्कुशा मुद्रा सर्वकामार्थसाधनी ७ सव्यं दक्षिणदेशे तु सव्यदेशे तु
दक्षिणम् बाहुं कृत्वा महादेवि हस्तौ संपरिवर्त्य च कनिष्ठानामि-
के देवि युक्ता तेन क्रमेण च तर्जनीभ्यां समाक्रान्ते सर्वोर्ध्वमपि मध्य
मे अङ्गुष्ठौ तु महेशानि सरलावपि कारयेत् इयं सा खेचरी नाम्ना
पार्थिवस्थानयोजिता ८ परिवर्त्य करौ स्पष्टावर्धचन्द्राकृती प्रिये
तर्जन्यङ्गुष्ठयुगलं युगपत्कारयेत्ततः अधः कनिष्ठावष्टब्धमध्यमे
विनियोजयेत् तथैव कुटिले योज्ये सर्वाधस्तादनामिके बीजमुद्रेय
म् विराज्ये सर्वसिद्धिप्रवर्धिनी ९ मध्यमे कुटिले कृत्वा तर्जन्युपरि सं-
स्थिते अनामिके मध्यगते तथैव हि कनिष्ठिके सर्वा एकत्र संयो
ज्याङ्गुष्ठपरिपीडिताः पश्चात्प्रथमा मुद्रा योनिमुद्रेति संज्ञिता १
एता मुद्रा महेशानि त्रिपुरायाम् अयोदिताः पूजाकाले प्रयोक्तव्या य
थानुक्रमयोगतः बद्धा तु योनिमुद्रैव मध्यमे कुटिले कुरु अङ्गुष्ठ-
नखदेशे तु मुद्रेयं मूर्तिनी मता बामहस्तेन मुष्टिं तु बद्ध्वा कर्णप्रदे
शके तर्जनीं सरलीकृत्वा भ्रामयेत्सन्ततमः सौभाग्यदण्डिनी
मुद्रा न्यासकालेपि सूचिता अन्तरङ्गुष्ठमुष्ट्या तु निरुद्धा तर्जनीमि
माम् रिपुजिह्वाग्रहा मुद्रा न्यासकालेपि सूचिता इति मुद्राप्रका
ः अथ धारणीयन्त्राणि तत्रादौ भुवनेश्वर्याः शालिग्रामहृदि गला
शुदेदरं गणपाशादिकं मन्त्रं कोष्ठगमनून्नरेषु विलिखेदछाणिमत्र
हयम् अष्टदलपरषट्कयुगलयवराज्योपासनानां गले षालिखें

ह्रूं जलाधिपादिग्गणेशाः पंक्तिद्वयं ततः परम् कोष्ठेष्वष्टयुगार्णमाल्यसहि
तांस्तु गन्धावरान्तगतं मायां केसरकांद्दलेषु विलिखेन्मूले त्रिपंक्तिक्रमात्
त्रिःपाशांकुशवेष्टितं च लिपिभिर्वीतं क्रमाद्व्युत्क्रमात्सम्प्रयत्नेन यद्वेष्टनं पंक
जमुखेनावेष्टितं तद्बहिः घटार्गलमिदं यंत्रं मत्तिर्णाप्राप्तं तमतम् पाश
श्रीशक्तिकंदर्पकामशक्त्यादि रांकुशाः प्रथमोष्टाक्षरो मंत्रस्ततः का
मनिरंजनि स्वाहान्तोष्टाक्षरः सद्भिरपरः कीर्तितो मनुः ह्रीं गौरि रुद्रद
यिते योगेश्वरि सर्वभिफट् ह्रिठान्तः षोडशार्णोयं मंत्रः सद्भिरुदीरितः
इति भुवनेश्वरीधारणयंत्रम् अथ त्वरितायाः तारं हृं विलिखेन्मरो
जकूर्हरे साध्याभिधानान्वितम् मंत्रार्णान्वसुसंख्यकान्वसुदलेष्वा
लिख्य तद्बाह्यतः प्राकारात्रिःपरिवेष्टितं घटगतं पद्मस्य मन्त्रानतंघ
त्रैवश्यकरं ग्रहादिमयहृल्लक्ष्मीप्रदं कीर्तितम् इति त्वरितायाधार
णयंत्रम् ॥ पद्मं भानुदलान्वितं प्रविलिखेत्तत्कर्णिकायां पुनस्तारं
शक्तिगबीजसाध्यसहितं तत्केसरेषु क्रमात् मार्दिन्यामनुसंभ
वाम्बुलशाकार्णान्पुनः पत्रगान्मंत्रार्णान्गुणशो विधाय विलिखे
द्दंसं रंदं सदले मंत्रस्तु उच्छिष्टपुरुषिकिंस्वपिषि भयं मे समुपस्थि
तम् यदि शक्यमशक्यं वा तन्मे भगवति शमय स्वाहा मातृकाव
र्णैः संवीतं भूपुरद्वयमध्यगम् यंत्रं विघ्ननिवासिन्याः प्रोक्तं सर्वस
मृद्धिदम् वहूनां किमिहोक्तेन यंत्रं तत्कामदो मणिः इति नवदुर्गा
या ॥ अथ महात्रिपुरायाः मध्याधनवयोनिषु प्रविलिखेद्वीजा
निवर्णांस्त्रिशो गायत्र्या पुनरष्टपत्रविवरेष्वालिख्य लिप्याहृतम्
भूविंबद्वितयेन मन्मथयुजा कोणेषु संवेष्टितं यंत्रं त्रैपुरमीरितं
त्रिभुवनप्रक्षोभनं श्रीप्रदम् गायत्रीत्तु मन्मथत्रिपुरादेवि विद्महे
परमेश्वरेति उक्त्वा कामेश्वरिपदं प्रवदेत् ... धीमहि तदंते प्रवदेत्
यम्लन्नः क्लिन्ना प्रचोदयात् गायत्र्येषा समाख्याता त्रैपुरी सर्वसि
द्धिदा इति श्रीत्रिपुराधारणयंत्रम् ॥ अथ महालक्ष्मीः वेदादि
स्थितसाध्यनामयुगपाः श्रीशक्तिमायान्वितं किंजल्केषुरिरेण

पत्रविलसन्मंत्रगताहंरेनहरिः पद्मंमनंतकेसरं स्मरलसत्पत्राष्टयुग्मं
यत्राविद्याभ्यावषट्कं तयात्वविनयाष्यंत्रंलिखेद्विष्टितम् भूपुरद्वयको
णेषु ह्लौं लिखित्वा पुनः पुनः महालक्ष्मींयंत्रमिदं सर्वसिद्धिफलप्रदम्
सर्वदुःखप्रशमनं सर्वापद्विनिवारणम् बहुनाकिमिहोक्तेन परम·
स्मान्नविद्यते अथगणेशयंत्रम् वह्निर्युग्मंतरस्थमदनेमायालिखेद्वा
ग्भवषट्कोणेष्वथसिद्धिपूर्वविलिखेत्तुकारमावेष्टयेत् क्लींबीजसं·
मीरितंत्रिभुवनप्रक्षोभणं श्रीप्रदंयंत्रंपंचमनोभवात्मकमिदं सौभाग्य
संपत्करम् बीजंषट्कोणमध्ये स्फुरदनलपुरेभाणगदिक्षु लक्ष्मी
मायाकंदर्पभूमीतदनुरसपुटीष्वालिखेद्बीजषट्कम् तत्संधिष्वंगमं
त्रान्वसुदलकमलेमूलमंत्रस्यवर्णान्छिष्टान्यत्रपुविष्टान्विलिखेत्तु ग
णेशास्याममस्यापलाशो आवीतंलिपिभिः क्रमोत्क्रमवशात्साशाक्रमा
भ्यामपि त्यागोरहद्रितयेनवेष्टितमिदंयंत्रंगणेशाश्रितः लाक्षाकुंकु
मरोचनामृगमदैर्भूर्जोदरे हेम्नि वा संलिख्याभिवहन्नरेणसकलैः सम्प्रा
र्थनीयाश्रियम् ॐ महागणपतेर्विद्यां नस्मरसूजितम् सर्वसिद्धिक
रंपुंसांसमस्तपुरुषार्थदम् अथरामचक्रस्य तारमध्येविलिखेत
मनुषट्स्वकोणेषु संधिष्वंगमायास्मरमपिलिखेत्कोणगेरेषुपस्था
न किंजल्केषुस्वरगणमथोपत्रमध्येषु मालामंत्रोस्यानानगुरूपदि
मितानष्टमेपंचवर्णान् दशान्तरेणांसवेष्टाकाद्यवर्णैश्चभूपुरे दि
ग्विदिक्षुलिखेद्बीजे नरसिंहवराहयोः नमोभगवतेब्रूयाच्चतुर्थ्यां र
घुनंदन रक्षोघ्नविषदायांतेमधुरादिमभीरयेत् प्रसन्नवदनायेतिप·
श्चादमिततेजसे बलायपश्चाद्रामायविष्णवेतदनंतरम् प्रणवादिन
मोंतोयमालामंत्रःसमीरितः इतिरामचक्रस्य बीजंसाध्यसमन्वि·
तंप्रविलिखेन्मध्येष्टपत्रेष्वथोमंत्राणिस्फुरितियाविभज्यविलिखेद्वहि
ष्यावहिर्वेष्टयेत् बाह्यकोणगबीजवद्धवसुधागारद्वयेनावृतंयंत्र
ल्वद्वविषग्रहामयरिपुप्रध्वंसनं श्रीप्रदम् नृसिंहस्य अथकूर्मस्य
पिंडस्थलेनबीजंदहनपुरयुगकोणराजनषट्कर्णिकायांस्वदशार्णं

स्फुरितदशदलप्रोल्लसत्षोडशार्णकिंजल्कसंजन्माङ्कविहृतित्रिगुणादः
लेकल्पितान्वेषवर्णम् पाशांकुशाभ्यामावीतं द्वात्रिंशत्पत्रयुगादिषु
अष्टाष्टकेण लसितं यन्त्रं गोविन्ददैवतम् धर्मार्थकामफलदं सर्वरक्षा
करं स्मृतम् पञ्चान्तकोऽथ रेवस्यामनुविन्दुविभूषितम् पिण्डबीजमिदं
प्रोक्तं सर्वसिद्धिकरं परम् स्मरकृष्णाय ठद्वन्द्वं षडर्णो मनुरीरितः गो
पीजनान्ते श्रवदे ठलभायाग्निवल्लभा अष्टादशार्णो मन्त्रोऽष्टाष्ट
फलप्रदः प्रणवं हृदयं कृष्णो ङेऽन्तं तमुक्तं ततः परम् तादृशो देवकीपु
त्रं हुं फट् स्वाहासमन्वितम् षोडशार्णो मन्त्रोऽयं गोविन्दस्य समीरितः
पिंडं रतिपतेर्बीजं नमो भगवते ततः नन्दपुत्राय बालादिवपुषे श्या
मलायच गोपीजनपदस्यान्ते वल्लभाय द्विठावधि अनुष्टुप्मन्त्र
आख्यातो गोपालस्य जगत्पतेः अनेनाः कृष्णो गोविन्दो नावष्टाद
शो मनुः इति कृष्णस्य धारणायंत्रम् प्राक्प्रत्यग्दक्षिणोदग्विधिवदभि
लिखेत्स्पष्टरेखाचतुष्कं कोणे यद्यद्दलं यत्क्रमबलयुगलयुग्मं मध्य
पूर्वं तदन्तः श्लोकस्यार्णं परस्ताद्वसुदलविवरे षष्ठवर्णालिखि
त्वा तद्बाह्ये द्वादशार्णं तदनुपरिवृतं देवकीपुत्रयंत्रम् श्लोकस्या
र्णं परस्ताद्वसुदलविवरे नन्दकीदेवदेवतं तं वन्दे वव्रतोव्रतम् तं वा
तोरूढतोयाङ्गानं नाम्नात देवकीसुतम् लिखित्वा भूर्जपत्रादौ यंत्र
मेतद्यथाविधिः विधृतं बहुनानि सर्वकामफलप्रदम् पलाश
शाखत्फलके लिखितं साधुसाधितम् गोरूयान्नेनिखिलेन देनरूवा
प्रतिर्भवेत्सदा इति गोपालस्य धारणायंत्रम् अथ शिवयंत्रम् त
त्रादौ षट्कोणमष्टदलं लिखित्वा तदन्तर्नाम साध्ययुक्तं प्रासादबी
जं विलिख्य षट्कोणेषु प्रणवसहितं पञ्चान्तरवर्णान्विलिख्य विव
रेषु षडङ्गमन्त्रान् तद्बहिः पञ्चदलानि विवरवर्त्म्य तद्दलेषु ईशानाय
नमः तत्पुरुषाय नमः अघोराय नमः सद्योजाताय नमः वामदे
वाय नमः इति सकलमन्त्राणामादिक्रमेण लिखेत् तद्दलेषु मातृ
काष्टवर्णान् लिखेत् तद्बहिर्वृत्तं सम्यग्वकेनचोष्टयेत् एतद्यंत्रं जपहोमा

तं॰
सा॰ दिनां स्पृष्ट्वा धारयेत् आयुरारोग्यैश्वर्यादिसिद्धिर्भवति इति शिवं य
२०२ न्त्रम् अथ शान्तिकादौ धारणयन्त्रम् तदुक्तं फेत्कारीये योनियुग्मे लि
खेन्मूलमन्त्रं हेमशलाकया क्लीं विभिन्नान्दीर्घवर्णान् षट्कोणे वि
202 लिखेत्ततः अष्टपत्रेष्वष्टवर्णान्नरसिंहैर्भूषणद्वयम् अष्टवज्रं भूपु
रं विलिखेत्साधकसत्तमः स्ववर्णपट्टे भूर्जे वा रूप्ये वाप्यथ ताम्रते
विलिखेद्धेमलेखिन्या गन्धाष्टकसमन्वितम् दूर्वाकाण्डेन वा लिखे
त् मूलेन वा पुनः एकवीराकल्पे वेष्टितं पीतवस्त्रेण जतुना प
रिवेष्टयेत् बध्नीयात्सीतवस्त्रेण शिखान्ते कण्ठे भूषणम् स्त्रीणां वा
मभुजे चैव मन्त्रमेतद्दक्षिणे भुजे वन्ध्यापि लभते पुत्रं निर्धनोपि धनवा
न् भवेत् रक्षयन्त्रमिदं बद्ध्वा ततो नार्थिगौतमादिभिः प्रोक्तं यत्पार्थिवेष्टाभि
सिद्धमेतन्यकादिभिः अस्यार्थः योनियुग्मे षट्कोणे तन्मध्ये हे
मशलाकया भूर्जपत्रे रोचनाकुङ्कुमगोरोचनाश्च नाभिश्चन्दन अष्टगन्धादि
नामं सौवियाथयन्त्रिकक्रमेण मूलमन्त्रं लिखित्वा तस्य हृल्लेखा रेफम
ध्ये अमुकस्य रक्षां कुरु कुरु अमुकीनामभ्युदयममुकस्याद्य
अस्य रक्षां कुरु कुरु इत्यादिना साध्यसहितं विलिखेत् षट्कोणे क्लीं
विभिन्नान् दीर्घवर्णान् तदुक्तं स्वराणां मध्यगा यश्चतन्वन्तः क्लीं नपुंसकं
दीर्घवर्णाः आद्ये द्वेद्येऽन्त्यः इत्येवं लिखेत् अष्टपत्रेष्वष्टवर्णान् यं ह्रीं ॐ
पें ह्रीं फट् स्वाहा तदुक्तं वाग्भवं कुलदेवी च तारकं वाग्भवं तथा हृ
ल्लेखा वामनेत्रं तु वह्निजाया वधिर्मनुः अष्टाक्षरो मनुः प्रोक्तो मन्त्रा
णां सारसंहितः अथ यन्त्रलेखनक्रमम् काश्मीरजेन च तालेन मृग
मदचन्दनैः विलिखेद्धेमलेखिन्या यन्त्राणि तानि देशिकः भूमिस्पृष्टं
शवस्पृष्टं पत्रं निर्माल्यसंगतम् विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न
धारयेत् सौवर्णे राजते ताम्रे भूर्जे वा सम्यगालिखेत् अथवा ताम्रपट्टे
वा गुटिकाकृतं धारयेत् यावज्जीवं सौवर्णे रौप्ये विंशतिवार्षिकम्
भूर्जं द्वादशवर्षाणि तदर्धं ताम्रपत्रके अथ प्रयोगान्तरं शान्त्युदककल्प
नम् तद्यथा सुरास्त्वामभिषिञ्चन्तु ब्रह्मविष्णुमहेश्वराः वामदेवोन

गङ्गाद्यस्तथा संकर्षणो विभुः प्रद्युम्नश्चानिरुद्धश्च भवन्तु विजयाय ते
आखण्डलोऽग्निर्भगवान्यमो वै निरृतिस्तथा वरुणः पवनश्चैव धनाध्य-
क्षस्तथा शिवः ब्रह्मणा सहिताश्चैते दिक्पालाः पान्तु वः सदा कीर्त्तिर्ल-
क्ष्मीर्धृतिर्मेधा पुष्टिः श्रद्धा क्रिया मतिः बुद्धिर्लज्जा वपुः शान्तिर्माया नि-
द्रा च भावना एतास्त्वामभिषिञ्चन्तु देवपत्न्यः समागताः आदित्यश्चन्द्रमा
भौमो बुधजीवसितार्कजाः एते त्वामभिषिञ्चन्तु राहुः केतुश्च पूजिताः
देवदानवगन्धर्वा यक्षराक्षसपन्नगाः ऋषयो मनवो गावो देवमात-
र एव च देवपत्न्यो द्रुमा नागा दैत्याश्चाप्सरसां गणाः अस्त्राणि सर्वशा-
स्त्राणि राजानो वाहनानि च औषधानि च रत्नानि कालस्यावयवाश्च
ये सरितः सागराः शैलास्तीर्थानि जलदा नदाः एते त्वामभिषिञ्चन्तु
सर्वकामार्थसिद्धये इति वसिष्ठसंहितोक्ताभिषेकमन्त्राः अथ संक्षे-
पतः सर्वासां देवतानां नित्यपूजाविधिर्लिख्यते तदुक्तं यामले आदा
शुद्ध्यादिविन्यासः करशुद्धिस्ततः परम् ध्यानपूजाजपश्चेति सर्वतन्-
त्रेष्वयं क्रमः पूजा च मूलदेवताया एव अन्यच्च जपार्थं सर्वमन्त्राणां
विन्यासं च लिपिं विना कृतं तन्निष्फलं विद्यात्तस्मादादौ लिपिं न्यसेत्
श्रीविद्यायां तु संक्षेपः तदुक्तं सततं तत्र पूजाविशेषान्देवेशि शृणु
नित्यक्रमादिनात् अप्रकाशनाच्च विस्तारे तथा चापत्तिर्जायते अन्यथा-
नर्थकारी स्यात्संकोचार्चनमीश्वरि हेतिभिर्मध्यमाद्यैः स्याद्द्वितीयं न-
वयोनिषु चतुर्दशारवध्यमस्तुर्यं प्रोक्तरूपतः पञ्चमं सर्वतोऽभि
नाशनं वाञ्छितप्रदम् अयमर्थः शक्तीनां हेतिभिर्मध्यमाद्यैः स्यात् हे-
तिचतुष्टयसहितदेवताचतुष्टयार्चनं कामेश्वरीवज्रेश्वरीभगमा-
लिनीमहात्रिपुरसुन्दरीरूपमेव तदार्चनमित्यर्थः द्वितीयमाह
नवयोनिष्विति वशिन्यादिमध्यमान्तमिति तृतीयार्चामाह चतुर्दशा-
रचक्रस्थितसंक्षोभिण्यादिमध्यान्ता सपर्या तृतीया चतुर्थी प्रोक्तरूपर
ति तत्प्रोक्तरूपेणेत्यर्थः षोडशदलादिमध्यमान्तमिति यावत् पं-
चमं मूलादिमध्यमान्तमिति यावत् इति पञ्चप्रकारार्चा प्रोक्ता सर्वा

तं·
सा· धेसिद्धिदा तत्रादौ भूतशुद्धिप्राणायामपुटितयावत् पंचमं मूलहृदादि
२०२ मध्यमांतमिति ऋः सरकरशुद्ध्यासनचक्रचतुष्टयांगवशिन्यादिदेवत
203 ष्टयंविभाव्य बालयाऽऽह्वयं षडंगविन्यस्य षडासनविघ्यापीठपूजावि
धायविदोह्लेखयापरिचितिमावाह्य यथाशक्तिविधुपचारैरभ्य
र्च्य मंत्रेणार्चयेकतामभ्यर्च्यपूर्ववत्सर्वभूतबलिं दत्वा जपस्तोत्रैः सं
तोषयेदिति तदुक्तं नवरत्नेश्वरे सामन्त्रयमसामान्यचक्रपूजासनै
नैवैः बालयाऽऽह्वय समासाद्य ह्लेखामतुनाशिवे चक्रमध्ये समावा
ह्यं संक्षेपार्चनमर्चयेदिति अथवा तदुक्तं विष्णुहेश्वरतंत्रे पूजासंके
तं कं चैव कथयामि सुरेश्वरि यत्सज्ञाबोधमात्रेण जीवन्मुक्तः प्रजा
यते प्रथमाशेन प्रथमा द्वितीया त्रिपुरेश्वरी तृतीया चक्रराजेन तु
त्रिपुरादिसमन्विता देवीपूजाक्रमेणैव सुंदरीवासिनीति च पंचमे
त्रिपुराश्रीषष्ठे त्रिपुरमालिनी सप्तमी त्रिपुरासिद्धा अष्टमे त्रिपु
राविका मध्यशक्तौ महेशानि महात्रिपुरसुंदरी इति संक्षेपार्चा अ
थनैमित्तिकविधिः तत्रगौतमीये नारदउवाच कर्मांतरमथावक्ष्ये
शृणुष्वावहितो मुने यत्कृत्वा मंदभाग्यापि लभेन्मंत्रफलानि वै प्र
णवहृदयमध्यस्थं जपेदयुतसंख्यया त्रिवारजपमात्रेण शुद्धःस्यात्तिस
सोमभवेत् ब्राह्मणानामवैशास्त्राणां वेदानामपि जायते रविवारेख·
स्यरत्नमालाद्याष्टोत्तरशतम् भूयोभूयो भवेत्कांतिर्जपेदष्टोत्तरं
शतम् तस्य शांतिर्भवेन्मंत्रं यद्यादिष्टकृता क्रिया श्रेष्ठकेरचयेत्कु
लमासमात्रेण निर्मलैः मुच्यते मलिनैःकर्मैः पापैर्घोरतरैरपि प
टवस्त्रे जपेद्धन्यासार्वभौमसमो भवेत् पद्मरागैर्येन्कुसराजा
भवतिनिश्चितम् क्षत्रियाःसार्वभौमःस्यात्स्थापयेत्सकलांमहीम्
गारुत्मतमयैरत्नैः जयन्ज्ञानवान्भवेत् अपिहाटकरत्नेन पूज
यत्किंनस्मापयेत् सुवर्णपुष्पैरभ्यर्च्य मासमभक्तिपरायणः कुबेरस
मसंपत्तिप्राप्य मोदते चिरम देहांते हरितां प्राप्यनिर्वाणपदमव्र
ति रविवारेसरसिजैः कल्हारैः सोमवासरे मंगले रक्तपुष्पैस्तु बुधे

त्वगारं संभवैः चंपकैर्गुरुवारे च शुक्रं कुंदसमुद्भवैः शनिवारे शमी-
पुष्पैः पूजयेद्भक्तितो यदि रविवारे घृतान्नं च पयोन्नं क्र निवेदयेत्
सोमवारे पिष्टकादि सितया सह योजयेत् मंगले गुडसम्मिश्रमन्नं च
कृशराणान्वितम् बुधवारे यावकैस्तु गुरौ तु सूपसमुद्भवैः शुक्रान्नं शुक्र-
वारे च शनौ सघृतपायसम् वैशाखे मासि विधिवत्तर्पयेद्धिमवज्ज-
लैः ज्येष्ठे मासि प्रयत्नेन फलैः संपूजयेद्धरिम् आषाढे मासि विधि-
वत्सवित्तैः पूजयेद्धरिम् एकैकं स्वर्णसूत्राणि ग्रंथियुक्तानि कारये-
त् श्रावणे पट्टसूत्राणि पद्मसूत्राणि वा पुनः पूजांते देवदेवाय सम-
हिषेभ्यो निवेदयेत् मिथुने भक्तदाद्वा महांतमुत्सवं चरेत् भि-
जयेद्वस्त्रभोज्यैश्च ब्राह्मणान्संशितव्रतान् एवं संवत्सरं मंत्री कु-
र्वाभीष्टमवाप्नुयात् नैवेद्यं विकृता पूजा वा स्तोमं हायकल्पयेत्
श्रावणे मासि कुंभं तु पूजयेत्केतकोद्भवैः रक्तचंदनकस्तूरीकुं-
कुमादिसुवासितैः एलालवंगकक्कोलफलानि व कूर्पापयेत्
भाद्रे मासि यजेद्विष्णुं सर्वकुगुणान्वितैः इषे मासि भवेद्भक्त्या भ-
क्ष्यैर्भोज्यैः सविस्तरैः कार्पासनिर्मितवस्त्रैर्नानाभरणभूषितैः त-
लास्थे भास्करे कृष्णं पूजयेन्मासमात्रकम् रात्रौ प्रदीपैर्हरीमेश्च
उत्थपिष्टादिसंयुतैः घृतदीपमविच्छिन्नं दद्यान्मासं समहोज्वलम्
एकादश्यामुपवसेद्द्वादश्यां पारणादिने शुक्लायां विस्मयभक्तीव
स्त्रालंकरणादिभिः अर्पयंतिष्ठोत्तमतिमान्वर्षे तोत्सवमाचरेत्
भोज्यानि वकुभक्ष्याणि ब्राह्मणेभ्यो निवेदयेत् एवं कृते देवतास्य
तुष्टो चेष्टं प्रयच्छति सत्तां लोकमवाप्नोति पुनरावृत्तिवर्जितम्
मार्गशीर्षे यजेद्देवं नवान्नैर्व्यंजनैः शुभैः नारिकेलामलतोद्मि-
श्रितगुडजीरकैः सपक्वं देवदेवाय भक्त्या तस्मै निवेदयेत् पौषे
मासि च मासं वै घृतैः पापं च पूजयेत् ग्रहदोषविनिर्मोक्षभूयान्नृ-
पतिसन्निभः माघे मासि यजेत्कृष्णमश्रवतैः सशुभैः सितैः उग्या
नेशार्कप्रायुक्तं मिष्टान्नं च निवेदयेत् अस्मिन्मासि शुभदिने वस्त्रे

तं·
सा· णगुच्छादयेद्विभुम फाल्गुणे देवकीपुत्रं पूजयेत्स्वर्णपुष्पकैः कु
२०४ नैर्गंधिकुसुमैर्धूपदीपैः सुविस्तरैः चैत्रमासि वासुदेवं सर्वैः पु
204 ष्पैः समर्चयेत् पौर्णमास्यां यजेद्रक्तपादमनेः समयगुच्छकैः अस्मिन्
दिने रतिकामं पूजयेद्भक्तितत्परः नैवेद्यं वत्सरं पूजाविफला तत
स्सञ्जायते भस्मीभूतं स्मरं दृष्ट्वा रुधितः सारितः सती तां दृष्ट्वा कृपया
विष्टो वरं दातुं शिवः स्वयम् प्रसन्नवाचा रतिं तेनेयस्त्वं भगत्वमवाप्स्यथा
त् सुदक्षः सर्वलोकेषु क्रीडार्थं व्रजमन्दिरे ततो भवत्कुन्दनं जला
स्मष्टमनंकं शुभम् तेन पूजनमात्रेण संवत्सरफलं लभेत् द्वा
मधेलत्तमान्नयः पिष्टकैर्घृतभर्जितैः तावत्सौख्यमनुजं स्वाकुलप
श्पतिमवाप्नुयात् इति ते कथितं सम्यक्पूजयेद्वार्षिकोत्सवम् कृत्वा
नेन विधानेन किं न साध्यति साधकः ज्ञानार्णवे अथ वक्ष्ये महेशा
नि श्रीविद्यापूजनं महत् ब्रह्महत्यादिदोषाणां पुरश्चरणमुत्तमम्
समस्तरश्मिसहितं नित्यमाद्यपुरस्कृतम् कुलाचारक्रमाद्विक
शदेहोदमर्दितम् माससमात्रेण देवेशि महापातककोटयः जन्मा
न्तरकृताः सर्वा नाशयेन्नात्र संशयः लक्ष्मीस्तत्र गृहे वश्या महिषि
राम्बरं वदिते नवावृष्टमहेशानि पूर्ववत्पूजयेच्छिवाम् माससमा
त्रक्रमेणैव तेनैव परमेश्वरीम् ब्रह्महत्यादिपापानि पूर्वजन्मकृ
तानि च नाशयेन्नात्र संदेहो यतनं वा जायते ध्रुवः केतक्यास्तृणैः
पत्रैः पूजयेत्पूर्ववत्प्रिये उपपातकसहस्रं माससमात्रेण नाशयेत्
सौभाग्यमतुलं तस्य जायते नात्र संशयः पातपत्रैर्मनोरम्यैः पूज
येन्माससमात्रकम् पूर्ववत्परमेशानि सर्वपापविनाशयेत् चंप·
केः सुमनोरम्यैः पूर्ववत्पूजयेच्छिवाम् माससमात्रेण हंस्येव पातकं
शतजन्मजम् सौभाग्यवान्भवेन्मर्त्यो श्रीत्रिपुरायाः प्रसादतः स्व
र्णपुष्पैर्महादेवि महद्भिः पूजयेत्पराम् पूर्वजं नाशयेत्पापं विंशज
न्मसमं वप्रिये माससमात्रेण सकलं मोचास्यस्य करे स्थिताम् वंधूक
कुसुमैर्देवि माससमात्रं प्रपूजयेत् त्रैलोक्यं वशमागतं तस्य पूर्वपाप

दद्देद्रुधः बिल्वपत्रैश्च लाजैश्च सन्देवि परिपूजयेत् पूर्ववत्परमेशानि
मासमात्रप्रसन्नधीः समृद्धिमान्भवेत्सोपि सर्वपापहरः सदा मल्लि
कामालतीजातीकुन्दैश्च शतपत्रजैः श्वेतोत्पलसमुत्थैश्च पूजयेन्मा
समात्रकम् कुलाचारक्रमेणैव पातकं शतजन्मजम् ब्रह्महत्यादि
जनितं नाशयेन्नात्र संशयः मुक्तिलाभकरं देवि वाजीवसमो
भवेत् अगस्त्यबाणैर्बन्धूकजपारक्तोत्पलैः प्रिये पूर्वक्रमेण संपू
ज्य मासमेकं प्रसन्नधीः पातकं नाशयेन्मंत्री साक्षात्कामसमो भवेत्
चम्पकैः पाटलैर्देवि बिल्वकुलैर्नागकेसरैः कल्हारैः सिन्धुवारैश्च पू
जयेत्सर्वतः क्रमात् सौभाग्यमतुलं तस्य मासमात्रेण पूजयेत् पा
पं विनाशयेद्देवि यद्दिजन्मसहस्रकम् रविवारे रुणाम्भोजैः कुसु
मैः सोमवासरके भौमे रक्तोत्पलैः सौम्यवारे तगरसंभवैः गुरुवा
रे च कल्हारैः शुक्रवारे सिताम्बुजैः उत्पलैः शनिवारे च पूजयेद्द्रूमाद
द्यात् निवेदयेत्क्रमोक्तं वा वारं वारादि समस्तु पायसं गुडयुक्कदलीन
वनीतं सिताघृतम् एकमन्त्रं समाराध्य देवीं गायत्र्यादिभिः क्रमात्
ग्रहपीडां विजित्याशु सर्वस्वानि समश्नुते मन्त्रपूजके अष्टम्यां च
चतुर्दश्यां पूजयेच्च प्रयत्नतः यद्यत्प्रार्थयते मंत्री तत्तदाप्नोति निश्चयः
लभते मंजुलां वाणीं कृष्णाष्टम्यां सदा जपेत् अत्र नित्यार्चनानन्तरं नै
मित्तकं कार्यं यत्र कालनियमो न दृश्यते तत्र मासं वा मण्डलं वापि
नैमित्तिकानुष्ठानेन मनसा नीयमिति तथा चोक्तं रुद्रयामले मासार्धं
मण्डलं वा मासं द्विगुणं वा तथाचरेत् यावत्फलाप्तिं स योगी तावदेव
समाचरेत् अत्रापि नैमित्तिके तथा काम्यफलाप्तिमण्डलावधि
नैवेद्यं द्विगुणं कुर्याद्यथा स्यात्फलभाक्सुधीः अष्टम्यां पूजयेद्देव्याः
सर्वकामफलप्रदम् रम्भापक्वबीजपूरं सुगन्धिपरिमिश्रितम् सि
श्रीकुसुमबलिं दद्यादष्टम्यां च विशेषतः स्वर्णमालां महादेव्यै दद्या
द्रूपे विशेषतः फलं क्षीरं तथा दद्याद्दधिकं शर्करान्वितम् तस्मात्तु
चप्रयत्नेन संपूज्य पूजयेच्छिवाम् दत्तं च तेन सिद्धार्थं दद्द्देवि प्रय

त्वतः तथा नीलतन्त्रे अष्टम्यां च चतुर्दश्यां पूजयेद्वै यथाविधिः आज्ञासि
द्धिमवाप्नोति जपात्पर्णं च चर्वणम् चंदनं चार्ककुसुमं दद्याद्धुतात्पराजि
ताम् यस्तु यः पूजयेद्दुर्गामष्टम्यां विशेषतः त्रिजन्मवर्जितं पाप
तत्क्षणादेव नाशयेत् दुर्गातारिणीम् इति प्रकारानुक्रमात् अथ प्र
योगविधिर्लिख्यते सर्वत्र प्रयोगे अयुतजपः तथा च शारदायाम् अ
युतं होमसंख्यास्याज्जपस्तावत्प्रकीर्तितः तत्रादौ भुवनेश्वरीप्रयोगः
तद्यथा मंत्री त्रिमधुरोपेतैः कृत्वाश्वत्थसमिद्वरैः ब्राह्मणान्वशये
द्धीक्षपार्थिवान्मन्त्रहोमतः पलाशपुष्पैस्तन्मंत्री मंत्रिणः कुमुदैरपि
पञ्चविंशतिसंजप्तैः जालैः स्नानं दिने दिने आत्मानमभिषिंचेद्यः
सर्वसौभाग्यवान्भवेत् पञ्चविंशतिसंजप्तैः जलं प्रातः पिबेन्नरः
आरोग्यमहतीं प्रज्ञां कवीनामग्रणीर्भवेत् कृत्वा पलाशकुसुमैर्वा
क्सिद्धिं स लभते ध्रुवम् कर्पूरागुरुसंयुक्तं कुंकुमं साध्यसाधितम् गृ
हीत्वा तिलकं कुर्याद्राजवश्यमनुत्तमम् शालिपिष्टमयीं कृत्वा
पुत्तलीं मधुरान्विताम् तस्यां प्रतिष्ठितप्राणां भजयेद्दिवसासरे
वशं नयति राजानं नारीं वा नरमेव वा कंठमात्रोदके स्थित्वा वीक्ष्य
तोयगतं रविम् त्रिसहस्रं जपेन्मंत्रमिष्टां कन्यां लभेत सः अन्नं त
न्मंत्रितं मंत्री भुंजीत श्रीप्रवृद्धये लिखित्वा भस्मना मायां सस्यां फ
लकादिषु तत्काले दर्शयेद्यंत्रं सुखं सूयेत गर्भिणी ब्राह्मीं हृतं पि
बेद्यस्तु मूलमंत्राभिमंत्रितम् कवित्वं लभते मंत्री वत्सरान्नात्र संश
यः सिद्धार्थं लवणोपेतान्कृत्वा मंत्री वशं नयेत् नरनारीनरपतीन्
नात्र कार्या विचारणा अथ त्वरिताप्रयोगः यथा योनिकुंडं प्रक
ल्प्याथ कुर्याद्धोमं यथोक्तया मल्लिकाकुसुमैर्हुत्वा वशयेदखिलं
जगत् हुत्वाष्टादशमं तपलाशकुसुमैर्हुत्वात् इष्टदैः शनै
हुत्वा लभते धनमीप्सितम् पुष्पैर्बकुलसंभूतैः कीर्तिः स्यादनपा
यिनी दीर्घमायुर्भवेद्रोगैश्चम्पकैः काञ्चनं लभेत् कुर्वीत सर्षपैर्होमं
शत्रुनाशकरं सुधीः पत्रैर्बकुलजैर्हुत्वा शीघ्रं चेन्मारयेद्रिपून् शा

त्मलीपत्रहोमेन सप्तलोकान्वशयेद्ध्रुवम् मासहोमेन मूकः स्यादुन्मत्तो।
हैर्भवेदरिः अथदुर्गाप्रयोगः यथा वशयेत्तिलहोमेन नरान्नरपती।
न्नपि उग्रयानैन्द्रकुर्यान्मंत्री रोगान्मुच्येत तत्क्षणात् पद्मैर्हुत्वा यजेद्व
त्दूर्वाभिः शान्तिमाप्नुयात् पलाशकुसुमैः पुष्टिं यासैर्थास्सिद्धियं।
लभेत् काकपक्षैः कृतो होमः उच्छावितनुयाद्रणम् मरीचहोमा
न्मरणं रिपुराप्नोति सर्वथा अथ सरस्वतीप्रयोगः यथा पीत्वाभि
मंत्रितं तोयं सहस्रं सुप्रसन्नं जपेत् महाकविर्भवेन्मंत्री वत्सरेण न सं
शयः उरोमात्रोदके स्थित्वा ध्यायेन्मार्तण्डमंडले स्थितां देवीप्रतिः
दिनं त्रिसहस्रं जपेन्मनुम् लभते मंडलात्सिद्धिं वाचामप्रतिमाम्ः
पि समिद्भिर्वा तद्वत्स्याभिर्यशः प्राप्नोति वाक्पतेः पलाशकुसुमैर्हु
त्वा परां वाक्सिद्धिमाप्नुयात् कदंबकुसुमैस्तद्वत्फलैः श्रीफलसं
भवैः अचिराच्छ्रियमाप्नोति वा चांकुंदसमुद्भवैः नंद्यावर्तप्रसूनैर्वा
हुत्वा वाग्बलभो भवेत् अथ लक्ष्मीप्रयोगः यथा वक्षःप्रमाणे स
लिले स्थित्वा मंत्री मिमं जपेत् त्रिलक्षं प्रजपेन्मंत्री देवीं ध्यात्वार्क
मंडले स भवेदल्पकालेन रमाया वसतिः स्थिराम् अवध्यानेनरने
त्रैर्देवीस्वकुचंदनादिभिः नंद्यावर्तभवैः पुष्पैः सहस्रं जुहुयात्ततः
पौर्णमास्यां फलैर्बिल्वैर्जुहुयान्मधुराप्लुतैः पंचम्यां विशदांभो।
जैः शुक्लवारे सुगंधिभिः अष्टम्यां विमलैः पुष्पैः प्रतिमासं विशा
लधीः स भवेद्वर्षमात्रेण सर्वदा संपदां निधिः शालिभिर्जुहु।
तो नित्यमष्टोत्तरसहस्रकम् गृहीत्वा प्रजपेद्रुक्मनागवल्लीरमा
न्वितम् तिलतन्तुयान्नेन सर्ववश्यकरं भवेत् नागवल्लीपर्णम्
अथ गणपतिप्रयोगः यथा तर्पयेत्सलिलैः शुद्धैर्दिने प्रोगणनाय
कम् चतुश्चत्वारिंशदाब्धचतुर्थ्यांतमंत्रितैः आरा… नं मंडलाद्वी
गभीष्टमधिकं नरः नारिकेलैः कृतो होमः स चतुर्थ्यां श्रीप्रदो भवेत्
शुक्लपक्षे प्रतिपदमारभ्य दिनशः सुधीः चतुर्थ्यंतं नारिकेलसक्तु
लाजतिलैः क्रमात् चतुःशतं प्रजुहुयात्तु प्रपाःसुः सर्वजंतवः स

तं॰ सा॰ २०६
206

तिलैस्तंडुलैर्होमस्सप्तलक्षोथश्रीप्रदो भवेत् पद्महोमेन नृपाणां नसन्ती
कुसुमैः शुभैः मंत्रिणः कुमुदैः पुष्पैर्विप्रान्सिमलं संभवैः समिद्भिर्वै
रपत्तिः उदुम्बरसमुद्भवैः लक्षैर्वैश्यान्वटोद्भवैः शूद्रान्सर्वीवशानयेत् मधू
नाम्वर्णलाभः स्यात्तु हस्त्येन लभेत गाः आज्यहोमेन महतीं श्रियमा
प्नोति मानवः दध्ना सर्वसमृद्धिः स्याद्दूर्वैर्जनपतिर्भवेत् अथ सूर्यप्रयो
गः यथा पंचम्यां शुक्लपक्षे विधिवद्भास्करं भक्तवत्सलम् दद्यादर्घ्यं प्रतिदि
नं वारे वतमचोदिते प्रभाते मंडलं कृत्वा पूर्ववत्पीठमर्चयेत् पात्रं
ताम्रमयं प्रशस्तं तोयं यथाविधिमनोहरम् निधाय तत्र मनुना पूरयेत्
कुम्भादकैः कुंकुमरोचनावाजिरक्तचंदनकेन वा करवीरयवाशा
लिकुशाश्यामाकतंदुलान् निक्षिपेत्सलिले तस्मिन्नेकं संभाव्य
भानुना मार्गमभ्यर्चयेत्तस्मिन्भास्करं प्रांकलक्षणम् गंधपुष्पा
दिनैवेद्यैर्यथाविधिविधानवित् अधिपायजपेन्मंत्रमम्पगाष्टोत्त
रशतम् पुनः स्वशुक्लंगंधाद्यैर्जानुभ्यामवनीगतः आमस्तकेन
उद्धृत्यमीभ्याममावरणेरवौ दृष्टिं निधाय सैकेन मूलमंत्रं धियाज
पन् दद्यादर्घ्यं दिने प्रायप्रसन्नेनात्मना दत्वा पुष्पांजलिं भूयो ज
पेदष्टोत्तरं शतम् यावदर्घ्यमतं भानुः समादत्ते निजैः करैः तेनत
सौ दिनमर्घ्यं दद्यात्स्मिन्मनोरथान् अर्घ्यदानमिदं पुंसामारोग्य
वर्धनं शुभम् धनधान्यपशुक्षेत्रपुत्रमित्रकलत्रदम् तेजोवीर्यप्र
दं कांतिविद्याविभवभाग्यदम् अथ रामचंद्रप्रयोगः यथा जाती
प्रसूनैर्जुहुयाच्चंदनाम्भः समुक्षितैः राजवश्याय कमलैर्धनधान्य
मानि संपदे नीलोत्पलानां होमेन वशयेदखिलं जगत् बिल्वप्र
सूनैर्जुहुयाद्दिनशो वाससे नरः दूर्वाहोमेन दीर्घायुर्भवेन्मंत्रीनि
रामयः रक्तोत्पलहुतान्मंत्री यतमाप्नोति वांछितम् मेधाकामे
न होतव्यं पलाशकुसुमैर्नवैः तेन समंभः प्रपिवेत्कविर्भवति व
त्सरात् नमंत्रितान्नं भुंजीत मदहारोपमादृयात् अथ श्रीकृष्ण
प्रयोगः अथ प्रयोगान्वक्ष्यामि मंत्रयोः कृष्णयोः समान् यान्कृत्वा

साधकवरो लोकत्रयसुपूजितः वंदेतं देवकीपुत्रं मयो जातं शशि
प्रभम् शंखचक्रगदापद्मधारिणं वनमालिनम् एवं ध्यात्वा मन्त्रव
रं लक्षं त्वाब्राह्ममुहूर्तके जप्त्वा मेधापरां प्राप्य कवीनामग्रणीर्भवेत्
श्रर्धस्फाटिकभा'' ष्टद्विभुजं लेखपुस्तकम् धारिणं तं विचिंत्याथ
लक्षं त्वाब्राह्ममुहूर्तके जप्त्वा मंत्री त्रिकालज्ञो बृहस्पतिसमो भवेत्
वलक्रोश्वरणं बालं ध्यायेद्ब्राह्ममुहूर्तके जप्त्वा मंत्री त्रिकालज्ञा
मानवरो विद्वान्सर्वशास्त्रार्थविद्भवेत् सर्ववेदार्थकुशलो ज्ञान
वाग्भवति ध्रुवम् नंदागने पर्यटंतं धूलीनिचयधूसरम् ध्यात्वा मणि
गदादीनयशोदालोचनोत्सकम् एवं ध्यात्वाशु निवरं जपेत्स्विय
समास्थितः लक्षैक जपनादस्य किं न सिद्ध्यति भूतले प्रातःप्रातः
पिबेत्तोयमष्टोत्तरशतं जपन् अनेन मूको दुष्टात्मा जडः पाषाण
वत्तदा अनेन जलपानेन साक्षाद्वाक्पतिसन्निभः जायते नात्र सं
देहः संसंससं न चान्यथा पद्मानि लिप्यशोकटरुदंतं प्राकृतय
था लक्षं जप्त्वादितिं ध्यात्वा आपदाम्मुच्यते ध्रुवम् शत्रुतो न भय
नस्य राजतो दस्युतोपि वा न तस्य विद्यते भीतिः कदाचिदपि सर्वते
निसंकल्परतः कुंकुमेन सपुष्पैः समर्चयेत् वश्या भवंति सर्वेषि ब्राह्म
णान्वात्र संशयः गोपालं वंशीमनसा जातीपुष्पैः समर्चयेत् वश्या
भवंति राजानो नात्र कार्या विचारणा तमालोद्भवपुष्पैस्तु वश्या वै
श्या भवंति ··· नीलोत्पलोत्थपुष्पैस्तु मासमेकं समर्चयेत् नृकू
यादृक्कक्रमेण मिश्रितैस्तिलतंदुलैः मंत्रेणाष्टसहस्रं तज्जप्त्वाभ
स्मयरेद्यदि ललाटे विद्यते तस्य सर्वे वश्या भवंति हि अनेन च शरीरे
णराजानो वश्यतामियुः स्त्रियो वश्या भवंत्यत्र पुत्रामाधात्र सर्वथा
विवहार्थी जपेन्मंत्रं मासमष्टसहस्रकम् रामे रलमध्यस्थं कुसु
ध्यात्वा ब्रजेस्थितम् विवाहं घटुन्नमासैकं मासं सर्वगुणोज्वलाम्
पुत्रमरत्नहेतिति द्विजेन प्रार्थितो हरिः लिमसंस्थमसमादस्य ददाय
स्तं विचिंतयेत् पुत्रकामो लभेत्पुत्रं मासेनैकेन सुंदरम् दीर्घायुषं

तं॰
सा॰
२०८

207

प्रतिहतंबलवीर्यसमन्वितम् कुंदैः पुष्पैः समाराध्य कृष्णं ध्यायेच्चका-
मकाम् मासद्वयं तथा ...... जपेद्दशसहस्रकम् मनोरथपतिं लब्धा
दीर्घकालं क्रीडति अंजनं कृष्णमवनीतानुलेपं दनं तथा समाप्नु
पभोग्यानि सुष्टुं मंत्रशतं जपेत् दीपते यस्य यस्यैति सो चिराद्राव
ह्ली स्त्रियो वश्या अनेनेति भवति मुनिसत्तम पुष्पं वश्याय नारी
अनेनैव विधानतः अन्नादिकामः श्रीपुष्पैः सितनद्रुलमिश्रितैः
अष्टोत्तरसहस्रं तु जुहुयाद्दधि वान्भवेत् विश्वरूपधरं ध्यात्वा-
शतमष्टोत्तरं जपेत् समाहितमना मंत्री यशस्वी कीर्तिमान् भवेत्
भूतप्रेतपिशाचाद्य ...... दिग्रहपीडिताः एतन्नाम्नतपानारं ध्यात्वा
मंत्रशतं जपेत् प्रणश्यन्ति ग्रहा दुःष्टाः पलायन्ते हरप्रियम् सर्प
मंडलं दृष्ट्वा तम् एकाग्रं दर्शिते कृष्णं कालीयदमनं चिंतयि-
त्वा जपेन्नरः न जेयं तु विषं घोरं कुकारेण विनाशयेत् अत्रापि
मंत्रं वै क्लीं बीजात् संपुटितं ततः कालियस्य मस्तके दिव्यं नृ-
त्यंकरोति तम् नमामि देवकीपुत्रं नृत्यराजानमच्युतम् ज्वरार्तो
ध्यायेन्मंत्रं जपेद्दशशतं तथा ज्वरेण संतप्तं कृष्णं बलप्रद्युम्न
संयुतम् दहंतं बाणनगरीं गरुडोपरिसंस्थितम् निजज्वरेणांस
पिष्ट्वा ध्यात्वा नाशयति क्षणात् शीतलाकामलादीनि तथा वात
पित्तकोद्भवान् श्लीपदगुल्मयकृत्ह्रायुअपस्मारभवांस्तथा नाशये
न्मंत्रमेदेसी दृष्टिमान्त्रणमांत्रिकः गोपालयष्टिपालं च वेणुवाद
यन्स्थितम् ध्यात्वा कृष्णं जपेन्मंत्रं पञ्चमासान्समाः सतः राजपु
रोधा भवितमिति यस्य मतिर्भवेत् मधुसिक्तैः सितैः पुष्पैः कृत्वान
मस्कारलाड्डवेत् मेरुसदृशमनप्राप्य भुविख्यातो भवेद्ध्रुवम् गोवर्धन
धरं कृष्णं ध्यात्वा मंत्रं जपेन्नरः वातवर्षादिभिर्घोरैर्भयेषु समुप
स्थिते सद्यमाशु विनश्येत नात्र कार्या विचारणा वृंदावनं गतं कृ
ष्णं दृष्टिकामो विचिंतयेत् जपेद्दशसहस्रं तु दृष्टिमाप्नोति संप्र
यम एवं च मनसा ध्यात्वा दृष्टिं वर्षास्तु नाशयेत् एवं जलाशये

ध्यात्वा जपेद्दशसहस्रकम् दृष्टिर्भवति कालेपि महती नात्र संशयः
गायंतं वेणुनाकृष्णं गगनमाने विचिंतयन् साष्टमष्टशतं कृत्वा कि
न्नरैः सह गीयते जयकामो जपेद्यस्तु हरंतं कल्पकद्रुमम् सत्तुतः
देवताभिस्तु गारुडारूढमच्युतम् ध्यात्वा रक्तकरवीरसमिद्भिर्जुहु
याद्दशी अष्टोत्तरसहस्रं तत्प्रत्याज्जितो रिपुः राजादिभयमाप
न्नैः संशयेद्गुरुसंसदि कृत्वा दशसहस्रं तत्तन्त्वाणान्नाशयेद्ध्रुवम्
नीलोत्पलादिभिर्हुत्वा अष्टोत्तरसहस्रकम् शास्त्रादिनिधिसंयु
क्तं हारिकामधुगां हरिम् ध्यात्वा तंदुलहूर्वाभिः कृत्वा शांतिकं
मावरेत् करंबमूले गायंतं गोपालं वनमालिनम् कदंबपुष्पैः सं
पूज्य चिंतयित्वा जनार्दनम् अपामार्गशतेः कृत्वा जपेद्दशसहस्र
कम् सर्वलोकान्वशीकृत्य आशु विक्षोभविधाति राजद्वारे सभा
यां च व्यवहारे च मंत्रवित् मंत्रमष्टशतं जप्त्वा प्रथमं वाक्यमुच्चरे
त् अनेनैव विधानेन सर्वत्र विजयी भवेत् मोक्षकामो यजेद्यस्तु
पुंडरीकाक्षमव्ययम् सनकादिस्तुतं कृष्णं शुक्लाम्बरधरं परम् सा
न्वचरूपं ध्यात्वा मंत्रलक्षं जपेन्नरः तारसंपुटितं कृत्वा विधिव
त्फलमाश्रितः चक्राब्जमंडले कृष्णं पूजयन्भक्तिमावहनम् संसा
रसागरात्सद्यो मुच्यते नात्र संशयः अथ दधिवामनप्रयोगः पायु
सान्नेन जुहुयात्सहस्रं श्रियमाप्नुयात् धान्यहोमेन धन्याश्रियः पा
नपुष्पसमुद्भवैः वीजैस्सहस्रसंख्यातै होमो भयविनाशकः द
ध्योदनेन पुष्ठेन हुत्वा मोचे वहुगेतेः सहत्वाथ त्रिविक्रमरूपं जपेन्मंत्र
मनन्यधीः मुक्तो बंधाद्भवेत्सद्यो नात्र कार्या विचारणा अथ हयग्री
वः ॥ विल्वैः फलैः कृतो होमः श्रीप्रदः परिगीयते कुंदपुष्पाणि जु
हुयाद्दिक्षु न्नाकुदृश्यमस्यधी मनुना तेन मंत्रमजनं तं ज्वालीरसीमि
नम् कविता माहेन्द्रसामनर्गलविजृंभिनीम् वचामनेन संजप्ता
मन्त्रयेत्प्रातरन्वहम् सर्ववेदागमादीनां व्याख्याता जायते चिरात्
अथ नृसिंहः श्रीपुष्पैर्जुहुयामंत्री विल्वकाष्ठेधिते नले सहस्रं स्त्रि

यमाप्नोतिपत्रैर्वाबिल्वसंभवैः श्रीपुष्पलवंगाभ्युष्प प्रसूनैर्वाफले·
स्तद्दूर्वाहोमाद्रोगिताम् उःस्वप्ननिशिसंजातेहत्वांमंत्रमप्युजपे
त् श्वनिस्सामंत्रविस्तस्थात्सस्वमस्तस्यजायते ध्यात्वैवारमशानादिश्याम
हारण्यभयाकुलम् रक्षेन्मन्त्ररयंजप्तोमयेषुभयेषुमंत्रिणाम् श्वतेन
मंत्रितंभस्मविषग्रहमहामयान् नाशयेदचिरादेवंमंत्रस्यास्यप्रभा
वतः होगाभिचारोन्मादेमहोत्पातेमहामये जपन्मंत्रमरेदेन
उःस्वान्तक्रोभवेन्नरः सिंहरूपंमहाभीमंनखदंष्ट्रातिभीषणम्
स्मृत्वात्मानंविघ्नपस्थाह्यायेन्नरगणांस्तुरिपुम् गृहीत्वागलदेशेतपु
नर्दिक्षुक्षिपेद्ध्रुवम् पुत्रमित्रकलत्राद्यैरुच्चाटोजायतेरिपोः एवंम
स्वपदेसाध्यनामकृत्वासवेहृदिः निशितैर्नखदंष्ट्राग्रैःखादयमा
नंरिपुंस्मरन् निसमष्टोत्तरशतंजपेन्मन्त्रमतंद्रितः जायतेमंडला
दर्वाक्ष्याभुसेनाविदारणम् विभीतकाष्ठज्वलितेपावकेरिपुम
दंतम् विविंशदेवनहरिंसप्तमकुस्तमादिभिः स्मृत्वाप्रयोगंकुर्वी
तयावदायातिसापुनः विजित्यलिखनाबद्धन्नरद्वीपाश्रयास्वयम्
आगत्यविजयीराजाप्राणदेत्रयनादिभिः प्रीणयेन्मंत्रिणंसम्यगे
भवेःप्रीतिमानसः मंत्रीयदिनसंतोष्टनर्थःस्यान्महीपतेः अथ
वारस्य रवौसिंहगतेछम्पाशुक्लपक्षेसितांशिलाम् पंचगव्येषु
निक्षिप्यसंस्पृष्टातामयुतंजपेत् उत्तरामिमुखोभूत्वातांशिलांनि·
खनेद्भुवि शत्रुवीरमहामूतैः कृतांवाधांविनाशयेत् भानूदये·
भोमवारेसाध्यहेत्रात्समाहरेत् गुलिकांसंजपेन्मंत्रंतांपुनर्विभजे
त्रिधा तुख्यात्मकंसमालिख्यपाकपात्रेतथापरम् गोदुग्धेपरमालो
ड्यशोधितांसतुलान्क्षिपेत् शोषयेत्शोपचेत्सम्यक्कंमंत्रीजपेन्म
त्रम् श्रवनार्थंचकूपस्मादशोदेवंयथाविधिः धूपदीपादिकैरिष्टाप
नगास्मकृतंचक्रम् जुहुयाद्दधिनैवकूायावदष्टोत्तरंशतम् एवं
समस्तवारेषुजुहुयात्तेत्रसिद्धये प्रातःकालेगुरोवारेमहंसाध्य
महीतलात् आदायहविराणांग्रपूर्ववत्कुर्यात्सुधीः विशेषेण

श्रणतेदोत्रेमहचौराद्युपद्रवैः राजवृक्षसमुत्थाभिः समिद्भिर्मधुनाक्तना
त्रिसहस्रं प्रजुहुयात्तस्य स्युः सर्वसंपदः शालिभिर्जुहुयान्मंत्री नित्य
मष्टोत्तरशतम् समृद्धैर्धान्यसंघातैः शोभते तस्य मंदिरम् तावदा
ज्येन जुहुयान्मंडलात्त्वरोगमाप्नुयात् अथ मृत्युंजयस्य उग्रयासितैः
स्वयाविद्धैर्मंत्री यामसहस्रकम् आराधितोग्नौ जुहुयात्साधका
विजितेंद्रियः स्वयाविद्धगुरवी सेतबृष्ट्याशिवसेन स्वयाप्लावित
विग्रहः आयुरारोग्यसंपत्तिर्यशः पुत्रांश्चविवर्धयेत स्वयावटति
लाहवीपयः सर्पिः पयोहविः इत्येकैः समभिद्रव्यैर्जुहुयात्समवास
रम क्रमाद्दशशतं नित्यमष्टोत्तरमतेंद्रियः समाप्यकान्द्विजनितं
मोजयेन्मधुरान्वितम् विकारानगुणांमंत्रीवर्द्धयेद्धोमकामवान्
गुरवेदक्षिणांदद्यात्दरूणामाः पयस्विनीः गुरुंसंपूजयेमस्याद्
नोपैर्देवताधिया अनेनविधिना साध्यः कृत्वाद्याद्यादिभिस्ततः
विमुक्तः सचिरंजीवेत्वरदापातमजमा अभिचारेज्वरेतीव्रेच्चो
रोन्मादापस्मारगदे असाध्यरोगेद्वेडातौ मोहेदाहेमहाभये दो
मायशांतिदः प्रोक्तः सर्वसंपत्प्रदायकः दूर्वाभिरेतैः प्रजुहुयात्त्रिज
न्मसुयथाविधिः मोजयेन्मधुरैर्भोज्यैर्ब्राह्मणान्वेदपारगान्
दीर्घमायुरवाप्नोति वांछितं विंदतेप्रियम् पंकजाद्याकृतीर्नित्यं
हवीभिर्जुहुयात्सुधीः अपमृत्युजिदेवस्यादायुरारोग्यवर्धनः
त्रिजन्मसुस्वयावलीकाश्मीरीवकुलोद्भवैः समिद्वरैः कृतोहो
मः सर्वमृत्युगदापहः सिद्धार्थैर्विहितेहोमोमहाज्वरविनाश
नः अपामार्गसमिद्धोमः सर्वामयनिसूदनः अथदक्षिणामूर्ते
भिक्षाहारोजपेन्मासमनन्यमनाजितेंद्रियः नित्यसहस्रमष्टार्धंप
रंविंदति कामयम् त्रिवारसममंतेन मंत्रनासलिलंपिवेत् नित्य
श्रीदक्षिणामूर्तिध्यायेन्साधकसत्तमः शास्त्रव्याख्यानसामर्थ्यं
लभतेवत्सरांतरे ब्राह्मीसैंधवसिद्धार्थवचाकुष्ठकलोत्पलैः
सर्गाधिसंयुतैः कंपैः कृतंब्राह्मीरसेघृतम् मंत्रनानेनसंजप्तं

तं॰
सा॰
२०९
209

साध्यसाधितम् निपीतं कविताकान्तिर्ह्लादश्रीधृतिप्रदम् अश्वमेर
बाः जुहुयात्तरुणाम्भोजैर् रक्तैर्मधुराप्लुतैः लक्षसंख्यैस्तदर्धं वा प्रत्य
हं भोजयेद्द्विजान् वनिताश्च युवतीरम्याः प्रीणयेद्देवताधिया होमान्ते यन्त्र
धाम्नो येन्नाशयेद्गुरुमात्मनः एवंकृते जगद्वश्यो रमाया भवनं भवेत्
रक्तोत्पलैस्त्रिमध्वाक्तैररुणैर्वा हयारिजैः पुष्पैः पयोन्नैः सघृतैः होमा
द्विश्ववशं नयेत् वाक्सिद्धिं लभते मन्त्री पलाशकुसुमैर्हुतात् क
र्पूरागरुसंयुक्तगुग्गुलं जुहुयात्सुधीः ज्ञानं दिव्यमवाप्नोति तेनैव
स भवेत्कविः क्षीराक्तैरमृतावल्लेर्होमः सर्वापमृत्युजित् दूर्वाभि
स्तद्वद्धोमः क्षीराक्ताभिर्दिनत्रयम् गिरिकर्णिभवैः पुष्पैः ब्राह्मणा
न्वशयेद्धुतात् कल्हारैः पार्थिवान्पुष्पैस्तद्वद्भूः कर्णिकारजैः मा
लतीकुसुमैर्हुत्वा नगरं स्ववशं नयेत् कोरण्टकुसुमैर्वैश्यान्नृ
पालान्पाटलोद्भवैः आत्मानमविलोमान्तःस्थितं साध्यं हुयान्वितं
मन्त्रमुच्चार्य जुहुयान्मन्त्री मधुरलोडितैः सर्षपैः पटुसम्मिश्रैर्वश
येत्पार्थिवान्क्षणात् अनेनैव विधानेन समपत्नीतत्तानपि जा
तीविल्वफलैः पुष्पैर्मधुरत्रयसंयुतैः नरनारीनरपतीन्होमतो व
शयेद्ध्रुवम् मालतीवकुलोद्भूतैः पुष्पैश्चन्दनलोडितैः जुहुयात्क
वितां मन्त्री लभते वत्सरान्तरे मधुरत्रयसंयुक्तैः फलैर्विल्वसमुद्भ
वैः जुहुयाद्वशयेल्लोकान् श्रियमाप्नोति वाञ्छिताम् पाटलैः कुसुमैः
कुन्दकुसुमैर्नागचाम्पकैः नद्यावर्तैर्विकसितैः कृतमालैर्जुहोति यः
जायते वत्सराद्वाक्श्रिया विजितपार्थिवः साज्यमन्नं प्रजुहुयाद्भुः
वेदन्नसमृद्धिमान् कस्तूरीकुङ्कुमोपेतं कर्पूरं जुहुयाद्वशी कन्दर्प
दर्पकं सद्यः सौन्दर्यमधिगच्छति लाजान्प्रजुहुयान्मन्त्री दधिक्षीर
घृताप्लुतान् विजित्य रोगानखिलान्स जीवेच्छरदां शतम् पादद्वयं
मलयजपाटीरकुङ्कुमकेसरम् पाटीरगोरोचनया श्रीत्रीणि पिष्टानि
मोममसा विदध्यात्तिलकं भाले याम श्रपयैर्विलोकयेत यान्स्पृशेत्स्पृ
श्रान्तैर्वीवशपाम्यमस्पृतेचिरम् कर्पूरकपिशोराणिमसभागानि

कल्पयेत् चतुर्भागो जटामांसी तावती रोचना मता कुङ्कुमं समभागं स्या
द्विमांशं चन्दनं मतम् अगुरुर्नवभागं स्यादिति भागक्रमेण च हिमाद्रिःक
न्यका पिष्टमेतत्सर्वं स्मरसादितम् आदाय तिलकं भाले कुर्याद्भूमिपतीन्न
रान् वशितामदगर्वाद्यान्मदान्मत्तान्मत्तगजान् सिंहान्व्याघ्रान्महा
सर्पान्भूतवेतालराक्षसान् दर्शनादेव वशयेत्तिलकं धारयेन्नरः अ
थसुंदरी ज्ञानार्णवे मालतीमल्लिकाजातीकुसुमैर्मधुमिश्रितैः
घृतप्लुतैः कृताद्देवि वागीशत्वं प्रजायते मूकस्यापि हि मूढस्यापि
लारूपस्य चान्यथा जवापुष्पै राजपुष्पैः करवीरैस्तथाविधैः हवना
न्मोहयेन्मन्त्री लोकत्रयनिवासिनः कर्पूरकुङ्कुमं देवि मिश्रमधुम
देनहि हवनान्मदनो देवि मन्त्रिणा विजितो भवेत् सौभाग्येन विला
सेन सामर्थ्येनापि सर्वदा चम्पकैः पाटलैः कृत्वा श्रियं प्रा[illegible]सिता
वरम् प्राप्नोति मन्त्री महतीं स्तम्भयेज्जगतीमिमाम् श्रीखण्डगुग्गु
लं चंदनमगुरुं होमयेत्ततः नागेन्द्रस्य दाराणां पुरं श्रीवशमानये
त् वशो लोकाः वशास्तस्य भवन्त्येव न संशयः लवणहोमाल्लभेद्राज्यं
दारिद्र्यनरपीडितः परराष्ट्रं महादुर्गं सम्यक् स्ववशं नयेत् सक्षीर
मधुदध्याज्यं पृथक्कृत्वा वशानने आयुर्धनमथारोग्यं सम्यग्दिजा
यते नृणाम् क्रमेणैकेन क्षीरमधुभ्यां मृत्युनाशनम् दधिमा
क्षिकहोमेन सौभाग्यं धनमाप्नुयात् सितया केवलं होमं वैरिस्त
म्भनकारकः होमो दधिमधुक्षीरलाजाभिर्वीरवंदिते रोगहन्ताका
लहन्ता मृत्युहन्ता न संशयः कमले रक्तैर्होमः सम्यक्कान्तपतिदायकः
रक्तोत्पलैर्जगद्वश्यं राजानो वशगाः तथा रक्तोत्पलैर्महाभूपाः
श्यामायान्ति नान्यथा श्वेतोत्पलैः श्रियं वाचं लभते हवनात्प्रिये तथा
श्वेतमालां प्रकुर्याच्च चन्दनेन प्रपूजिताम् समाश्रित्य जपेद्दिवा लक्ष
मात्रं यदा शुचिः योषितो रमयेदेवमनस्तस्य सुनिश्चितम् तदा
द्विजातीयलक्षं तु प्रजपेत्साधकोत्तमः पातालतलनागेन्द्रकन्याः
काः क्षोभयन्ति तम् तासां कटाक्षजालेषु न मोहयति साधकः ते

तं. सा. २१ 210

दालक्षत्रयं कुर्यात्साधकः स्थिरमानसः तदालक्षत्रयं सायुः सर्वपापनि-
कृन्तनम् एवं लक्षत्रये जप्ते साधकः स्वस्थमानसः सखो भवति स्वर्लोक-
भूर्लोकतलवासिनः पुरुषा योषितो वश्याश्चराचरमपि प्रिये गोरोच-
नादिभिर्द्रव्यैः स्वकरांजेन समालिखेत् अतीव सुन्दरं रम्यं तन्मध्ये प्रतिमां
वराम् ज्वलन्तीं नामसहितां महाबीजविदर्भिताम् चिन्तयेत्तु ततो दे-
वि योजनानां सहस्रतः अदृष्टपूर्वा देवेशि श्रुतमात्रापि दुर्लभा रा-
जकन्याथवा भार्या भयलज्जाविवर्जिता आयाति साधकं सम्यग्मन्त्र-
मृतमतिं प्रिये चक्रमध्यगतां भूत्वा साधकश्चिन्तयेत्सदा उद्यत्सूर्य-
सहस्राभमात्मानं महेशं तथा साध्यमध्यहृत्पीभूतं चिन्तयेत्परमेश्वरि
अनेन क्रमयोगेन सर्वथैकं दर्पकरूपवान् सर्वसौभाग्यसम्पन्नः सर्वलोक-
वशंकरः सर्वरक्षोपचारैस्तु मुद्रासहितविग्रहः चक्रं सम्पूजयेद्यस्तु
यस्य नाम विदर्भितम् स भवेद्दाससर्वदेवि यन्नाखोवापि भूपतिः चक्र-
मध्यगतं कुर्यान्नाम यस्य स्त्रियोषितः अष्टाशास्त्रमहेशानि योनिमु-
द्राधरे तु यः हृदाहानीयते शीघ्रं यदि राजकन्यकाम् नागकन्या-
मप्सरसं खेचरीं वासुराङ्गनाम् विद्याधरीं दिव्यरूपां सृषिकन्यां रिपु-
स्त्रियम् मदनोद्भवसन्तापस्फुरद्गगनमण्डलाम् कामबाणप्रभिन्नां
नः क... ण्णां लोलचक्षुषम् महाकामकलाध्यानयोगान्नस्रवद्दिते
दोभयेत्स्वर्गभूलोकपातालतलयोषितम् रोचनाभागमेकं तु भाग-
मेकं तु कुङ्कुमम् अष्टभागन्तु येद्देवि चन्दनं मलयसम्भवम् एकत्र तिल-
कं कुर्यात्त्रैलोक्यवश्यकारणम् अष्टोत्तरशतं विद्यां मन्त्रयित्वा वशं न-
येत् राजानं नगरं ग्रामं येन यत्र स्पृश्यते मन्त्रिणां परमेशानि तन्त्रसर्व-
तस्य वश्यगाम् ताम्बूलं धूपमुदकं पत्रपुष्पफलं दधि उंग्यचूतं तचूर्णा-
मांत्रवस्त्रं कर्पूरमेव च कस्तूरीकुसुमं चैव लवंगं जातिपत्रकम् जल-
वावाम्स सकलं यद्यत्परमेश्वरि अष्टोत्तरशतं जप्यं यस्मै यस्मै प्रय-
क्षेनि स वश्यो जायते देवि नात्र कार्या विचारणा स्त्रियस्तस्सकलाव-
स्पादासीभूता भवन्ति हि दन्नाकर्षणमेतत्तु कथितं नाम साध्या भवेत्

अथवक्ष्येमहेशानिमहापातकनाशनम् शिवांसम्पूज्यमेदेविसर्गाद्यैः।
कुसुमैःप्रिये महापातकमुक्तात्मातत्क्षणात्पापहाभवेत् शमीदूर्वाङ्कुरा
श्वत्थपल्लवैरथवार्कजैः मासेनहन्तिकल्मषंसप्तजन्मकृतंनरः मुद्रास्तत्र
दृढयोगःसन्सर्वोक्तध्यानयोगतः लक्षमात्रंजपेद्यस्तुमहापापैःप्रमुच्यते
लक्षद्वयेनपापानिसप्तजन्मभवान्यपि महापातकमुख्यानिनाशयेन्ना
त्रसंशयः ततोलक्षत्रयंजप्त्वामन्त्रंमन्त्रकुलेश्वरि महापातककोटिस्त
नाशयेन्नात्रसंशयः चतुर्लक्षंजपेद्देविमहावागीश्वरोभवेत् कुबेरत्वा
रदेवेशिपंचलक्षान्नसंशयः षड्लक्षजपमात्रेणमहाविद्याधरोभवेत्
सप्तलक्षजपान्मन्त्रीखेचरीमेलकोभवेत् अष्टलक्षजपान्मन्त्रीदेवस
स्याभवेन्नरः अणिमाद्यष्टसिद्धीनांनायकोभवतिप्रिये वशगास्तस्य
राजानोयोषितश्चविशेषतः नवलक्षप्रमाणानिजपेत्त्रिपुरसुन्दरीम्
रुद्रमूर्तिःस्वयंकर्ताहर्तासाक्षान्नसंशयः सर्वैर्वन्द्यःसदासेव्यः सर्व
सौभाग्यवान्भवेत् अथश्यामादि कालीतन्त्रे अथकामविधिंवक्ष्ये
येनसर्वत्रपारगः साधकःसाधयेत्सिद्धिंदेवानामपिदुर्लभाम् कुलाचा
रंपुष्पितांयाद्दृष्ट्वायोजपतेनरः अयुतैकप्रमाणेनसाधकःस्थिरमानसः
केवलंगुरुभावेनसद्विद्यानिधिर्भवेत् संस्कृताःप्राकृताःशास्त्रालो
किकावैदिकास्तथा वशमायान्तितेसर्वेसाधकस्यनचान्यथा अथ
वाशुक्रकेशान्तहरविमुक्ताश्वयंयतः प्रजपेदयुतंप्राज्ञःतदेवफलंल
भेत् लग्नापराणांतापशपन्नयुतंयस्तुसाधकः प्रजपेत्सभवेत्सद्योवि
द्याद्यावल्लभःस्वयम् तस्यदर्शनमात्रेणवादिनःकुंठतांगताः गद्य
पद्यमयीवाणीसभायांतस्यजायते तन्नाम्नाःस्पर्धयःसर्वेप्रशंसतिः
गुह्यान्विताः तस्यवाक्यपरिचर्याजडाभवंतिवाग्मिनः कुलचूडामणौ
रंनोमुक्तांसमासाद्यनद्यांत्रिषिष्टदेवताम् पूजयित्वामहारात्रौत्रिदि
नंप्रजपेन्मन्त्रम् लक्षपीठफलंदेविलभतेनात्रसंशयः वेतालपादुका
सिद्धिंखड्गसिद्धिंचभैरव अंजनंतिलकंगुप्तंसाधयेत्साधकोत्तमः प्र
जपेत्त्रितिदिनमष्टोत्तरसहस्रमिमर्थः यत्रजपेचहोमेचसंख्यानोक्ता

मनीषिभिः तत्रैव गणनाथोऽक्षाणां जातक सहस्रकम् विद्याकामेन होत
व्यं पद्मैर्मधुसमन्वितैः धनकामेन होतव्यं तिलाज्यमधुसंयुतम् वंधूक
पुष्पहोमेन दासां च कुरुते नृपाम् सर्षिलवणहोमेन सदाकर्षति का
मिनीम् बकुलैर्होममात्रेण सौभाग्यं लभते नरः मल्लिकाजातिपुन्ना
गकदंबैः पुष्टिमाप्नुयात् हीराज्यतगरैर्होमान्महतीं कवितां लभेत् चं
दनागुरुकाश्मीरकर्पूरा होमतः पुनः मंत्री नीलसरस्वत्याः सर्वाभीष्ट
मवाप्नुयात् नीलसरस्वतीपदमुपलक्षणम्। कर्पूरहोमतो मंत्री स
र्वाभीष्टानि साधयेत् मधूकमूलमंत्रेण बिल्वपत्रैर्घृतान्वितैः सह
स्रं प्रसहं कृत्वा प्राप्नोति परमां गतिम् प्रतिदिनमिति मंडलपरम् चूता
कुमालतीपुष्पहोमात् उत्तककविर्भवेत् अत्र यत्र संख्या नोक्ता तत्रायुत
संख्या बोद्धव्या तदुक्तं अत्र सर्वस्य होमस्य नियमोऽयुतसंख्यकः अथ नि
ग्रहप्रयोग तत्तर्पणम् तदुक्तं वीरतंत्रे श्मशानांगारमादाय मंगले
वासरे निशि कृष्णवस्त्रेण संवेष्ट्य बध्वा यत् कृतं तेन शत्राभिमंत्रितं
कृत्वा निक्षिपेद्वैरिवेश्मनि सप्ताहाभ्यंतरे तेषामुच्चाटनमिदं भवेत्
तदुक्तं फेत्कारीये नराश्थिनिखनेन्मंत्री द्वारगुरुकृहरिद्रया सहस्रप
रिसं जप्यनिशायां श्मशानिवासरे निखिप्यते यस्य गेहे स सुतस्य त्रिमास
तः दौत्रेत्र समस्य हानिः स्यात् नवहानिस्तुरंगमे धनहानिर्धनागारे ग्राम
मध्ये तत्तवयः क्षारस्तत्वेपनविट् युक्तलवणम् फलेखायोगरे
फसाध्यममुकामुकयोर्द्वेषं कुरु कुरु तदुक्तं द्वेषतंत्र विलिखेन्मंत्री
प्रेतकर्पटके सुधीः अस्य द्वेषकयोर्नाम्ना तस्य द्वेषो महान् भवेत्
लिखेन्मंत्रमिति मंत्रं लिखित्वा फलेखारेफमध्ये ऽमुकं मारय मार
य स्वाहादि साध्यसहितमित्यर्थः। अथवा साध्यं लिखित्वा तदंते मं
त्रं लिखेत्॥ सहस्रं परिजप्येति अमुकं मारय मारय स्वाहा इति मंत्र
जपः द्वेषेत्र अमुकामुकयोर्द्वेषं कुरु इत्यस्यां मंत्रमुच्चार्य सहस्रं ज
पेत् अथ तर्पणम् तत्र मत्स्यसूक्ते मधुना तर्पणं कुर्यात्सर्वकाम
प्रदं कम् मंत्रसिद्धिकरं साक्षान्महापातकनाशनम् नीलतंत्रे

कर्पूरमिश्रिते स्तोयैर्मासमात्रं दिने तर्पयेत् वशीकृतस्तत्पानस्सर्वो भो
गीस्याद्यावदायुषम् घृतेः पूर्णायुषः सिद्ध्यै तोयराणप्रसिद्धये श्री
गुरुमिश्रितैस्तोयैः सर्वकालं सुखी भवेत् नारिकेलोदके मिश्रे·
स्तोयैस्सर्वार्थसिद्धये मरीचिमिश्रितैस्तोयैः शत्रून्नपि विनाशयेत्
केवलैस्तु तोयैस्तु शत्रुमुच्चाटयेत्क्षणात् ज्वराविष्टो भवेल्लेनतु·
ष्यमेकाक्रमं नयेत् सिद्धसारस्वते शताभिजपमात्रेण रोचनाति
लकं नरः कृत्वा पशुपतिर्यं मन्त्रीतं कुर्याद्दासवत्सुधीः फेत्कारीये
उपचारविशेषेण स्वधिकारिभेदाद्बोध्यम् जपमात्रेणेति पूजा·
भावेनेत्यर्थः बलिद्रव्यं तमस्त्राप्य सूक्ते रंभाजातीवीजपूरं सुगंधि
पुरिमिश्रितम् मिश्रीकृत्य बलिं दद्यादष्टम्यां च विशेषतः बलि·
मन्त्रस्तु । प्रणवं पूर्वमुच्चार्य उग्रतारे ततः परम् विकटदंष्ट्रे मोह
पदं ठं ठं स्तमुच्चरेत् मारयोच्चाटयशान्तये ठं ठं घं चवदेत्ततः घमांहि
सत्तमुद्यताः योगिनीचक्रेस्तान्द्रावयद्रावय हुं फट् स्वाहा परविद्या
माकर्षय तुटत्कपाले शृणु शृणु स्वाहेति इयं ताराविषये का
लिकादौ तत्तत्पटलोक्तबलिमन्त्रा बोद्धव्याः अथ वेतालसिद्धिः तेउ
क्रमाव चूडामणौ भैरव उवाच वेतालादिमहासिद्धिः कथं भवति
चंडिके तन्मे कथय देवेशि यदि स्नेहोऽस्ति मां प्रति श्रीदेव्युवाच
निर्वहुद्धोद्भवं काष्ठं श्मशाने साधकोत्तमः भौमवारे मध्यरात्रौ
गत्वा गिलयुगान्वितः खनित्वा वाष्टलंबं वै जपेन्मरदिषमर्दिनीम्
तन्मरस्तकुनेद्वन्स्तत्रैव पितृकानने काष्ठमुद्धृत्य तस्मिन्वैदंउपाउ
कचिद्भितम् कृत्वा तु गोष्ठमी रात्रौ श्मशाने निक्षिपेत्ततः तस्योप
रिशवं कृत्वा पूजयित्वा यथाविधि शवासनगतो वीरो जपेदष्टस·
हस्रकम् ततो मातृबलिं दत्वा काष्ठमामंत्रयेत्ततः स्फें स्फें दंउम·
हाभाग योगिनीहृदयप्रिय मम हस्ते स्थितो नाथ ममाज्ञां परि·
पालय एवमामंत्र्य वेतालं यत्र यत्र प्रमुञ्चते ततस्तूर्णं नियाया·
थपुनरायाति कौलिकः गच्छ गच्छ महाभाग पादुकेगरवर्णिनि

मस्मादस्पर्शमात्रेण गच्छेच्छतयोजनम् अष्टलोहसमायोगात्पञ्चा
शदङ्गुलाकृतिम् खड्गं कृत्वा तत्र मंत्रं लिखित्वा पूजयेन्मनुम् तत्स
हस्रं ततो कृत्वा महाशवकरे वीरे खनित्वाजीवहृत्वाग्रब्रह्मशृङ्कत
भावयेत् कुलाष्टम्यामर्धरात्रौ चितामध्ये समाहितः प्रतिपूर्वममा
मश्रद्धेन स्मित्वचेन ततः मधुरत्रयसंयुक्तं बिल्वपत्रेण संयुतम् पा
टादिमूर्धपर्यन्तं होमान्ते बलिमाहरेत् बलिस्तेपरमामायादेवीम
हिषमर्दिनी आयाति बलिपूर्णामिमां हरहस्ताहसम्मुखी गृहाण व
त्सेति शाक्त्या खड्गमुत्तोल्य धारयेत् घोरदंष्ट्रे महाकालि करवा
लस्वरूपिणि आं ह्रीं क्रं कुरु कल्याणं विपद्विच्छेदविस्तरम् एवमामं
त्र्य खड्गं तयमुद्दिश्य प्रक्षिपेन्नरः छित्वाछित्वा पुनश्छित्वा गच्छेत्सा कूष्मा
ण्डेन: अथवा कृष्णमार्जारमेकघातेन घातयेत् कुजे च तच्छेश्वरा
त्रौ निखनेन्मंत्रितं ततः तत्र मोक्षाम सारोप्य यावत्तत्र प्रजायते ना
चक्रकारविषमं त्वप्रति रात्रं जपेद्धि भीः अष्टोत्तरसहस्रं तत्पुकाकी
दीपवर्जितः उम्बन्नपत्रमालोक्याच्छिद्रानिच्छिद्रमालयेत् तत्र मु
स्कारविषमाशीतदिने तटिनीतटे तमानीय मृदूपन्तस्मात् त्वालयेन्मं
त्रमुच्चरन् ततः स्रोतोऽभिमुखं वित्वास्य यद्दक्षिणप्रतिगच्छति तदानीय
यजेत्तत्र कालिकां घोरनिःस्वनाम् अभिमंत्र्य सहस्रं तत्कालीमंत्रम
यत्नतः अष्टोत्तरसहस्रं तज्जप्त्वा भूमितले स्थितम् भूमौ मूत्कारमा
त्रेण विवरं तत्र जायते शतयोजनदूरे वा यदस्माच्छ्रियति भवेत् त
त्रैव गमनं तस्य भूतले नाःप्राणिनः एवं विवरमध्ये तु गवाक्षकु
रेपि वा कायसंकोचमामाद्य गच्छेदविकलो नरः दुर्गामंत्रं विना
वस्त्र कालीमंत्रं तथैव च सिध्यः कुलनाथेश जायते न कथंचन
अथ बालकसंस्कारो यथा मधुलाजाभ्यां नाडीछेदात्पाक् स्वर्ण
शलाकया यत्तदा कृष्णविद्यावाग्भवेन दूर्वया वा वालस्य जिह्वाडां
